क्रम सं०

प्रवेश सं० १४८११ | विषयः धर्मशास्त्रम्

नाम वीरमित्रोदयः ( मोक्षप्रकाशम् ) | ग्रन्थकार मित्रमिश्रः

पत्र सं० १-२२९

श्लोक सं० | अक्षर सं० ( पंक्तौ ) ६३ . | पंक्ति सं० (पृष्ठे) १२ .

आकार: १२.७" × ५.४" | लिपि: दे.ना. | आधार: कर्ग.

विवरणम् पू०

12164

न. सं. ~~७३~~ / २३७.

Govt Sanskrit College, Benares

Indira Gandhi National
Centre for the Arts

पु. सं. १४५९९

२२ वे. नं. ३०

५ सं.

वीरमित्रोदये मोक्षप्रकाशः। ग्रन्थ सं. ५००८

१२
२२८ ५८

गोविन्ददासस्य

SARASVATI-BHAVAN
BENARES
GOVT SANSKRIT LIBRARY

Indira Gandhi National
Centre for the Arts

स्वप्नादिश्यानि चोक्तानि घोषिनो मरणं ततः ॥ मार्गैरर्चिःप्रभृतिभिर्योगिनां गतिरीरिता । ग्रंथे मोक्षप्रकाशे स्मिन्विंश
कांशीति वधंको । एते पदार्थाः क्रमशो मित्र मिश्रैर्निरूपिताः ॥ तत्र वक्ष्यमाणार्थप्रतिपत्तिसौकर्याय मोक्षप्रस्तावना
। मार्कंडेयपुराणे । अहन्नित्यं करोत्यन्नो ममेति स्कंधवानं गृहक्षेत्रादिशाखः स्मृतः दारादिपल्लवः धनधान्यमहाप माहात्+
त्रोनेककालप्रवर्द्धितः ॥ पुण्यापुण्यप्रसूनश्च सुखदुःखमहाफलः । अपवर्गपथव्यापी मूढसंपर्कसेचनः । विधित्सा
भृंगमालाढ्यो हृद्विजातीमहातरुः । संसाराध्वपरिश्रांता तच्छायामाश्रिताः भ्रांतिज्ञानसुखाधीनास्तेषामात्यं
तिकं कुतः । यैस्तु संसंगपाषाणसितेन स महातरुः छिन्नो विद्याकुठारेण ते गतास्तेन वर्त्मना प्राप्य ब्रह्मवनं शीतं
नीरजस्कमकंटकं । प्राप्नुवंति परां प्राज्ञां निर्वृतिं वृत्तिवर्जितां । अत्र सर्वस्यापि सांसारिकपदार्थाध्यासस्याहंका वि+
राध्यासपूर्वकत्वात् अहंकारस्यांकुरत्वोक्तिः । ममेत्यभिमानस्याहंकाराध्यासपूर्वकत्वात् गृहक्षेत्रादिविविधविष
त्र+ यविषयकतया नानात्वात् स्कंधत्वोक्तिः । दृष्टादृष्टलोके एकांकुरकांडमूलत्वे अनेकविधावृक्षस्य स्कंधाः । गृहक्षेत्रा का+
दीनां च विषयतया स्कंधतारूपितममेत्यभिमानाश्रिततया नानाविधत्वाल्पतरत्वस्वीयस्कंधघटित १
तयाच शाखात्वोक्तिः । दृष्टादृष्टलोके एकैकामहती शाखा वृक्षस्कंधाश्रिता नानाविधक्षुद्रशाखाघटिता
चांत्यक्तदारस्वीकारस्येव बाहुल्येन पूर्वं पित्रार्जितशाखारूपितगृहादिसंभवात्पुत्रादेश्चानंतरं नावि

त्वात्पल्लवत्वोक्तिः । लौकिकवृक्षपल्लवानामपि शाखापूर्वकत्वात् । कृतदारस्यैव धनाद्यर्जनोपायविधानात् धना
दे+ दीनां पल्लवरूपितैः दारक्षेत्रराजीवित्वात् महापत्रत्वोक्तिः । लौकिकवृक्षेपि पल्लवपूर्वकस्यैव महापत्रस्याविर्भावा
त् । त्रैवर्णिकाधिकारत्वेनोयः सनुसोमं पिबेत् द्विजइत्यादिना अर्थिनः कर्माधिकारावगमात् पुण्यकर्मणोमंत्ररूपित त्रय+
धनाद्यंतरत्ना । वित्वेन प्रसूनत्वोक्तिः । तादृशाधिकारसंपत्यनंतरं नियतकर्माकरणलक्षणस्यपर्वलिसंनो
गादिलक्षणस्य चापुण्यस्यापि संभवात् तस्यापि तथात्वोक्तिः । जापादिकर्मतानां च क्रमशः कामकर्मोक्त्वाद्गृहदा
रपुष्पक्षुतावस्थगतः । तस्माद्यथेतर्ह्येकाकी कामयते । जाया मे स्यादथ प्रजायेयाथ वित्तं मे स्यादथ कर्म कु
र्वीयेति । अत्र सुखदुःखं । अपवर्गपथपीति । मोक्षपरमोपायवैराग्यादिविनीविरोधीत्यर्थः । मूढसंपर्कसे
चनः । मूढाः अस्मितारागद्वेषाभिनिवेशाख्यक्लेशाविद्याविपीताः रणनित्याशुचिदुःखानात्मसु नित्यशुचि
सुखात्मख्यातिलक्षणेनाविद्यामहीरगेण दंष्टांतःकरणाः । तेषां संपर्कः आसंगपूर्वकः सहवासादिः स
एव सेचनमिव सेचनं वासनाद्वृद्धिद्वारेण जानसकंपस्येत्यर्थः । विधित्साविधानुविज्ञातस्याश्लेषसाधनत्व
प्रमाप्रमाविषयप्रसूनरूपितपुण्यापुण्यकर्मसंबद्धत्वात् भृंगत्वोक्तिः । लोकेपि भृंगाणां प्रसूनसंबंधद
र्शनात् । एवं च विधित्सा लिस्येति व्याख्यात च तःकल्पतरुकारस्याप्ययमेवाभिप्रायो यथा कथंचिद्वर्णनीयः

Indira Gandhi National
Centre for the Arts

३

विश्वितास्याएतत्सर्वप्रवृत्तिसाधनत्वादनुगतरूपतयामालात्वोक्तिः।संसाराध्वपरिश्रान्ताः संसरंति रागादि।
।मोक्षप।। त्तिनिर्जो वा अस्मिन्निति संसारो ऐहिकामुष्मिकविषयकलापः।तद्रूपो योऽध्वा तत्र परिश्रान्ताः विविधायाससाध्यो
पायानुष्ठानेऽपीष्टालाभेन तन्नाशे च स्वनाशदुःखसंवलनात्पाक्तकष्टैः शोकमोहादिभिरभिभूताः तच्छायांत
२ न्नस्संबन्धिनी छाया या आमुष्मिकस्वर्गाद्यनुकूलव्यापारपरंपरा इत्यर्थः चातिज्ञानसुखाधीनाः यन्नदुःखेने
त्यादिवाक्योपजनिताभिलाषोपनीततत्वदुःखासंभिन्नत्वाच्चेत्याप्यत्वरूपेषु ग्रोष्मपद्मोतिरूपं ज्ञानं तद्विषयकं यत्सु
खं स्वर्गाख्यं तदधीनास्तदभिलाषवन्तः।चातिस्वंवास्पतयर्थोहेत्यादिवाक्यैरयमेवंव विध्यते।यद्वा संसाराध्वा
ऐहिकामुष्मिकविषयमात्रं तत्र पूर्ववत्श्रान्ता अविमांसारिकसुखतत्वविवेकाभावात्पुनरपि चातिज्ञा
नसुखाधीनाः सन्तस्तत्र शरीराभिमानजं यद्दुःखं प्रज्वलन्तं तज्ज्वालान्तमिदानीं पुनरेतैरुपायैर्निर्दुःखसुखं स्पष्टा
मीत्येवं लक्षणं प्राप्ताः तेषामात्यंतिकं अंतमतिक्रांतं प्रकृतत्वात्सुखं निःश्रेयसाख्यं सांसारिकसुखतत्वविवेका
भावात्तन्मूलकामतत्समाज्ञात्काराभावादितिसमुदायार्थः।ये त्विलित्यादि।संतः अनित्याशुचिदुःखानात्मादि २
पदार्थतत्वविवेकालोकनिरस्तसमस्ताभिलाषिकृत्यादिमिरसमूहाः।तेषांगः पूर्वोक्तः।शितः तीक्ष्णीकृतः म+
निःशेषं पूर्वोक्तावासनानिरासेनोत्कंठ्यं प्राप्तः द्रुतियाबरविद्याकुठारेण विवेककुठारेण।तेनवर्त्मनावैरा

ग्याद्विना मोक्षोपायेन।वृत्तावतंश्रवणादिसंपत्तिं।शांते विषयविक्षेपराहित्येन सांसारिकत्रिविधतापरहिते।तत्र
हेकर्नी रजस्कमिति।चित्रसत्वोद्रेकेण तनुप्रमर्दितरजोगुणं पाडुर्नवि।अकंटकं स्वसंपादनेऽपि यागादिवद्यायास
रहितं।परांस्वतःस्फुरद्रूपत्वेन सकलवैषयिकसुखोत्कृष्टो पञ्चांपञ्जा त्मिकां।निर्वृतिमानंदकाष्ठां।वृत्तिरंतःक
रणवृत्तिस्तद्रहितां।तद्राहित्यमेवस्वपरत्वे हेतुः वैषयिकसुखस्य स्वजनपरत्वं।तस्यांतःकरणवृत्तिपरत्वादिति नु
समुदायार्थः।इदमेव वैलक्षण्यं मनिवेत्योक्तं महाभारते।सुखं मोक्षसुखं लोकेऽस्मिन्तत्रलोकोनबुध्यते।
म मूढः पुत्रदारेषु धनधान्यसमाकुलः।यद्वैतस्यापि निर्णयमेवृत्तैश्च दिवं समासादयंतं तिकं श्रितो तस्मादुपेयं परमं
पवित्रं शिवं हि मोक्षं परमं वदंति।तु शब्दएवकारार्थकः।मोक्षएवसुखं सकलानर्थनिवृत्तिरूपपरमानंदात्म
कत्वेन परमपुरुषार्थ इत्यर्थः।प्रसक्तं इति अनिषेधविपत्तदारादिप्रदत्तलादिचांतेवासनाजनितरागादिनाव
शीकृतइत्यर्थः।अतएव तत्परिपोषणार्थं धनधान्याद्यर्जने समाकुलः स्वर्गस्यापि पतनदुःखेत्यादिना आपाततः रमणी
तेपरमपुरुषार्थत्वं नास्त्यतियद्वैरिति।अपेवं परमपुरुषार्थः परमं नित्यं निरतिशयं पवित्रं दुःखसंपर्करहितं अ
र्थात्सुखमिति भावः।एवं सामान्यतः परमपुरुषार्थस्वरूपमभिधाय तादृशास्तमोक्षएवेत्याह शिवं हीति मोक्षं हि
नित्यनिरतिशयं निर्दुःखसुखं वदंतीत्यर्थः।परमपुरुषार्थमोक्षसाधनं ज्ञानमेव।तदुक्तं विष्णुपुराणे।अनेकजन्म

Indira Gandhi National Centre for the Arts

ग्रहस्तो संसारपदवीं व्रजन्मोहमिमं प्राप्तो सौ वासनारेणुकंठितः । प्रक्षाल्यते यदासौ स्वैरेण ज्ञानी भवारिणात
॥मोक्ष १॥ दभ्रंसारिपांथस्यपातिमोहभ्रमः ग्रामं । मोहभ्रमेश्रमं प्राप्तेस्वस्यांतकरणः प्रमानं अनन्यातिशयावाधं परं निर्वाणमृच्छ
ति । अनेकेति । सहस्रमेव सादृस्यं अनेकानि जन्मसहस्राणि यस्यां तां संसारस्वरूपां पदवीं मार्गं गच्छन् असौ पुमान् मो
२ हः कर्तृत्वभोक्तृत्वाद्यनिर्विशमस्त्वस्तं भ्रमं प्राप्तः । एतौ वासनाहंममेतिमिथ्याज्ञानसंस्कारं सैव रेणुकंतेन कंठितो
व्याप्तइत्यर्थः । तद्भ्रमोपशमोपायमाह प्रक्षाल्पत इति । ज्ञानी भवारिणा ब्रह्माहमस्मीत्यसंभावनाविपरीतभावनार
हितज्ञानात्मकेनोष्णावारिणा उष्णोदकेन दृक्सरबेनेकांतर्गतोविमलः प्रकर्षेण क्षाल्यते । तावता पिकथं ब्रह्म
प्राप्तिसिद्धिरतआह मोहभ्रम इति । स्वस्यांतःकरण इति जीवन्मुक्त्यनिष्पाद्येन परमफलकारं तःकरणभावात् ।
न विद्यते न्यस्यातिशयोयस्मिन् तदनन्यातिशयं तदबाधं न दुःखरहितं परं नित्यं निर्वाणं सुखं मोक्षाख्यं प्राप्नोतीत्यर्थः
अथ मोक्षस्वरूपं ॥ मार्कंडेयपुराणे ज्ञानपूर्वो वियोगो यो ज्ञानेन सह योगिनः । सा मुक्तिर्ब्रह्मणा चैक्यमनैक्यं प्राकृ
तैर्गुणैः ज्ञानमद्वयमं ब्रह्मसाक्षात्कारस्वरूपं । अज्ञानेन सह वियोगः अविद्यानिवृत्तिः । योगी आत्मप्रयत्नसापेक्षाविं ३ वृत्तिः+
शिष्टायामनोगतिः तस्या ब्रह्मणि संयोगो योग इत्यभिधीयत इति विष्णुपुराणप्रतिपादितविजातीयप्रत्ययानंतर रितः+
ब्रह्माहमस्मीति प्रत्ययप्रवाहस्वरूप निदिध्यासनापरपर्यायवान् । ब्रह्मणा चैक्यमिति योयं न स्वतः शुद्धब्रह्मणै

तन्यात्मकस्याविजीवस्याप पारमार्थिकजीवतासंपादकाज्ञानेनाविद्यया सहवियोगः तस्मिन् सति जीवस्य वास्तवब्र
ह्मस्वरूपेण विर्भाव इत्यर्थः । प्राकृतैर्गुणैः सत्वरजस्तमश्चेति प्रकृतिसंज्ञकाः निबध्नंति महाबाहो देहे देहिन
मव्ययमिति निगद्यमानैः प्रकृतिकार्यैः शरीरादिभिर्वा गुणैरनैक्यं तत्तादात्म्याध्यासविलयः ब्रह्मैकात्म्यक्रियाफ
लत्वेन स्वस्वरूपानतिरिक्तायाः सदातनत्वेनासाध्यत्वात् तदर्थं तत्ज्ञानोपायेप्रवृत्त्यभावमाशंक्य ज्ञानपूर्वकाज्ञाननिवृत्ति
पूर्वत्वेन तदुक्तिः । तथा च मुक्तः प्रतिज्ञानादिस्वाधिकरणीभगवत्पादनाथ्यं फल त्व सिद्धिरविमोक्षस्य बंधननिवृत्ति
मात्रापेक्षानाप्रयोजननापह्नेतिप्राकृतगुणानैक्योक्तिः स्वजीवब्रह्मानैक्यप्राकृतगुणदेहादितादात्म्याध्यासकृतत्वात् द्विल
यकृतस्यतदैक्यस्य स्वरूपप्रसिद्ध्यर्थं । एवं चायमध्याननिवृत्तिपूर्वः सहस्वोक्तिप्रयोजनमेतदज्ञौ व सिध्यतीति नात्यंतं
तत्प्रयोजनं तथाविजाग्रदाद्यवस्थात्रयसाधारणसंसारविलक्षणस्य तुरीयावस्थात्मकमोक्षस्वरूपप्रस्तावक सवि
लासाविद्यानिलये समुदितं तत्त्वर्थमित्यवधेयं अनुमेवार्थं संक्षिप्याह द्वाभ्यां । यदात्मव्यतिरेकेण द्वितीयं वेचनप्रत्ययविद
स्मीभूतः स एवेतिदक्षन्वदाहृतः आत्मा सच्चिदानंदघनः । श्रुतिरपि प्रत्त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदिति । श्री
नागवते पिक्कोर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिः । जीवब्रह्मणोरनैक्यस्याज्ञानकृतत्वमज्ञाननाशे च तस्यासंभा
वितत्वयुक्तं विष्णुपुराणे तद्भावनाभावनापन्नस्तातोसौ परमात्मना । नवत्यभेदः अतस्याज्ञानकृतोनवेत् विभेदजनकेज्ञाने

Indira Gandhi National Centre for the Arts

नाशमात्रं प्रति किं गतौ। आत्मनो ब्रह्मणा भेदस्य संतकः कश्चिदस्तीति तद्भावनाभावनाब्रह्मास्मीत्यात्मवित्तेन भवत्यभेद इति। पारमा
मो०१। र्थिकब्रह्मस्वरूपेणावस्थितो भवतीत्यर्थः। एतदेवोपपादयति भेदभ्रमस्याज्ञानकृतोऽनेनेत्यादिना। अस्य पतेव छांदोग्यो
५ पनिषदि एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इति। एष संप्रसादः कभ्रत्रौ जाग्र
वस्था त्स्वप्नौ कृतकालुष्यत्यागेन संप्रसीदतीति प्रसादो जीवः अस्माच्छरीरात्समुत्थाय तत्त्वमस्यादिवाक्यैः स्वात्मानं ब्र
ह्मत्वेन विविच्य शरीरात्मभावनां त्यक्त्वा परं ज्योतिर्ब्रह्माख्यमुपसंपद्यानुभूत्वा स्वेन रूपेण स्वाभाविकेनैकरसेन चिदानंदादिरू
पेणाभिनिष्पद्यतेऽवस्थितो भवति नागंतुकरूपांतरेण युक्तो भवतीत्यर्थः। यद्यपि परं ज्योतिः संपन्न स्वरूपाभिनिष्पत्त्योर्भे
देन तथापि दशमालाभरविन्नो देवदत्तः परोपदेशेन स्वात्मानं लब्ध्वा दशमं लब्धवानिति वत्कल्पितो भेदः। परं ज्योतिरात्मैव त
मुपसंपद्य साक्षात्कृत्य तेनैव स्वेन रूपेणाभिनिष्पद्यतेऽवस्थितो भवतीति केचित्। तथा च परमार्थतो द्वितीयसच्चिदानंदा
त्मकब्रह्मस्वरूपस्यैव जीवस्याविद्यासंपादिताहंकारादिप्रपंचाध्यासकृतभेदप्रत्ययकल्पितस्य तत्त्वमस्यादिवाक्यजनि
तात्मतत्त्वसाक्षात्कारेणाविद्यानिवृत्तौ तत्संपादिताहंकारादिप्रपंचाध्यासकृतसमस्तभेदप्रत्ययविलयात् पूर्वोक्तपारमार्थि ५
कस्वरूपमात्रेणावस्थितिर्मोक्ष इत्युक्तं भवति। पारमार्थस्त्वं संपद्याविर्भावस्वेन शब्दादिति। अथ केयमविद्यानिवृत्तिः।
त्वा अत्र केचित् आत्मस्वरूपैवेति। नचात्मनो नित्यसिद्धत्वात् ज्ञानवैयर्थ्यं। ज्ञानासंपाद्यत्वेऽपि हेत्वविद्याया अविविधमानतयात्म्हल

कः संसारोऽपि तिष्ठेदिति तदर्थं ज्ञानान्वेषणात्। यस्मिन् सत्यग्रिमक्षणे यस्य सत्त्वं यद्व्यतिरेके चासत्त्वं तत्तत्साध्यमिति लक्ष
णोक्तरीत्येन ब्रह्मरूपाया अप्यविद्यानिवृत्तेर्ज्ञानसाध्यत्वसंभवात् ज्ञाने सत्यग्रिमक्षणे आत्मरूपाविद्यानिवृत्ति
सत्त्वं तद्व्यतिरेके तत्प्रतियोगिन्यविद्यारूपस्तदनावृत्त्यैवं तत्र लक्षणसमन्वयसंभवादित्याहुः। अन्ये तु आत्मनोऽन्यैवा
विद्यानिवृत्तिः सा च न सती द्वैतहानेः। नाप्यसती ज्ञानसाध्यत्वायोगात्। नापि सदसद्रूपा विरोधात्। नाप्यनिर्वाच्या
। अनिर्वाच्यस्य सादित्वनियमेन सोपादानकतया मुक्तौ तदनुवृत्तौ तदुपादानाज्ञानानुवृत्तिप्रसंगात्। ज्ञाननिव
र्त्यत्वापत्तेश्च किंतु कथितप्रकारचतुष्टयोत्तीर्णा पंचमप्रकारेति। उक्तं च न सन्नासन्न सदसन्नानिर्वाच्यश्च तत्क्षयः। पञ्चा
त्मरूपो बलिरित्याचार्या अप्यपीपदन्नित्याहुः। अपरे तु अविद्यानिवृत्तिरनिर्वाच्यैवानचमुक्तौ तदनुवृत्तौ तदुपा
दानस्याप्यनुवृत्तिप्रसादितिवाच्यं। अविद्यानिवृत्तेरनुवृत्तौ अविद्याया अप्यनुवृत्तिरित्यत्र मानाभावात् ध्वंसानुवृत्तौ
प्रतियोग्यनुवृत्तेरसंभवात्। किंच यथोत्पत्तिसमये समवायसंबंधसाध्या निवृत्तिरधिष्ठानस्य समवायसंबंधरूप
नाविकाररूपत्वान्नोपादानत्वे घटस्य कस्मसमये नैवर्तते निवृत्तिर्न इति ध्वंसन इति वर्तमानव्यवहारः। निवृत्तेर्मृत्वा
स्वरूपनित्यपदार्थस्वरूपमेति तु विरक्तकलितघटेऽपि दानीं निवर्तत इति व्यवहारापत्तेः। आरब्धानां तत्प्रत्यार्पणे
तस्यार्थ नोभकत्वम्युत्पत्तेर्वर्तमानत्वाज्ञो बाधकल्पनस्य बाधकं विना अप्रयोगात्। अन्वाख्यातार्थधात्वर्थाः

Indira Gandhi National
Centre for the Arts

व्यापार एव वर्त्तमानत्वान्वय इति वाच्यं आमवातजडीकृतकलेवरस्योत्थानानुकूलप्रयत्नवतोपि तादृशवर्त्त
मोक्ष ५॥ मानव्यापारवत्वात् — निवृत्तीतिव्यवहारापत्तेः। तस्मात्प्रकृतपदार्थगत एव वर्त्तमानत्वाद्याख्यातार्थो नासत इ
ति ध्वंसस्यापि तत्वे चिरनिवृत्तेपि घटे निवर्त्तत इति व्यवहारो दुर्वारः तस्मान्न पूर्वं प्रागभावः नापि प्रध्वंसः। किं
५ तु मध्ये नियतकालमनिर्वचनीयोत्पत्तिस्थितिध्वंसलक्षणभावविकारस्थानघटाकाराध्यासः एवं चाविद्यानिवृ
त्तेरनिर्वाच्यत्वे तन्निवृत्तावपि न दोष इत्याहुः। नन्वेवमविद्यानिवृत्तेः क्षणिकत्वे मोक्षः स्थिरः पुरुषार्थो न
स्यात् बाढं न ह्यहोसि। न ह्यविद्यानिवृत्तिरेव स्वयं पुरुषार्थ इति तस्या ज्ञानसाध्यत्वमुपेयते। तस्याः सुखदु
खाभावान्यतरत्वाभावात् किंतु अखंडावरकाज्ञानोच्छेदे दुःखविलये च सति परमाखंडानंदस्फुरणं सांसा
रिकदुःखोच्छेदश्च भवति तदुपयोगित्वाच्च तस्याः पुरुषार्थसाधकतया ज्ञानसाध्यत्वमुपेयते पुरुषार्थत्वं
च स्वस्वरूपप्राप्तेरेव तथा च विष्णुपुराणे। निरस्तातिशयाह्लादसुखभावैकलक्षणा। भेषजं भगवत्प्राप्ति
रेकांतात्यंतिकी मतेति महाभारते। निर्वाणं परमं सौख्यं धर्मोसौ परमः स्मृत इति। जीवन्मात्रान्निवृत्त इत्यभिधा ५
पदेवलः। स तथा निर्वृतो निर्गुणः छिन्नबंधो जन्मजरामरणदुःखनिर्मुक्तः सम्यग्भवन्मत्तवद्विपद्गूमपानवत्स
त्वादिहीनः सन्मात्रावस्थितः परमसुखमैकांतिकमधिगच्छतीति सांख्यं तथा। निवृत्तः जीवोपाधिविलये

सति ब्रह्मीभूतः। एतेनात्यंतिकदुःखनिवृत्तेरेव परमपुरुषार्थतां मन्यमानास्तावन्मात्रमेव मोक्षस्वरूपं प्रतिपा
दयंतः परास्ताः। दुःखाभावस्यापि स्वतः पुरुषार्थत्वाभावात्। न हि दुःखाभावः काम्यते तथापि सुखमेव काम्य
ते। मुख्यतया सुखसाधनतयैव च दुःखाभावः काम्यः। लाघवेन सुखत्वेनैव पुरुषार्थताया अवच्छेदात्। किं
च दुःखं स्वरूपानंदाभिव्यक्तौ प्रतिबंधकं। तथा च तदभावस्य प्रतिबंधकाभावतया हेतुत्वस्य सुखत्वात् दुःखाभा
वस्यापि पुरुषार्थत्वे तत्साधनताज्ञानस्यापि फलेच्छापत्त्यादौ हेतुतायाः सुखदुःखाभावयोरिच्छाविषयत
याऽनुगमं कृत्वा इच्छाविषयसाधनताज्ञानस्य हेतुतायाः कल्पनमपेक्ष्य सुखहेतुताज्ञानस्यैव कारणत्वकल्पना
लाघवात् दुःखाभावस्य सुखत्वाच्च निष्प्रत्यूहत्वे च सुखस्यैव पुरुषार्थत्वं। अत एव बहुकालिकसुखसाध्ये
पि क्षणिकसुखजनके परांगनालिंगनादौ प्रवृत्तिदर्शनात् दुःखं प्रबलतरमननुभूयापि सुखा— र्थं प्रवर्तमा
नात् अपि दुःखाभावस्य पुरुषार्थतां वदंतः स्वात्मनस्त्व क्रियाव्याहततया बितत्वादुपेक्ष्या इति दिक्। नन्वस्याव
तश्चिदानंदरूपस्य प्रत्यगात्मरूपतया नित्यप्राप्तत्वात् तस्या प्रयेपूर्वोक्तसाधनसंपत्तेर्नैष्फल्यमेवं सति स्या
दिति चेत्तत्राहुः। नित्यप्राप्तोप्यनवच्छिन्नानंदस्तमात्मत्वतद्विपरीतमर्थं प्रदर्श्य यत्या विद्यया असत्क
ल्पतां नीत इति स्वकंठगतविस्मृतमणिवत्प्राप्यत इत्यौपचारिकी तस्य प्राप्यतेति अन्ये तु। संसारदशायां

Indira Gandhi National
Centre for the Arts

॥मोक्ष०॥ ६

नास्ति न प्रकाशत इति यद्दृष्टो योग्यत्वरूपज्ञानावरणशक्तिकस्य ममनिरतिशयानंदो नास्तीति व्यवहारस्य सर्वसिद्धत्वा
त्तदालंबनभूतः कश्चित् ब्रह्मानंदस्याभावः काल्पनिको यावदविद्यमनुवर्त्तत इत्यभ्युपगम्यतेऽविद्यानिवृत्तौ
तन्मूलकत्वात्स्वयमेव निवर्त्तत इति यस्मिन्सत्यग्रिमक्षण इत्यादिलक्षणानुरोधेन मुख्यमेव तस्य प्रतिबंधकत्व
मित्याहुः। ननु ततो सौ परमात्मना नवत्यनेदीति नैवं जं नगवत्प्राप्तिरित्यादि सोपक्रमविष्णुपुराणात्सगुण
ब्रह्मभाव एव मुक्तिरित्यापद्यते तथा च निर्गुणब्रह्मभावः सेति बोधक श्रुत्यादिविरोध इति चेत्। शृणु प्रतिबिंबो
हि जीवः बिंबस्थानीय ईश्वरस्तद्भावापत्तिरेव मुक्तिरिति युक्तं यथा ह्यनेकेषु दर्पणेषु एकस्य मुखस्य प्रतिबिंबे
षु सत्सु सत्स्वेकदर्पणापनयेन तत्प्रतिबिंबो बिंबभावेनावतिष्ठते न तु मुखमात्ररूपेण। तदानीमपि दर्पणांतर
संनिधानप्रयुक्तस्य मुखे बिंबत्वस्यानपायात्। तथैकस्य ब्रह्मचैतन्यस्यानेकेषु प्रतिबिंबेषु सत्स्वेकस्मिन्प्रति
बिंबे विद्योदयेन तदुपाधिविलये सति बिंबभूतेश्वरभावेनैवावस्थानावश्यंभावात्। न च मुक्तस्याविद्याभावात्स
त्यकामादिविशिष्टेश्वरभावानुपपत्तिः। तदविद्याभावेऽपि तदानीं बद्धपुरुषांतरगताविद्यासत्त्वात् न हीश्व ६
रस्येश्वरत्वं सत्यकामत्वादिगुणविशिष्टत्वं स्वाविद्याकृतं तस्य निरंजनत्वात्। किंतु बद्धपुरुषांतराविद्या
कृतं तत्सर्वमिष्टव्यं। ननु तं यथा यथोपासते इत्यादिश्रुतेः। सायुज्यं सालोक्यं प्रकृतिर्जपो मोक्षश्चेति चतु

र्विधं प्रयोजनं तेषामैश्वर्यावाप्तिर्ब्रह्मादिहिरण्यगर्भनारायण— व महेंद्रसोमसूर्यस्कंदज्येष्ठोमादेवीप्रभृतीनां देव
तानामैकात्म्यं सायुज्यं पृथिव्यादिभूतेष्वधिदैवतत्वं तद्भावनावित्त्वं प्रकृतिलयो वसुंधराद्भुतवद्बहुवरुण
मारुतसरस्वतीनां पृथिव्यप्सु नाप्याकाशेषु आधिपत्यमधिदैवतत्वं योगविशेषाद्भवति। अपुनर्भवो मोक्ष
इति देवरोक्तेस्तत्तदुपाध्यवच्छिन्नमात्मस्वरूपमी— वैराजब्रह्मप्रकृतिशब्देन व्यपदिश्यत इति कल्पतरुव्या
ख्यात यज्ञेन देवानाप्नोति वैराजं तपसा पुनः संन्यासाद्ब्रह्मणः स्थानं वैराग्यात्प्रकृतौ लयं ज्ञानात्कैवल्य
माप्नोति पंचैता गतयः स्मृता इति महाभारतीयवचनादवगम्यमानसगुणब्रह्मप्राप्तिरूपमुक्तिः संपी प्रत
पसात्मानमीप्सामुत्सृज्य मोहिनीं। त्यक्त्वा कामं च मोहं च ततो ब्रह्मत्वमश्नुत इति नारदेन नरसिंहपुराणे। तपो
हि यः सेवति कानने स्थो वने महत्सत्वसमाधियुक्तः। विमुक्तपापो नियतः प्रशांतः स याति दिव्यं पुरुषं
पुराणमिति तपोध्यानरूपसगुणोपासनादिति विजनिताया सगुणब्रह्मप्राप्तिरूपा मुक्तिस्तस्याश्चको
विशेष इति चेत्। नैवं सगुणोपासका— नामखंडब्रह्मसाक्षात्काराभावेन नाविद्यानिवृत्तिर्वा तन्मूलाहं
कारादेर्विदायः तेषामावरणनिवृत्तेर्वस्त्वैक्याभावात् नाखंडानंदस्फुरणमिति महती विशेषस्य सत्त्वात्
अत एव सगुणविद्याफलं पुनरावृत्तिसाम्येन गौणमुक्तिरित्याचक्षते वेदांतिनः। किंच जगद्व्यापारव

Indira Gandhi National Centre for the Arts

मोक्षप्र

१

र्जप्रकरणादसंनिहितत्वाच्च भोगमात्रसाम्यलिंगाच्चेत्यादिसूत्रैः सगुणोपासकानां परमेश्वरेण भोगसाम्येपि सं-
कल्पमात्रात्स्वभोगोपयुक्तदिव्यदेहेंद्रियवनितादिसृष्टिसामर्थ्येपि सकलजगत्सृष्टिसंहारादिस्वातंत्र्यलक्ष-
णं निरवधिकं सामर्थ्यं मुक्तानां तु निःशेषतया भगवज्ज्ञानवतामपि तत्सर्वमिति प्रतिपादितत्वाच्च को विशेषः॥
किंच तेषां लिंगशरीरभंगाभावात् न मुक्तता तद्भंगस्यैव मुक्तता। तदुक्तं ब्रह्मांडपुराणे। पुर्यष्टकेन
लिंगेन प्राणाद्येन स युज्यते। तेन बद्धस्यैव बंधो मोक्षो मुक्तस्य तेन तु संसारे विनिवृत्तोपि मुक्तो लिंगेन मुच्य-
त इति। न च परमेश्वरस्य रामाद्यवतारे दुःखादिप्रदर्शनान्मुक्तानामीश्वरभावेपि न बंधापत्तिः। तस्येश्वरस्य स्व-
कृतमर्यादापरिपालनाय कथंचित् दुःखाद्यापादेः सत्यत्वं प्रतिपादयितुं नटवदनियमाभावात्। अत एव ह-
रिवंशे भानुमतीहरणप्रसंगे शस्त्रसंपातजनितमोहादिनियम [illegible] कंचन मात्मेच्छया कृष्णस्तथाभ-
क्तेः करोन्नमः। कोस्ति सर्वेश्वरं कृष्णं लोके मोहयितुं क्षम — इति। अन्यथा नित्यमुक्तत्वनिरवग्रहत्वातं
व्यसमाभ्यधिकारादित्यादिश्रुतिविरोधः स्यात्। तस्मात्सर्वमुक्तिपर्यंतं परमेश्वरभावो मुक्तस्येति निरव- १
द्यं। अयमेव पक्षः श्रुतिसूत्रभाष्यपुराण इति तत्तदधिकरणावलोकिनां स्पष्टं। अत एव भेदं भगव-
त्सूरिरित्यत्र भगवद्ग्रहणं। निर्गुणब्रह्मभावो मुक्तिरित्यादिवाक्यानि च सगुणस्यापि वस्तुतो निर्गुण-

ब्रह्मभावो मुक्तिरित्यादिवाक्यानि च सगुणस्यापि वस्तुतो निर्गुणत्वात्सर्वमुक्तिकालिकशुद्धब्रह्मभावमादायो-
पपन्नानीति न को विशेषः। ननु यदि लिंगभंग एव मुक्तिस्तदा विदेहमुक्तेरपि जीवन्मुक्तिशब्दाभिधेयमुक्तित्वानु-
पपत्तेरिति चेत् न। तस्याविद्यापानिरस्तत्वेन ब्रह्माभेदाभिव्यक्तेर्जातत्वात् मुख्यत एव मुक्तत्वात्। तथा च ब्रह्मांडपु-
राणे। स चापि त्रिविधः प्रोक्तो मोक्षो वै तत्त्वदर्शिभिः। पूर्वो वियोगो ज्ञानेन द्वितीयो रागसंक्षयात्। लिंगाभावा-
त्सुकैवल्यं कैवल्यात्तु निरंजन इति। यथा हि कनकादेः मलमयद्धवदग्निना। दग्धदोषं द्वितीयेन खंडेनै-
क्यं व्रजेन्नृप। न विशेषमवाप्नोति तद्वद्योगात्मतिः। निर्दग्धदोषं तेनैक्यं प्रयाति ब्रह्मणा सह। यथाग्निरग्नि-
रग्निरग्नौ रूपद्विरूपसमानत्वमनुव्रजेत्। तदाख्यस्तन्मयो भावी न गृहीतविशेषतः। परेण ब्रह्मणा तद्वत्प्रा-
प्तैक्यं दग्धकल्मषः। योगी याति पृथक्भावं न कदाचिन्महीपते। यथा जलं जले नैक्यं निक्षिप्तमुपगच्छति
। तथात्मा साम्यमभ्येति योगिनः परमात्मनि। ननु जीवन्मुक्तस्य योगिनो लिंगदेहभंगाभावेन पुनरपि क-
दाचिद्बंधापि स्यादिति चेत्। अविद्याया बंधमूलाया निवृत्तेः पुनः संसारापादकाभावात्। तथा च ब्रह्मपुराणे।
क्षीरात्समुद्धृतं तोयं न पुनः क्षीरतां व्रजेत्। पृथक्कृतो गुणेभ्यश्च नात्मा भूयो गुणी भवेत्। क्षीरे क्षीरं जले तो-
यं पवने पवनो यथा। ब्रह्मभावनया योगी यतिस्तन्मयतां तथा। एवं तन्मयतां योगी ब्रह्मभावनया गतः। वि-

Indira Gandhi National
Centre for the Arts

हायशोकमोहौ तु सर्वं वृत्तेनैव पश्यति ॥ यथास्वप्नद्रष्टा नातिकेवलस्फटिकोऽमलिनः । पुरुषस्याविविदिषायाश्चेत
न्यं नातिकेवलं । महाभारते पि । यथा एवं विगतानयो व्यक्ताज्जहाति नामवनन्दस्वता नियच्छेति तादृशः सत्वसंश्रयः
एवं सति कुतः संज्ञा प्रेत्य नावश्चिन्तनं वेता पतिसंश्लिष्टे जीवे गृह्यमाणे विशेषतः । विमलात्मा चनवतिसमेत्य विम
लात्मना । यदा ह्यसौ सुखदुःखे जहाति मुक्तेस्तदाग्र्यां गतिमेत्यलिंगः ॥ श्रुतिप्रमाणागममंगलैश्च शेते जरामृत्युभ
यादतीतः । अदृष्टतो नियच्छेति स्वरूपमुदकरूपं न त्यजतीत्यर्थः । सत्वसंश्रयः जीवस्य संपर्कद्वयोर्बंधविच्छेद
इत्यर्थः । प्रेत्य नावेजन्म । अलिंगः लिंगशरीररहित इत्यर्थः । अथ यथा एवं वित्वा दिवाकीर्तस्कृतो निक्षानमेवान
वतीति पतीयत इति वाक्यं । न दस्य न पारमार्थिकत्वमिति वक्ष्यं तागमो ह्यस्य स्वरूपं त्रयथ वानप्रस्थवि— ॥ तत्र
महाभारते । आश्रमादाश्रमं गच्छेदित्ययं सुदितो विधिः । नित्यं हि मृत्युरागच्छन् कर्मसंप्रतीक्षते अप्रमाद्
ब्रह्मचर्यात् गार्हस्थ्याद्वेत्यर्थः । आश्रमं वानप्रस्थाश्रमं तत्र ब्रह्मचर्याद्वानप्रस्थतामाह प्रस्तंबः । अत एव ब्र
जतीति । प्रव्रजनं वनगमनं । वानप्रस्थाधिकारात् । अपरार्के वसिष्ठोपि । वेदमधीत्य वेदान्वा विप्लुतब्रु
ह्मचर्यो यमिच्छेत् तमावसेदिति । गार्हस्थ्याद्वानप्रस्थतामाह मनुः । एवं गृहाश्रमे स्थित्वा विधिवत् स्नातको ८
द्विजः । वने वसेत नियतो यथावद्विजितेंद्रियः । विजितेंद्रियः पक्वकषायः क्षीणराग इति यावदिति मेधा

तिथिः । यद्वा जितेंद्रियः भार्यया सह वनगमने गमने पि ब्रह्मचर्यवानित्यर्थः । वानप्रस्थो ब्रह्मचारी तियाज्ञवल्क्यवा
क्यव्याख्याने ब्रह्मचारी मैथुनत्यागी यदि सपत्नीको व्रजेदित्यपरार्के निधानात् । गृहस्थकर्तव्यविशेषाणंतरं वा
नप्रस्थाश्रमक्रमो महाभारते । नत्यानुपत्रानपत्नोः अकृत्वाहन्नि वतेत्यो नुविधायकोवित । स्थानेकुमारीःप्रति
पाद्य सर्वान्प्रत्य मासाद्य मुनिर्बुभूषेत् । शंखलिखितावपि । पुत्रानुत्पाद्य संस्कृत्य वेदमध्याप्य वृत्तिं विधा
य दारैरं संयोज्य गुणवति पुत्रे कुटुंबमावेश्य कृतप्रस्थानलिंगो वृत्तिविशेषाननुक्रमन्क्रमशो यायावराणां वृ
त्तिमुपास्य वनमाश्रयेतेति । वृत्तिविशेषान् षट् निवर्तिनी कोंतालीत्यादि बोधायनोक्तान् । यायावराणां वृत्तिकु
स्तूलधान्यको वा स्यात् कुंभीधान्यक एवं वेति लघुविष्णूक्तः । अथ वा गृहस्थाश्चतुर्विधा नवंतिवार्ताकशालीनः शा
लीनायायावराघोरसंन्यासिकाश्चेत्युपक्रम्य यायावरा यजंती याजयंतीधीयमानाध्यापयंतीददतः प्रतिगृह्णंत
इत्यादिकात्यायनोक्तः । कालविशेषमाह यमः । द्वितीयमायुषो भागमुषित्वा तु गृहे द्विजः । तृतीयमायुषो भागं गृहमे
धी वने वसेत् । तृतीयायुर्भागस्यानियतत्वेन तस्योपलक्षकमाह स एव । गृहमेधी यदा पश्येद्वलीपलितमात्मनः । शै
थिलत्वं च गात्राणां तदारण्यं समाश्रयेत् मनुरपि । गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः । अपत्यस्यैव चापत्यं
तदारण्यं समाश्रयेत् । वलीत्वकशैथिल्यं । पलितं केशपांडुर्यं । अपत्यापत्यं पात्र इत्यादुशिशः । तेन जाते सति पुत्र

Indira Gandhi National
Centre for the Arts

कन्यायां वानेवं विधिः। अत्र वलीपलितवान् जातपौत्रो वेति विकल्प उक्तो विज्ञानेश्वरेण। तत्र वाशब्दानावातान्
मोक्षप।। त्पन्नकर्मत्ववादेन पदार्थद्वयविधाने वाक्यभेदात् उत्पन्नयोर्वा विशेषोऽलक्षणे जातपुत्रः कृष्णकेशोऽग्नीना
९ दधीतेतिवदितिकेचित्। पौरुषेयवाक्ये वाक्यभेदो न दुर्बलमिति यदि तदा न पंचविंशतिमेवेति मेधातिथिः। अ
त्रपद्य वित्रत्याद्यधर्मतः पुत्रानिष्ट्वा यज्ञैश्च शक्तितः दृष्ट्वापत्यस्य चापत्यं ब्राह्मणोऽरण्यमाश्रयेदिति पुत्रवाक्ये ब्रा
ह्मणग्रहणं तस्यैवाधिकार इति प्रतिभातीति तथापि वेदोपक्रमाधिकरणन्यायेनोपक्रमस्थद्विजपदस्यासंजातविरो
धित्वात् ब्राह्मणमात्रपरत्वं किंतूपसंहारवाक्यस्थब्राह्मणपदस्यैव जघन्यस्य संजातविरोधिनो द्विजमात्रपरत्वेन ब्रा
ह्मणपदस्य पूर्वोदाहृतयमनुवाक्ययोर्द्विजग्रहणेन तत्परत्वस्यैवोचितत्वमित्यपरार्कः। तत्र पूर्वोक्तवाक्य
स्थद्विजपदस्य सामान्यवाचकस्य विशेषब्राह्मणपरत्वं लक्षणां विनैव न घटतीति पुरोडाशं चतुर्धा करोतीत्यत्र पु
रोडाशपदस्याग्नेयपरत्ववत् स्मृतिचन्द्रिकोदाहृतकठसूत्रालोचनेनुनशंकावसरोपीति। वनं गच्छतो विशेषमा ९
ह मनुः। संत्यज्य ग्राम्यमाहारं सर्वं चैव परिच्छदं। पुत्रेषु भार्यां निक्षिप्य वनं गच्छेत् सहैव वा। अग्निहोत्रं समादाय गृह्यं
चाग्निपरिच्छदं। ग्रामादरण्यं निःसृत्य निवसेन्नियतेन्द्रियः। ग्राम्याहारः व्रीहियवान्नरूपः। परिच्छदं प्राप्यमिति सं
वध्यते। अग्निपरिच्छदस्यानन्तरं ज्ञातत्वात्। ग्राम्यः परिच्छदः आस्यवस्त्रासनशय्यादिः। अग्निहोत्रं श्रौताग्नीनाम

ह्यं स्मार्त्ताग्निं। अग्निपरिच्छदं स्रुक्स्रुवादि। यमः। यज्ञांगान्यग्निहोत्रं च धेनुरथ परिच्छदं। समादाय सदारो वा तदारण्यं व्र
जेद्द्विजः। पुत्रे ज्येष्ठे गुणवति तत्कुटुंबं निवेश्य च। दारान्निक्षिप्य वा गेहे निर्ममो विजितेन्द्रियः। याज्ञवल्क्योपि। सु
तविन्यस्तपत्नीकस्तया वानुगतो वनं। वानप्रस्थो ब्रह्मचारी साग्निः सोपासनो व्रजेत्। यदि भार्यायाः पतिसंक्रमणे
च्छा तदा तया सह नवेत्तस्याः पुत्रे निक्षेप इति केचित्। तन्न। पतिशुश्रूषाया नित्यत्वेनात्मेच्छिकत्वासंभवात्। अन्ये
तु तरुणीं निक्षिप्य वृद्धया सहेति वर्णयन्ति। अयं च पुत्रे पत्नीनिक्षेपो वने सहगमनं वा विद्यमानभार्यस्य मृतभार्यस्य
तु नोभयं। तस्यापि वानप्रस्थता पस्नेवादिनिःस्पृहते। यस्य मृतभार्यस्यैव द्वितीयापत्न्यभावेनाग्निः स वानप्रस्थो भवेत्। अन्यस्तु
दारान्तरं पुनरादधीतेति व्यवस्था। साग्निः श्रौताग्निसहितः। सोपासनो गृह्याग्निसहितः। तत्र यदि अर्धाधानं तदा वै
तानाग्निभिः औपासनेन च सहितो वनं व्रजेत्। यदा तु स— र्वाधानं तदा श्रौतैरेव। यदि कथंचिज्ज्येष्ठभ्रातुरनाहिता
ग्नित्वादिनेन श्रौताग्नयो नाहिताः तदा सोपासन इति व्यवस्था। आहिताग्निः सभार्य एव साग्निरेव वनं व्रजेत् अनाहिताग्नि
स्तु सोपासनो भार्यां गृहीत्वा पुत्रेषु निक्षिप्य वा वनं व्रजेत्। श्रौतस्य सहाधिकारस्य स्मार्तेन पुत्रेषु पत्नीनिक्षेपेण बा
धायोगात्। स्मार्तस्य सहाधिकारस्य तु स्मार्तेन संभवादिति मेधातिथिः। केचित्तु आहिताग्नेः सभार्यस्यैव वनगमने वै
तानिकं च जुहुयादिति विधिः। पुत्रे निक्षेपपक्षे पुनर्नायं विधिरिति। तत्र वैतानिकं च जुहुयादग्निहोत्रं यथाविधि

Indira Gandhi National
Centre for the Arts

॥गौ०वृ०१॥

१० तिमन्तो नित्यवल्कवल्कं विभृयेत। अग्निहोत्रादिश्राद्धानामौपासनिककर्मपरत्वेन लक्षणप्रवृत्तेः। एतेन ब्रह्मचारिपत्नीनि
क्षेपपक्षेऽग्निहोत्राद्यनाधीवानप्रस्थस्येति निरस्तं। विज्ञानेश्वरादयस्तु। अप्राहिताग्नेरपि ब्रह्मचारिपत्नीनिक्षेपविधि
बलादेव तावितैवाग्निहोत्रादिष्वधिकारः। यथा यस्य ब्रत्येष्टिनिपत्त्या नालं तु कास्यात्तामपसृध्य यजेतेति पत्नीवि
नैव दर्शपूर्णमासादावधिकार इत्याहुः। तन्न ब्रह्मचारिपत्नीनिक्षेपस्यानाहिताग्निविषयत्वेनाक्षपपत्नीकोऽतस्याधि
कारबाधायोगात्। दृष्टांते तु ब्रत्येष्टिनीतियजेतेति विधिबलात्पक्षे बाधः। केचित्तु ब्रह्मचारिपत्नीनिक्षेपपक्षेऽपि
पत्न्यनुज्ञयावनेऽग्निहोत्रादावधिकारसिद्धिः। यथा प्रोषितेन यजमानेनानुज्ञयाऽग्निहोत्रादिकमनुष्ठीयते तद्व
दिति। तन्न प्रोषितेन्यथानुपपत्त्याऽनुज्ञया विकर्तृत्वं। अत्र तु पत्नीनिक्षेपस्यानाहिताग्निविषयत्वेनोपपत्तावनुज्ञया
कर्तृत्वमसमंजसं। वस्तुतस्तु ब्रह्मचार्यानिक्षेपपक्षेऽप्यात्मन्यग्निं समारोप्य वनगमनं। तदाह ब्रह्मगलेयः। ब्र
ह्मचार्यर्पितं स्यात्पुनर्वनं गच्छेद्यथाविधि। अपत्नीकः समारोप्य ब्राह्मणः प्रव्रजेद्गृहात्। अपत्नीकः पत्न्या रहितः। समारो
प्याग्नीनित्यध्याहारः। प्राजापत्यामिष्टिं कृत्वा समारोप इति हरदत्तः। एवं वनं गतस्य श्रावणिकेनाग्न्याधानमाह वसिष्ठः। १०
श्रावणिकेनाग्निमाधायेति। इदं चाधानं ब्रह्मचारिविधुरयोरपि वनं प्रस्थितयोरिति मेधातिथिविज्ञानेश्वरौ।
श्रावणिकं वैखानससूत्रं। तदुक्तेन प्रकारेण। ब्रह्मचर्याद्वानप्रस्थतामाहापस्तंबः। अथ वानप्रस्थोऽतर ब्र

ह्मचर्यवान् प्रव्रजति तस्योपदिशंति। एकाग्निरनिकेतः स्यादशर्माशरणो मुनिः। स्वाध्याय एवोत्सृजमानो वाचं। त
स्यारण्यमाच्छादनं विहितं। ततो मूलैः फलैः पर्णैस्तृणैरिति वर्तयंश्चरेदंततः प्रवृत्तानि ततोऽपो वायुमाकाशमित्यभिनि
श्रयेत्तेषामुत्तरउत्तरसंयोगः फलतो विशिष्टः। अथ शब्दोऽधिकारार्थः। अत एव ब्रह्मचर्यात्। प्रव्रजति प्रकर्षेण व्र
जते अपुनः प्रवेशाय वनं प्रतिष्ठत इत्यर्थः। तस्योपदिशंति तस्य धर्मानुपदिशंति। एकाग्निः ब्रह्मचारिणो व्रतप्रवे
शीवद्धंतरानाभावात् लौकिक एवाग्निः। श्रावणिकेनाग्निमाधायेति गौतमोक्तेः श्रावणिकाग्निरिति केचित्। अनि
केतः गृहरहितः अशर्मा निर्विषयिकसुखरहितः। अशरणः रक्षकरहितः। मुनिर्मौनी। स्वाध्याय एव वाचं वि
सृजेन्नान्यत्रेत्यर्थः। आरण्यं अजिनवल्कलादि। अंततः प्रवृत्तानि कियंतं कालं नीवारादिभिर्नीत्वा ततो मूलादि
भिस्तत्पर्णैः कालं यापयेत् ततः स्वयमेव वाताहिनापतितैस्तैरेव वर्तयेत् ततोऽपो वायुमाकाशमिति। ततोऽपः
वायुभक्षः आकाशभक्षो निराहारः। अभिनिश्रयेत् तमेवेत। तेषां नीवारभक्षादिनिराहारांतानां उत्तरउत्तरः फल
तो विशिष्टः ज्येष्ठः। गार्हस्थ्यपूर्वकं वानप्रस्थमाहापस्तंबः। अथ वानप्रस्थस्यैवानुपूर्व्यमेकउपदिशंति। विद्यां
समाप्य दारान्कृत्वाग्नीनाधाय कर्माण्यारभेत सोमावरार्ध्यानि यानि श्रूयंते। गृहान्कृत्वा सदारः सप्रजः सहा
ग्निर्बहिर्ग्रामाद्वसेत्। एको वा शिलोंछेन वर्तेत न चात ऊर्ध्वं प्रतिगृह्णीयात्। अभिषिक्त एवाजुहुयात्। ऊर्जुपात्रेणापो सुपेयात्। अग्नि

Indira Gandhi National Centre for the Arts

॥मोक्षप्र॥ ११

पूर्वदिङ्मुख आदित्य उदङ्मुख उपस्पृशेदिति सर्वत्रोदकोपस्पर्शनविधिः । क्षारलवणमधुमांसानि वर्जयेत् । तस्य द्वंद्वं पात्रा
णामेकनपदिशंति पाकार्थं भोजनार्थं वा सिपरशुदात्रादीनां द्वंद्वमेकैकमुपाददीत रालिदत्वीरणमुपतिष्ठेत । तस्मा
रण्येनैव । तदूर्ध्वं होमो त्रिषवणं ह्याच्छादनं विहितं वेशकर्म कमण्डलुरीडाशा अरवस्ते कार्याः सर्वीपांशु सहस्वाध्याये
ननारण्यमन्याश्रावयेदस्यार्थं शरणमाकाशे स्वपमनुपस्तीर्णे शय्यासनेन वेसस्येषा पुराणमनुजानीयात् तान्
यांसं वानिवमन्विच्छन्नन्वक्षमेव पात्रेण सायंप्रातरन्नमाहरेत् ततो मूलैर्वर्तेरिति वर्जयं स्त्रेतत्रांतत वृत्तानित
तोपीवाशुमाकाशमित्य निनिश्रयेत । तेषामुत्तरनुत्तरसंयोगः फलतो विशिष्टः । सोमावराध्यानि सोमयागात् प्राची
नानि दर्शपूर्णमासादीनीति कल्पतरुः । हविर्द्धान सोमं वेति हरदत्तः । एको वेति शत्रैशतार्पानिक्षेपवृक्षो । अनि
विक्रस्नातः । अपं वस्नाने विशेषं विधातुमनुवादः । विशेषमेवाह शानैरपोन्युवेपात । अनिध्नन् जलवाणपवसारण
पोदकं पाणिना ताडयन् । अनिमुख आदित्यं । सूर्याभिमुखः उदकमुपस्पृशेत् । स्नायात् सर्वत्र स्नाने कर्मणि ने
मित्तिके च । तस्य द्वंद्वं पात्राणामेकनपदिशंति । पाकार्थादीनां पात्राणां शरास्मुपादेयं एकैकं वदंति । इदं च नार्यपाः ११
सहनपनवक्षे । द्वंद्वानामेकैकमाददीतेत रालिदत्वा । त्रयाणां पात्राणामेकैकं गृहीत्वा परं नार्यविदत्वा । इदं च श्रे
षुनार्यनिक्षेपवक्षे आरण्येन नीवारादिना । वृत्तिः प्राणयात्रा । पतीनां तिथिपूजा । येषु कर्मसु पुरोडाशा

अरवस्ते कार्याः । दर्शपूर्णमासादिषु पुरोडाशा विहिता अरवस्ते कार्या न पशुबंधादि । सर्वं विहितं कर्म उपांशु
कर्त्तव्यं । संहस्वाध्यायेन श्रसयत्नस्वाध्यायेनानारण्यमन्याश्रावयेत् । नान्यधिकमंत्रादिस्वरेते रण्यं हविराश्रा
वयेत् । यद्यपि उपांशुत्वनादेव सिध्यत्यर्थे पुनर्विधानमनर्थकं तथाप्यरण्यस्याप्यभिमुखीनन श्रणफ
स्तथोपांशुत्वप्रयः । अग्न्यर्थं शरणं अग्न्यर्थं गृहं कुर्यात् न आत्मार्थे । शय्यासने अनुपस्तीर्णे कुर्यादिति शेषः ।
पुराणमनुजानीयात् पुरातनमन्नं वासनतो न्यो दद्यात् । अन्वक्षमेव पात्रेणेत्यत्र स्तनवृत्तिरुच्यते । इदमेका
किनो वनस्थस्य तथा वास्व स्तन वृत्या किंपतं कालं पाययित्वा ततो मूलादिनत्ताणादि निराहारान्तैर्न वितव्यमिति
समुदायार्थः । इति वानप्रस्थविधिः ॥ अथ वानप्रस्थधर्माः । तत्र वानप्रस्थानां वक्ष्यमाणदीक्षावृत्तिभेदेनाने
कविधानां साधारणधर्मविधयो गुणविधयश्च प्रस्तूयंते । तत्र मनुः । मुन्यन्नैर्विविधैर्मेध्यैः शाकमूलफलेन वा
एतानेव महायज्ञान् निर्वपेद्विधिपूर्वकं । एतानेव गृहस्थपुरस्कारेण विहितांस्तानेव । साधारण्येनास्य विश्व
त्वायेपाकधर्मादि च महायज्ञास्तानेव मुन्यन्नैर्मुनयस्तापसास्तेषामन्नानि वन्यानि नीवारादीन्यफालकृष्टा
नि तैः वन्यैरेव शाकमूलफलैर्वा निर्वपेत् अनुतिष्ठेत् शाकादयपि वन्यमेव अग्राम्य नोजा । तिसाधारण्येनगो
तमस्मरणात् यदन्नः पुरुषो राजन् ततदन्नास्य देवता इति स्मरणाच्च । अनेन वक्ष्यमाणपक्वापक्वमूलफ

Indira Gandhi National Centre for the Arts

॥मीन्न प॥ लाशिनामिछयासर्वप्रानदिमुन्यनैशाकानि निर्वापंतमत्राप्रक्षुप्रातौ व्यवस्थामाहुः न वा एकत्वस्यात्तत्लोदयाद्व
लिंनिद्धांवद्य— क्रिनः। अमूजफनिद्धानिरर्वयेदाप्नमागतं। पीयक्षत्वयोमुन्यन्ता दीनांमध्येएकलक्षणसंक
१२ ल्पवान्यातततएवबलिंवलिशद्दोचदृज्यामात्रवचनः अग्नौ अनग्नेव— वतार्थक्षिप्यमाणार्थकइतिमि
धातिथिनालितेः। एवमाहापक्षान्वैश्वदेवादीनकुर्यात्। तथाचस्वस्वपरिगृहीतनन्द्येलेवयज्ञपंचकानि वि
धजनादिविधेयमित्यवस्थितं। यदन्नः पुरुषोरजनतदन्नास्तस्यदेवताइतिस्मृतेस्वन्नेन्द्वोलोवस्मात्तद्दोमवो
धिकायासामीत्या पात्रवचय कल्पश्रुतिमूलायाः सत्वात्ततएवतत्सिद्धावस्पदेय्यर्थ्यापसाकाम्यएरिसंख्या
र्थमिवैतद्वाक्यद्वयमितिवक्तुं इतिनातिएवं वकालपक्षाशिनोग्नावयद्गेन नदालोके स्नैनैवर्तनहोतव्यमितिप
रिवसितीर्थइतिवद्दवं यद्विवाग्नौपक्षेनेवाग्नौ होतव्यमिति। नियमश्चाद्रियते तदा विकालपक्षाशिनाकालप
कमेवाग्नौदत्काहोममात्रमत्रर्थयंस्वतयं कालपक्षमात्रंनीक्तव्यमितिसमंजसमेवयत्तुकालपक्षाशिनएत्य
ग्नौवैश्वदेवादीनपरिसंख्यानंअनग्नौपद्दोपलक्षणमिद्यायेदुपुरुषाद्येत्यादिविदितंबलिमात्रंविध १२
त्रएतद्वाक्यमितितद्वित्यंत्रक्रीत्यासाधारण्येनसामंजस्यविशेषपरतयासंकोचस्यमानान्तावेनानौ
विद्यातवलिशद्दस्यैज्यामात्रवचनत्वेनानियंक्रनांपसिद्वे— दुक्तायागोगाद्येतिदिक्। तदा। वैता।

निकंचकुर्यात अग्निहोत्रंयथाविधिदर्शमस्कंदयनपर्वपौर्णमासंचयोमतः। कृत्स्नस्याग्रयणंचैवचातातुर्मास्या
निचाहरेत्। तुरायणंचक्रमशोदक्षस्यायनमेवच। वितानोविहारः तत्रचवैतानिकंश्रौताग्निविषयश्रौतंकर्मअ
ग्नेहोत्रादिनित्यंकर्मनजुहुयात कुर्यात्। दर्शपौर्णमासावपियोगतः युक्त्यान्यायोपेतविध्या। स्कंदयतीनास्कंद
यनअविनाशयन्। कृत्स्नेषुयोनक्षत्रेष्टयोअग्निर्वाकामायत अन्नादोदेवानास्यामितिसएतमग्नयेकृ
त्तिकाभ्यः पुरोडाशमष्टाकपालंनिरवपत्। — — एकस्यैतेनहविषायजेतेत्यादितेत्तरीयब्राह्म
णोक्ताः संवत्सरसाध्याइष्टयस्ताराघणंसंवत्सरंचमनविविधाईष्टिरि— पस्तंबसूत्रोक्तं। दक्षस्याय
नंदाक्षायणयज्ञः। दाक्षायणेनयजेतेत्यादिवि— विहितअयगुणमाहसएवचांमतशारदैर्मेध्येर्मु
न्यन्नैस्वयमाहृतैः पुरोडाशांश्चरूंश्चैव निर्वपेत्विधियतएथकवसंतेनवाः जाताः पक्कावावासंताः य
वाः शारदाव्रिहयः तैःतान्विशिनष्टि मुन्यन्नैरितिमुनिनिरफालकृष्टनामदनीयत्वात अफालकृष्टं
रित्यर्थः तथाचयाज्ञवल्क्यः अफालकृष्टेनाग्नीश्चपितृदेवातिथीनपि भृत्यांश्चतर्पयेतइतिस्वयमाहृ
तैर्याजानाश्चर्जनोमायपरित्यागेनसंपादितैः पुरोडाशान्चरूंश्चनिर्वपेत्सपादयेदित्यर्थः। अ
स्यार्थस्यैवमनुनाप्योक्तेः ग्रामाणिकैर्मधवादिनिरादंत्वाच्चग्रामाणिकसंकेमितमुन्यन्नैःनीवारादिभिर्यासं

Indira Gandhi National
Centre for the Arts

मीसपा।

१३

तथा च निरूढपशुबन्धादिष्वेवमेव तथा च वचनं तासु प्रवृत्तं तदन्येष्वपि षोडशादिकर्मादित्वर्थः तत्र निरूढे निरूढेति तिसृ
ती जागरूकायां कथमेतैः षोडशादिकर्मणोस्तस्याश्रुतिसंकोचस्य नोदितत्वात् निरूढेन षोडशादीन्येव सदा
न स शास्त्रोक्त एव वेदितव्यानि श्रौतानि तथा च श्रौतयाग्येष्वेवानुष्ठानेन विरोध इत्याहुः अन्ये तु तानवस्थेन वचनगम
न समये श्रौताग्नीन् समारोप्य वनं गतं घ्नंतथा वैतैः षोडशादिकर्मप्रोतं वचनं दैवानि कर्मवैत्यादि विनिवेधः त्वत्कर्माणि श्रावणि
दाशास्त्रे विहितानि कर्माण्यपि वक्तव्यं नाम कानि दर्शपूर्णमासादिशाखानक्तानामग्निर्यज्ञकाण्डवनिनः श्रौता
ग्नीनामजातत्वे व च्छिद्रे शास्त्रप्रवृत्तौ च तेषु षोडशादियोगायतत् श्रावणिकाम्याधानं दक्षितं तत्रैव विधातव्या
इत्याहुः तदेतद्द्वयमप्यसंगतं अग्निहोत्रादीनपुरूर्यवासं तत्र वेदित्यस्याम्नानात् श्रौतस्य च विषयत्व
त्वस्यैवस्वारस्येन प्रतीतेः स्मार्तविषयत्वे मानाभावात् यज्ञस्यादित्यनेन तात्पर्यत्वात् एककारणविच्छेदकस्य
चाभावा— ति अग्निसमारोपणस्य वपुर्मुमुक्षुविकल्पवद्रूपमाणत्वेन सर्वस्य तत्स्थेमानाभावात् अस्य
दुष्करीत्या सर्वसामंजस्ये दर्शादिशाखानां गौणत्वस्य कर्मान्तरत्वस्य वा कल्पना यावि शिष्य प्रमाणमंतरेण
रक्षितुमशक्यत्वात् अग्निहोत्रं समादायेति पूर्ववाक्यविरोधाच्च श्रावणिकाम्याधानमपि प्रत्नार्थस्यैव
न सार्वत्रिकं तस्मात् श्रौतकर्माणि वनिनापि यत्वेयत्तात् अफालकृष्टैर्व्रीह्यादिभिः स्वस्वस्थानेन कोपि विरोध इति पूर्वोक्त १३

मेव सम्यक् वनवासिनो व्रीह्यादिभिः श्रौतकर्म चरेयुः नानुपगमे यजमानपंचमाद्द्वयोन्नाद्यते तत्प्रनेनास्यापि
तद्गुणपरस्त्वे संप्रत्यग्याम्यमाद्दारमिति वचनविरोधः यद्यपि कृतव्रीहीणामफलकृष्टतया मुन्यन्नतासंपादि
तास्तथापि पवित्राचितया स्यात्तान् प्रगतास्त्वेव यथा हुलौगाक्षिः त्रिदयोयवगोधूमान्नीततिलसर्षपो इक्षु
इति यंगवत्स्वेवग्राम्याच्चोपधयस्मृता इति एवं पूर्वोक्तमयुक्तमिति चेत् नरडानद्वयस्य प्रत्यप्रत्ने विहित
त्वेन तद्वचनस्य ग्राम्याहारविषयत्वोपपत्तेर्विरोधाभावादिति संक्षेपः यमोपि। अकृष्टं मूलफल
व्रीहीन्संचित्यवापरान् विष्णाद्वेप यद्येन महासनेषु पंचसु महायज्ञेषु श्रौतसाधर्म्येण कल्पयेः पंचसुम
हाग्निहोत्रदर्शपौर्णमासचातुर्मास्यतुरायणदाक्षायणलेशपंचमाहाय इति केचित्। पश्वादिद्रव्यं पत्रश्रौ
ते तत्र सर्वेषु षोडशाश्च स्वरूपेवोपादेयाः तथा च सपत्र यस्यै यस्यै यथा हविर्दैवतायै द्विर्द्विजः। तस्यै तस्यै
तथा सम्यक् हविष्यं कल्पयेत् पृथक् चरुहविः पशुरूपं हविष्यं षोडशाश्च स्वरूपं। अतएव दक्षोपि अरण्य
निलयः पश्वर्थे षोडशांश्च संवानिवपेत पर्वकालेषु यथा देवीनमिनिगोर्वर्जितः। आज्यसाध्यं होमे गुणविधि
धिमाद् बाह्य वत्स्यः श्रौतं स्मार्तं फलमूलैः कर्म कुर्यात् क्रियास्तथेति। मनुः वसीतचर्मचीरं वासायं स्नायात् गतथाज
टाश्चदि रूपा नित्यं स्मृ लोमनखानि च। तथा स्वाध्याये नित्ययुक्तः स्याद्दान्तो मैत्रः समाहितः। दाता नित्यमना दाता

Indira Gandhi National Centre for the Arts

॥मी॰क्ष॰प्र॥

२५

सर्वभूताद्युदकं पक्वं ग्राम्यमेव। आध्यात्मिकं संवीक्षेत्। ध्यानपरो नित्यं निद्रालस्यं च वर्जयेत्
... वेद्रान्तविधश्रवणस्नायी निरहंकारी प्रतिग्रहात् ... अध्यायवान् शीलश्च सर्वसत्त्वहितेरतः तथा यः कदर्भ
विमुक्तं तिलं दन्तैरश्मनिर्भिन्नं पति। प्रयुङ्क्ते प्रतिग्रहं च समस्तस्य तस्य ... तस्य पतिः। दान्तो ... दारान् द्रव्यत्यक्ता
विवर्जितः सुसंतुः। अग्निकार्यमग्निहोत्रं चेकीनूमिभ्रष्टाजनाजिनं वन्याद्वन्न दासम्प्रयानवयुक्तस्य द्वादशिनां वसि
थः। दारण्यः सर्वभूतानां संविभागरुचिर्मलं सर्वपरित्यागादपेक्षश्च मृषावादवर्जितः। स्वाद्यर्थमिनं भवितीरतत्
था परिधूलं पोहितो भूमिमकामेत संस्कृतानिमं भैरधिश्रयीत। संस्कृतानिस्थलानि मं वैतैर्खानसोक्तैः रा
त्वगजिनं दिव्दृष्यां जिनोत्तरीयः। विमावरात्ते वर्मकाशाकुशैः कुर्यात परिधानोत्तरीयके। वन्यः स्तेहेनगाव
शाम्यतथ्या स्पशस्पते। वीक्षायन्। वनप्रतिशः संतुष्टः चर्मवीरजनप्रियः। देवविप्राग्निकार्येषु युक्तस्तप
सितापरः। कुञ्जां चलिमसंहार्यमाशमानं मनपक्विनि। तदहर्जन्तसंनारांकपर्यकटुकाश्रयां। परिशस्व
स्पृतांरशिमितां दुर्जनवर्जितां। वनवासमुपाश्रित्य ग्रास्त्रणेनावसीदति। मृगैः सह परिव्रजेत् संवासः श्रु
तेमध्यान्हे वसदृशीवृत्तिः प्रत्यक्षं स्वर्गलक्षणो। देवलः। मर्वपालिप्रवक्ते शोहृदयवृद्धिरपापवितत्त्वं स
दर्पिमोगवर्जनं भूमिशिलाकृण सिकताशर्करणामन्यतमाधिशयनं। सदा सत्त्ववोधो धर्ममार्जवं च अ

२५

न र्दनं चेति। अक्रोशो दयासत्त्वस्यअंतःकरणस्य बोधः धर्मैकाग्रता। अनर्दनं परापीडनं न स्नान्याहम
तुः दैवत। स्वप्नतद्वृत्वा धन्यमेध्यतरं वा विशेषमात्मनि भुंजीत लवणं च स्वयंकृत। स्थलजौदकशाकानि पु
ष्पमूलफलानि च। मेध्यवृक्षोद्भवान्यद्यात् स्नेहांश्च फलसंभवान्। लवणं स्वयं कृतमेव न स्यान्नादिकं सैंध
वादि। आलशमः। वेणुशामाकनिवारास्तन्तुयोग्यवेधुकाः। फलानामुपभुंजीत पक्वमामं च वर्जयेत्। छाग
लेयः शाकमूलफलाहारी जटिलाः पुष्पमे वनी वा रीमासमथवाप्राहारी वन्यपक्वं वा वर्जान्याह मनुः स्व
र्जयेन्मधुमांसानि भौमानि कवकानि च। भूस्तृणं शागरकं चैव श्लेष्मातकफलानि च। नीमम च क्नेपरात्पंगोजी
त्रु केतिप्रसिद्धं। कवकानां द्विजमात्रं प्रतिनिषिद्धत्वात् तत्र वाराप्रितस्यात्रोपुनस्तं निषेधो भूस्तृणसमभा
धिष्ठितार्थः। भूस्तृणशिमुकशादीशाकविशेषवचनौ वादीके पुवसिद्धौ। तथा नफालकृष्टमश्नीयात्
उत्सृष्टमपि केनचित्। नग्रामजातान्यार्तोपि पुष्पाणि च फलानि च। आरण्यमपि फालकृष्टं नाश्नीया
त् ग्रामजातानि लोगादिपरिनाषितानि अफालकृष्ट्यन्यपि नाश्नीयात् द्वंद्वं च संत्य। सोम्यमासारमिति
... स्वयनिवेशप्रतिपुनर्निषिधसामर्थ्यादिव गम्यते। मेधातिस्त्रिकाम्याणाप्युप्यमूलफलानां देवा
ताद्यर्थमुपादानं निविध्दते आर्तोपि अन्यासंभवे अग्रपकर्षस्यात्वात देवताद्यर्चनस्य प्रतिनिषिद्धत्वात्पादि

Indira Gandhi National Centre for the Arts

मोक्ष प॰ ।। नी एवदानेकार्यं इत्यः — अविज्ञाते निःक्रमः पुत्रा सर्वं संपक्व्यातिथ्यान्पानि किं तु नर्थान्यानीत्वा हत्वित्तं नाश्नी
यादिति क्रियाप्रघनोपपत्तौ तथा कल्पनायां मानान्नावात ग्राम्याणाम्नकालकृष्टानाम विहीहीणां हौमीयदेव नोपयो
२५ गस्यारतीकृतत्वेनान्यत्रपुष्पादीनामविविशिष्टस्य गृहवनानावेत्यागायी गार्हे तिखकृतस्तत्सर्वं ग्राम्यधान्य
निषेधः अत्र तु पुष्पफलानां ग्राम्यासां फालकृष्टानां निषेधः अत एव यमः मूलं पुष्पं फलं पंचं दिवास्य लजातौ
ग्रजेन ह्य ये स्वयमाहृत्य स्नकृष्टं परिवर्जयेत् इति तथा स एव यतश्च पत्रमुपाघात ततस्तुष्पमुपोहरेत यतः पु
ष्पमुपादघात् न ततः फलमाहरेत यतश्च फलमादघात् ततः काष्ठमाहरेत् यस्य छायामुपासीत न ततः किंचि
दाहरेत न दुह्मेहं ग्राममन्नाकं हिमा तप सहनेन वेत श्रौषधये दात्मनो देहतं पसिद्धिमया सुयात्तनन कं किं विदश्नीया
त्रु दकंत च्छितः पिवेत गौतमः न फालकृष्टमधितिष्ठेत् न ग्रामं प्रविशेत् इति कर्म वानप्रस्थस्य भेदाबोधाय नेनो
क्तः अथ वानप्रस्थ द्वैविध्यं पचमानका अपचमानकाश्चेति तत्र पचमानकाः पंचविधाः सर्वारण्यका वैतुषिकाः कं
दमूलफलभक्षाः फलभक्षाः शाकभक्षाश्चेति सर्वारण्यकानाम द्विविधाः द्विविधमरण्यमाश्रयंति इंद्राव २५
सिक्तं चेति तत्रेंद्रावसिक्तं नाम वल्लीगुल्मलतावृक्षाणामानयित्वा सायंप्रातरग्निहोत्रं हुत्वा यत्यतिथिव्र
तिभ्यश्च दत्वा शेषेतरच्छेशभक्षाः रेतोव सिक्तं नाम मांसं व्याघ्रमृगर्द्धपेनानामित्येवमादिनि रन्यतमेन वाहृत

नातयित्वा श्रपयित्वा सायंप्रातरग्निहोत्रं हुत्वा यत्यतिथिव्रतिभ्यश्च दत्वा शेषेतरच्छेषभक्षाः वैतुषिकास्तु
षधान्यवर्जं तंडुलानानयित्वा श्रपयित्वा सायंप्रातरग्नि होत्रं हुत्वा यत्यतिथिव्रतिभ्यश्च दत्वा शेषं तच्छेष
भक्षाः कंदमूलफलशाकभक्षाणामप्येवमेव पंचैवापचमानकाः उन्मज्जकाः प्रवृत्ताशिनो मुखेनादायिनस्तोया
हारा वायुभक्षाश्चे — ति तत्रोन्मज्जका नाम लोहाश्मकरक वर्जं हस्तेनादायिनः प्रवृत्ताशिनो मुखेनादायि
नो मुखेनाददते तोयाहाराः केवलतोयाहाराः वायुभक्षा निराहाराश्चेति वैखानसानां विहितादीक्षा रहि
तातः एताश्चावलंब्याग्निमुपसमाधाय वल्कलशाणचर्मचीरकुशमुंजकनकवासा वानप्रस्थो नेन वि
धिना वानप्रस्थो द्विविधी न वतिस्वाभिक्षायिकोनु प्रस्थायिकश्च तत्र स्वाभिक्षायिकश्चतुर्विधः एकहतिः
संप्रक्षालकः आत्मरक्षितिरहिंसकश्च एकहतिर्दीक्षितो गुरुणानुज्ञातो दिशमुपनिःक्रम्य पतिताप्रक्षालनण
मधुरकटुकषायादीनां वा मूलफलानां यत प्रथमं यदृश्येत तेन प्रणमासान्यापयेत् समाप्ते पुनराहृत्य कंदमूल
फलं वैफ्रणपाषकनीवाराणां मासे पर्याप्तमाहृत्य तदहरेवोपयुक्तं किं मसंप्रक्षालः दंतोलूखलिकश्मगोपवा
सिश्चरतश्चतयच्चात्मरक्षयो नवतिशीर्णपर्णोशेवालं गोमयाः अहिंसकः अत्रापस्थायिकश्चतुर्विधः अर्द्द
मासं संवत्सरं वा ततः मासं स्मात्पमासं संवत्सरादित्यकः एतानिहत्ति निराहृत्य देवपितृमनुष्याणां नक्त

Indira Gandhi National
Centre for the Arts

वि:तरी:उपाश्रीयात्वनपाश्यनंतरकर्त्व्यमाह्यधेदिनंसि॥ वानप्रस्थोण्यमनिप्रज्यज्ञास्नीमितिदंत्वाअग्निंभूस
मीत्न १॥ द्भृत्तुएस्थापवन्नेन जीवेच्चावारिगृदनदरक्षाकमंदंघोतिप्रिपित्तदेवतानितर्पणंकुतननकंदिवाईरात्रिस्त
र्थपञ्नृतिंभोजनंकृत्वारूक्षोधूम्नःकृशःकेशश्मश्रुनिसंततम्ब्रमृगस्वर्यधावान्धरनद्भपधेदिदियथामंथा
१६ याद्रीबालुत्रिमुपःसीतमिष्यनिसंततीनिर्गतशिरासमुदायः वास्नीमितित्रस्तदेवत्यानकंदिवैत्याविनाएते
भुकालेभोजनविकल्पः शक्त्यपेक्षयाथ्यपतेवशिष्टः आवणिकेनाग्निमुपसमाधायआहिताग्निरुक्तंष्ट
न्योमासेन्योनग्निरनिकेतनोदणात्देवपितृमनुष्येभ्यः सगच्छेत्स्वर्गमानंत्याय। श्रावणकंवैखानससूत्रंसं
गच्छद्वापरिमाणमादेयाज्ञवल्क्यः अह्नोमासस्यषण्णांवातथासंवत्सरस्यवाअर्थस्यसंचयंकुर्यातकृत
माश्वयुजेत्यजेत्। एकस्यसंमंधिभोजनादिदृष्टादृष्टकर्मनिपर्याप्तस्यार्थस्यसंचयंकुर्वीतमासस्यषा
षण्णांवामासानांसंवत्सरस्यवासंमंधिकर्मपर्याप्तंसंचयंकुर्यात्तनाधिकंयस्मातिच्चेततदाश्वयुज्यांत्य
जेततथाचमनुः सद्यःप्रक्षालकोवास्यात्माससंचयकोपिवाषण्मासंसचयोवास्यात्समानिचयए १६
वचेतिविष्णुः संवत्सरनिचयीपूर्वनिचयमाश्वयुज्यांजह्यात्मनुः त्य्जेदाश्वयुजेमासिमुन्यन्नंपूर्वसं
चितंजीर्णानिचैववासांसिशाकमूलफलानिच। गौतमलातिसंवत्सरंन्नजीतपूर्वसंचितान्नंनत्यजी

तसंवत्सरमतिक्रम्येत्यर्थः त्वानुभूरालौविवानप्रस्थाश्रमेयेताआतस्त्रीदन्तयस्मृताः॥ सद्यःप्रक्षालकाःकेचि
त्केचिन्मासिकसंचयाः वार्षिकसंचयाःकेचित्केचिद्द्वादशवार्षिकाः कुर्वत्यतिथिपूजार्थंयज्ञतंत्रार्थमेवचेतितित
योनियमम्। मनुः अग्निपक्वाशनोवास्यात्कालपक्वभुगेववा॥ अश्मकुट्टोनवेद्यादिंदंतोलूखलिकस्तथा।
नक्तंवान्नंसमश्नीयाद्दिवावाहृत्यशक्तितः। चतुर्थकालिकोवास्यात्स्याद्वाष्टमकालिकः। चांद्रायणविधानैर्वा
शुक्लेकृष्णेचवर्त्तयेत्। पक्षांतयोर्वाप्यश्नीयात्यवागूंक्वथितांसकृत्पुष्पमूलफलैर्वापिकेवलंवर्त्तयेत्स
दा। स्वंभावाविकैःस्वयंशीर्णैर्वैखानसमते॥ भूमौविपरिवर्त्तेततिष्ठेद्वाप्रपदैर्दिनं। स्थानासनाभ्यांविहरेत्स
वनेषूपयन्नपः। ग्रीष्मेपंचतपास्तुस्यात्वर्षास्वभ्रावकाशकः। आर्द्रवासास्तुहेमंतेक्रमशोवर्द्धयंस्तपः। उप
स्पृशंस्त्रिषवणंपितृन्देवांश्चतर्पयेत्। तपश्चरंश्चोग्रतरंशोषयेद्देहमात्मनः। अश्मनिःपाषाणैःकुट्टयि
त्वाधिएकृत्वाभुंजीत। दंतोलूखलिकः दंतैरेवतुषकवाटमपनीयनच्छयेत्सनक्तंवान्नमित्यत्रभोजनस्पे
वप्रकृतत्वात्तेनैवकालसंबंधः तथाचसायंप्रातर्द्विजातीनामशनंश्रुतिचोदितमित्यनेनप्रकृतायपा
डाधवारद्वयभोजननंनिवर्त्यतेअन्यतरस्मिन्कालएवविधीयमानेतपोभवति। भूमौकेवलायां। विप
रिवर्त्तेत। एकेनपार्श्वेननिविपन्नःपार्श्वांतरेणननिषीदेतनउपविशेत्तल्वंकम्पेतनशय्यायांनासने

...hi National
Centre for the Arts

मीज्ञप।। नाग्निं चेतनिकी इत्यर्थः ॥ ऋतुदैः पादाद्यैः ॥ तनैः ॥ ग्रीष्मे पंचतपास्तु स्याद्वर्षास्वभ्रावकाशिकः ॥ ग्रीष्मे पंचस्फातिकः प्रथमपरिश
... इत्यर्थः ॥ स्मातानंतापयेत्पादविवर्णाभ्रावकाशकः अभ्रावकाशः अभ्रावकाश आकाशः यस्मिन्देशे तत्रैव स्थि
१७ तइत्यर्थइति द्विधातिथिः ॥ हेमंतशिशिरयोरार्द्रवासाः वा पंचपश्चात्शीतस्नायात अन्यदपि दूर्ध्वबाहुवस्थानं
मासोपवासहारदाराचारितपउग्रतरं कुर्यादित्यर्थः यतः एकपादेन तिष्ठंतः केचित्सूर्यं शीर्षंपंचा
ग्निधूमपा केचित्केचिदश्मकुट्टिताः बहुकालनिरताः केचित्केचिद्दादशकालिकाः पक्षोपवासिनः के
चित्मासि ए त्रुटिनः ॥ केपापाः सोमपाः केचित्वायुभक्षास्तथापरे ॥ शुक्ले पक्षे पिबंत्येके यवागूं क्वथितां सकृ
त्कृष्णपक्षेपिबंत्यन्येकुंडं ते न्येयथागतं ॥ पत्रः पिबति शुक्लेन्येकृष्णपक्षेचगोमूत्रकृताः एता अन्यस्त्वविवि
धादीनां तेषां महात्मनां ॥ चतुर्थश्चोपनिषदोधर्मः साधारणस्मृतः ॥ शीर्णमायुर्लौभेवैखानसावालखिल्या
... योपदमनारीमिः ॥ मनयः सलिलाहारा वायुभक्षास्तथैव च ॥ अश्मकुट्टास्तथा चारु ... श्वतापसाः
... दंतोलूखलिनः ... दंडकारण्यवासिनः ॥ ... हिमाहिमाहारा नागाज्वलनीर्कसमप्रभाः ॥ आका
... शिलाशीवृत्तयास्पंदिलशायिनः ॥ तद्वद्रक्षादीतास्तथैववास्त्वधारिणः ॥ जपंतश्चमहात्मानस्त १७
था ... द्विजाः ॥ चातुर्मास्यकृताहारानिराहारस्तथैवबाह्यसकाय पादाश्चपिचरंतिमहत्तपाः ॥

वर्जितायेधर्मचरंतिनिपतद्भृताः ॥ येकाग्रुष्ठेनतिष्ठंतियेव श्वतावृत्तिहिंसकाः ॥ शिष्टनर्दस्तपोनद्धानिदिष्ठफ
लभोजिनः ॥ फलाहारैवनिरलबाधनद्धास्तथापरे ॥ सर्वेवान्येवधर्मज्ञामुनयाधर्मवत्सला ॥ हारीतः ॥ स्थाणुव
त्पादेकपाश्चीर्ध्ववाहूर्ध्वमितपनवर्षास्वावकाशमद्भिजलशायनकुशप्रस्तरस्थंडिलशर्करोलूखलम
शानकीलकशय्याप्रवृत्तिनिरात्मानंशापयेत ॥ अतोहारेरतिरकृशं समपीदेहः शकयोनिसमुद्भवाः न
स्थानैनदरकपवैलोकाः धर्मकथंचन ॥ धननीलपदिपागाद्भागलोन विवर्जनात ॥ संयमादिदिपालांवतप
सासिद्धिमाप्नुयात ॥ शौवस्नानादिनिर्मचैर्जपहोमादिभिः स्तथा ॥ तपसासिद्धिमाप्नोतिदिव्यंदेहमनुत्तमं
॥ तपोज्ञानंतपाचज्ञाम्नायसिद्धिसमुच्चतिः ॥ नाशक्यतपसःकिंचित्तस्माच्छ्रेष्ठतमंतपः ॥ नानाधर्मसमृद्धेषु
वनेषुमफगविष्णुदेवारण्येषुवानप्रस्थस्तपश्चरेत ॥ प्राप्यतेतपसालोकः शोध्यतेतपसाशुचं ॥ तपसा
सर्वमाप्नोतियत्किंचिन्मनसेप्सितं ॥ वैखानसविधानज्ञस्तत्वात्मातुच्छावस्थितः ॥ सूक्ष्मः समताप्नोतिपरं
ब्रह्मपदमव्ययं ॥ स्थाणुवाद्ध्वर्ध्वबाहुरित्यंतेनावस्थानप्रकारादर्शिताः ॥ पंचतपनंग्रीष्मकालेग्निसवाः एताआ
दयः अंतर्जलावस्थानलक्षणाः ॥ उपनिषदः ॥ सूलीः रहस्याधिकारवनहिमानिवेदकाख्यानिमध्यायीतवि
नदेतावनबीजात्मसमंसंसिद्ध्यैतथा ॥ ... वस्त्रालयाथोनानाविधाः संगणीपासनाः कर्तव्याः इत्यर्थः ॥ नव

Indira Gandhi National Centre for the Arts

॥मीक्षा ५॥

१८ ज्ञोपासने संन्यासिन एवाधिकारात्कथमिति दितिचेद् सम्बुध्याध्विकारिकत्वे विमर्शस्यादेरधिगमात्। क्षेकरिक
तायाः साधनाध्याय सिद्धत्वात्तादीक्षाश्चनपाश्रयताः किंतु लिंगैरव्यवसितास्तथाद्य स एव। व्याधिर्विवृत्तसेक्ष
ऽपत्यर्थैरेवचेविता: विघातपी विश्वरुप्यंथशरीरस्य वशुद्धये। विधाऽभ्यासेन रूढविज्ञानं। ततश्च निषेव
नेन विरुद्धिनयता शरीरस्य वशुद्धये आहारनियमदीक्षाः सेवेते नियमधर्मविधि। एवमनुष्ठानेनाकं च प्रतिमा
हाप्रस्थानमारभेत। अपराजितांवास्थाय व्रजेद्दिशमजिह्मगः। आनिपाताच्छरीरस्य युक्तो वा
र्यनिलाशनः। अजिह्मगः ऋजुगामी। युक्तः योगाभ्यासरतं यावच्छरीरं पतति तावत्तथाविधः फंदानहयेत। या
ज्ञवल्क्योक्ति। वायुभक्षः अस्या दानिं वाद्विशं गच्छेदर्वात्तसहयादिति। कूर्मपुराणेपि माहिप्रस्थानिकं वासौ कुर्या
दनशनं तु वा। अग्निप्रवेशमन्यद्वा कुर्यात् ब्रह्मार्पण विधौ स्थितः। अपराक्रेपून स्मृत्यंतरं वानप्रस्थो महाप्रस्थानं ज्व
लनं बुदीशं जलप्रवेशं प्रतनं वा व्रतिष्ठेत्। एवं ब्रह्मचार्यादिप्रकरणोक्ताः अविरुद्धा धर्माश्चस्यापि वेदितव्या उत्तरेषा
चैतदविरोधी निगौतमस्मरणात्। एवं शास्त्रदृष्टेन महाप्रस्थानप्रभृतिनादीक्षा अनुतिष्ठन् ब्रह्मलोकमश्नुते। भवति। १८
स्थानपदं भवः आसामदं विवर्णानां स्यत्क्वान्यतमयात् तु। वीतशाकनयौ विप्रो ब्रह्मलोके महीयते। शौनकः। क
द्वे र्द्धिविनयेत्कालं ब्रह्मचर्येविपालयेत्। एवं नीत्वाद्वितीयंकालं द्विजो ब्रह्माश्रमी नानाभवेत्तनाग्निभृद्ध्यवस्थायांत्यात्मा

नेन विधिना वानप्रस्थो दिवं यातीत्यादिभोजनवर्जनात्। आग्न्यादिविशेषकरणासमर्थं प्रत्याह मनुः। अग्नी
नात्मनि वैतानान्समारोप्य यथाविधि। अनग्निरनिकेतः स्यान्मुनिर्मूलफलाशनः। अप्रयत्नः सुखार्थेषु
ब्रह्मचारी धराशयः। शरणेष्वममश्चैव वृक्षमूलनिकेतनः। तापसेष्वेव विप्रेषु यात्रिकं भैक्षमाहरेत्। गृहमेधि
षु चान्येषु द्विजेषु वनवासिषु। अनिकेतः निवासार्थं पर्णकुटीमपि त्यजेत्मुनिः मौनवान्। मूलफलान्ये
वननीवारादिसमारोपणविधिश्च वैखानससूत्रादवगंतव्यमिति मेधातिथिः। सुखसाधनेष्वप्रयत्नः
शरणेषु गृहेष्वसक्तवनेनमूलफलादिभवममतां न कुर्यात्। तापसेष्वित्यादि सप्तमी पंचम्यर्थे। एतेभ्यो
निकालाभेऽयनं ग्रामादाहृत्य वाऽश्नीयादष्टौ ग्रासान्वने वसन्। प्रतिगृह्य पुटेनैव पाणिना शकलेन वेति। अथैवं
ग्रामसमुनेर्भुक्तं वानप्रस्थस्य षोडशेति स्मृत्यंतरं वशक्तोयस्तावन्तो ग्रासधारणं कर्तुं शक्नोतीति तद्विषयं तथा। ए
ताश्चान्याश्च सेवेत दीक्षा विप्रो वने वसन्। विविधाश्चौपनिषदीरात्मसंसिद्धये श्रुतीः। ब्रह्मलोकः स्थानं न विरादि
लांपैतिकार्षं ब्रह्मसाप्तिः न तु नित्यब्रह्मप्राप्तिः। तच्च लोकशरीरस्यापुयोगात् तुरीयाश्रममंतरेणमुक्त्यनंकारात्।
न्ववयोगाभ्यासेनवायुन इति। याज्ञवल्क्योक्तेस्य विविधाश्चौपनिषदीः इति। तेमनुक्तं स्वब्रह्मोपासनविषेर
त्वपपत्तावब्रह्मवादापत्तिरेवावोऽन्यन इति वाक्यं कमभुक्तिपरत्वेनाप्युपपत्तेः। अत एव श्रुतौ त्रयो धर्मस्कंधा इत्यु

Indira Gandhi National Centre for the Arts

॥मो॰ह॰१॥
१८

त्यक्त्वा प्रव्रजेद्ब्रह्मयज्ञेनादानमिति प्रथमः पक्षः द्वितीयो ब्रह्मचर्यं गुरुकुलवासी इति तृतीयोऽयं वैतन्मात्रानन्तरं स्नाद
क्रियादिर्गृहस्थस्यानप्रस्थने भिक्षुकं वा निधायः सर्वे एते उपलीकान् वृत्तीति प्रथमानाश्रमे तत्र उपलीकश्चाश्रित
भिक्षुः ब्रह्मसंस्थामृतत्वमेति इति दारिद्र्याद्यात् पारिव्राजकः स्यैव चतुर्थः इति तृतीयाध्याये शारीरकभाष्ये स्प
ष्टं छित्वा लोकं इति वानप्रस्थस्य कर्मणं इति वै — तत्र अथ संन्यासाश्रमः । तत्र मनुः । वनेषु तु विहृत्यैवं तृतीयं भाग
मायुषः । चतुर्थमायुषो भागं त्यक्त्वा संगान् परिव्रजेत् । आश्रमादाश्रमं गत्वा हुतहोमो जितेन्द्रियः । भिक्षाबलि
परिश्रान्तः प्रव्रजन् प्रेत्य वर्धते । — ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् । अनपाकृत्य मोक्षं तु सेवमानो
व्रजत्यधः । अधीत्य विधिवद्वेदान् पुत्रांश्चोत्पाद्य धर्मतः । इष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत् । अनधीत्य
द्विजो वेदाननुत्पाद्य तथात्मजान् । अनिष्ट्वा चैव यज्ञैश्च मोक्षमिच्छन् व्रजत्यधः । वित्तत्यज्य इति त्या । पंचीकृदिधि
मनुष्यादेतिया वत्सु चतुर्थमायुषो भागं परिव्रजने न संन्यासविध्युक्तधर्मानुष्ठाने न चापयेत् चतुर्थायुर्भागसंबं
संन्यासमास्थायपावन्मरणं तदनवं विधर्मानुष्ठानेन तिष्ठेदिति भावः । अयं चायुर्भागशब्दः कषायपरिपाके सति १८
यदा दृढतरं वैराग्यमुत्पद्यते तत्कालोपलक्षकः । जातपुत्रः कृष्णकेशोऽग्नीनादधीतेति वत् । यथा श्रुते च तुर्थाय
र्भागस्यायुषि पञ्चाशतां तुम राशस्य चैन दुर्लभमिति लीन तत्त्वाचिकं प्र ब्रह्मनापत्तेः शास्त्रवर्णितश्चाश्रमसमुच्चय

स्योक्तिनत्वचाथ विरोधश्च । तथा सिद्धेः परिव्रजेदित्यःन्य उक्तत्वात् । यदहरेव विरजेत्तदहरेव प्रव्रजेदिति श्रुतेश्चा अ ।
आश्रमादाश्रमं मितिसमुच्चयपक्षमुपोद्बलयति । ब्रह्मचर्याद्गार्हस्थ्यं ततो वनवासं संन्यासं कुर्यात् । भिक्षाबलिपरिश्रान्तः
भिक्षादिदानेनापासितः । तथा च जाबालश्रुतिः । ब्रह्मचर्यं समाप्य गृही भवेत् गृही भूत्वा वनी भवेत् वनी भूत्वा
प्रव्रजेदिति । मोक्षे निवेशयेत् मोक्षशब्देनात्र संन्यास उपलक्ष्यते । प्रधानाधिकारत्वेन संनिहितत्वात् । अधीत्ये
त्यादिकणत्रयनिराकरणप्रकारकथनं । तथा च श्रुतिः । जायमानो वै ब्राह्मणस्त्रिभिरृणवा जायते यज्ञेन देवे
भ्यः प्रजया पितृभ्यः स्वाध्यायेन ऋषिभ्य एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारीति । आश्रमसमुच्चयस्यापरिपक्वकषा
यं प्रति प्रवृत्तत्वात् परिपक्वकषायस्य यदि संन्यासमनुतिष्ठति तदा प्रत्यवैति त्याह अनधीत्येत्यादि । आश्रमत्र
यीक्तधर्मानुष्ठानवतश्च कषायपरिपाकस्यावश्यकत्वादधिकारिविशेषणं संपन्नोत तदनुष्ठानं युक्तं तदनावेत्
८ उत्पद्यते इत्यर्थः । पक्षांतरनिंदया समुच्चयपक्षं स्तौवैपन्नमुदितहोमनिंदयोदितहोमस्तुतिवद्विधिस्तुतिः प्रतिभाति ।
आश्रमचर्यानुष्ठानेति तु कषायपाको वश्यं भवति । तदुक्तं नारदेन । कषायं पाचयित्वा तु श्रेणिस्थानेषु त्रिषु प्रव्रजेत
[illegible]स्थानं परिव्राजकः त्रयाणामनुत्तमां श्रेणिस्थानेषु त्रिषु ब्रह्मचर्याश्रमेषु [illegible] वनवासादूर्ध्वं शांतस्य
परिणतवयसः कामतः प्रव्रज्यतमेवाग्निसात्मन्यारोप्य पतनतरपजोत्मनो [illegible] ह्रत्कोशकोकदौहन्तस्य कालेनानुवित

Indira Gandhi National Centre for the Arts

॥मी०न०१॥ रेऽनवस्थितत्वान्मनसः प्रद्वाहानिय॥ एवं दतितस्मान्मध्यमा सीतदतहरेव संन्यसेत्सर्वं इन परिग्रहात्त्यजेति। अप्र
२० नाणंसमुच्चपोद्देधा अयाणांव तुर्णां दानत्र यस्ताग्रहएवकषायपरिपाकं पूर्वमेवस्वात्मन्येवात्मानमायज्ञायाणां प्राजु
पंत्यकल्पयतिस्म रहादेवाय प्रसंकल्पितत्वतुष्टयस्य मुख्यं संवन्नादेवेतित्यवस्थितो विकल्पः। तदपि वेत्थैवाह
याज्ञवल्क्यः। वनाद्गृहाद्वाकृत्वेष्टिं सर्ववेदसदक्षिणां। प्राजापत्यां तदंते तानग्नीनारोप्य चात्मनि। अधीतवेदो जपकृ
त्पुत्रवानन्नदोग्निमान्। शक्त्या च यज्ञकृन्मोक्षेमनः कुर्यात्तु नान्यथा। अग्निमान्‌ आहिताग्निः। वनाद्गृहाद्वाग्रामु
पलक्षणं। पत्एजन्मांतरीणाश्रमधर्मानुष्ठानेन कषायपरिपाकात्‌ ब्रह्मचर्यएव वैराग्योत्पत्तिस्तेन ततोपि संन्या
सो ह्येयः। तथाच श्रुतिः। यदिवेतरथा ब्रह्मचर्यादेव प्रव्रजेद्गृहाद्वा वनाद्वेति। इतरथा ब्रह्मचर्य एव सति वैराग्ये।
नतु अनपाकृतमोक्षं तु सेवमानो व्रजत्यधः इति मनोरधीत वेद इति याज्ञवल्क्यस्य च वचनं कथं तथा स्याद्विति
चेन्न। उक्तश्रुतिविरोधेनानन्यगत्या पूर्वोक्त एव वचनद्वयस्य तात्पर्यात्‌। अन्ये तु प्रजोत्पादनादेः कृतदारपरिग्र
हाधिकारिकत्वेन दारपरिग्रहस्य च रागप्रयुक्तत्वेन विरक्तं ब्रह्मचारिणं प्रति प्रजोत्पादनयज्ञावश्यकताबोध
कवाक्यस्याप्रवृत्तत्वेन न तद्विरोधः। न च प्रागलभ्यायाः करणविधिरेव दारपरिग्रहमाक्षिपतीति वाच्यं। विद्याध २०
नार्जननियमवदन्यप्रयुक्तदारपरिग्रहसंनिवेशस्यानाक्षेपकत्वात्‌। न च जायमानो वै इति वाक्यं जायमानस्ये

व प्रजोत्पादनादीन्यावश्यकानीति वक्तीति वाच्यं। जातस्याकृतदारस्याग्निदरिग्रहस्य यज्ञादावनधिकारादधिकारी
जायमानो यज्ञाद्यनुतिष्ठेदिति वाक्यार्थः। तथा चोपनीतस्य वेदाध्ययनमेवावश्यकं कृतदारपरिग्रहस्यैव प्रजोत्पादना
दि नियम इति न कोपि विरोध इत्याहुः। अत एव नृसिंहपुराणे। यस्यैतानि सुगुप्तानि जिह्वोपस्थोदरं शिरः। संन्यसेदकृतो
द्वाहो ब्राह्मणो ब्रह्मचर्यवान्‌। शिरः शब्देनात्र तन्निष्ठानीन्द्रियाणि गृह्यंते मंदाः केशांतीति वत्‌। अत्र विरतः संसारमेव नि:सा
रं दृष्ट्वा सारदिदृक्षया। प्रव्रजत्यकृतोद्वाहः परं वैराग्यमाश्रितः। प्रव्रजेद्ब्रह्मचर्येण प्रव्रजेच्च गृहादपि। वनाद्वा प्रव्रजे
दित्यन्वेवमाश्रमवत एव संन्यास इत्यायातं तथा च विधुरादीनां सति परमवैराग्ये संन्यासो न स्यादिति चेत्‌। श्रुत्यान
द्विरुक्तवाक्यानां तदाश्रमवत एव संन्यासेधिकार इत्यवगतावपि किंतु परवैराग्यवत एवेति सोवैराग्योत्पत्तिस्तत एवाश्र
मान्तरमनापन्नमिति तथा च विधुरादीनामपि संन्यासाधिकारः वैराग्यसिद्धौ संन्यासाश्रमपरिग्रहे वाधकाभावा
त्‌। तथा च श्रुतिः। अथ पुनर्व्रती वाव्रती वा स्नातको वास्नातको वा सान्निरनग्निको वा यदहरेव विरजेत्तदहरेव प्रव्र
जेदिति। यमोपि। पुनर्दारक्रियाभावे मृतभार्यः परिव्रजेत्‌। वनस्थो धूतपापो वा परं पंथानमाश्रयेत्‌। नीहृतमवे
दापेसति कुटीचकद्बहूदकसंन्यासिनोः परिपारमहंस्यमुक्तं जाबालश्रुतौ। त्रिदंडं कमंडलुं शिक्यं पात्रं जलप
वित्रं शिखां यज्ञोपवीतं चेत्येतत्सर्वं भूः स्वाहेत्यप्सु परित्यज्यात्मानमन्विच्छेदिति। तस्माद्यदैव तद्वैराग्यं तदे

॥मी०प्रा०॥ २१ त्ववान्सेदिति फलितं। तथा च मनुः। आगारादभिनिष्क्रान्तः पवित्रोपचितो मुनिः। समुपोढेषु कामेषु निरपेक्षः परिव्रजे
दिति। पवित्रोपचितः पवित्रैर्दर्भजपैरुपचितो युक्तः। समुपोढेषु विषयेभ्यः कामेषु समुपोढेषु प्रसंन्नतेषु। एतत्काम्यंत
इति कामा विषयास्तेषु स्रक्चन्दनादिषु भोजनादिषु पराचीनतो नीता दिशा येषु संनिहितेषु वा आदिषु वा समुप
स्थितेषु। निरपेक्षः अचंचलमनाः परिव्रजेत। आगमेयः। रागादि विषयासंगं च वदारः यत्नाशुनो। लोकया
त्रानयैव वत्यन्तं संन्यासकच्चते। उत्पत्तिगणव संन्यासे विकायतदुत्पर्थः। अंगिराः। पदाः पन सिसंजातं वैत
स्ये सर्ववस्तुषु। तदा संन्यासमिच्छंति पतितस्याद्विपर्यये। यमश्चात्र विदवस्तलोको दमान्वयेत् समस्त सर्वेषु भूतेषु
स्थावरेषु स्थावरेषु च। उत्पन्नज्ञान विज्ञानो वैराग्यं परमं गतः। प्रव्रजेद्ब्रह्मचर्यात् यदीच्छेत्परमां गतिं। सोरघराणो पदा
नतस्ति वैराग्यं जायते सर्ववस्तुषु। तदैव संन्यसेद्विद्वानन्यथा पतितो भवेत्। वैराग्यमविनकोमलकंटका पमानंमपि
तुरष्टतरसेवा। तथा च बृहस्पतिः। यस्मिन्कामाः प्रशान्ताः स्ते विषयेभ्यश्च संहृताः। विषयाश्च प्रवर्तंति सकैवल्याश्रमे
वसेत। यस्मिन्क्रोधः शमं याति विफलः सम्प्रयुज्यते। आकांक्षा सिर्यया ज्ञितम् स कैवल्याश्रममावसेत। अंगिराः २१
। अंधः पंगुर्दरिद्रो वा विरक्तः संन्यसेद्द्विजः। सर्वेषामेव वैराग्यं सन्तु विधीयते। व्यासः। परमात्मनि यो रक्तो विरक्तो
परमात्मनि। सर्वेषणाविनिर्मुक्तः स भैक्षं भोक्तुमर्हति। आतुरस्यापि संन्यासः तथा च श्रुतिः। यद्यातुरः स्यात

न्मनसा वाचा संन्यसेदिति। अत्र यदि रथंतरसामा सोमस्यादिं देवायवचानयहृन्त गृह्णीयादित्यत्र रूपस्या। ऐन्द्र यदि रोथे
तरथंतरसामा सोमः स्यादिति तदैन्द्रवायवाग्रग्रहणं कार्यमिति। यदि ज्ञानस्य व्यवधानान्वयेन लिङ्गं च कामप्रवेदने कश्चिल्लिं
गा कृत्य। एवैन्द्रवायवाग्रानग्रहान गृह्णीनमिच्छेत तदा रथंतरसामा सोमः कार्य इति। एवं हेतुमल्लिङ्गं ग्रहणवाक्यं गाक
त्पश्च द्वय ग्रहणस्य फलस्य हेतु रथंतरसामा सोमः कार्य इति। यदा हि रथंतरसामा सोमस्यादिति हेतौ लिङ्ग ग्रहाग्र
स्यात्र ह्नीयादिति विधौ लिङ्। तत्तश्च रथंतरसामसोमहेतुक ग्रहाग्रत्वं कार्यमिति एवं संन्यासिनांकाश्चित्कि हेतुवि
तास्यैवस्तात्तं रूप्यधाराहार व्यवधानान्वयकामप्रवेदनहेतुहेतुमल्लिङ्गः न्यतमम न्युपेत्य यदि रोथे तातुरस्यादितिवदा
संन्यसेदिति। यदि मनसा वाचा वा संन्यसेतु विच्छेत्तदातुरः स्यादिति संन्यासस्य फलस्यादेतु रातुरः कार्यइति
आतुरहेतुक संन्यासः कार्य इत्यादि रूपाणां मसंनवगचा यज्ञतयं तावत्र संचवति आतुरतायाः विधेयत्वा
तावत्कृत्वो विनष्टतं तदैवं न्यात। सोमयागस्य हि रोपित्वात पयोजकत्वा रथंहेतुत्वं संचरति नत्वातुरतायाः अशेषि
त्वात। निमित्ततायाश्च प्रथमं संनवाश्चात्तस्माद्वचयदि ज्ञात पतित्यागेना तुरस्त्वक प्रयोगं तरं वाक्यांतरो त्पन्न संन्या
सस्यादेच्याधिकरणन्यायेन विधीयते। यत्तु कर्मांतरस्तेव ययातुरस्यादित्यनेनोच्यत इति तद्वलवद्युक्त्यन्ना
वेक्षी देत्यमिति। दक्षः। अंगिराः। वनाद्वा प्रव्रजेद्विद्वानातुरो वाथ दुःखितो व्याधितो लोकवीरव्याघ्रयुपद्रुतः। अत्रोत्तरी

॥मी०त्र१॥ ह ...॥ तथा महाभारते शान्तौ संकटे घोरे चौरव्याघ्रादिसंकुले नष्टेति तस्य संन्यासमंगिराः प्रनिरब्रवीत्। अनातुराणां च स
न्यासे न विधिर्नैव च क्रिया। एवमयं समुच्चयसंन्यासं तत्र इच्छति। आश्रमे ब्राह्मणस्यैवाधिकारः। आत्मन्य
ग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद्गृहात् तथा एव तां विहितेः धर्मो ब्राह्मणस्य चतुर्विधः तूपक्रमोपसंहाराभ्यां ब्र
२२ नाब्राह्मणस्यैवाधिकारप्रतिपादनात्। ब्राह्मणाः प्रव्रजंतीति श्रुतेः। ब्राह्मणो ब्रह्मचर्यवानिति नृसिंहपुराणात्।
ब्राह्मणो मोक्षमाश्रयेदिति यमोक्तेः। योगियाज्ञवल्क्योक्तिवत्वात्। ब्राह्मणस्यैव का आश्रमाः श्रुतिनोदिताः। गा
र्हस्थ्यं ब्रह्मचर्यं च वानप्रस्थं च यो मताः। क्षत्रियस्यापि कथिता य आचाराद्द्विजस्य हि। ब्रह्मचर्यं च गार्हस्थ्यमा
श्रमद्वितयं विशः। गार्हस्थ्यमुचितं त्वेकं शूद्रस्य क्षणदाचरेदिति। न तु शूद्रस्याश्रमान्तरं चनास्ति चत्वार आश्रमा
स्तन्नतेषु शूद्रस्तु नार्हतीति निषेधात्। ननु शूद्रस्य कथं गार्हस्थ्यंगीकार इति चेत्। न समंत्रकस्याश्रमपरि
ग्रहस्यानिषिद्धत्वेनामन्त्रकदारपरिग्रहे गार्हस्थ्यस्वीकारे बाधकाभावात्। कथमन्यथा विवाहप्रकरणोदा
हृतातिग्रहस्य धर्मं पंचमहायज्ञादिश्चोदात्तानि शूद्राधिकारिकानि स्वनामप्रपदीरन्। तस्मादस्ति शूद्रस्य गा २२
र्हस्थ्यं। ननु चाराते शूद्रश्चरस्तूपाक्रमपक्रम्य आश्रमावि हिता सर्वं वर्जयित्वा निराशिषो निराशीर्वचपरिशा
ज्य। तथा च संन्यासातिरिक्तस्याश्रमत्रयस्य सत्त्वात् कथं गार्हस्थ्यमेव शूद्रस्येति चेत्। न। नापरार्थः प्रकृतत्वा

त्वस्य सर्वआश्रमास्तेन कर्तव्या इति किं तर्हि त्रैवर्णिकशुश्रूषया पुण्यजोत्पादनेनायं सर्वाश्रमफलं लभते न पारिव्राज्य
फलमिति निषेधाति विनाव्याख्यातत्वात्। संन्यासस्तु विप्रस्यैव तथा च माधवोदाहृतस्मृत्यंतरं। मुखजानामयं धर्मो य
द्विष्णोर्लिंगधारणं बाहुजातोरुजातानामयं धर्मो न विद्यत इति। अन्ये तु संन्यासस्त्रैवर्णिकाधिकारिकः। अधीतवेदस्य
द्विजातिमात्रस्य समुच्चयविकल्पाभ्यामाश्रमचतुष्टयस्य बहुस्मृतिषु विधानात्। अत एव याज्ञवल्क्येन संन्यासप्र
करणे। द्विजशब्दः प्रयुक्तः। संनियम्येंद्रियग्रामं रागद्वेषौ प्रहाय च। भयं हित्वा च भूतानाममृतीभवति द्विज इति। स्मृत्य
र्थसारेऽपि। ब्राह्मणः क्षत्रियो वाऽथ वैश्यो वा प्रव्रजेद्गृहात्। कूर्मपुराणेऽपि।
अग्नीनात्मनि संस्थाप्य द्विजः प्रव्रजितो भवेदिति। पूर्वोदाहृतवचनानि तु क्षत्रियविशोः काषायदंडधारणनिषेध
पराणि। तथा च बौधायनः। ब्राह्मणानामयं धर्मो यद्विष्णोर्लिंगधारणं। राजन्यवैश्ययोर्नेति दत्तात्रेयमुनेर्वचः। अयं
च तात्पर्यार्थः। अबाधेनोपपत्तेर्न बाधनं युज्यत इति न्यायेन श्रुतिस्मृतिवाक्यविरोधपरिहाराय विविधवाक्यानामाश्रम
स्वरूपविधौ तात्पर्यं निषेधवाक्यानां तु दंडग्रहणमात्रनिषेधे तात्पर्यं। तस्मात्क्षत्रियविशोर्दंडमात्रनिषेधो न त्वाश्र
मनिषेध इत्याहुः। अन्ये त्वाहुः। श्रुतिविरोधे तु श्रुतिरेव बलीयसी। ततश्च श्रुत्यनुसारेण व्यवस्था विधीयते। ब्राह्मणाः
प्रव्रजंतीत्यत्र ब्राह्मणकर्तृकप्रव्रज्याविधानेन ब्राह्मणत्वस्य विवक्षितत्वात्। न च ब्राह्मणोद्देशेन प्रव्रज्याविधानेत

Indira Gandhi National Centre for the Arts

यान्वीक्षिकीविशेषणत्वेनाविवक्षितिवाच्यं उद्देश्य विशेषणस्याविवक्षायामपि उद्देश्यस्वरूपांतर्गतविनश्यत्त्ववतब्राह्मणत्व
॥मो॰प॰॥ स्यतत्त्वाविविवक्षोपपत्तेः नत्वब्राह्मणवेदान्तविज्ञानस्वदध्ययनवतोब्राह्मणक्षत्रियविशस्त्रयो विकीर्णीकृतानेव
स्मिन्नेवंवचनात्पत्यधिकार इति चेत् मैवं रूढियोगमपहरतीति न्यायेन रूढार्थस्य प्रथमोपस्थितस्य ग्रहणोपपत्ते
१२ वर्णोपस्थितियोगरूढीकरणस्यानुचितत्वात् ननु जायमानो वै ब्राह्मणस्त्रिभिर्ऋणैर्वा जायत इत्यत्रैव ब्राह्मणशब्द
स्त्रैवर्णिकपरइतिचेत् मैवं दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यात् तथाहि ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृ
भ्य इतिवाक्यशेषे ब्रह्मचर्यादिनिर्देशेन यथाप्रकरणप्रतीतब्रह्मचर्यादिपूर्वत्रैवर्णिकस्याधिकारात् युज्यते तत्र
त्रैवर्णिकपरत्वं प्रकृते तु तथा त्वात् तस्मादपि प्रव्रजेद्गृहादि ति प्रव्रज्याधिकारं दर्शयति अत एव ब्राह्मणः क्षत्रियो वा
एवं व्रजेदित्यादि प्रव्रज्याधिकारदर्शनेऽथ शब्दप्रयुक्तः ब्राह्मणः कथ्यानंतरं क्षत्रियवैश्ययोरपि ब्राह्मण्यस्य
भक्षितवैश्यो वा प्रव्रजेत् ग्रहादित्यत्र प्रव्रज्याधिकारदर्शने प्रयुक्तः ब्राह्मणः क्षत्रियो वैश्यस्ततो गच्छेद्गृहं
क्षत्रियश्चैव वैश्यः सोपि प्रव्रजेत् सूत्रमप्येवमेव व्याकर्तव्यं अत एव ब्राह्मणः क्षत्रियो वैश्यस्ततो गच्छेदनं २३
ति संन्यासे ह्याचारांतरत्वेन दर्शितव्याख्यातं उत्तरार्द्धे वा आश्रमांतरवाक्यांतः ब्राह्मणः शमोदमस्तपः शौचमित्यादि
नागमिता यांशांतेब्राह्मणलक्षणत्वोक्तेः अत एव दत्तात्रेयः अतिस्क्तर्यामनेनास्तिबाहुजोरुजयोः क्व
चित्तुदर्शनमेतनिष्क्रमुखजानां स्वपंक्तौ मदनपारिजाते वचनांतरं संन्यासे ब्राह्मणः सम्यक् पानप

स्थानदेपः पूर्ण द्रस्यो त्रैदेह्य एवं त्रैवर्णिकमस्तत इति नत्वजडनरतं प्रत्युपदेशावैगिरहंसोपदिष्टत्वोः पदं शांत
मनायां संशाष्टतं पदमिछुरसितस्पर महंसोनवेति तथाचक्षवं विप्रस्यैवाधिकार इति चेन्नाष्णुणु किं जडनरतं प्रत्ये
तोपदेशः किं वा लक्षणपाद त्रियमावेव प्रतिज्ञाचेन्नरतस्यैवाधिकारोनेतरस्येत्यापन्नं क्षत्रियाधिकारस्यता
वत्सिद्धेः लिंगदर्शनस्यचोदात्तृतश्रुतिस्मृतिभ्यां बाधितत्वेनासाधकत्वाच्चापत्तावित्रैवर्णिकानां संन्यासः क
विशदस्ततः तृतीये तेन चाप्युक्तश्रुतिबलेन संन्यासिनः त्रैवर्णिनं मतं संपादयेदित्यर्थः वस्तुतो जडनरतनात्
जन्मनैवेति ब्राह्मणीभवतेः सिद्धितत्वात् तं प्रति संन्यासोपदेशोन क्षत्रियस्याधिकारमापादयतीति तत्वं नहि
तीयोलक्षणपाः प्रमाणं विनास्वीकर्तुमनुचितत्वात् एतेन पञ्चाबालश्रुतौ जनकयाज्ञवल्क्यसंवादे परम
हंसकानाम संवर्तकारुणिश्वेतकेतुदुर्वासोऋभुनिदाघजडभरतदत्तात्रेयरैवतकप्रभृतयइति तद्विव्या
ख्यातं एतदेव मदनपारिजातमदनरत्नाभ्यामुपपादितं द्विजपदस्यापि ब्राह्मणपरतयोपसंहारात्तत्परत्वं
सामान्यशास्त्रस्यविशेषपरतापा एवलक्षणेनापत्यः आग्नेयं चतुर्द्धाकरोतीतिवत्न्यायप्रत्वात् ब्राह्मणशब्द
वोदाहृतवद्बहुवाक्यस्य स्पसंकोचस्यान्याय्यत्वात् श्रौतब्राह्मणशब्देलक्षणाप्रत्ते स्मृत्यंतरस्यचपामातिके
त्युदाहृतत्वेन निर्मूलत्वात् सम्मूलत्वेपि रक्तस्य क्षत्रियादेर्जन्मांतरीयपुण्यसंस्कारदर्शायितालोपसनं

Indira Gandhi National Centre for the Arts

स्वाच्छंद्येन कर्तुं दुराणामीत्युपरत्वोपपत्तेः। अत एव पद्मे। सर्वविकर्मशास्त्रे तेपथाशास्त्रं निषेविनाः। यथोक्तकारिलिंगि
ऽनर्थेतिपरतोगतिमितिविज्ञातदितस्परतुल्यसमुच्चयस्य फलमाह। यज्ञत्रियादेः कषायदंडानावपरतया गृहस्था
कथनेतदविना। योगयाज्ञवल्क्येन द्वाविंशस्य चतुराश्रमा इत्यनेन संन्यासाश्रमस्यैव परिसंख्यातत्वात्। आश्र
मरहस्यकषायदंडपरत्वे लक्षणापत्तेः। विष्णुलिंगद्याचेन संन्यास एव विवक्षित इति बौधायनवाक्यमथस्म
रत्नकूलमेव। किंच ब्राह्मणस्य संन्यासिनः कषायाद्यनावपरत्वे शुक्लवस्त्रधारणस्य पालित्यहेतुतया वद्भ्यमा
णत्वात्तस्य संकोचः। इंद्रस्य वज्रोसीति ब्राह्मणवैणवान्दंडान्दक्षिणपाणौ धारयेदेकं वेति संन्यासिसामान्यं प्र
तिदंडविधायकमैत्रायणीयश्रुतिसंकोचश्च स्यात्। इति। एवं नित्योमहिमा ब्राह्मणस्य न कर्मणा लिप्यते नो कनी
यानिति बौधायने दान्दतश्रुतौ ब्राह्मणग्रहणात् ब्राह्मणस्यैवाधिकार इति कल्पतरूक्तं षष्ठांते ब्राह्मणध
र्मत्वाद्वर्णान्तरस्यमितिमेधातिथिनलितेवाल कल्पतरमिति दिक्। तस्माद्ब्राह्मणस्यैवाधिकार इति सिद्धं।
अथानधिकारिणः। आरूढपतितापत्यं कुनखी श्यावदंतकः। क्षयी गतांगविकलो न संन्यासमर्हति।
प्रत्यवसितानां च महापातकिनां तथा। व्रात्यानामभिशस्तानां संन्यासं नैव कारयेत्। व्रतयज्ञतपोदान
होमस्वाध्यायवर्जिता। सत्यशौचविहीनश्च संन्यासं नैव कारयेत् इत्यादि पठ्यमानस्त्वनैरवगंतव्याः। संन्या

२४

ससंकल्पान्निरत्नं प्रत्याह वसिष्ठः। अभयं सर्वभूतेभ्यो दत्त्वा निवर्तते। इति जानानजातोऽप्रतिग्रहात्ययश्च निर
र्णति च व्रयते पारिव्राज्यादित्यर्थः। संन्यासनिश्चयं कृत्वा पुनर्न च करोति यः। स कुर्यात्कृच्छ्रमश्रांतः षण्मासान्प्रत्य
हं द्विजः। प्रत्यहं नैरंतर्येण संन्यासं पातयेद्यस्तु पतितं न्यासयेत्तु यः। संन्यासविघ्नकर्ता च त्रीनेतान्पतितान्विदुः।
अथ संन्यासफलं। तत्र वसिष्ठः। परिव्राजकः सर्वभूताभयदक्षिणां दत्त्वा प्रतिष्ठेत। अथाप्युदाहरंति। अभयं स
र्वभूतेभ्यो दत्त्वा चरति यो मुनिः। तस्यापि सर्वभूतेभ्यो न भयं जातु विद्यते। बृहदारण्यके एतमेव प्रव्राजिनो लोक
मिच्छंतः प्रव्रजंति। छांदोग्ये ब्रह्मसंस्थोऽमृतत्वमेति। न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुरिति तैत्ति
थ परिव्राड्विवर्णवासा मुंडोऽपरिग्रहः शुचिरद्रोही भैक्षमाणो ब्रह्मभूयाय कल्पत इति। एतेन वंति स्कन्दतस्य लोके
येषां कुले संन्यासी तीह विप्रः। संन्यासाद्ब्राह्मणस्थानं वैराग्यात्प्रकृतौ लयः। ज्ञानात्कैवल्यमाप्नोति इति त्रिसप्तागतस्व
तारयति विभुः। एकरात्रोषितस्यापि पर्यायाः ... न सा शक्या क्रतुसहस्रेण प्राप्तुं क्रतुशतैरपि। मंतव्यमिति योगपातपा
लैः कंटगतैरपि। न तत्क्रतुशतेनापि प्राप्तुं शक्यो तिमानवः। संन्यस्तं तं द्विजं दृष्ट्वा स्थानाच्चलति भास्करः। एष मे मंडलं
भित्त्वा परं ब्रह्माधिगच्छति। दशतः त्रिंशत्परानत्रिंशत्परांस्त्रिंशच्च परतः परान्। सद्यः संन्यसनादेव नरकात्तारये
त्पितृन्। ज्ञानवान् चतुर्वेदस्तु यो विप्रः सोमयाजी शतक्रतुः। तस्मादपि यतिश्रेष्ठ इति। ... पर्वतो पथा। कपिलः।

Indira Gandhi National
Centre for the Arts

न्यस्तमितियो ब्रूयात्प्राणैः कंठगतैरपि सोऽक्षयानलमते लोकान्पुनर्जन्म न विद्यते अंगिराः षष्टिः कुलान्यतीतानि
षष्टिमागमिकानि च कुलान्युद्धरते प्राज्ञः संन्यस्तमिति यो वदेत् येच संतानजा दोषा ये च स्युः कर्मयोनयः संन्यासस्ता
न दहेद्दोषानतृणाग्निरिव कांचनं मनुः यो दत्वा सर्वभूतेभ्यः प्रव्रजत्यभयं गृहात् तस्य तेजोमया लोका भवंति ब्र
ह्मवादिनः तथा प्रायश्चित्तार्थमपि संन्यास श्रूयते यथाहमनुमृत्तो यैरुच्यते शोध्यं नदी वेगेन शुध्यति रजसा
स्त्री मनो दुष्टा संन्यासेन द्विजोत्तमः तथा अनेन क्रमयोगेन परिव्रजति यो द्विजः स विधूयेह पाप्मानं परं ब्रह्माधि
गच्छति तथा ब्रह्मचारी गृहस्थो वा वानप्रस्थोथवा पुनः यइच्छेन्मोक्षमास्थातुमुत्तमां वृत्तिमाश्रयेत् एवं मोक्षब्र
ह्मलोकपापक्षयरूपफलानां व्यवस्था परमहंसस्य मोक्षः कुटीचकबहूदकयोः पितृद्वारादि हंसस्य ब्रह्मलोकः
पापक्षयस्तु सर्वत्रानुषंगिकं फलं व्यक्ती भविष्यति चैतदुपरिष्टादनुपदं वक्ष्यमाणवचनेभ्यः तेच संन्यासिनश्चतुर्वि
धाः भारते चतुर्विधा भिक्षवस्तु कुटीचकबहूदकौ हंसः परमहंसश्च यो यः पश्चात्स उत्तमः हारीतोपि चतुर्वि
धा भिक्षवस्तु प्रोक्ताः सामान्यलिंगिनः तेषां पृथक्पृथक् ज्ञानं वृत्तिभेदात्परिस्फुटं पितामहोपि चतुर्विधा भिक्ष
वस्तु प्रख्याता ब्रह्मणो मुखात् कुटीचको बहूदको हंसश्चैव तृतीयकः चतुर्थः परमो हंस संज्ञाभेदैः प्रकीर्ति
ताः एतेषां च भेदो अधिकारिविशेषण वैराग्यतारतम्यात् तथाच माधवोदाहृत पुराणे विरक्तिर्द्विविधा प्रोक्ता ती



व्रा तीव्रतरेति च सत्यामेव तु तीव्रायां न्यसेद्योगी कुटीचके शक्तो बहूदके तीव्रतरायां हंसे संस्थितः मुमुक्षुः परमहंसे
साक्षाद्विज्ञानसाधने अयमर्थः यदा तीव्र वैराग्यमैहिके पुनरावृत्तिस्यात्पारलौकिकेपि विरक्तः स एवाशक्तस्ता
त्काम कुटीचकः शक्तो बहूदकः अत एव प्रजापतिः कुटीचको नाम स्व गृहेव वर्तमान इति बौधायनोपि कुटीचकाः
परिव्रज्य स्वे स्वे वेश्मनि नित्यशः भिक्षां बंधुभ्य आदाय भुंजते शक्तिसंक्षयात् बहूदकस्तु सर्वदा अटनशीलत्वा
त् शक्तः १ स्वर्गादौ विरक्तो पि पुनरावृत्तिवर्जितब्रह्मलोकात्मक गौणमुक्तौ सक्तस्तीव्रतरविरक्तः स हंसः केवलनि
र्गुणात्मभावमाकांक्षमाणो गौणमुक्तिमपि सर्वथा नापेक्षते ज्ञानैककारणः स परमहंसः एवं चतुर्विधासंन्यासिन २
तेषां चतुर्णामपि साधारणेतिकर्तव्यतोच्यते विशेषस्तु तत्र तत्र दर्शयिष्यते अथ विरक्तः संन्यसितुकामः स्वस्य योग्य
तासिध्यर्थं यथायोग्यं प्रायश्चित्तं समाचरेत् यथाह कात्यायनः कृच्छ्रांस्तु चतुरः कृत्वा पावनार्थं हि नाश्रमी आश्रमीचे
न्मासकृच्छ्रं तं नाम संयोग्यतां व्रजेत् कृच्छ्रादि लक्षणानि च प्रायश्चित्तप्रकाशोक्तानि योग्यता संपत्यनंतरं कात्यायमाह बोधा
यनः दैवमार्षकं दिव्यं पित्र्यं मातृकमानुषे भौतिकं चात्मनश्चांते अष्टौ श्राद्धानि निर्वपेत् शौनकः एकैकस्मिन्दिने कु
र्यात् एकैकं श्राद्धमुत्तमं नांदीमुखविधानेन विधिरेषां प्रकीर्तित इति तत्र देवता आह स एव वसवोष्टौ स्मृतास्तत्र
रुद्रा एकादशापि च तथैव द्वादशादित्या देवश्राद्धेषु देवताः मरीचिरंगिरसौ पुलस्त्यः पुलहः क्रतुः



Indira Gandhi National
Centre for the Arts

चेताश्च वसिष्ठश्च आर्ष्टिषेणभृगुनारदौ दिव्ये हिरण्यगर्भश्च वैराजपतिरेव च सनकश्च सनंदश्च तृतीयश्च सनातनः क
पिलश्चासुरिश्चैव वोढुः पंचशिखस्तथा एते मानुषके श्राद्धे मनुष्याः सप्त देवताः पृथिव्यापस्तथा तेजो वायुराकाशमेव च
एतानि पंचभूतानि भूतश्राद्धे तु देवताः पितृश्राद्धे कव्यवानलो नलः सोमोर्यमा तथा अग्निष्वात्ता बर्हिषदः सोमपाश्चैव देव
ताः गौरी पद्मा शची मेधा सावित्री विजया जया देवसेना स्वधा स्वाहा मातृश्राद्धे तु देवताः आत्मश्राद्धे देवता तु परमात्मा प्र
कीर्तितः हेमाद्रौ तु दिवश्राद्धे ब्रह्मविष्णुमहेश्वरा देवताः ऋषिश्राद्धे देवर्षिब्रह्मर्षिक्षत्रर्षयः क्वचित्तु अर्थे देवर्षिक्षत्रर्षिमनु
ष्यर्षयः दिव्यश्राद्धे वस्वादित्याः मनुष्यश्राद्धे सनक सनंदन सनातनाः भूतश्राद्धे पृथिव्यादीनि भूतानि चक्षुरादीनि करण
नि चतुर्विध भूतग्राम इति तिस्रः पितृश्राद्धे पितृपितामहप्रपितामहाः मातामहप्रमातामहवृद्धप्रमातामहाः मातृश्राद्धे मा
तृपितामही प्रपितामह्यः आत्मश्राद्धे आत्मपितृपितामहाः एते सर्वे नांदीमुखविशेषणवंतः यतश्शौनकप्रोक्ते संन्यासविधौ प
ठ्यते अथातः संन्यासविधिं व्याख्यास्यामः पूर्वेद्युर्नांदीमुखश्राद्धं कुर्याद्देवऋषिदिव्यमनुष्यभूतपितृमात्रादीनां पृथक् पिंड दा
नैर्युग्मैर्ब्राह्मणैरष्टौ श्राद्धानि कुर्यादिति एतेषां श्राद्धानां संन्यासार्थत्वेन कर्मांगत्वात् इष्टिश्राद्धे क्रतुदक्षाविति विश्वेदेवाः सत्यवसु
संज्ञका वा सत्यो नांदीमुखे वसुरिति वचनात् नृसिंहपुराणे तु एवं वनाश्रमे तिष्ठन् तपसा दग्धकिल्बिषः चतुर्थमाश्रमं गच्छेत्संन्य
स्य विधिना द्विजः दिव्यपितृभ्यो देवेभ्यः स्वपितृभ्यश्च यत्नतः दत्वा श्राद्धमृषिभ्यश्च मनुजेभ्यस्तथात्मने इष्टिं वैश्वानरीं कृत्वा २६

प्राजापत्यामथापि वा अग्नीन् स्वात्मनि संस्थाप्य मंत्रवित्प्रव्रजेत्पुनरित्युक्तेः स्वपितृश्राद्धमपि कुर्यात् अत्रिः कृत्वा तु सं
स्कृतं पाकं हविष्यं स्वादु भोजनं हृदि यज्ञेश्वरं ध्यायेत् देवं नारायणं प्रभुं आरभेत्सर्वकर्माणि स्नानादीनि विधानतः तर्पयेद्दे
वसास्नात्वा मंत्रपूर्वं द्विजोत्तमः देवान् ऋषीन् मनुष्यांश्च भूतानि च यथाक्रमं तर्पयित्वा नमस्सर्वान् पुनः श्राद्धेन तर्पयेत् पार्व
णं च तथा हृद्यं श्राद्धं कुर्याद्यथाविधि दद्यान्नांदीमुखेभ्यश्च पिंडानक्षतसंयुतान् श्राद्धदेवान् नमस्कृत्य यथोक्त श्रुतिशासना
त् एकैकमंत्रवत्पिंडो देयस्तूष्णीमथापरः सर्वत्रैते प्रकर्तव्या नांदीमुखविशेषणं इत्थं प्रयततो विद्वान् हृष्टपुष्टेन चेतसा
प्रदक्षिणं ततः कृत्वा नमस्कृत्य द्विजोत्तमान् दातव्यमिति तान् ब्रूयात्प्रणम्य शिरसा ततः संन्यासार्थमया श्राद्धं कृतमेतद्द्वि
जोत्तमाः अनुज्ञां प्राप्य युष्माकं सिद्धिं यास्यामि शाश्वती परेद्युरिष्टिपूर्वकं कर्तव्यमाह बौधायनः अथातः संन्यासविधिं व्याख्या
स्यामः सोत एव ब्रह्मचर्यवान् प्रव्रजतीत्येकेषां अथ शालीनयायावराणामनपत्यानां विधुरो वा प्रजां स्वधर्मे वा प्रतिष्ठाप्य स
प्तत्याद्र्ध्वं संन्यासमुपदिशंति वानप्रस्थस्य वा कर्मविरामे एष नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्द्धते नो कनीयान् तस्यै
व स्यात्पदवित्तं विदित्वा न कर्मणा लिप्यते पापकेनेति पुनर्नवनयतीति महिमाके ज्ञाज्ञमस्तुटोमनस्यानिवापयित्वोपकल्प
येत् संन्यासविधिं व कथं आश्रमेति कर्तव्यतां सः गर्भाधानादिवेदाध्ययनांतानुष्ठानवान् अतएव ब्रह्मचर्यवान् वि
प्लुतब्रह्मचर्यवानविप्लुतब्रह्मचर्यः प्रव्रजति संन्यसेदित्येकेषां दर्शनमिति शेषः विधुरे मृतभार्ये संन्यासमुपदिशंतित्य

Indira Gandhi National
Centre for the Arts

न्ययः कर्मविरामे कर्मानुष्ठाना सामर्थ्ये अत्र चतुर्विधसंन्यासस्य मुख्यत्वात् परमहंसे बृहदारण्यके यं मंत्रं साक्षितवोप
न्यस्य उत्पादितस्तं मंत्रमेव पठति एष इति प्रपंचितं चैतदधस्तात् वपनमपि सशिखशिखं स्थापयित्वेति विकल्पः मुंडः शि
खीवेति गौतमस्मरणात् मुंडो ममोऽपरिग्रह इति वसिष्ठस्मरणात् सोपि व्यवस्थित इति वदंते यदापि सर्वमुंडनं तदापि स
मष्टके शान्तकं चिकाग्रं स्थापयेत् तथा च संप्रदायविदः पठंति शेषस्य कर्मणः सिध्यै शेषान् समष्टया द्विजः संरक्ष्य वाप
येत् सर्वं केशश्मश्रुनखानि च गोभिलः ततः समाचरेत् स्नानं हेमरूप्यकुशांभसा कृत्वा तु वपनं विद्वान् भवेन्मुंडोऽथवा शि
खी माधवीदाहृत बौधायनः कृत्वाश्राद्धानि सर्वाणि पित्रादिभ्योऽष्टकं पृथक् वापयित्वा च केशादीन् मार्जयेत् मातृकादिभिः
गोभिलः स्नानमब्दैवतैः कुर्यात् तर्पयेद्देवताः पितॄन् ऋषीन् छंदांसि वेदांश्च मनुष्यांश्च यथाविधि शौनकः यथाविधि
स्नात्वा होमादि द्रव्यव्यतिरिक्तं द्रव्यजातं पुत्रादिभ्यो दत्त्वा दंडादीन् संनिधाय देवायतने वा ग्रामे वारण्ये वा पुलिने वा स्थि
त्वा ब्रह्मणे नमः इंद्राय नमः आत्मने नमः अंतरात्मने नमः परमात्मने नमः इति ब्रह्मांजलिं कृत्वा मानसं जपेत् तत आच
म्य वेदादीन् जपेत् अप उपस्पृश्य पद्मांजलिं कृत्वा वेदान् जपित्वेति शौनकोक्तेः दक्षिणजानुनि उत्तानं वामकरतलं निधा २७
य तदुपरि दक्षिणहस्ततलेन पिधाने सति ब्रह्मांजलिर्भवतीति सांप्रदायिकाः यष्टयः शिक्यं जल
पवित्रं कमंडलुं पात्रमित्येतत् समादाय ग्रामांते ग्रामसीमांते अग्न्यागारे वा अप्पं पयो दधीति त्रिवृत्प्राश्योपवसेदापो वा यष्टय

स्त्रयो वैणवा दंडाः शिक्यं जलपवित्रं वस्त्रप्रमाणं जलछालि कमंडलुः प्रसिद्धः पात्रं भिक्षापात्रं त्रिवृदिति संसृष्टमाज्यादित्रयं तद
लाभे अपः प्राश्य उपवसेत् ब्राह्मणभावसंकल्पं कुर्यात् सांप्रदायिकास्तु संसृष्टमाज्यादि त्रिवारं प्राश्नीयात् त्रिवृदसीतिमं
त्रेण प्रथमं प्रवृदसीति द्वितीयं विवृदसीति तृतीयं आपः पुनंतु पृथिवीमित्युदकं च प्राश्नीयात् त्रिवृत् प्रवृत् विवृत् वृदसी
तित्रिभिर्मंत्रैः सकृदपः आपः पुनंत्विति बौधायनस्मरणात् संसृष्टाज्यादिप्राशनात्पूर्वं सक्तुप्राशनमपि कुर्यात् अथ सक्तून्प्रा
श्नीयात् अप्सु नाभिमभिमंत्रयेत् आत्मने स्वाहांतरात्मने स्वाहा प्रजापतये स्वाहेत्यभिमंत्रणमंत्रः प्राशनं च मुष्टिपरिमितानां सक्तू
नां प्रणवेनेति प्रतिपादयंति एतदनंतरं गायत्रीप्रवेशः कर्तव्य इत्याह बौधायनः ओं भूः सावित्रीं प्रविशामि तत्सवितुर्वरेण्यं
ओं भुवः सावित्रीं प्रविशामि भर्गो देवस्य धीमहि ओं स्वः सावित्रीं प्रविशामि धियो यो नः प्रचोदयात् पच्छोऽर्धर्चशः ततः समस्त
पाद्व्यस्तपाद्वात्मानमात्मना आश्रमादाश्रममुपनीय ब्रह्मभूतो भवतीति विज्ञायते अथाप्युदाहरंति आश्रमादाश्रमं गत्वा हुत
होमो जितेंद्रियः भिक्षाबलिपरिश्रांतः पश्चाद्भवति भिक्षुकः स एष भिक्षुरानंत्यायेति पच्छः पादशः अर्धर्चशः अर्धर्चेन समस्त
या ओं भूर्भुवः स्वः सावित्रीं प्रविशामि ओं भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् इत्येवं रूपया
व्यस्तपाद्व्याख्या इति परित्यागेन ओं सावित्रीं प्रविशामि तत्सवितुर्वरेण्यमित्यादि आत्मानं गायत्रीं आत्मना स्वेन रूपेण
प्रविशेत्यर्थः भूतो विधूतपापो भवति विज्ञायते निश्चीयते पुनराश्रमादाश्रमग्रहणात् गायत्रीप्रवेशानंतरं पुनराहृत्य

Indira Gandhi National Centre for the Arts

॥मोक्ष१०॥
२८

नाव: प्रतिपाद्यते स एष भिक्षुणां त्याग कल्पतरुरिति शेषः एतावदाहिताग्न्यनाहिताग्निगृहस्थब्रह्मचारिविधुराणां समा
नं आहिताग्नेरेव कर्त्तव्यविशेषो बौधायनेनोक्तः पुरादित्यस्यास्तमयात् गार्हपत्यमुपसमाधायान्वाहार्यपचनमाहृत्य
ज्वलंतमाहवनीयमुद्धृत्यनुप्योपसमाधाय गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीत्वा समिद्वत्याहवनीये पूर्णाहुतिं
जुहोति ॐ स्वाहेति ब्रह्मान्वाधानमिति विज्ञायते अथ सायं हुते ऽग्निहोत्रेऽत्तरेण गार्हपत्यं तृणानि संस्तीर्य तेषु द्वंद्वं
न्यंचि पात्राणि सादयित्वा दक्षिणेनाहवनीयं ब्रह्मायतने दर्भान् संस्तीर्य कृष्णाजिनं चांतर्धाय एतां रात्रिं जागर्ति स एवंविद्वा
न् ब्रह्मरात्रिमुषित्वा ब्राह्मणोग्नीन्समारोप्य प्रमीयते स सर्वं पाप्मानं तरति तरति ब्रह्महत्यां अथ ब्राह्ममुहूर्त उत्थाय काल
एव प्रातरग्निहोत्रं जुहोत्यपरस्य द्वा आस्तीर्त्वापः प्रणीय वैश्वानरं द्वादशकपालं निर्वपेत्सा प्रसिद्धेष्टिः संतिष्ठते आहवनी
येग्निहोत्रद्रव्याणि प्रक्षिपति अमृन्मयपात्रमयानि गार्हपत्ये रणी अवतं तं समनसावित्यात्मन्यग्नीन्समारोपयति या ते अग्ने
यज्ञिया तनूरिति त्रिस्त्रिरेकैकं समाजिघ्रति पुरा सूर्यास्तमयात्पूर्वं उपसमाधाय प्रज्वाल्य अन्वाहार्यपचनं भिन्ने निक्षिप
न्युप्यस्थाने निचाय प्रादेशमात्रं समिधमाधाय अथ सायंकालानंतरं अग्निहोत्रहोमे कृते सति नित्यहोमे हुते सति सं
प्रदायिका स्तस्वस्वा हेत्यग्नौ होमे कृ तेसतीत्याहुः गार्हपत्योत्तर भागे तृणानि संस्तीर्य द्वंद्वं द्विश न्यंचि अधोमुखानि पा
त्राणि यज्ञायुधानि कृष्णाजिनं चांतर्धाय दर्भे ब्रह्मा स्तीर्य अकाले सूर्योदयात्पूर्वमेव इष्ट्वा स्तीर्त्वा गार्हपत्याहवनीययोरं

२८

तराले उलपराजीं कृत्वा अमृण्मयपात्राण्मयानि मृन्मयाश्ममय व्यतिरिक्तानि गार्हपत्ये प्रक्षिपतीति शेषः एवं माधवोदाहृ
त बौधायन वाक्यानि त्रिदंडानंगुलिस्थूलान्वैणवानमूर्द्धसंमितान् एकादशानवद्धि त्रिचतुःसप्तान्यपर्वकान् सत्वाकान
व्रणान्सौम्यान्समसंन्नतपर्वकान् वेष्टितान्कृष्णगोवालरज्वा तु चतुरंगुलान् एको वा ताहशो दंडो गोवालरहितो भवेत्
कुशाकार्पाससूत्रैर्वा क्षौमसूत्रैरथापि वा गोवालैर्ग्रथितं शिक्यं पमाकारसमन्वितं षट्पादं पंचपादं वा मुष्टिहृय विदी
रितं द्विगुणं त्रिगुणं वापि सर्वतोष्टांगुलं तु वा प्रादेशमात्रं वा सूक्ष्मकार्पासैः कृतमव्रणं चंडालाद्यस्पृष्टं चैतत्स्मृतं कुलप
वित्रकं गृहीतं मंत्रवच्चैतत्पात्रशिक्यं च कमंडलुं दारवं वैणवं वापि मृदलाबुमयं तु वा पात्रं शिलामयं ताम्रपर्णादिमयमेव
वा चतुरस्रं वर्तुलं वा पाद्यासनं दारवं शुभं कौपीनाच्छादनं वासः कंथां शीतनिवारिणीं पादुके चापि वर्ज्यमिश्रत्येतान्येकविंश
तिः गृहीत्वैतान्यथागत्य देवागारे ग्निवेश्मनि ग्रामांते प्रयतो भिक्षुर्ग्रामसीमांत एव वा अथादित्यस्यास्तमयात्पूर्वम
ग्नीन्विहृत्य सः आज्येन गार्हपत्ये संस्कृत्ये तेन च स्रुचा पू र्णयाहवनीये तु जुहुयात्प्रणवेन तु ब्रह्मान्वाधानमे
तस्मादग्निहोत्रे हुते ततः आस्तीर्त्वा गार्हपत्यस्य दर्भानुत्तरतो न्यंचि पात्राणि सादयित्वा तु ब्रह्मायतन एव च स्तीर्त्वा बु
दर्भे ष्वास्तीर्त्वाजिनांतरितश्च वजागृयाद्रात्रिमेतां तु यावद्ब्राह्मो मुहूर्तकः एतावदेमस्यां संप्राप्य मृतो ब्रह्मानंत्यमश्नुते अ
ग्निहोत्रं स्वकाले च हुत्वा प्रातरनंतरं इष्टिं वैश्वानरीं कुर्यात्प्राजापत्यामथापि वेति नरसिंहपुराणे इष्टिं वैश्वानरीं कुर्या

Indira Gandhi National
Centre for the Arts

त्प्राजायत्यामथापि वा अग्नीन्वात्मनि संस्थाप्य मंत्रवत्प्रव्रजेद्गृहात् ततः प्रभृति पुत्रादौ स्नेहलोभादि वर्जयेत् दत्त्वावै
यः ब्रह्मणे तीतो जहाद्विर्णो संन्यस्यमानसं समभ्यर्च्य हृषीकेशं जपन्नेकाक्षरं परमिति शौनकः ब्राह्मे मुहूर्ते उत्थाय
यथाविस्नात्वा प्रातरग्निकार्यं कृत्वा व्याहृतीर्जपित्वा तरत्समंदी धावतीति सूक्तमप्स्वजपेत् प्राजापत्येष्ट्याहिताग्निर्वि
षया प्राजापत्यां निरूप्येष्टिं सार्ववेदसदक्षिणां आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद्गृहादिति मनुवाक्येऽग्नि
बहुत्वाभिधानसमभिव्याहाराद्वैश्वानरीयाऽऽहिताग्निविषयेति स्पष्टमेव सा प्रसिद्धेष्टिः संतिष्ठत इति बौधायनस्म
रणात् एकाग्निस्तु आग्नेयीं कुर्यात् तथा च श्रुतिः तद्धैके प्राजापत्यामेवेष्टिं कुर्यात् तदु तथा न कुर्यात् आग्नेयीमेव
कुर्युः अग्निर्हि प्राणः प्राणमेवैतत्करोति प्राजापत्यां निरूप्येष्टिमाग्नेयीमथवा पुनः दांतः पक्वकषायोऽसौ ब्रह्माश्र
ममुपाश्रयेत् एतस्या नाहिताग्निविषयत्वमेव आग्नेयीं निरूप्याग्निमाजिघ्रतीत्येकाग्निवचनसमभिव्याहारात् य
दा आहिताग्निना वैश्वानरेष्टिः क्रियते तदा विशेषमाह बौधायनः देवयजनोल्लेखनप्रभृत्यग्निमुखांतं कृत्वा पक्वाज्जु
होति वैश्वानराय प्रतिवेदयाम इति पुरोनुवाक्यामनूच्य वैश्वानरः पवमानः पवित्रेणेति याज्यया जुहोति अथाज्याहु
तीर्जुहोति वैश्वानरीं नत उतय इत्यष्टाभिरनुच्छंदसमग्नये स्वाहेति च अथैनमुपतिष्ठते सहस्रशीर्षा पुरुष इत्यनेना
नुवाकेन स्विष्टकृत्प्रभृति प्रसिद्धमाधेनुवरप्रदानात् अपरेणाग्निं दर्भस्तंबे स्रुक्स्रुवौ निदधाति सर्वैर्वै रुद्रः विश्वंभूत २९

मिति द्वाभ्यां उत्सृजत्यग्निं आयुर्दा अग्ने हविषो जुषाण इति अथ पक्वाऽन्नमादाय प्रज्ञाटया प्राश्नाति सहस्रशीर्षा पुरु
ष इत्यनुवाकेन प्राश्य आचम्य आत्मानं प्रत्यभिमृशति त्वमिति ब्रह्मेत्यंतेनाथाग्निद्रव्यमग्नौ प्रक्षिप्यात्मन्यग्निं समारोपयेत्
या ते अग्ने यज्ञिया तनूरिति शौनकोक्तो विशेषः प्राजापत्यायां प्राजापत्येष्ट्या पुनराहवनीयमुद्धृत्य प्राणापानौ समीक्ष्य
त्वा सर्वं निदधाति यच्च पूर्वं यच्च प्रजापतौ तन्मनसि जुहोमि विमुक्तोऽहं देवकिल्बिषात्स्वाहा अयं ते योनिर्ऋत्विय इत्यात्म
न्यग्नीन्समारोपयति प्राणेन गार्हपत्यं अपानेन दक्षिणाग्निं व्यानेनाहवनीयं उदानेनावसथ्यं समानेन सभ्यं पुनरा
हवनीयं गत्वाऽन्यः संभूत इत्युपस्थायाऽत्तरनारण्यालीयेन गृहान्निष्क्रामति प्रागंतरप्रतिपत्तिमाहाद्भिः मन्मपान्यत्रम
मयान्यप्सु जुहुयात् तैजसानि दद्यात् यमः ततश्चाहवनीयात्प्रज्वाल्य हुत्वा प्रागणिमंत्रतः असौ स्वर्गाय लोकाय स्वाहेत्ये
वं निधापयेत् अयं ते योनिरित्येवं समारोप्यात्मनो मुखे अथवा गार्हपत्याग्नौ जुहुयाद्दरणीं बुधः अयमग्निर्गृहपति
मंत्रेणानेनान्वितः ततो वैश्वानरं ध्यायन् नन्नः संज्ञां विश्वतोमुखं जुहुयाद्दक्षिणेनैव प्रज्वलीभूतेन तत इति एकाग्यन
ग्नी तु शौनकोक्तेन विधिना चरुं श्रपयित्वा होमादि कुर्यात् स उच्यते ब्राह्मे मुहूर्ते उत्थाय यथाविधि स्नात्वा प्रातरग्नि
कार्यं कृत्वा व्याहृतीर्जपित्वा तरत्समंदीति सूक्तमप्सु जपित्वा स्वगृह्योक्तेन विधिना चरुं श्रपयित्वाऽग्निमुपसमाधाय प्राण
य स्वाहाऽपानाय स्वाहा उदानाय स्वाहा समानाय स्वाहेत्याज्यहोमं कृत्वाथ पुरुषसूक्तेन प्रत्यृचमाज्यहोमं चरुहो

Indira Gandhi National Centre for the Arts

मंच[illegible]चरुत्वा पुरुषसूक्तं जपित्वा प्रणीतापात्रं संमृज्य सौविष्टकृतं कृत्वाऽचार्याया ज्यपात्रं हिरण्यं धेनुं च दत्वाचार्य
पुरतोवस्थितः समासिंचंतम रुतः संमिंद्रः संबृहस्पतिः समाभिः सिंचत्वायुषा च बलेन चायुष्मंतं करोतिमामितिजपि
त्वापाते अग्नेयज्ञियातनूस्तयाह्यारोहात्मानमच्छा वसूनि कृ[illegible]न्वस्मेनर्यापुरूणियज्ञो भूत्वा यज्ञमासीद स्वां योनिं जा
तवेदो भूव आजायमानः सक्षय एहीति त्रिरात्मन्यग्नीन्समारोपयेति अनग्नेस्तु समारोपणं नास्ति तत्र बह्वृच परिशिष्टं
अथात्मन्यग्नीन्समारोपयेदेकाग्निरेकाग्निमनग्निर्न किंचनेति केचित्तु रात्रौ संस्कृतां विरजाहोममपीच्छंति होमानंतरं स
र्वसाधारणं प्रैषोच्चारणं कर्तव्यमिताहबौधायनः अर्धांतर्वेदिति ष्ठन् अभूर्भुवस्वः संन्यस्तं मयासंन्यस्तं संन्यस्तं मयेतित्रिरु
पांशूक्त्वा त्रिरुच्चैः त्रिसत्याहि देवा इति विज्ञायते अभयं सर्वभूतेभ्यो मत्त इति चापामंजलिं निनयत्यथाप्युदाहरंति अभ
यं सर्वभूतेभ्यो दत्वा प्रचरते मुनिः न तस्य सर्वभूतेभ्यो भयं चापीह जायत इति कात्यायनोपि आत्मन्यग्नीन् समारोप्य वेदि
मध्यस्थितो हरिं ध्यात्वाहं स्वयन्वनुज्ञातो गुरुणा प्रैषमीरयेत कपिलः विधिवत्प्रैषमुक्त्वा त्रिरुपांशु त्रिरुच्चकैः अभयं सर्व
भूतेभ्यो मत्त इत्यपो निनयेदिति आरुणिश्रुतौतु ब्रह्मसूत्र महमेवेति विद्वान् त्रिवृत्सूत्रं त्यजेत संन्यस्तं मया संन्यस्तं
मया संन्यस्तं मयेति त्रिरुक्त्वा अभयं सर्वभूतेभ्यो मत्त इति अपो निनयेदिति बह्वृचपरिशिष्टे चाभूः संन्यस्तं मया भुवः संन्या
स्तं मया भुवः संन्यस्तं मया स्वः संन्यस्तं मया भूर्भुवस्वः संन्यस्तं मयेति त्रिरुपांशु त्रिर्मध्यमं त्रिरुच्चैरितिप्रकारांतराणं वि



कल्पः अभयदानजलं पाद्मेसुरवेन तथा बह्वृचपरिशिष्टे अभयं सर्वभूतेभ्यो मत्त इति पाद्मे सुरवाभयपूर्णांजलिं निन
येन्ममितिततो विष्णुप्रार्थनं कर्तव्यं तदाह यमः दत्वा तोयांजलिं विप्रो नत्वा संप्रार्थयेद्धरिमिति तस्मिन्काले तु च दर्श
नेसतिनैमित्तिकमाह शौनकः पुत्रं दृष्ट्वा जपेतित्वं ब्रह्मत्वं यज्ञस्त्वं लोक इति स पुत्रः प्रत्याहाहं ब्रह्माहं यज्ञोहं लोक
इति वह्वृचपरिशिष्टे अथपुत्रान्स्कृहदो बंधून् प्रत्याह न मे कश्चिन्नाहं कस्यचिदिति ततो जलसमीपं गत्वा तत्रजलेज
लेनजुहुयात् तथा च कपिलः अप्सु स्वाहा पुत्रैषणा या श्च वित्तैषणा या श्च लोकैषणा या श्च व्युत्थितोहं स्वाहेत्य प्सुवा
पः पाणिनाहुत्वेति ततो विष्णुप्रार्थनां कुर्यात् तत्र मंत्रः सर्ववेदात्मके तोये तोयाहुतिमहं हरे दत्वा सर्वैषणां त्यक्त्वा त्व
प्स्त्ररणमागतः त्राहिमां सर्वलोकेश गतिरन्या न विद्यते संन्यस्तं मे जगन्नाथ पाहि मां मधुसूदन त्राहि मां सर्वलोके
शवासुदेव सनातन संन्यस्तं मे जगद्योने पुंडरीकाक्ष मोक्षदा अभयं सर्वभूतेभ्यो दत्वा भूतानां परमेश्वर त्वच्छरणमा
पन्नस्त्राहि मां पुरुषोत्तमेति यज्ञोपवीतत्यागमाह वौधायनः अथ यज्ञोपवीतं विसृज्याद्भिः संमृज्याप्सु जुहोति वे
दांतविज्ञान इति आरुण्युपनिषदि यज्ञोपवीतं भूमौ वाप्सु वा विसृजेत् ततः सिक्तार्थरक्षितान् केशान् उत्पाद्य स्वाहे
ति भूमौ वाप्सु वा निक्षिपेत् कठश्रुतिरपि सशिखान्केशान्निकृत्य विसृज्य यज्ञोपवीतं भूः स्वाहेति वौधायनः प्रैष
पः शिक्यं जलपवित्रं कमंडलुं पात्रमित्येतान् समादाय यत्रापस्तत्र गत्वा स्नात्वाचम्य सूर्यमभिमंत्र्याप्लिंगाभिर्वारुणीभि

Indira Gandhi National Centre for the Arts

॥मी०प्र०॥ हिरण्यवर्णाभिः पावमानीभिर्व्याहृतिभिरिति मार्जयित्वांतर्जलगतोऽघमर्षणेन षोडशप्राणायामान्धारयित्वोत्तीर्य वा
सः पीडयित्वान्यत्प्रयतं वासः परिधायाप आचम्योंभूर्भुवस्वरिति पवित्रमादाय तर्पयित्वोंभूस्तर्पयाम्योंभुवस्तर्प
३१ याम्योंस्वस्तर्पयाम्योंभूर्भुवस्वर्महर्नम इति देववत्पितॄंश्चांजलिमादाय तर्पयति ओंभूस्वधोंभुवस्वधोंस्वस्वधो
भूर्भुवस्वर्महर्नमस्स्वधा इति अथोदुत्यं चित्रमिति द्वाभ्यामादित्यमुपतिष्ठतो अमिति ब्रह्म ओमितीदं सर्वमोमिति ब्र
ह्म वा एष ज्योतिर्य एष वेदो य एष तपति वेद्यमेवैतत् य एष तपति एष आत्मानं तर्पयति आत्मने नमस्करोति आत्मा
परं ब्रह्म ज्योतिः सावित्रीं सहस्रकृत्व आवर्तयेत् शतकृत्वोऽपरिमितकृत्वः ओंभूर्भुवस्वरोमिति पवित्रमादायापो गृ
ह्णाति नचात ऊर्ध्वमनुश्रुताभिरपरिश्रुताभिरपरिपूताभिरद्भिराचामेत् नचात ऊर्ध्वं कृष्णवासो विभृयात् दंडी अथेमानि
व्रतानि भवंति अहिंसा सत्यमस्तेयं मैथुनस्य च वर्जनं त्याग इति पंचैवोपव्रतानि भवंति अक्रोधो गुरुशुश्रूषाऽप्रमादः
शौचमाहारशुद्धिर्गुणश्चेति सुरभिमत्या दधिक्राव्णो अकारिषमित्येतयर्चा अब्लिंगाः आपोहिष्ठेत्याद्याः वारुण्यः
इमंमेवरुण इत्याद्याः हिरण्यवर्णाः शुचयः पावका इत्याद्याश्चतस्रः पावमान्यः पवमानस्सुवर्जन इत्यनुवाकः व्या ३१
हृतयः प्रसिद्धाः अघमर्षणेन ऋतं च सत्यं चेति सूक्तेन एतास्सूक्तं जपन्नंतर्जलगतो भवेत् तत्रैव षोडश प्राणायामा
न्कुर्यात् पवित्रं जलपवित्रं देववत्पितॄंश्चांजलिमादायेत्यनेन प्राचीनावीतित्वं निषेधति अमिति ब्रह्मेत्यारण्यब्रह्म

ज्योतिरित्यंतं सूक्तं अकारस्तुतिः तत्पदेदिति शेषः तदनंतरं सहस्रकृत्वो गायत्रीं जपेत् तदशक्तौ शतकृत्वा अ
परिमितं सहस्राधिकं अपरिमितं देयमिति वत् यदा यदा जलपवित्रमादायापो गृह्णाति तदा ओंभूर्भुवस्वरित्युक्त्वेत्यर्थः
जलपवित्रेणानुधृताभिः परिश्रुताभिस्तप्ताभिः अपरिपूताभिः अनिरस्ताप्यद्भ्याभिः एतादृशाभिराचमनस्य सर्वानुप्र
तिनिषिद्धत्वेऽपि संन्यासिनस्ताभिराचमने प्रत्यवायोऽधिको त्पद्यते एकदंडी त्रिदंडी वेति याडोप्रार्कविज्ञानेश्वरादिसंम
तः कृत्यकल्पतरुस्तु एकदंडीति पाठं नानुमेने नाश्यकृता ङ्धृतत्वात् त्रिदंडस्यैवाग्रेग्रहणोक्तेश्च त्यागः संगस्ये
ति शेषः एवं जले मार्जनानंतरं बहिरागत्य नग्न एवोत्तरदिशं प्रतिगच्छेत ततो दिगंबरो भूत्वा गच्छेत् किं चिद्दशमुखः जि
ज्ञासुश्चेत् पराहूतः स्तिष्ठेत्तदनुज्ञासनादिति सांप्रदायिकैः पठ्यमानवचनात् तस्य गुरोरनुज्ञासनात् अनंतरं गुरोरा
ज्ञया दंडादिकं ग्राह्यं तथा च नरसिंहपुराणे दद्याच्च भूमावुदकं सर्वभूताभयंकरं त्रिदंडं वैणवं सौम्यं सत्वचं
समपर्वकं वेष्टितं कृष्णगोवालरज्ज्वा च चतुरंगुलं ग्रंथिभिर्वा त्रिभिर्युक्तं जलपूतेन चोपरि गृह्णीयाद्दक्षिणे ह
स्ते मंत्रेणैव तु मंत्रवित् क्षौमं वा कुशसूत्रं वा सूत्रं कार्पासिकं तु वा तैरेव ग्रथितं शिक्यं पद्माकारं समन्वितं षड्भिर्वा
पंचभिर्युक्तं मुष्टिभिः शिक्यलक्षणं गृह्णीयान्मंत्रतो विद्वान्पात्रं वा पिकमंडलुं आसनं दारुजं प्रोक्तं समग्रं वा
ल्कलं समं कौपीनाच्छादनं वासः कंथां शीतनिवारिणीं पादुके चापि गृह्णीयात् कुर्यान्नान्यस्य संग्रहं एतानि

Indira Gandhi National
Centre for the Arts

॥मोक्ष१०॥

३२

तस्य चिह्नानि यतेः प्रोक्तानि धर्मतः संगृह्य कृतसंन्यासो गत्वा तीर्थमनुत्तमं स्नात्वाचाचम्य विधिवत् जलपूतां

शुकेनवै वारिणा तर्पयित्वा तु विधिवद्भास्करं नमेत् आसीनः प्राङ्मुखो मौनी प्राणायामत्रयं चरेत् गायत्रीं च

यथाशक्ति जप्त्वा ध्यायेत् परं पदं दंडादिग्रहणमंत्रानाह बौधायनः सखा मे गोपायेति

दंडमादत्ते यदस्य पारे रजस इति शिक्यं गृह्णाति येन देवाः पवित्रेणेति जलपवित्रं गृह्णाति येन देवा ज्योतिषो

र्ध्व उदायन्निति कमंडलुं गृह्णाति सप्तव्याहृतिभिः पात्रं गृह्णाति माधवीदाहृत बौधायनः सखा मेत्यादिना दंडं

गृह्णीयाच्छुरूपार्थितं यदस्य पारे रजसः शुक्रमित्यपि शिक्यकं व्याहृतीभिस्तथा पात्रं कौपीनं धेत पाश्चाद्यु

वासका वासाइत्येवं तच्छंयोरूपवीतकं एतद्गृहीत्वा निष्क्रम्य स्वग्रामं वाप्यथवा त्यजेत् मैत्रायणीयश्रुतौ तु इंद्रस्य

वज्रोसीति त्रीन् वैणवान् दंडान् दक्षिणे पाणौ धारयेदेकं वा यद्येकं तदा सशिखं वपनं कृत्वा चतुर्वर्णेष्वेकागारं भैक्षम

श्नीयादिति अत्र त्रिदंडशिखायज्ञोपवीत जलपवित्रादिधारणं कुटीचक बहूदक विषयं तथाच वृद्ध पराश

रः कुटीचको नाम पुत्रादिभिः कुटीं कारयित्वा कामक्रोधलोभमोहमदमात्सर्यादीन् हित्वा विधिवत्संन्यासं कृ ३२

त्वा त्रिदंडकमंडलुपवित्रकषायवस्त्रधारिणः स्कंधश्चराणेपि शिखायज्ञोपवीती स्यात् त्रिदंडी सकमंडलुरिति

वृद्धपराशरः तत्र बहूदको नाम त्रिदंडकमंड॰लुपक्षपवित्रपात्रकषायवस्त्रधारिण इति तयोरेव विशेष्या

---

विधानात् हंसपरमहंसयोश्चैकदंडित्वान्मुंडत्वाच्च अत एव शिखायज्ञोपवीतविकल्पो व्यवस्थितः कात्याय

नः एकदंडधरा मुंडा हंसाः परमहंसकाश्चेति आरुणश्रुतिरपि आरुणिः प्रजापतेर्लोकं जगाम तं गत्वोवाच के

न भगवन् कर्माण्यशेषतो विसृजानीति तं होवाच प्रजापतिः तव पुत्रान् भ्रातॄन् शिखां यज्ञोपवीतं यागसूत्रं

स्वाध्यायं च भूर्लोकं भुवर्लोकं स्वर्लोकं महर्लोकं जनलोकं तपोलोकं च अतलपातालवितलसुतलरसातलतलात

लमहातलं ब्रह्मांडं च विसृजेत् दंडमाच्छादनं कौपीनं च परिगृह्णीत शेषं विसृजेच्छेषं विसृजेत् परमहंसोपनिषदि च

सोस्य पुत्र मित्र कलत्र बंध्वादीन् शिखां यज्ञोपवीतं स्वाध्यायं च सर्वकर्माणि संन्यस्यायं ब्रह्मांडं विसृज्य कौपीनं दंड

माच्छादनं च स्वशरीरोपभोगार्थाय च लोकस्योपकाराय च परिग्रहेदिति अत्रिः शेषं विसृज्य त्यजेत् पितरौ धनधान्यादि

कं च यत् अत्यागात् सर्वविज्ञानां संन्यासो निष्फलो भवेत् वाष्कलेयः कुटुंबं पुत्रदारांश्च वेदांगादिनि च सर्वशः यज्ञं

यज्ञोपवीतं च त्यक्त्वा गूढश्चरेन्मुनिः परमहंसेन गायत्री त्यागोपि कर्तव्यस्तत्र वक्ष्यते एवं कृतसंन्यासो जिज्ञासु

र्गुरुं प्रति गच्छेत् तत्रेतिकर्तव्यता वृद्धपराशरोक्ता अथ गुरुमुपगम्य दक्षिणं जान्वाच्य पादावुपसंगृह्याह अधी

हि भगवो ब्रह्मेति तत्र मंत्रः यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै तं देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै श

रणमहं प्रपद्ये इति सांप्रदायिकैस्तथाभिधानात् एवं समागते शिष्ये गुरुः परमात्मानमद्वैतं ध्यात्वा जलपूर्णं शं

Indira Gandhi National Centre for the Arts

॥ मोक्षप्र॥

३३ स्वं वृद्ध्यादिनिरस्य चर्व्हादन्नाप्रणवैरभिमंत्र्यतेतोदकेन प्रणवेन शिष्यस्य शिरोभिर्विंचेत ततः शान्तो भिश इति शांतिं
पठित्वा शिष्य शिरसि हस्तं दत्वा पुरुषसूक्तं जपेदिति सांप्रदायिकाः परिशिष्टे च अथास्य शिरसि पुरुषसूक्तेन पाणि
मुपदधाति मम व्रते हृदयं ते दधामि मम चित्तमनुचित्तं ते अस्तु मम वाचमेकव्रतो जुषस्व बृहस्पतिस्त्वा नियुनक्तु मह्यमिति
ततश्च दक्षिणकर्णे प्रणवं तदर्थं च कथयेत ततो नाम दद्यादिति सांप्रदायिकाः पदं तत्त्वं पदार्थयोरैक्यं यत्पदं प्रतिपाद
येत् तन्नाम यत पंकुर्यात् वाक्यनामतदिष्यत इति यतीनां ख्यातयश्च ता याश्चाचार्यपूर्वजा विनां नाम कुर्यान्न शि
ष्यस्य शुद्धिपूर्वकं दाचनेति बहृचपरिशिष्टे अथास्मै नाम दद्याद्वे द्वं वा मासनाम अथवा यज्ञोपवीतेति ततः सन्यासधर्मा
नप्युपदिशेत महाभारते एतदेव हि पर्याप्तं शिखोरेकांतशालिनः यन्नास्य कश्चिल्लियते प्रीयते नास्य कस्य चित् ह्र
यणं विलयन्नालोजरपान्निपरिप्लुतः प्रीयते रुदतां मध्ये ज्ञातीनां च सपूरुषः अधिकारिशारीरे पुरुषायं प्राप्य अस्त
पः नापक्रामति संसारादात्महा स नराधमः द्वन्द्वः सत्वोत्कटा सुरास्ते पि विषयैस्तव शीकृताः प्रमादि बल्पसत्वेषु मनु
ष्येषु का कथा तस्मात्यक्तकषायेण कर्तव्यं दंडधारणं यदि कर्तुं न शक्नोति विषयैरेव हीयते त्रिदंडव्यपदेशेन जीवं ३३
वहवो जनाः यो हि ब्रह्म न जानाति न त्रिदंडार्हको हि सः आतुरसंन्यासेतिकर्तव्यता तु संन्यस्तोहमिति ब्रूयात् सर्वने
षु रूपात् शीघ्रा रात्रिलोकात्मा स्वस्याशक्यविशफ ...हये यत्किंचित्वंधकं कर्म कृतमज्ञानतो मया प्रमादालस्यदो

षाद्यत्तत्सर्वं संत्यजाम्यहं एवं संचिंत्य भूतेभ्यो दद्यादभयदक्षिणां पद्भ्यां कराभ्यां विहरन्नाहं वाक्कायमानसैः करि
ष्ये प्राणिनां हिंसां प्राणिनः संतु निर्भयाः इति प्रैषोच्चारणं अभयदानं गायत्री प्रवेशमपीच्छंति सांप्रदायिकाः अत्रे
दं चिंत्यते अयं संन्यासः श्रवणांगं ज्ञानांगं वेति तत्र प्राचीनमतानुसारिणो न्यतरां संन्यासो ज्ञानांगं तथा हि
शांतो दांत उपरतस्तितिक्षुः श्रद्धावित्तो भूत्वात्मन्येवात्मानं पश्येदित्य उपश्येदिति प्रकृति विचारलक्षणया विचारमनू
द्य शमदमाद्यंगविधिपरता तावन्न युज्यते अनेकगुणविधाने वाक्यभेदापत्तेः नापीदं वाक्यं शांत्याद्यंगविशिष्टद
र्शनोपलक्षितविचारविधिपरमिति वाच्यं विचारविधेः श्रोतव्यादिवाक्येनैव सिद्धेः विशेष्यस्य प्राप्तत्वात् किंतु शांत्या
दिगुणवत्कर्तृकं विचारमुपलक्ष्य विचारोपरतिशब्दितसंन्यासयोः समुच्चयं ज्ञानसाधनत्वेन विधत्ते संन्यासस्य ज्ञा
नप्रतिबंधकदुरितनिवृत्तिद्वारा ज्ञानोपकारित्वात् श्रवणेन सह समुच्चीयत इति युक्तमुत्पश्यामः इत्याहुः अन्ये
तु न व्यतमाः भूयस्त्वेनोभय श्रुतिन्यायेन शांत्याद्यनेकगुणविशिष्टविचारविधिरवसीयते शांतवाक्ये हि भूयसा
मंगानामवगमात् संपश्येदिति धातुना ज्ञाने विध्यसंभवेन विचार एव लक्षणीयः एवं च संन्यासो न प्रधानं किंत्व
गमेव पूर्वोत्तरभागयोः श्रवणांगत्वं तत्र शमदमतितिक्षाभिः सह मध्ये सम भिव्याहारात् उपरतिं ते विधयसंन्यासो
पि शांत्यादिवत् श्रवणांगत्वेन विधीयते तथा च यार...मर्थसूत्रं शमदमाद्युपेतः स्यात्तथापि तु तद्विधेस्तदंगतया

Indira Gandhi National
Centre for the Arts

तयातेषामवश्यानुष्ठेयत्वात् तथैव भाष्यकारैर्व्याख्यातत्वाच्च किंच वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेत्यत्र बृ
हस्पतिसवस्य वाजपेयांगत्ववत् त्रिदंडं कमंडलुं शिक्यं पात्रं जलपवित्रं शिखां यज्ञोपवीतं चेत्येतत्सर्वं भूःस्वाहेत्य
प्सु परित्यज्यात्मानमन्विच्छेदिति जाबालश्रुतौ विद्वानिमं लोकममुं च परित्यज्यात्मानमन्विच्छेत् संन्यस्य श्रवणं कु
र्यादिति स्मृतौ च क्त्वाप्रत्ययेन संन्यासस्य श्रवणांगत्वावबोधनात् ननु दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेत्यादिवा
क्ये दर्शपूर्णमाससोमयागयोरिव वाक्यांतरोत्पन्नत्वात् संन्यासश्रवणयोर्न गांगिभावो बोध्यते किंतु कालार्थसं
योगपरत्वमेव पूर्वोक्तवाक्यानामिति चेत् न तद्वाक्यवदेषां श्रुतिः कालार्थसंयोगपरा तद्वदस्या अनारम्याधी
त्यभावात् किंच तत्त्वमसीत्यादिज्ञानप्रतिबंधकदुरितनिवर्तकस्य तस्य साक्षाज्ज्ञानसाधनश्रवणपूर्वभावितायाः अर्थसि
द्धत्वात् परित्यज्येत्यादिश्रुतेः संन्यस्येत्यादिस्मृतेश्च क्रमपरत्वायोगात् अपि च वाक्यांतरोत्पन्नत्वाद्दर्शपूर्णमा
ससोमयागयोर्न गांगिभावः प्रकृते तु शांतो दांत इत्यादिवाक्ये संन्यासविशिष्टश्रवणविधानस्योक्तत्वात् आग्नेयोष्टाक
पाल इत्यादिवाक्यविहितद्रव्यदेवतयोर्यागांगत्वादिवत्संन्यासस्यापि श्रवणांगत्वमेव अन्यच्च समानकर्तृकयोः
पूर्वकाल इति सूत्रेण विहितः क्त्वाप्रत्ययः समानकर्तृकत्वमेकप्रयोगत्वमेव ब्रूते इति तच्चांगांगित्व एव सम्यक् संप
द्यते तं विना पूर्वकालत्वमात्राभिधाने तदर्थैकदेशलक्षणापत्तेः सोमत्वस्य तु दर्शपूर्णमासांगत्वे प्रसिद्धसोमया ३४

गापेक्षया कर्मांतरत्वप्रसक्त्या तच्च न संभवति देवताभावात् न चानेन व्यक्तत्वचोदनालिंगेन सौमिकी देवता लभ्यत
इति वाच्यं तर्हि द्रव्यमपि तत एव लभ्यमिति सोमेनेति व्यर्थं तस्माद्देवतासंभव एव सोमस्य तदंगत्वे बाधको नात्र
तथास्तीति न कालार्थसंयोगपरत्वं किंच संन्यासो यदि नांगं तर्हि संन्यासिनां श्रवणमनावश्यकमिति तेषां तदक
रणे अरुन्मुखान् यतीन् सालावृकेभ्यः प्रायच्छन् नित्यं कर्म परित्यज्येत्यादि प्रत्यवायश्रवणं विरुध्येत यथा
र्यतीनीति रुद्धवेदांतवाक्यं तन्मुखास्तदर्थविचारणपराः वेदांतविज्ञानसुनिश्चितार्था इति श्रुतेः अरुन्मुखानभवंती
त्यरुन्मुखास्तान् सालावृकेभ्यः प्रायच्छन् त्वंपदार्थविवेकाय संन्यासः सर्वकर्मणां श्रुत्या विधीयते यस्मात्त
त्त्यागी पतितो भवेदिति स्मृतेः ब्रह्मसंस्थतात्वस्याश्रमविहितं कर्म तदतिक्रमे च तस्य प्रत्यवाय इति भाष्याच्च न
चैतमेव प्रव्राजिनो लोकमिच्छंतः प्रव्रजंतीति पृथगधिकारिश्रवणं विरुध्येतेति वाच्यं उक्तरीत्यात्स्यांगत्वेपि
द्वेषं गे फलश्रुतेरर्थवादत्वोपपत्तेरित्याहुः इदमत्रावधेयं शांतो दांत इत्यादिवाक्ये निशिष्टविचारविधिपरत्वं प्रतीयेदिति धा
तो लक्षणया स्मृत्युपगम्यते तत्किं वाक्यभेदभयाद्वा संन्यासस्य श्रवणांगत्वलोभाद्वा नाद्यः ज्ञानस्याविधेयत्वेवि
ज्ञानकर्मक शांतादिकर्तृकप्रयोगभावनाविधिसंभवेन वाक्यभेदाभावात् यथा विविदिषाकर्मविविदिषायामवि
धेयत्वेपि तत्कर्मकप्रत्ययोपात्तयज्ञाद्यवच्छिन्नप्रयोगभावनासमुदायो विधीयते व्युत्पादितं चैतद्गुरुभिः तथा

Indira Gandhi National
Centre for the Arts

अपि विधिनैव लक्षणामुपपत्तौ तत्स्वीकारस्यानुचितत्वाच्च वाक्यांतरे श्रवणांगत्वेन श्रुतानामप्यस्मिन्वाक्ये ज्ञानसाधन
त्व एव पर्यवसानादेतद्वाक्यव्यपायपाठस्यापि श्रवणांगत्वासाधकत्वाच्च यच्च किंचेत्यादिना बृहस्पतिसवस्य वा
जपेयांगत्ववत् परित्यज्यात्मानमन्विच्छेदित्यादिना परित्यागस्यांगतेति तदप्युक्तं बृहस्पतिसववत्संन्यासस्य क
र्मांतरत्वापत्तेः किंचाकृतार्थयोरेव त्वत्काप्रत्ययेनांगांगिभावः प्रतिपाद्यते बृहस्पतिसवेनेत्यत्र आख्यातांतरसमभिव्या
हृततया प्रकरणभेदात् कृतार्थबृहस्पतिसवप्रत्यभिज्ञायकाभावात् अकृतार्थबृहस्पतिसवस्य कर्मांतरस्यांगता
युज्यते परित्यज्येत्यत्र तु आख्यातासमभिव्याहृतनाम्ना विविदिषावाक्यस्थयज्ञपदेनेव दूरस्थज्ञानादिफलकसं
न्यासस्य प्रत्यभिज्ञापितत्वात्कृतार्थस्यैवोपस्थितेर्नांगत्वं वक्तुं शक्यते किंतु फलार्थसंयोग एवान्यथा दर्शपूर्णमासा
भ्यामिष्ट्वा सोमेन यजेतेत्यत्रापि दर्शपूर्णमासादेः सोमांगतापत्तेः यच्च संन्यासवाक्यस्य दर्शपूर्णमासाभ्यामिष्ट्वेति वा-
क्यवदनारभ्याधीत्यभावात् न तद्वत्कालार्थसंयोगः संभवतीति तदपि तथैव अस्य वाक्यस्य सोमप्रकरणे पाठस्य
वार्तिककारैरभिहितत्वेन वैषम्यकथनस्य निर्मूलत्वात् भाष्यकारेण च दर्शादिप्रकरणपाठस्यानुगततया अनार ३५
भ्याधीतेः केनाप्यनंगीकाराच्च यदपि ज्ञानप्रतिबंधकदुरितनाशकत्वेन ज्ञानांगत्वेपि संन्यासस्य ज्ञानप्रधानसा
धनश्रवणपूर्वभावस्यार्थसिद्धतया नैतद्वाक्यानां क्रमे तात्पर्यमिति तदपि स्थवीयः प्रधानसाधनस्य पूर्वमनुष्ठाने

पि प्रतिबंधकदुरितनाशकसंन्यासस्योत्तरकालमपि विधातुं शक्यतया नियमतः पूर्वमनुष्ठानाप्राप्तेः तदर्थवा-
क्यप्रवृत्तेः संभवात् यदपि च वाक्यांतरोत्पन्नत्वादित्यादि तदपि न भिन्नवाक्योत्पन्नानामपि दर्शप्रयाजादीनां
मंगांगितया तत्र भिन्नेन तदभावे भिन्नवाक्योत्पन्नताया अप्रयोजकत्वात् एकवाक्योत्पन्नानां भिन्नवाक्योत्पन्नानां
वांगांगित्वे श्रुतिलिंगादितार्त्तीयप्रमाणानामेव पूर्वतंत्रे साधकतयाभिहितत्वेनैकवाक्योत्पन्नत्वस्य संन्यासश्रवण
योरंगांगिभावासाधकत्वाच्च एतेनान्यच्चेत्यपि परास्तं प्रधानस्य दर्शादिकस्यैकप्रयोगतया अंगीकृतत्वेनांगां
गित्वाभावेपि त्वाप्रत्ययस्वारस्योपपत्तेः यदपि च सोमस्येत्यादि तदपि न अव्यक्तचोदनाचोदितत्वेन सौमिकदे-
वताप्राप्तेः संभवात् न च सोमेनेति व्यर्थमिति वाच्यं अनुवादार्थवत्त्वेनोपपत्तेः सौर्यं चरुं निर्वपेदित्यत्र निर्वपेदि
तिवत् यदपि संन्यासो यज्ञांगमित्यादि तदपि चिंत्यं संन्यासस्य श्रवणांगत्वेपि श्रवणाकरणे प्रत्यवायश्रवणे
न तत्परिहारार्थमेवावश्यकत्वोपपत्तेः एवं संन्यासस्य श्रवणांगत्वसाधकस्यानन्यथासिद्धस्याभावादेतमेव प्रव्रा-
जिनो लोकमिच्छंतः प्रव्रजंतीति फलश्रवणमपि नार्थवादतया नेतुं शक्यते फलवत्त्वस्यैव वक्तुमुचितत्वात् एते
नांगे फलश्रुतेरर्थवादत्वमित्यपास्तं अंगत्वस्यैवाप्रामाणिकत्वादिति दिक् अपरे तु श्रवणं तावत् दृष्टार्थत्वाद्दृष्ट
मेवार्थवादिकं फलमासाद्य फलवदिति निर्णीयते संन्यासस्य ज्ञानांगत्ववादिनापि तस्यांगीकारात् तेन निर्णी

Indira Gandhi National Centre for the Arts

॥मोक्षप्र०॥ तेश्रवणस्यफलवत्वेतत्संनिधौश्रुतस्याफलस्यसंन्यासस्यप्रयाजादिवदंगत्वमेवाश्रयणीयेनार्थवादिकफलक
ल्पनातथाहि उभयाकांक्षाहिप्रकरणं यथाप्रयाजदर्शपूर्णमासयोः प्रकृतेचसंन्यासोप्युपकाराकांक्षःश्रवणंचो
३६ पकारकाकांक्षमितिप्रकरणेनसंन्यासस्यश्रवणांगत्वंभवतिएवंसत्यर्थवादिकफलकल्पनायांप्रयाजादेरपि
वर्मवाएतद्यज्ञस्यक्रीयतइतिआर्थवादिकफलकल्पनाप्रसंगात् तथाचद्रव्यसंस्कारेत्यधिकरणविरोधः नोपितद्यु
ज्यते प्राकरणिकीनांक्रियाणांविश्वजिन्न्यायेनफलकल्पनेरात्रिसत्रन्यायेनवार्थवादिकफलकल्पनेऽन्यतराकां
क्षयाफलसंबंधःकर्त्तव्येतफलस्याकांक्षाराहित्यात् अंगस्यकल्पनेतूभयोरुभयाकांक्षयासंबंधइत्यन्यतराकांक्षा
रूपस्यानाडुभयाकांक्षारूपप्रकरणस्यबलवत्वात् ननुएतमेवप्रव्राजिनोलोकमिच्छंतःप्रव्रजंतित्यजतैवहितज्ञेयं
त्यक्तुःप्रत्यक्परंपदमितिविफलश्रवणान्नार्थवादिकीफलकल्पनायद्यप्येतच्छब्दसमानाधिकरणप्रावव्युत्पन्नलो
कशब्दस्यप्रकृतात्मपरामर्शित्वात् आत्मनश्चफलत्वाभावातनफलपरत्वंतथाप्यात्मनःफलत्वासंभवेनतज्ज्ञानस्यैव
फलत्वंकल्प्यतेतथाचकथमंगत्वमितिचेत् नप्रकरणेनांगतावगतौसंन्यासेफलकल्पनायोगात् त्यजतेत्यत्र ३६
प्रधानफलानुवादमात्रंयावच्चास्मिन्वाक्येज्ञानफलकत्वंकल्पनीयंतावत्प्रकरणेनांगतैवसिद्धेतिकृताविफल
कल्पनाभ्रांतिरेवेत्यवसीयते नचज्ञानकामःसंन्यसेदितिक्वचिदसंदिग्धंश्रूयते यत्तुशांत्यादिवाक्येयथाश्रुतेवा

क्यभेदप्रसंगेलक्षणयाश्रवणमुपस्थाप्यतेनसहसंन्याससमुच्चयोविधीयतइतितदप्युक्तं बाधकाभावेनलक्षणा
स्वीकारस्यानुचितत्वात्शांतपदेनैवतदुपस्थितिसंभवेनपदांतरवैयर्थ्यप्रसंगाच्च कृतेपिस्वार्थपरित्यागेएकज्ञा
नोद्देशेनसंन्यासश्रवणयोरपिविधानेनेकगुणविधानइववाक्यभेदस्यापरिहाराच्च समुच्चयस्यद्वयान्यत्वेमानाभा
वेनवाक्यभेदस्यावश्यंभावात् दर्शपूर्णमासाभ्यामित्येकपदस्यसमुच्चयोयस्यापकस्यसत्वेनयथातत्रविधातुंशक्य
तेनात्रतथाविचारसंन्याससमुच्चयबोधकपदस्याभावात् शांत्यादिविशिष्टविधिपक्षस्त्वेतुनवाक्यभेदःशारीरकभाष्य
णेतदतिरिक्तंश्रवणविध्यभावाच्चनपौनरुक्त्यं एवंचफलवत्वेऽलंनेविद्वनिमलोकममुंचलोकंपरित्यज्यात्मानमन्वि
च्छेदितिफलवच्छ्रवणसमभिव्याहारात्मकंवाक्यमपिसंन्यासस्यांगत्वेप्रमाणंयथादेवस्यत्वेत्यादिपदानांनिर्वापपदस
मभिव्याहारोनिर्वापांगत्वेमानं संन्यस्यश्रवणंकुर्यादितिचोदाहर्त्तव्यं एवंचयत्रापिसंन्यासंविधायश्रवणविधिर्नश्रूय
तेतत्राप्युक्तवाक्येनसंन्यासस्यश्रवणंयोगएवअनारभ्याधीतस्यप्रवर्ग्यस्येवपुरस्तादुपसदांप्रवर्ग्येणप्रचरंतीतिवा
क्येनज्योतिष्टोमसंयोगः नतुफलांतराकल्पनायुज्यते यदुक्तंजन्मांतरीयोप्युपयुज्यत इति तन्नानिष्टद्वारस्यनि
ष्पन्नत्वात् ननुश्रवणंगत्वेजन्मांतरीयसन्यासोनोपयुज्यतइतिचेत्न प्रयाजादिषुजन्मांतरीयेषूपकारित्वादर्शनि
विश्रवणादिषुतथानृतेषुतत्कल्प्यते एवंप्रायपाठोपिपूर्वोदाहृतोंगत्वेप्रमाणंयथाग्निरोवाएतद्यज्ञस्यपदोयेयःहद

National
Centre for the Arts

यं यज्ञपं शुमाजइति प्रधानप्रायेपाटाद्यां ज्ञयाजस्य प्रधानत्वं तस्मात्प्रकरणवाक्यपाये पाटे स्विमिश्रमाणैः संन्यासस्य श्रवणंगतैवेत्याहुः अत्रेदं चिंत्यं श्रवणस्य ज्ञानप्रतिबंधकासंभवनादिनिवर्त्तकतयाज्ञानार्थस्य आत्मान्वविषयसाहित्यविद्धिमिच्छेतसो ज्ञानोदयासंभवेनतद्राहित्यद्वारा संन्यासस्य ज्ञानोपयोगित्वेपिह श्चार्थतालाभात् अन्वयव्यतिरेकसिद्धफलवत्त्वस्य संन्यासश्रवणयोस्तुल्यत्वात् किंच आत्मावारेद्रष्टव्य इत्यादिश्रवणफलबोधकवाक्यवत्त्यजतैवहितइ यंमितिप्रस्यत्वड़दाहृत स्यैवफलविधायकवाक्यस्यसत्वात्प्रकरणेनवाक्यलिंगश्रुतिकल्पनेन यावतांगताबोधनीयातावद्गेयमितिक्रत्वप्रत्ययेनक्रवर्णेनार्यमितिवतविधायकेन श्रवणसंनिहितसंन्यासस्यास्मा तासमभिव्याहृतत्यजतेतिस्रबंतेनद्वूरस्थस्याप्युपस्थानसंभवेनङ्गगेवफलवत्तायाबोधितत्वात्प्रकरणस्यासाधकत्वात् एतेनसंन्यासस्यार्थवादिकफलकल्पनामात्रांक्यनार्थवादिकफलकल्पनेत्यारभ्यप्रकरणस्यफलवत्वादित्यंतमपास्तं फलविधेरेवलत्साधकस्योदाहृतत्वात् किंच बृहदारण्यके खलुपरमहंससंन्यासविधायकवाक्यं श्रूयते तेतमेतवेदानुवचनेन ब्राह्मणाविविदिषंति यज्ञेन दानेन तपसानाशकेनैतमेव विदित्वा मुनिर्भवति एतमेव प्रव्राजिनो लोकमिच्छंतः प्रव्रजंति एतद्धस्मवैपूर्वेविद्वांसः प्रजांनकामयंते किंप्रजयाकरिष्यामोयेषांनोयमात्मायंलोकइति एतच्छब्देनपरामृष्टस्यात्मनोयरोद्वाविशिष्टस्यफलत्वं आत्मज्ञानविशेषविशिष्टस्यतत्फलत्व

---

त्वांधनयन्नात्मस्वरूपं एषनेतिनेत्यात्मागृह्योनहिगृह्यतेइत्यादिनोक्तं एवंसंन्यासफलंसाधिकारिकं विधायतत्र संमत्यैमंत्रवर्णउदाहृतः तदेतदृचाभ्युक्तं एषनित्योमहिमाब्राह्मणस्यनकर्मणावर्द्धतेनोकनीयान् तस्यैवस्यात्पदवित्तंविदित्वानकर्मणालिप्यतेपापकेनेतिअस्यायमर्थः एषः आत्मानित्योमहिमानित्यत्वंविद्यतेतिनकर्मणेतिएतेनएषनेतिनेत्यादिब्राह्मणवाक्यं विहितंतस्यैवात्मनःपदवित्स्वरूपज्ञानयोग्यः शांत्यादिगुणविशिष्टः पदवेदनफलकसंन्यासवान्स्यादितिविधिः ज्ञानस्यस्वतोपुरुषार्थताभावमात्रांक्यपुरुषार्थसाधनतयापुरुषार्थतांध्वनयितुंनकर्मणानियतइत्यादितथाचाज्ञानफलकसंन्यासमुक्तात्स्यैवफलविधिः तस्मादेवंविच्छांतोदांतइत्यादिनाविहितःएतदभिप्रेत्यैवाथसंन्यासविधिंव्याख्यास्यामः सोतएवब्रह्मचर्यवान्प्रव्रजतीत्यारभ्यवानप्रस्थस्यवाकर्मविरामेएषनित्योमहिमेतिमंत्रमुदाहृत्यापुनर्भवंनयतीतिनित्योमहदेनंगमयतीतिमहिमेत्येकदेशोव्याख्यातोभगवताबौधायनाचार्येण तस्मात्फलवानेवसंन्यासःएतेनप्रकरणेनांगतावगतौफलकल्पनायाआर्थवादिकत्वादित्यादिकमपास्तं अन्योन्याश्रयात् फलविधेरेवप्रकरणात्फलवत्त्वस्योक्तत्वात्फलकल्पनायांगतित्वकल्पकस्यासाधारणस्योभावाततत्कल्पकमप्रामाणिकमेवाज्ञानकामः सन्यसेदित्यस्याभावेपित्यजतेत्यस्यैवतथाभूतस्यसत्वेनभवङ्कुमुक्तेरप्रयोजकत्वात् अतएवशांतेत्यारभ्यशारीरकब्राह्मणेतदतिरिक्तस्य ३९

Indira Gandhi National
Centre for the Arts

णविध्यनावाच्चनपौनरुक्त्यमित्यंतमपास्तं उक्तरीत्यावयोगविधिसत्त्वेनवाक्यभेदाभावात विशिष्टश्रवणवि
धीलक्षणपक्षेरन्याय्यत्वात्वाक्यस्यचकालार्थसंयोगपरत्वेनैवोपपत्तेरंगत्वसाधकत्वाभावात यज्ञानारंभ्यत्वात्
श्चेणजाबालारुणि यपरमहंसाद्युपनिषत्सुसंन्यासःश्रूयतेतत्रायितेनैवाक्येनफलंविधेयमितिनतत्त्ववर्ग्य
न्यायावतारःप्रायपाठीप्युक्तरीत्याज्ञानांगत्वसाधकएव तस्माज्ज्ञानांगमेव किंचत्यागःपरिग्रहाणांचजीर्णका
षायधारणंविषयेंद्रियसंप्रयोगस्तत्रालस्यविवर्जनं शरीरपरिसंख्यानंप्रवृत्तिष्वघदर्शनं रजस्तमजयसत्वशुद्धिर्नि
स्पृहतादयाएतैरुपायैसंसिद्धसत्वयोग्यस्तुक्तिर्भवेदितियाज्ञवल्क्यीयैः नैतादृशंब्राह्मणस्यास्तिवित्तंयथैकतासत्य
तासमताच शीलस्थितिर्दंडनिधानमार्जवंततस्ततश्चोपरमःक्रियाभ्यइतिमहाभारतीयेनचात्मज्ञानहेतुप्रकरण
पठितेनतत्रैवकल्पतरूदाहृतेनात्मज्ञानार्थतायाएवसिद्धेःसर्वपरिग्रहत्यागकषायधारणशब्दितस्यदंडनिधानस
र्वक्रियोपरमशब्दितस्यचसंन्यासस्यद्वरस्थस्यापियज्ञशब्देनेवतच्छब्देनपरामृश्यसंसिद्धोभवेदितिज्ञानलक्षणफ
लायविधीयमानत्वस्यावगमात्ज्ञानहेतुपठितस्यचसर्वक्रियोपरमदंडनिधानशब्दितस्यज्ञानहेतुतावगमाच्च
अपिचसह्याश्रमैर्विजिज्ञास्यसमस्तैरेवमेवतु द्रष्टव्यस्त्वथमंतव्यश्रोतव्यश्चद्विजातिभिरितियाज्ञवल्क्येनाश्रमचतु
ष्टयस्यश्रवणमननाधिकारोक्तेःक्षत्रियादीनांचसंन्यासेधिकाराभावस्यप्रागेवावेदितत्वात नसंन्यासःश्रवणांगं

सन्न्यस्यश्रवणंकुर्यादित्यादेःसन्न्यासेनिमित्तेनैमित्तिकश्रवणविध्युपपत्तेःविधवणस्नानादिवत्तद्धर्मतयोपपाद
नोपपत्तिश्चकार्या तथासतिसन्न्यासिनःश्रवणवत्त्वपक्षतावोधकविधेर्वाक्यतापयुपपद्यते किंचज्ञानहेतुप्रकथन
प्रकरणेतपसाब्रह्मचर्येणसंगत्यागेनमेधया तत्रगत्वावतिष्ठंतेयावदाभूतसंप्लवमित्यनेनसंन्यासस्यफलसंबं
धात्प्रकरेणनांगतायावक्तुमनुचितत्वादितिदिक् पराशरपुराणे ब्रह्मविज्ञानलाभायपरहंससमाह्वयः शांतिः
दांत्यादिभिःसर्वैःसाधनैःसहितोभवेत् तथासंन्यासःकर्मसंन्यासद्वारेणब्रह्मवेदने अविद्यानाशकेशब्देविशे
षेपकरोतिहि इत्यादिशांत्यादिवाक्येयद्ग्रहणेनसन्यासस्यज्ञानफलायश्रवणादिगुणैसहविधानमितितात्पर्यम
स्यवर्णनेनवाक्यभेदस्यैववचनाभ्युपगततयातदभेदार्थविशिष्टविधिकल्पनानौचित्यमित्यलंपल्लवनेन इतिश्रीम
त्सकलसामंतचक्रचूडामणिमरीचिमंजरीनीराजितचरणकमलश्रीमन्महाराजप्रतापरुद्रतनूजःश्रीमन्महाराज
मधुकरसाहसूनुचतुरुदधिवलयवसुंधराहृदयपुंडरीकविकासदिनकरश्रीमन्महाराजाधिराजश्रीवीरसिंहदेवो
द्योजितश्रीहंसपंडितात्मजश्रीपरशुराममिश्रसूनुसकलविद्यापारावारपारीणधुरीणजरागद्वारिश्रमहागजपा
रीन्द्रविद्वज्जनजीवातुश्रीमन्मित्रमिश्रकृतेवीरमित्रोदयाभिधनिबंधेमोक्षप्रकाशेसंन्यासिफलं अथसामान्यतोय
तिधर्माः हारीतःतदयवर्गमिच्छन्नात्मस्थानग्नीन्कृत्वामनोवाक्कर्मदंडान्संन्यस्यभूतेभ्योभयंदत्तानपत्येयात

३९

Indira Gandhi National Centre for the Arts

॥मोक्ष१०॥

३९

अनग्निरनिकेतोऽस्वस्तनविधानो मुंडः कषायवासास्त्रिदंडकुंडिकाजलपवनयवित्रसूक्ष्मजंतुनिवारणपालिः आत्मस्थ
न्मनीनात्मन्यारोपितान् आत्मन्यग्नीन्समारोप्येति मनुवचनात् मनोवाक्कर्मणां परपीडाकरत्वेन यादंडरूपता तां परित्य
ज्य अतएवाज्ञयं भूतेभ्यो दत्वा अरण्यं गत्वेति तत्रैव निवासार्थं न प्रत्येयात् यत्याश्रमं गत्वा पुनरर्वाचीनमाश्रमांतरं स्वा
तंत्र्येण वानाश्रयणीयमित्यर्थः इदमेवाह दक्षः गृहस्थवानप्रस्थसंन्यासिनः प्रकम्या त्रयाणामानुलोम्यं स्यात् प्रातिलो
म्यं न विद्यते प्रातिलोम्येयाति नतस्मात्पापकृत्तम इति अनग्निरिति याकाद्यर्थस्याग्नेः प्रतिषेधः श्रौतस्मार्ताग्न्योस्तु
आत्मसमारोपेणाभावस्य सिद्धत्वात् अनिकेतो गृहरहितः अस्वस्तनविधानः स्वस्तननिधानस्वीकरणादिरहितः कुं
डिका कमंडलुः जलपवनार्थं पवित्रं वस्त्रखंडं त्रिदंडेत्यादि कुठीचव इत्युदकविषयं सूक्ष्मजंतूनां निवारणे पालिं व्याप
रं कुर्यादित्यर्थः मनोवाक्कर्मादंडानाह मनुः वाग्दंडोऽथ मनोदंडः कर्मदंडस्तथैव च यस्यैते नियता बुद्धौ त्रिदंडीति स उच्यते
त्रिदंडमेतन्निक्षिप्य सर्वभूतेषु मानवः कामक्रोधौ तु संयम्य ततः सिद्धिं नियच्छति निक्षिप्य सर्वभूतेष्विति सर्वभूतविषय
कं त्रयाणां दंडं निरस्येति कल्पतरुः माधवस्तु त्रयाणां दंडं नियमनं कृत्वेति व्याचचक्षे अतएव वाङ्मनःकर्मणां दंडस्व ३९
रूपमाह दक्षः वाग्दंडे मौनमातिष्ठेत् कर्मदंडे त्वनीहतां मानसस्य तु दंडस्य प्राणायामो विधीयते मनुः अग्निरनिकेतस्या
त् ग्राममन्नार्थमाश्रयेत उपेक्षकोऽसंकुसुको मुनिर्भावसमन्वितः कपालं वृक्षमूलानि कुचैलमसहायता समता चैव सर्वस्मि

न्नेतन्मुक्तस्य लक्षणं नाभिनंदेत मरणं नाभिनंदेत जीवितं कालमेव प्रतीक्षेत निदेशं भृतको यथा दृष्टिपूतं न्यसेत्पादं
वस्त्रपूतं जलं पिबेत सत्यपूतां वदेद्वाणीं मनःपूतं समाचरेत् अतिवादांस्तितिक्षेत नावमन्येत कंचन न चैनं देहमाश्रित्य
वैरं कुर्वीत केनचित् क्रुध्यंतं न प्रतिक्रुध्येदाक्रुष्टः कुशलं वदेत् सप्तद्वारावकीर्णां च न वाचमनृतां वदेत् अध्यात्मरतिरा
सीत निरपेक्षो निरामिषः आत्मनैव सहायेन सुखार्थी विचरेदिह क्लृप्तकेशनखश्मश्रुः पात्री दंडी कुसुंभवान् विचरेन्नि
यतो नित्यं सर्वभूतान्यपीडयन् अनग्निरिति पाकार्थस्याग्नेः प्रतिषेधः अन्नार्थं भिक्षार्थमेव ग्रामं प्रविशेत् न निवासार्थं नि
वासस्तु ग्रामाद्बहिरेवेति वक्ष्यते संकुसुकोऽस्थिरः तन्निषेधेन चित्तस्थैर्यवान् इति मेधातिथिः यद्यसंचयिक इति पा
ठः तदा धनधान्यादिसंचयरहित इति व्याख्येयम् मुनिः संयतवाक् भावेन चित्तेन समन्वितः समाधियुक्तः कपालं भोजन
खर्परं कुचैलं जीर्णवस्त्रखंडः समता शत्रुमित्रादिषु मुक्तस्य लक्षणमित्यनेनाचिरप्राप्यता मोक्षस्योच्यते निदेशं भृतिप
र्यासे वक्ता भृतिकालमेव प्रतीक्षते तथेत्यर्थः दृष्टिपूतं वस्त्रादिना क्षुद्रप्राणिवधपरिहारेण पादं निक्षिपेत् मनःपूतं मनसा
परामृष्टं चिंतनमकुर्वन् समाचरेत् सप्तद्वारावकीर्णां षडिंद्रियाणि बुद्धिः सप्तमी एतैर्गृहीतविषयैर्वाक्प्रवर्तत इति वचोद्वा
राण्युच्यंते तेन तैर्गृहीतान्यविषयां वाचं विसृजेत किंतु मोक्षाश्रयामेवेत्यर्थ इति कल्पतरुः सप्तद्वाराणि धर्मार्थौ धर्मकामौ
त्रिवर्गः अत्रावकीर्णां विक्षिप्तां अतएवानृतां विषयस्यानृतत्वात् तादृशीं न वदेदिति मेधातिथिः सप्तद्वाराणि कामक्रोधलो

Indira Gandhi National Centre for the Arts

नमोहमदमात्सर्याहंकाररूपाणीत्यपरार्क: कुसंकन:कमंडलु:शम: निर्ममोनिरहंकारोनिरपेक्षोनिरामिष: एकात्मनासहा
येनविचरेत्ससुखीभवेत् सूचीपिप्पलकंचैवत्रिविष्टपकमंडलू कंथांपवित्रंपुस्तंचलघुमात्र:परिव्रजेत् अथासूर्येणनि
र्दिष्ट: कीटवत्पर्यटेन्महीं एकवासअवासावाएकदृष्टिरलोलुप: एकएवचरेन्नित्यंधर्मवाननिहिंसक: अभ्यस्तनिधानस्था
सुमति: सुसमाहित: शून्यागारेगुहावासीपर्वतेषुनदीषुच ग्रामांतेवृक्षमूलेवाशुचौदेशेकुलेपिवा तत्रासीन:प्रसन्नात्मा
धारणास्त्रिविधाश्चरेत् पर्यंकंदंडकोलेषुपुंजीतासौयथाविधि नित्यंस्थंडि लशायीस्यात्अनित्यांचवसतिंवसेत् अरण्यनित्यो
मुंडस्यात्मनसाज्ञानमभ्यसेत् तथासायंप्रातर्नतृप्येतनप्रसज्येतभोजने नेंद्रियार्थेषुसज्जेतकदाचिदपिकामत: योवास्यद
क्षिणंवाङ्गंचंदनेनानुलेपयेत् वामंवाप्यस्यतक्षेतसमौतौपुरुषौमतौ एवमस्यभवेज्ज्ञानोनित्यमेवप्रियाप्रिये इष्टेवायदिवाद्वे
ष्येसम:सर्वत्रवर्त्तयेत् सम:साधौचपापेचशत्रौमित्रेसमोभवेत् शीतोष्णसुखदुःखेषुसम: संगविवर्जित: नप्रहृष्यतिसंमा
नेनावमानेनकुप्यति रागद्वेषौसमौयस्यसमुनिसर्वनिस्पृह: श्रुत्वास्पृष्ट्वाचदृष्ट्वाचभुक्त्वाघ्रात्वाचयोनर: नहृष्यतिग्लायति
वासविज्ञेयोजितेंद्रिय: अरोषतोष: समलोष्टकांचन:प्रहीणशोकोगनसंधिविग्रह:व्यपेतनिंदास्तुतिरप्रियाप्रिय: चर
त्युदासीनवदेवभिक्षु: पिप्पलकंसीवनसूत्रं त्रिविष्टपंत्रिपादिका पवित्रंजलपावनंवस्त्रखंडं अतएवश्रीभागवतेविनयाच्चे
न्मुनिर्वासिकौपीनाच्छादनंपरं त्यक्तंनदंडपात्राभ्यामन्यत्किंचिदनापदि शेषोच्छारात्पूर्वत्यक्तं नबिभृयादित्यन्वय:लघु ४०

मात्र: अल्पपरिकर: अथासूर्येणनिर्दिष्ट: यतेर्नवेदितिशेष: दिवैवविचरेन्नरात्रावित्यर्थ: कीटवत् आत्मानंलोकेप्रख्या
पयन् एकवासा: एकपरिधानवासा: अवासा: वासोरहित: एककौपीनपरिहितोजिनेनवेतिवसिष्ठस्मरणात् कंथावत्वे
कवासत्वावासत्वपक्षाणांतत्तदधिकारित्वेनव्यवस्थितोविकल्पइतिवक्ष्यते शून्यागारेशून्यगृहेतदुक्तंमहाभारते शून्या
गारमरण्यंवावृक्षमूलंनदींतथा प्रतिश्रयार्थंसेवेतपार्वतींवापुनर्गुहां पर्यंकंदंडकालेष्विति पर्यंक: पर्यस्तिकादंडस्तंभादि:
कालोगृहादीनांएतेषुहस्तावष्टंभइतिशेष: केचित्तुपर्यंकदंडकोणपदाभिधेयासनभेदेषुभुंजीतयोगंकुर्यात्इतिव्याचक्ष
ते स्थंडिलशायीभूमिशायी अनित्यांवसतिं एकत्रनचिरंवसेदित्यर्थ: सायंप्रातर्नतृप्येतेत्यत्रैवहेतुर्नप्रसज्जेतभोजनइति
इदंचाशास्त्रविषयमितिवक्ष्यतेत क्षणंशास्त्रेण अत्रि: अहिंसासत्यमस्तेयंब्रह्मचर्यापरिग्रहौ भावशुद्धिर्हरेर्भक्तिसंतो
षशौचमार्जवं आस्तिक्यंब्रह्मसंस्पर्शस्वाध्याय: समदर्शनं अनौद्धत्यमदानत्वंप्रसादस्थैर्यमार्दवे सस्नेहोगुरुशुश्रूषाश्र
द्धाक्षांतिर्दमश्शम: उपेक्षाधैर्यमाधुर्यतितिक्षाकरुणातथा ह्रीस्तपोज्ञानविज्ञानेयोगोलघ्वशनंधृति: स्नानंसुरार्चनंध्या
नंप्राणायामोबलिस्तुति: भिक्षाटनंजय:संध्यात्याग: कर्मफलस्यचारक्षस्वधर्मोविरव्यातोयतीनांनियतात्मनामिति स्वा
ध्याय: उपनिषज्ञाग: कर्मकांडाध्ययनस्यनाध्येतव्यंनवक्तव्यंनश्रोतव्यंकदाचनेतिदक्षेणनिषेधात् गुरुशुश्रूषाज्ञान
प्राप्तिपर्यंतांतदुक्तंलिंगपुराणेआश्रमत्रयमुत्सृज्यप्राप्यपरमाश्रमं तत:संवत्सरस्यांतेप्राप्यज्ञानमनुत्तमं अनुज्ञाप्यगु

Indira Gandhi National
Centre for the Arts

रुंचैव चरेदिह पृथिवीमिमां त्यक्तसंगो जितक्रोधो लघ्वाहारो जितेंद्रियः पिधाय बुद्ध्या द्वाराणि ध्याने नैकमना भवेत् मत्स्यशु
शालेपि गुरोरविहिते युक्तः सतु संवत्सरं वसेत् नियमेष्वप्रमत्तः स्याद्यमेषु च सदा भवेत् प्राप्य चांते ततश्चैव ज्ञानयोगमनुत्त
मं अविरोधेन धर्मस्य चरेत पृथिवीमिमामिति संवत्सरमित्युपलक्षणं ज्ञानप्राप्तिपर्यंतं निवसेत् गुरुसमीपवासस्य ज्ञाना
र्थत्वात् पुनरपि अत्रिः श्रद्धया परयोपेतः परमात्मपरायणः स्थूलसूक्ष्मशरीराभ्यां मुच्यते दशपक्करित् गौतमः अनिच
यो भिक्षुरूर्ध्वरेताः ध्रुवशीलो वर्षासु भिक्षार्थं ग्राममियाज्जघन्यमनिवृत्तं चरेत् निवृत्ताशीर्वाक्चक्षुःकर्मसंयतः कौपीनाच्छा
दनार्थं वासो विभृयात प्रहीणमेके निर्णिज्य नाविप्रयुक्तमोषधिवनस्पतीनामंगमुपाददीत न द्वितीयामपर्तु रात्रिं ग्रामे व
सेत् मुंडः शिखी वा वर्जयेद्बीजवधं समो भूतेषु हिंसानुग्रहयोरनारंभी ध्रुवशीलो वर्षास्ववर्षर्त्तौ ग्रामात्ग्रामांतरं न गच्छेदि
त्यर्थः जघन्यमनिवृत्तं चरेत् भिक्षाकाले यद्गृहमुपपत्या विनाविलंबितं न तद्भूयस्तद्गृहं प्रविशेत् निवृत्ताशीः आत्मनः
परस्य वा नष्टाशंसनरहितः कौपीनं गुह्यप्रदेशाच्छादनमिति गौतममिताक्षराकारः प्रहीणं परित्यक्तं वस्त्रं निर्णिज्य प्रक्षाल्य अ
पर्तुर्वर्षर्तुवर्जं द्वितीयां रात्रिं न ग्रामे वसेदित्यर्थः मुंडः शिखी वा सर्वमुंडः शिखावर्जमुंडो वा जटिलत्वनिवृत्त्यर्थो यमारंभ इति ४१
मर्दयातसहायप्रस्करिणः मुंडः शिखी वेति कुटीचकादिभेदेनेति व्यवस्थितो विकल्प इति वक्ष्यते देवलः सभिक्षुः
स्वराग्यनुक्रोशप्रधानः कषायी मुंडितः त्रिदंडकमंडलुपवित्रपात्रपादुकासनकंथामात्रो ज्ञानवानात्मदृष्टिबंधुभिः संसृष्टो

निरपेक्षो परातिक्रमक्षीणविगतपापः समभृत्कांचनः क्षमावानसक्तो मध्यस्थतुल्यारिमित्रो निःपरिग्रहोप्रसवादीनिर्म
गलव्यवहारसंस्कारवीजशिखारत्नधनधान्यविषयोपभोगसंपर्केर्ष्यासर्पमहामायाहर्षविरोधविस्मयविवादशासवित
र्कतंत्रश्चेति यतिधर्माः स्वरागी आत्मानंदपूर्णः पवित्रं कुलपावनेवस्त्रखंडं परेषामतिक्रमक्षीणतातपाविगतं पापं यस्य सः
वसिष्ठः एकशाटी परिहितोजिनेन वा गोप्रलूनैस्तृणैरवस्तृतशरीरः स्थंडिलशाय्यनित्यां वसतिं वसेत् ग्रामांते देवगृहे शू
न्यागारे वृक्षमूले वा मनसा ज्ञानमधीयानो न ग्राम्यपशूनां दृशि विचरेत् अथाप्युदाहरंति अरण्यनित्यस्य जितेंद्रि
यस्य सर्वेंद्रियप्रीतिनिवर्त्तकस्याध्यात्मचिंतागतमानसस्य ध्रुवा ह्यनावृत्तिरुपेक्षकस्य अव्यक्तलिंगोव्यक्ताचारो
नुन्मत्तउन्मत्तवेषेण अथाप्युदाहरंति नशब्दशास्त्राभिरतस्य मोक्षो न चापि लोकग्रहणेरतस्य नभोजनाच्छादनतत्परस्य
नचाभिरम्यावसथप्रियस्य नकुंभ्यां नोदके संगो नचैलेन त्रिपुष्करे नागारे नासने नान्ने यस्य वै मोक्षवित्तु स इति ब्राह्म
णकुलशेषप्रदग्रमतेतद्भुंजीत सायं प्रातर्मधुमांसवर्जनं च तत्प्यं ग्रामे वा वसेदजिह्मोशठो संकुसुको नेंद्रियसंगं कुर्वीत
केनचित् उपेक्षकः सर्वभूतानां पैशून्यमत्सराहंकाराभिमानाश्रद्धानार्जवात्मस्तवपरिगर्हादंभलोभविवर्जनं वर्णाश्रमा
णां धर्मिष्ठं यज्ञोपवीत्युदककमंडलुहस्तः शुचिर्दूषिलालवर्जी न हीयते ब्रह्मलोकात् गोप्रलूनैस्तृणैरवस्तृतशरीरः
गोभिश्छिन्नैस्तृणैराच्छादितशरीरः अनित्यां वसतिं वसेत् नैकत्र वसेदित्यर्थः यदापि ग्रामे वसेत तदा ग्रामांते न तु ग्राममः

Indira Gandhi National Centre for the Arts

ध्ये नग्राम्यपशूनां दर्शनि यत्र ग्राम्यपशून् पश्यति न तत्र नित्यमासीत किं त्वेकांतनिरतेन भवितव्यमित्यर्थः अनाहृतिर्मो
क्षः अव्यक्तलिंगः न लिंगविशेषधारण एव तत्परः स्यात् किं तु व्यक्ताचारो भवेत् शौचादिषु प्रमादी स्यात् तदुक्तं महा
भारते भूषितोपि चरेद्धर्मं यत्र यत्राश्रमे रतः सर्वेषु भूतेषु न लिंगं धर्मकारणं भूषितोपि आश्रमधर्मे षितोपि धर्ममेव चरेदि
त्यर्थः वस्त्रतोनुन्मत्तोपि उन्मत्तवच्चरेदित्यर्थः लोके पूजापरिहारार्थं चैतत् शिष्यं ररेविदं ज्ञापि तिकश्चित् केचित्तु भि
क्षायाधारकाष्ठत्रय इत्याहुः ब्राह्मणकुलत्रय इति शेषः गार्ग्यापत्स्वकाममपि भुंजीतेत्यनुज्ञातं धर्मिष्टं धर्मिष्टमध्येषु धान
तमं यज्ञोपवीतीति कुटीचकबहूदकहंसपरंपरमहंसस्य तत्यागविधानात् हारीतः केतनं चानियोगं च आशिषं कोप
मेव च वर्जयेत् ब्रह्मसमं दयाज्ञानं सर्वत्र सर्वशः हिंसा प्रवर्त्तते केतानि नियोगात् कर्मसंभवः आशिषः पुण्यविस्रंसः कोपसिद्धिवि
नाशकः भिक्षोदकपवित्राद्यार्जवं भिक्षुसक्रियानरकाय नियोगाद्या उभयोरप्यसक्रिया पूज्यमान प्रवृत्तेस्त्वर्हतेव
स्वतेजसा नि वृत्ते स्तूपहन्येत समं वाग्निरिवं भसा फलमग्नौ कृते यद्वत् प्रवृत्तेस्तद्ददादन भस्मन्येव कृते यद्वन्निवृत्तेस्तद्दद
दन् तस्मान्निवृत्तप्रवृत्तेषु आददीताप्यहिंसया केतनमत्र निमंत्रणं नियोगः पराज्ञानुष्ठानं आर्जवमिति क्रियाविशेष
णं तेन भिक्षोदकपवित्राद्याः ऋजुभावेन शोभनाभिक्षुसक्रियेत्यर्थः नरकायेति नियोगाद्या असक्रिया उभयोरपि नर
कायेत्यन्वयः लक्षणपूर्वकं यतिधर्मानाह हारीतः अहिंसानामसर्वभूतेष्वनभिद्रोहः चक्षुर्मनो वक्तृशरीरकर्मणां न्या
सकर्मेंद्रियबुद्धींद्रियाणां संयमो हंकारकामक्रोधलोभोपनिवर्त्तनमाशीः प्रतिषेधसंगापरिग्रहो ममत्ववर्जनं कलहवाद
कुतूहलोपनिवृत्तिर्दिने योनित्यं परहितत्वं प्राणभृत्परत्वं व्यतगतमानसत्वं पूर्वापरशास्त्रानुसंधानं प्राणायामदेवनं देवाल
यपर्यटनं नराशौचवर्षासु प्रकीर्णस्थानेन भूतावतरणं न विक्षोभणं नोत्क्षेपणं सत्योनैक्षग्रहणं स्वविमृष्टभोजनं समभानाव
मानता सम सुख दुःखोपभोगता समलोष्टाश्मकांचनता जंतूनां शरीरारूढानां रुक्मचामरव्यजनवस्त्रांतेन वीज्यमानेनाप
सर्पणकरणं बौधायनः अथ यज्ञोपनिषदमाचार्या ब्रुवंते तत्रोदाहरंति स्थानमौनवीरासनसवनोपस्पर्शनचतुर्थषष्ठा
ष्टमकालयुक्तस्य कणपिण्याक यावकसक्तुदधिपयोव्रतत्वंचेति तत्र मौनयुक्तस्त्रैविद्यवृद्धैराचार्यैर्मुनिभिरन्यैर्वाश्रमि
भिर्वक्तृश्रुतैर्दांताकृंधा याधमूक एव यावदर्थसंभाषीन स्त्रीभिर्नयत्र व्रतलोपो भवतीति विज्ञायते स्थानमौनवीरासनाना
मन्यतमेन युक्तो भत्रयं सन्निपातयेद्यत्र गतश्चेद्यावन्मात्रमनुव्रतयेदायत्तनयत्र व्रतलोपो भवतीति विज्ञायते स्थान
मौनवीरासनसवनोयस्पर्शनचतुर्थषष्ठाष्टमकालयुक्तस्याष्टौ तान्यव्रतघ्नानि आपो मूलं फलं पयः हविर्ब्राह्मणकाम्या
गुरोर्वचनमौषधमिति छागलेयः अतःपरं प्रवक्ष्यामि योगसिद्धिसमाश्रयं त्यज धर्ममधर्मं च उभे सत्यानृते त्यज अहिंसः
सर्वभूतानां कर्मणा मनसा गिरा महात्मा रतेत्यजधर्ममधर्मं च उभे सत्यानृते त्यज उभे सत्यानृते त्यक्त्वा येन त्यजसि तत्त्यज
त्यज धर्ममसंकल्पादधर्मं चाप्यहिंसया उभे सत्यानृते बुध्या बुद्धिं परमनिश्चयात् याज्ञवल्क्यः ॐ अन्यसन्नयवावेदं ४२

Indira Gandhi National
Centre for the Arts

॥मी०द्वि०॥

न्यस्तकर्मा वनेवसन् अयाचिताशीमितभुक् परां सिद्धिमवाप्नुयात् वेदं उपनिषज्जातं तदुक्तं तेनैव ज्ञेयं चारण्यकम
५३ हं पदादित्यादयानं श्रवान् योगशास्त्रं च मत्प्रोक्तं ज्ञेयं योगमभीप्सता मनुः अधियज्ञं ब्रह्म जपेदाधिदैवतमेवं च अध्या
त्मिकं च सततं वेदांताभिहितं च यत् इदं शरणमज्ञानामिदमेव विजानतां इदमन्विच्छतां स्वर्गमिदमानंत्यमश्नतां अ
धियज्ञं यज्ञविधायकं ब्राह्मणं आधिदैवकं देवताप्रकाशकं अध्यात्मिकं स्वस्य सर्वात्मत्वेनानुसंधानप्रतिपादकं अहं मनु
रभवं सूर्यश्च अहं रुद्रेभिर्वसुभिश्चरामीत्यादिकं वेदांताभिहितं वेदांत इति यदभिहितं तदपि जपेदित्युपलक्ष्यते इति क
ल्पतरुमेधातिथी वेदांतेषु जप्यत्वेनोक्तमोंकाररूपमिति सर्वज्ञनारायणः इदमिति वेदारंभब्रह्मोच्यते अयं च पूर्वोक्तस्यै
वार्थवादः मनुः प्राणायामा ब्राह्मणस्य त्रयोपि विधिवत्कृताः व्याहृतिप्रणवैर्युक्ता विज्ञेयं परमं तपः दह्यंते ध्मायमानानां
धातूनां हि यथा मलाः तथेंद्रियाणां दह्यंते दोषाः प्राणस्य निग्रहात् व्याहृतयः भूर्भुवः स्वरिति प्रणव ओंकारः तैर्युक्ताः प्रा
णायामाः तत्र मुख्यस्य नासिकास्यचरवायोर्बहिर्निष्क्रमणनिरोधेन कुंभकपूरकाख्याः अनुच्छ्वसतो बहिरंतर्गमनवायोरु
त्सर्गेण रेचको भवति दह्यंते दोषा इति इंद्रियाणां विषयसंनिकर्षे यो प्रीतिपरितापौ ततः पापं तस्य दाहः प्राणनिरोधादि ५३
त्यर्थः प्रीतिपरितापयोर्हि मुक्तिप्रतिबंधकत्वात् स्रक्संगस्पर्शनारीरिपुयाद्वविकरूपशब्दसंनिकर्षे प्रीतिपरितापौ भवति
इत्यर्थः प्राणायामाः अयं च निवर्त्यनिवर्तकभावः प्रत्यक्षसिद्धोपि प्राणायामस्तुत्यर्थमुच्यते महाभारते आहारार्थं कर्म

कुर्यादनिंद्यं कुर्यादाहारं प्राणसंधारणार्थं प्राणाधार्यस्तत्त्वजिज्ञासनार्थं तत्त्वं जिज्ञास्यं येन भूयान्न भूयः एवं धर्मर
तस्यैव सिद्धिरित्युक्तं नृसिंहपुराणे यतिधर्मरतः शांतः सर्वभूतसमो वशी प्राप्नोति परमं स्थानं यत्प्राप्य न निवर्तते न
निवर्तत इति ब्रह्मभूतस्य नावृत्तिः शब्दादिति न्यायेन न च पुनरावर्तत इति श्रुत्युक्तापरावृत्तिरुक्ता धर्मानुष्ठानमेवाव
श्यकं न पुनर्लिंगधारणमात्रमित्याह मनुः भूषितोपि चरेद्धर्मं यत्र यत्राश्रमे वसन् समः सर्वेषु भूतेषु न लिंगं धर्मकारणं फ
लं कतकवृक्षस्य यद्यप्यंबुप्रसादकं न नामग्रहणादेव तस्य वारि प्रसीदति तथा अनेन क्रमयोगेन परिव्रजति यो द्विजः स वि
धूयेह पाप्मानं परं ब्रह्माधिगच्छति भूषितोपि आश्रमधर्मैर्दंडधारणादिभिः धर्मं परिव्राजकस्य रागद्वेषलोभमोहपरिहाररू
पं फलमिति कतकवृक्षस्य फलं हि जलेनिर्दिष्टं स दंबुप्रसादकं न हि नामग्रहणमात्रात्तत्सिद्धिः अतो धर्मानुष्ठानमावश्य
कं आश्रमसमुच्चयक्रमेण प्रत्याश्रममनुतिष्ठन् पाप्मानं विधूय परब्रह्मैक्यमागच्छतीति वाक्यार्थः यथा पुष्करपलाश आपो न श्लि
ष्यंति एवमेवंविदि पापं कर्म न श्लिष्यत इति ब्रह्मसाक्षात्कारादेव पापविधूननप्रतीतेः अथ प्रतिविशेषधर्माः यतिचातुर्विध्यमा
ह पितामहः चतुर्विधा भिक्षवस्तु विख्याता ब्रह्मणो मुखात् कुटीचको बहूदको हंसश्चैव तृतीयकः चतुर्थः परमहंसस्तु सं
ज्ञाभेदैः प्रकीर्तिताः महाभारतेपि चतुर्विधा भिक्षवस्तु कुटीचकबहूदकौ हंसः परमहंसश्च यो यः पश्चात्स उत्तमः हारीतो
पि चतुर्विधा भिक्षवस्तु प्रोक्ताः सामान्यलिंगिनः तेषां पृथक्पृथक् ज्ञानं वृत्तिभेदात्पृथक् कृतं कुटीचको बहूदको हंसः

Indira Gandhi National Centre for the Arts

।मोक्षप०॥
४४

श्चैवततीयकः चतुर्थः परमोहंसोयोयपश्चात्सउत्तमः अत्रतीव्रतीव्रतरत्वात्त्रात्क्रवैराग्यवतः कुटीचकादिरूपसन्या
सग्रहणमित्युक्तः प्राक् तत्रकुटीचकस्यवृत्तिविशेषमाहप्रजापतिः तत्रकुटीचकोनाम स्व गृहेववर्त्तमानः शफविरक्
लुषोऽहिताग्निषु भिक्षांभुंजानोपगतकामक्रोधलोभमोहाहंकारवजीतपश्चात्मानुग्रहकुंरुतेहद्वपराशरः कुटीच
कोनामपुत्रादिभिः कुटीकारयित्वाक्रोधक्रोधलोभमोह मदमात्सर्यभियादीत् हित्वा विधिवत्सन्यात्संकृत्वात्रिदंडजल
पवित्रकषायवस्त्रधारिणः स्नानशौचाचमनजपस्वाध्यायब्रह्मचर्यध्यानतत्पराः पुत्रादेरेवभिक्षाकालेपात्रामात्रमुप
युंजानास्तस्यांकुर्घ्यांनित्यंवसंतआत्मानंमोचयंतइति जलपवित्रंजलग्रवनार्थवस्त्रयात्रामात्रंप्राणयात्रामात्रंप्राण
यात्रामात्रं कुटीचकस्यस्वबंधुष्वेवभिक्षोक्तास्कंदपुराणे कुटीचकाश्चसंन्यस्यस्वेस्वेवेश्मनिनित्यशः भिक्षामादाय
भुंजंतिस्वबंधूनांगृहेथवा शिखायज्ञोपवीतिस्यात्रिदंडीसकमंडलुः अत्रपूर्वोक्तप्रजापतिवचनादाहिताग्निषुसर्वे
षुभिक्षाकार्येत्युक्तं पुत्रादिषुअनाहिताग्निष्विति व्यवस्था तीव्रवैराग्यवतोप्यशक्तस्यकुचकत्वमित्युक्तं बौधा
यनेन कुटीचकाः परित्यज्यस्वेस्वेवेश्मनिनित्यशः भिक्षांबंधुभ्यआदायभुंजतेशक्तिसंक्षयादिति बहूदकस्यधर्मा
नाहस्कंदः बहूदकश्चसंन्यस्यबंधुपुत्रादिवर्जितः सप्तागारंचरेद्भैक्षमेकान्नंचपरित्यजेत् गोवालरज्जुसंबद्धंत्रिदंडं
शिक्यसुदृतंजलपात्रंपवित्रंचखनित्रंचकृपाणिकां शिखांयज्ञोपवीतंचदेवताराधनंचरेत् कृपाणिकाछुरिका ह्ह ४४

पराशरः तत्रबहूदकानामत्रिदंडकमंडलुपवित्रपात्रकषायवस्त्रधारिणोवेदांतार्थविबोधकाः साधुवृत्तेषुब्राह्मणगृहे
षुभैक्षाचर्यांचरंतआत्मानंमोचयंतइति वहूदकस्यनस्वबंधुवर्गेभिक्षा तदाहपितामहः बहूदकसविज्ञेयः सर्वसंग
विवर्जितः बंधुवर्गेनभिक्षेतस्वभूमौनैवसंवसेत् निश्चलः स्थाणुभूतश्चसदामोक्षपरायणः नकुर्यान्नोदकेसंगंकु
र्यात्स्वेनचेतसा नागारेनासनेनान्नेनास्तरेनत्रिदंडके स्वमात्रायांनकुर्याद्वैएगंदंडादिकेयतिः कुटीचकबहूदकयो
: त्रिदंडनाशेपुनस्तत्वाजपर्यंतमेकदंडग्राह्यतामाहहारीतः नष्टेजलपवित्रेवात्रिदंडेवाप्रमादतः एकंतुवैणवंदंडंपाला
शंबैल्वमेववा गृहीत्वाविचरेत्तावद्याव ज्योत्रिदंडकं मेधातिथिरपियावन्नस्युस्त्रयोदंडास्तावदेकेनपर्यटेत् हंसस्य
त्विस्कंदपुराणेदर्शिता हंसःकमंडलुंशिक्यंभिक्षापात्रंतथैवच कंथांकौपीनमाच्छाद्यमंगवस्त्रंवहिः पटंएकंतवैणवं
दंडधारयन्नित्यमादरात् देवतानामभेदेनकुर्याध्यानंसमर्चयेत् सर्वदेवताभेदेनहरिंध्यायेदित्यर्थः पितामहः हंसस्तृ
तीयोवितेयोभिक्षुर्मोक्षपरायणः नित्यंत्रिषवणस्नायीत्वाङ्वासाभवेत्सदा चांद्रायणेनवर्त्तेतयतिधर्मानुशासनात् वृ
क्षमूलेवसेन्नित्यंगुहायांवासरित्तटेहंसाः कमंडलुंशिक्यंदंडंपात्रात्रिविशुतः ग्रामतीर्थैकरात्रश्चनगरेपंचरात्रिकाःत्रि
षट्रात्रोपवासश्चपक्षमासोपवासिनः कृच्छ्रलंतयनादैश्चव्रतैकृत्रावपुर्धराः यज्ञोपवीतंदंडंवस्त्रंजंतुनिवारणं ता
वान्परिग्रहः प्रोक्तोनान्योहंसपरिग्रहः एकदंडधरामुंडाहंसाः परमहंसकाः इतिकात्यायनवचनेनहंसपरमहंसयोरे

Indira Gandhi National
Centre for the Arts

॥मोक्षप१०॥ कदंडत्वं मुंडत्वं धर्मः कुटीचकबहूदकयोः पूर्वोक्तवचनात्त्यां सशिखत्वं त्रिदंडत्वं धर्मः परमहंसव्यतिरिक्तानां
४५ यज्ञोपवीतित्वं धर्म इति व्यवस्था परमहंसधर्मः स्कंदपुराणे कौपीनाच्छादनं वस्त्रकं थाशीतनिवारिणीं अक्ष
मालां च गृहीयाद्वैणवं दंडमव्रणं माधूकरमथैकान्नं परहंससमाचरेत् वसिष्ठेन तु एकशाटीपरिहितो जिनेन
वेति एकवस्त्रयज्ञोपयुक्तः स च वैराग्याधिक्ये इष्टव्यः कुटीचकादीनां संग्राह्यमपि परमहंसेन त्याज्यमित्युक्तं स्कं
दपुराणे परहंसस्त्रिदंडं च रज्जुं गोवालनिर्मितां शिखां यज्ञोपवीतं च नित्यं कर्म परित्यजेत् जाबालश्रुतावपि तत्र
परमहंसा नाम संवर्तकेत्युपक्रम्य शिखायज्ञोपवीतयोस्त्याग उक्तः दंडं कमंडलुं शिक्यं पात्रं जलपवित्रं शिखां
यज्ञोपवीतं चेत्येतत्सर्वं भूः स्वाहेत्यप्सु परित्यज्यात्मानमन्विच्छेद्यथाजातरूपधरो निर्द्वंद्वो निःपरिग्रहः तत्त्ववि
द्ब्रह्ममार्गे सम्यक्संपन्नः शुद्धमानसः प्राणसंधारणार्थं यथोक्तकाले विमुक्तो भैक्षमाचरन्नुदरपात्रेण लाभालाभौ समौकृ
त्वा शून्यागारदेवगृहतृणकूटवल्मीकवृक्षमूलकुलालशालाग्निहोत्रनदीपुलिनगिरिकुहरकंदरकोटरनिर्झरस्थं
डिलेष्वनिकेतो वासयत्नो निर्ममः शुक्लध्यानपरायणोऽध्यात्मनिष्ठाशुभकर्मनिर्मूलनपरः संन्यासेन देहत्यागं करोति स प ४५
रमहंसो नामेति मैत्रायणीयश्रुतावपि इंद्रस्य वज्रोसीति त्रीन्वैणवान्दंडान्दक्षिणे पाणौ धारयेदिति कुटीचका
दिसंन्यासमभिधायैकं वा यद्येकं तदा सशिखं वपनं कृत्वा विसृज्य यज्ञोपवीतमिति परमहंसाभिधानात् पिप्पलादशा

खायामपि सशिखं वपनं कृत्वा बहिःसूत्रं त्यजेद्बुधः यदक्षरं परं ब्रह्म तत्सूत्रमिति धारयेत् सूचनात्सूत्रमित्याहुः
सूत्रं नाम परात्परं तत्सूत्रं विदितं येन स विप्रो वेदपारगः येन सर्वमिदं प्रोतं सूत्रे मणिगणा इव तत्सूत्रं धारयेद्योगी
योगवित्तत्त्वदर्शिवान् बहिःसूत्रं त्यजेद्विद्वान्योगमुत्तममास्थितः ब्रह्मभावमिदं सूत्रं धारयेद्यः सचेतनः धारणा
दस्य सूत्रस्य नोच्छिष्टो भवति द्विजः एतेन यत्कैश्चिदुक्तं बहिःसूत्रं त्यजेद्विद्वानिति हिरण्यगर्भोपासनाप्रतिषेधपरं न
तु यज्ञोपवीतत्यागपरमिति तत्परास्तं नोच्छिष्टो नाशुचिर्भवेदिति तद्विनाऽप्यशुचितायाः प्राप्त्यभावात् सूत्रमंतर्गतं
येषां ज्ञानयज्ञोपवीतिनां ते वै सूत्रविदो लोके ते च यज्ञोपवीतिनः ज्ञानशिखिनो ज्ञाननिष्ठा ज्ञानयतोपवीतिनः
ज्ञानमेव परं तेषां पवित्रं ज्ञानमुच्यते अग्नेरिव शिखा नान्या यस्य ज्ञानमयी शिखा स शिखीत्युच्यते विद्वान्नेतरे
केशधारिणः कर्मण्यधिकृता ये तु वैदिके ब्राह्मणादयः एभिर्धार्यमिदं सूत्रं क्रियांगं तद्धि वै स्मृतं शिखा ज्ञानमयी य
स्योपवीतं च तन्मयं ब्राह्मण्यं सकलं तस्य इति ब्रह्मविदो विदुः आरुणिश्रुतावपि परमहंसस्यमुपक्रम्यारुणिः प्रजा
पतेर्लोकं जगाम तं गत्वोवाच केन भगवन् कर्माण्यशेषतो विसृजानीति तं होवाच प्रजापतिः पुत्रान्भ्रातॄन्बंधा
दीन् शिखां यज्ञोपवीतं यागं सूत्रं स्वाध्यायं च विसृजेत् दंडमाच्छादनं कौपीनं च परिग्रहेच्छेषं विसृजेच्छेषं विसृजेत् गृ
हस्थो ब्रह्मचारी वानप्रस्थो वा लौकिकाग्नीनुदराग्नौ समारोपयेत् गायत्रीं च स्ववाचाग्नौ समारोपयेत् उपवीतं भूमौ वा

National Centre for the Arts

मोक्षध०॥
४६

क्तः वा विसृजेत् व्यासस्मृतावपि यज्ञोपवीतं कर्मांगं वदंत्युत्तमबुद्धयः उपकुर्वाणकात्पूर्वं यतो लोके न दृश्यते या
वत्कर्माणि कुरुते तावदेवास्य धारणं तस्मादस्य परित्याग ईर्यते कर्मभिः सह अग्निहोत्रादिनाग्नीन् जुहूादीनि
यथा त्यजेत् यथा च मेखलादीनि गृहस्थाश्रमं वांछया पत्नीयोक्तं पथे यंते सोमांते च यथाग्रहान् तद्वद्यज्ञोपवीत
स्य त्यागं यद्विच्छंति योगिन इति एतदेव विज्ञत्वा मित्रोपि जगाद सत्यानृते सुखदुःखे वेदानिमं लोकममुं च परित्य
ज्यात्मानमन्विच्छेदिति शिखायज्ञोपवीतकपालानां त्यागीति बौधायनोपि अत ऊर्ध्वं यज्ञोपवीतमग्नमाच्छादनं पद
यः त्रिकं जलपवित्रं कमंडलुमित्येतानि वर्जयित्वाऽथैकं दंडमादत्ते सखा मा गोपायेति इदमेव स्मृत्यंतरेप्युक्तं
यदा तु विदितं तत्स्यात्परं ब्रह्म सनातनं तदैकदंडं संगृह्य उपवीतं शिखां त्यजेत् अनेन श्रुतिस्मृतिसमुतिसमुदायेन
परमहंसस्य शिखायज्ञोपवीतत्यागे प्रपंचिते यान्यन्यानि शिखायज्ञोपवीतसंध्यावंदनावश्यकत्वप्रतिपादकानि व
चनानि पद्मपुराणे शिखायज्ञोपवीतेन त्यक्ते नासौ कथं द्विजः अत्रिः यज्ञोपवीतं सर्वेषां द्विजानां मुक्तिसाधनं परित्यजं
ति ये मोहान्नरा निरयगामिनः हारीतः चत्वारोप्याश्रमाद्यैते संध्यावंदनवर्जिताः ब्राह्मण्याद्देवहीयंते यद्यप्युग्रतपोध्वरा ४६
इति बौधायनोपि अनागतां तु ये पूर्वामनतीतां तु पश्चिमां संध्यां नोपासते ये तु कथं ते ब्राह्मणाः स्मृताः मनुः सावित्रीपति
ता व्रात्या भवंति इत्यादीनि तानि परमहंसव्यतिरिक्तविषयत्वेनाप्युपपन्नानि शिखायज्ञोपवीतत्यागवचनानां निरवका

शत्वात् स्पष्टोयमर्थो जाबालश्रुतौ पृष्ठा मित्वा याज्ञवल्क्यायज्ञोपवीनी कथं ब्राह्मण इति स होवाच याज्ञवल्क्यः इदमेवा
स्य तद्यज्ञोपवीतं य आत्मेति न च शिखायज्ञोपवीतत्यागवचनानि पुरातनविषयाणि स्मृत्यंतरेण स्नानि निक्षत्य पुराणं
वस्त्रं यज्ञोपवीतं कमंडलुं त्यक्त्वा नवानि गृहीत्वा ग्राममंत्रविज्ञेदित्यभिधानादिति वाच्यं तस्य कुटीचकादिविषयत्वेना
प्युपपत्तेः शिखायज्ञोपवीताभ्यां विना आचमनाद्यनावश्यकं कौषीतकिब्राह्मणेप्यश्रौतत्वाभ्यां निराकृता तत्र हि किमस्य पसो
पवीतं का वास्य शिखा कथं वास्योपस्पर्शनमिति प्रश्नः इदमेवास्य तद्यज्ञोपवीतं यदात्मज्ञानं विद्या शिखेत्यप्युत्तरं त
था च परमहंसस्य शिखायज्ञोपवीतत्यागश्रावश्यकः गायत्रीत्यागोपि कर्मण्यधिकृता येक्तवैदिके ब्राह्मणादयः एभि
र्ह्यार्थमिदं सूत्रं क्रियांगं तद्धि वै स्मृतं। मिति पिप्पलाद ज्ञानखास्थवचनेन सूत्रधारणस्य कर्माधिकारिहेतकत्वेन कर्मानधिका
रिकृतः सूत्रत्याग इति दिक्त वादात् च तत्र गृहीतान्यानि नवंति न ह्युत्रा नूपाजायद्यं भवतीति वत क्रियात्यागे तदंगस्यापि
त्यागात् सूत्रवन्यायप्राप्ति त्यागः सिद्धः अत्र केचिदाहुः न परमहंसेनापि गायत्रीत्याज्या शिखां यज्ञोपवीतं चेत्येतत्सूत्वा हि
त्य क्तः परित्यज्येति वत् तस्यास्त्यागस्य विशिष्याकथनात् गायत्रीजपस्य नित्यत्वात् सर्वसाधारणेन वाक्य सहे स्वेष्टदाह
तत्वात् त्यक्त सावित्रिकाणां दुर्ब्राह्मणे पुपतितेष्वगणनाच्च न च पूर्वोदाहृत गायत्रीप्रवेशास्य गायत्रीस्वत्वाच्चाग्नौ समा
रोप येदित्या रूण्यश्रुतौ वागग्नौ समारोपस्यैवोक्तेरर्थात् त्यागएवापातीति वाच्यं गायत्रीप्रवेशास्य संन्यासप्रयोगा तन्नू

Indira Gandhi National
Centre for the Arts

तकर्मणः प्रधानस्यांगस्य वानुष्ठेयतयाविहितत्वेन तावन्मात्रतात्पर्यकवाक्यैर्विशेषवाक्यमंतराणि नित्यप्राप्तगायत्री त्याग
स्य स्वीकर्त्तुमनुचितत्वात् बौधायनेन पुनरपि गायत्रीजपोक्तेः प्रवेशस्य गायत्रीजपाभावप्रयुक्तप्रयोजकतया स्पष्टी
करणीच्च किंच सन्यस्याग्निं न पुनरावर्त्तयेत् मामन्यं जायामावहेदित्यध्यात्ममंत्रान् जपेदिति सन्यासोपनिषदि समारोपिता
नामग्नीनां पुनराहृत्य नावकथनेन समारोपणस्य परित्यागं प्रति प्रयोजकतायास्य स्फुटत्वात् अन्यथा न पुनरावर्त्त
येदिति व्यर्थं स्यात् गायत्र्या अपि ब्रह्मपरतायाश्चाकरे प्रतिपादितत्वेनाध्यात्ममंत्रान्तर्भावात् तज्जपस्याहत्यापि साधयितं
क्यत्वात् अत एवाम त्रवदाचरेदित्यपिव्याख्यातं गायत्र्यादिव्यतिरिक्तमंत्राणां त्यागोपपत्तेः स्वाध्यायं चेति वेदत्यागोपि गा
यत्रीव्यतिरिक्तवेदस्यैव गायत्रीत्यागे प्रत्यवायस्य परमहंसव्यतिरिक्ते सावकाशत्ववत् वेदमंत्रत्यागस्यापि गायत्रीव्यति
रिक्तस्यैवोपपत्तेः उपनिषदतिरिक्तत्वेन संकोचस्यावश्यकत्वादिति न परमहंसस्य गायत्रीत्याग इति अत्रोच्यते नहि
वयमपि परमहंसस्य गायत्रीत्यागं वा वेदत्यागं वा ब्रूमहे किं तु प्रणवे गायत्रीसहितं वेदमंतर्भाव्य तज्जपेनैव तज्जपं निर्वाह
यामः उक्तं च बौधायनेन अनग्निरनिकेतस्याद ग्रामार्थाश्रमशरणो मुनिः भिक्षार्थी ग्राममन्विच्छेत् स्वाध्याये वाचमुत्सृजेत् विज्ञा
यते ऽपरिमिता वाचो परिमितानि सामानि अपरिमितानि यजूंषि अथैतस्यांतो नास्ति यद्ब्रह्म तत् प्रतिगृह्णीयाद्वाचं मीत
स प्रतिगरइत्येवमेवोपासीता शरीरविमोक्षणात् वृक्षमूलिको वेदसंन्यासी वेद वृक्षस्य मूलं प्रणवः प्रणवात्मकं तथा ४५

यनु प्रणवो ब्रह्म ब्रह्मन्न्यायाय कल्पत इति होवाच प्रजापतिः यतिधर्मसमुच्चयेपि वेदो वृक्षस्तस्य मूलं प्रणवो ब्रह्मवाच
कः वृक्षमूलीयतिसस्यात् पक्वे वेदो परिग्रहः तथा च सर्वस्य वेदस्य प्रणवे तर्नाव कथनं तज्जपेनैव जपसिध्यर्थ एवं चा
गायत्र्या अपि तज्जपेनैव जपसिद्धिः एवं च गायत्री स्ववाचाग्नौ समारोपयेदित्यारुणिश्रुतेरपि तदनुसारेण यमर्थः वाचा
त्रार्थ श्रावयंतः सकलवाग्रूपत्वात् ओंकारपदपरः तथा च तत्रैव समावेशः प्रवेशः तज्जपेनैव जपसिद्धिः स्यात् तच्चैणजा
पाभावएव ओंकारस्य सर्ववागात्मत्वं च पूर्वोक्तबौधायनवाक्येनोंकारेण सर्वा वाक् संतृणेति श्रुत्या चावगम्यते किंच
परमहंसोपनिषदि तदेतमोंकारं परमं धाम तदेव शिखा तदेवोपवीतं चेत्युपक्रम्य सा संध्या सर्वानुकामान् परित्यज्याद्वैते
परमस्थितिरित्यनेनाद्वैतप्रतिपादकप्रणवादिषु संस्थितिरेव संध्या संध्याकार्यकारिणीत दकरणे प्रत्यवायपरिहारो
रोपितत एव ब्रह्मसंस्थतास्याश्रमविहितं कर्मेत्यादिनापीदमेवाभिप्रेत्य भाष्यकारैः परं जैमिनिरिति सूत्रे मिहितं अ
द्वैतसंस्थितेर्यतिं प्रति संध्यावंदनकार्येविधानात् संध्याशब्दाभिधेयागायच्चैवेति प्रतिपादितमाह्निकप्रकाशोऽप्यत ए
वाश्वलायनेन संध्यामुपक्रम्य गायत्रीजप एवोक्तः अत एवोत्तरतापनीये तेदेवा ऊचुः पुत्रैषणायाश्च वित्तैषणायाश्च लोकै
षणायाश्च समाधनेभ्यो व्युत्थायनिरगाराः निःपरिग्रहा अशिखा अयज्ञोपवीता अंधा बधिरा मुग्धाः क्लीबा मूका उन्मत्ता
इव परिवर्त्तमानाः शांता दांता उपरतास्तितिक्षवः समाहिता आत्मरतय आत्मक्रीडा आत्ममिथुना आत्मानंदाः प्रणवमेव

Indira Gandhi National
Centre for the Arts

मो०ह्र०प०॥ यरंब्राह्मात्मएकात्मकंजगच्चूम्येजानंतस्तत्रैवपरिसमाप्ताः तस्मात्देवानांव्रतमाचरन्नोंकारेपरेब्रह्मणिपर्यवसितोभवे-
५८ त्स्वात्मना आत्मानंपरंब्रह्मपश्यति स्कांदेपि कुटीचकाश्चहंसाश्चतथैवचबहूदकाः गायत्रीमात्रसंपन्नाभवेयुर्मोक्ष
कारणात् प्रणवाद्यास्त्रयोवेदाःप्रणवेपर्यवस्थिताः तस्मात्प्रणवमेवैकंपरहंसः सदाजपेत् सूतसंहितायामपि नसंति
मंत्राजप्याश्चपरहंसस्यसर्वदात्रयीसारमिमंमंत्रंजपेन्नित्यंसमाहितः प्रणवादपरंमुक्त्वा कदामुक्तोभविष्यति अका
रःसर्वमंत्राणामुत्तमः परिकीर्तितः अकारेणजवेनैवसंसाराच्चिंतरिष्यति तथा कुटीचकाश्चहंसाश्चतथैवचबहू
दकाः नित्यानुष्ठानतः शुद्धाभवंतिद्विजपुंगवाः चित्तशुध्यामुमुक्षुत्वंक्रमान्नेषांविजायते मुमुक्षुत्वेतसंजातेभवेयुः
परहंसकाः परहंसस्तुनित्याख्यकर्मत्यक्त्वाविधानतः शमादिसाधनोभूत्वावेदांतसानमभ्यसेत किंच संध्यागाय
त्रीजपादेस्तत्तदाश्रमपुरस्कारेणैवविधानात्परहंसंप्रतिगायत्रीजपप्रसक्तिरेवनास्ति तथाहि स्कंदपुराणे अथा
तः संप्रवक्ष्यामिब्रह्मचर्याश्रमंमुनेइत्युपक्रम्यसायंप्रातरुपासीतसंध्यांविप्रः तइति तथा अथातः संप्रवक्ष्यामिगार्ह
स्थ्यंसंग्रहेणतइत्युपक्रम्यप्राणायामत्रयंकुर्यात्गायत्रींचजपेद्बुधइति तथा अथातःसंप्रवक्ष्यामिवानप्रस्थाश्रमंमु ५९
नइत्युपक्रम्यभूमौशयीतसततंसावित्रींचजपेद्बुधइति अथातः संप्रवक्ष्यामिसंन्यासंमुनिसत्तमेत्युपक्रम्यचतुर्वि
धास्तुविज्ञेयाभिक्षवोहंत्तिभेदतः कुटीचकोमुनिश्रेष्ठतथैवचबहूदकः हंसपरमहंसश्चतेतेषांवृत्तिंवदामितइतिकु

टीचकधर्माननिधायसपवित्रश्चकाषायीगायत्रींचजयेत्सदेति बहूदकधर्माननिधायसंध्याकालेषुसावित्रींजपन्क
मसमाहरेदिति हंसःकमंडलुमितितद्धर्माननिधायसंध्याकालेषुसावित्रींजपन्नध्यात्मचिंतनं तीर्थसेवातथाकृत्स्नत
याचांद्रायणादिकं कुर्वन्ग्रामैकरात्रेणन्यायेनैवसमाचरेदिति एवंसर्वाश्रमेषुविशेषतोगायत्रीजपाभिधानात्पर
महंसस्यगायत्रीजपप्रसक्तिरेवनास्ति तस्यतुकेवलंप्रणवजपमात्रंविहितं सूतसंहितायां प्रणवाद्यास्त्रयोवेदाःप्रणवेप
र्यवस्थिताः तस्मात्प्रणवमेवैकंपरहंसःसमभ्यसेत् संध्याकालेषुशुद्धात्माप्रणवेनसमाहितः षट्प्राणायामकंकुर्याज्जपे
दष्टोत्तरंशतंविविक्तदेशमाश्रित्यसुखासीनः समाहितः यथाशक्तिसमाधिस्थोभवेत्संन्यासिनांवरः तस्मात्परमहंसस्य
नगायत्रीजपः एकएवचदंडः मुंडीत्वाएकदंडधरामुंडाहंसाः परमहंसकात्यायनवचनात् नन्वेवंमेकदंडविधानंपर
हंसस्त्रिदंडंचरज्जुंगोवालनिर्मितांशिखांयज्ञोपवीतंचनित्यंकर्मपरित्यजेदितिस्कांदवाक्येनचत्रिदंडत्यागस्यतद्वये
दत्तवाक्यविरुद्धं तेनहिसर्वेषामाश्रमिणांक्रमेणलक्षणान्यभिधायानेनत्रिदंडेनयतिंचैवेतियतेर्लक्षणमुक्तं यस्यैतद्लक्ष
णंनास्तिपापश्चित्तीनचाश्रमीतित्रिदंडाभावेप्रत्यवायोप्युक्तः अत्रिरपिशिखिनस्त्रुतःकेचित्केचिन्मुंडास्तुभिक्षु
काः चतुर्द्धाभिक्षवः प्रोक्ताःसर्वेचैवत्रिदंडिनइति परमहंसस्यापित्रिदंडित्वमभिहितंएकदंडविधानस्यत्वापद्विषयत्वं
तदुक्तंमेधातिथिना यावन्नस्युस्त्रयोदंडास्तावदेकेनपर्यटेदिति हारीतेनाप्युक्तंनष्टेजलंपवित्रेवात्रिदंडेवाप्रमादा।

Indira Gandhi National Centre for the Arts

॥मोक्षप०॥
॥४९॥

तः एकं तु वैणवं दंडं पालाशं बैल्वमेव वा गृहीत्वा विचरेत्तावद्यावद्धन्येत् त्रिदंडकमिति चेत् न स्कंदपुराणे एकदंड
ग्रहणं विधाय त्रिदंडं परित्यजेदिति त्रिदंडत्यागे विहिते एकदंडग्रहणस्यानुकल्पत्वायोगात् यदि सोमं न विंदेत्पूती
कानभिषुणुयादिति अन्नावेविधाने ह्यनुकल्पो भवति न त्वत्र तथेति एकदंडग्रहणस्यैव मुख्यत्वं यत्तु यावन्न स्युस्त्र
यो दंडास्तावदेकेन पर्यटेदिति तत्कुटीचकादिविषयं यत्तु सर्वे चैव त्रिदंडिन इत्यत्र वचनं तन्मनूक्तवाग्दंडोथ मनो
दंडः कर्मदंडस्तथैव चेत्येतदभिप्रायं एवं कुटीचकादीनां धर्मभेदे व्यवस्थिते तेन केवलं त्रिदंडत्वादिलिंगभेदाभेदः किं
तु वृत्तिभेदादपि यो हि कुटीचकोपि वंचु त्यागरूपां बहूदकवृत्तिमाश्रयति यो वा बहूदकः सन् त्रिषवणस्ना
दिकां हंसवृत्तिमाश्रयति यो वा हंसः सन् मुमुक्षुः परमे हंसे साक्षाद्विज्ञानसाधनं इति विहितां वेदांतश्रवणादिकां परम
हंसवृत्तिमाश्रयति स स एव भवति तदुक्तं पितामहेन वृत्तिभेदेन भिन्नाश्चैव लिंगेन ते द्विजा इति परमहंसोपि द्वि
धः विद्वान् विविदिषुश्च विद्वत्संन्यास उक्तो वाजसनेयिब्राह्मणे एवं चैतमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वि
त्तैषणायाश्च लोकैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरंतीति आत्मानं विदित्वेति अत्र नायायती ४९
तमभोक्तारमकर्तारमात्मानं साक्षात्कृत्य तदुत्तरं व्युत्थायेति संन्यासविधानात् तद्धर्माः परमहंसोपनिषदि कौ
पीनं दंडमाच्छादनं च स्वशरीरोपभोगाय लोकस्योपकारार्थाय च परिग्रहेत्तच्च न मुख्यं को मुख्य इति चेदयं मु

ख्यो न दंडं न शिखां नाच्छादनं चरति परमहंस इति तस्यैव वाक्यशेषे ज्ञानमेव तस्य दंड इत्युक्तं ज्ञानदंडो धृतो येनै
कदंडी स उच्यते अत एव श्रुत्यंतरं अयज्ञोपवीती शौचविनिष्टः काममेकं वैणवं दंडमादधीत कामग्रहणेन दंडस्येच्छ
यादानं भगवानपि विदुषः कर्तव्याभावं दर्शयति यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः आत्मन्येव च संतुष्टस्तस्य
कार्यं न विद्यते ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः नैवास्ति किंचित्कर्तव्यमस्ति चेन्न स तत्त्ववित् बह्वृचब्राह्मणे
पि एतद्ध स्म वै विद्वांस आहुः ऋषयः कावषेयाः किमर्था वयमध्येष्यामह इति विविदिषासंन्यासोपि जाबालब्राह्मणे
उक्तः एतत्सर्वं भूः स्वाहेत्यप्सु परित्यज्यात्मानमन्विच्छेदिति संन्यासं विधाय वेदांतश्रवणविधानात् तैत्तरीयोपनिष
दि तानि वा एतान्यवराणि तपांसि न्यास एवात्यरेचयेदिति तयोर्निंदापूर्वकं पारमहंस्यं विधाय आत्मविद्याधिकारं दर्शयति
अमित्यात्मानं युंजीतेति दंडधारणादिजन्यनियमादृष्टानां विविदिषुपरमहंसकर्तव्यवेदांतश्रवणे उपकारकत्वेनो
पयोगः विदुषः परमहंसस्य तत्कर्तव्याभावात्तन्नियमादृष्टानां कुत्राप्युपयोगः यस्तु विविदिषोरपि दंडनिषेधः काष्ठदं
डो धृतो येन सर्वाशी ज्ञानवर्जितः स याति नरकान् घोरान् महारौरवसंज्ञितानिति स विविदिषां विना जीवनार्थमेव दंड
धारणविषयकः अत एव सर्वाशीति विशेषणं स्मृत्यंतरे एकदंडं समाश्रित्य जीवंति बहवो जनाः नरके रौरवे घोरे कर्म
त्यं तंतिते एकदंडधारणेपि मनूक्तांतरदंडानामावश्यकत्वं तदुक्तं कालिकापुराणे वैणवा ये स्मृता दंडा लिंगमात्रप्रबोध

Indira Gandhi National
Centre for the Arts

कः लिंगव्यक्तैर्हि धार्यास्तेन पुनर्धर्महेतवः कायजा ये तु ये नित्यं नृणां पापप्रमोचनात् जितेन्द्रियैर्जितक्रोधैर्धार्या येति त्वद
ग्निभिः कायजा ये दंडास्ते धार्या इत्यन्वयः श्रीभागवतेपि मौनानीहानिलायामा दंडावाग्देहचेतसां न ह्येते यस्य संत्यंग वे
णुभिर्न भवेद्यतिः यस्त्वेकदंडत्रिदंडयोर्विकल्पः श्रूयते आश्वमेधिके एकदंडी त्रिदंडी वा शिखी मुंडित एव वा काषाय
मात्रसारो वा यतिः पूज्यो न संशयः शौनकः अथ काषायवासाः सशिखा भागोपायेति त्रिदंडमेकदंडं वा गृह्णीतीति व्यासः त्रि
दंडमेकदंडं वा धुतमास्थाय तत्त्ववित् यर्यटेत्पृथिवीं नित्यं वर्षाकाले स्थिरो भवेत् विष्णुः एकदंडी भवेद्वापि त्रिदंडी वा मुनि
र्भवेदिति स व्यवस्थितो द्रष्टव्यः त्रिदंडित्वं कुटीचकबहूदकयोः एकदंडत्वं हंसपरमहंसयोः विविदिषुपरमहंसधर्मा
नाह मनुः सुखाभ्युदयिकं चैव नैःश्रेयसिकमेव च प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकं इह वामुत्र वा काम्यं प्रवृत्तं कर्म की
र्त्यते निष्कामं ज्ञानपूर्वं तु निवृत्तमुपदिश्यते यथोक्तान्यपि कर्माणि परिहाय द्विजोत्तमः आत्मज्ञाने शमे च स्यात् वेदाभ्या
से च यत्नवान् वेदाभ्यास आरण्यकाभ्यासः न तु वेदसंन्यासिकोपयरो वेदसंन्यासिकानां तु कर्मयोगं निबोधतेति मनुवच
नात् प्रतीयते स कुत्रांतर्भवतीति चेत् शृणु गृहस्थविशेष इति कल्पतरोराशयः तथाहि एष धर्मानुशिष्टो वै यतीनां नियता
त्मनां वेदसंन्यासिकानां तु कर्मयोगं निबोधतेति मनुना पूर्वार्धेन पूर्वोक्तं पतिधर्मोपसंहारं कृत्वोत्तरार्द्धेनायकं काषायाणां
कर्मानुष्ठानेषांशक्तानां गृहस्थानामेव धर्मविधानप्रतिज्ञेति स एव वेदसंन्यासिकः वेदस्य यागहोमादेः काम्यस्य त्यागः न

---

पुनर्जपादेर्नित्यस्य त्यागः कर्मयोगं वक्ष्यमाणं दशलक्षणिकधर्मरूपं अत एव मनुना तदग्रे गृहस्थप्रशंसा कृता सर्वे
नत्र येण ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा एते गृहस्थप्रभवाश्चत्वारः पृथगाश्रमाः सर्वेपि क्रमशस्त्वेते यथा
शास्त्रमनुष्ठिताः यथोक्तकारिणं विप्रं नयंति परमां गतिं सर्वेषामपि चैतेषां वेदस्मृतिविधानतः गृहस्थ उच्यते श्रेष्ठः स त्री
नेतान्बिभर्ति हि यथा नदीनदाः सर्वे समुद्रे यांति संस्थितिं तेन गृहस्थविशेष एव वेदसंन्यासिकः अयमेव गौणः संन्या
स इत्युच्यते काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुरिति भगवदुक्तेः एवमेव मनुवचनानि व्याख्यातवान् सर्वज्ञ
नारायणः मेधातिथिस्तु वेदसंन्यासी नामाश्रमविशेषो पूर्वः तस्य धर्माः धृतिः क्षमा दमोस्तेयं शौचमिंद्रियनिग्रहः धी
र्विद्या शौचमक्रोधो दशकं धर्मलक्षणं दशलक्षणकं धर्ममनुतिष्ठन्समाहितः वेदांतान्विधिवच्छ्रुत्वा संन्यसेदनृणो द्विज इति
मनूक्ताः अत्र संन्यासो नाम परिग्रहत्यागः कर्मसिद्ध्यर्थानां प्रतिग्रहादीनं अध्ययनादीनां मसति द्रव्ये ऽग्निहोत्रादीनां च
त्यागो वेदसंन्यासिपदे नैवोक्तः यानि द्रव्यव्यतिरेकेणैव साध्यानि संध्योपासनजपादीनि नित्यानि तानि नैव त्येवानिषेधा
त् यत्तु वेदसंन्यासिकधर्मप्रतिज्ञाय ब्रह्मचारी गृहस्थश्चेत्याद्याश्रमांतरकथनं समुच्चयकथनं च तत्सर्वं वेदसंन्यासिकं
प्रशंसितुं अग्रेपि मनुनास्यैव फलमुक्तं संन्यस्य सर्वकर्माणि फलदोषानुपादद न् नियतो वेदान्न्यस्य पुत्रैश्वर्ये सुखं वसे
त् एवं संन्यस्य कर्माणि स्वकार्यपरमो स्पृहः संन्यासेनापहत्यैनः प्राप्नोति परमां गतिं सर्वकर्माणि काम्यानि वेदसंन्या

Indira Gandhi National
Centre for the Arts

५१

सन्नजयन् पुत्रैश्वर्यसुखं वसेत् पुत्रैतत्स्थानीयैः पौत्रादैर्वा गृहन्यासं कृत्वा सुखं वसेत् स्वकार्यं त्वात्मोपासनं परमं य
स्य अस्पृहः स्पृहारहितः परमां गतिं ब्रह्मैक्यं एतेन वेदसन्यासिको गृहस्थविशेषः पुत्रैश्वर्यसुखं वसेदिति गृहे वासविधा
नात् संन्यासिविशेषो वा एवं कर्माणि संन्यसेदिति त्यागविधानादिति निरस्तं विनिगमनाविरहात् तस्माद्यवग्यादिव
द्यावदुक्तधर्मपूर्वएव नचैवमस्यानाश्रमित्वादनाश्रमिणा प्रायश्चित्तप्रसंग इति वाच्यं मनुवचनानां वेदसन्यासिकानां तु क
र्मयोगं निबोधतेत्यादि सन्यासेनापहृत्यैनः प्राप्नोति परमां गतिमित्यंतानां संदर्शेण अस्याश्रमस्य विहितत्वेन कुतः प्रायश्चि
त्तावकाशः तथा च वेदसंन्यासिको नाम स्वतंत्र एवेति व्याचख्यौ कश्चित्तु एषवोभिहितो धर्मो यतीनां नियतात्मनामित्यनेन ब
हूदकहंसपरमहंसानां धर्म उपसंहृतः वेदसंन्यासिकानामिति कुटीचकधर्मनिरूपणप्रतिज्ञा अतएव पुत्रैश्वर्यसुखं वसे
दिति पुत्रगृहे वास उक्तः पुत्रादिभिः कुटीं कारयित्वेति स्मृत्यंतरात् तस्माद्वेदसंन्यासिको नाम कुटीचक इत्याह पर
महंसधर्मा उक्ताः पराशरपुराणे मुमुक्षुः परहंसाख्यः साक्षान्मोक्षैकसाधनं अभ्यसेदिह विज्ञानं वेदांतश्रवणादिना ५१
ब्रह्मविज्ञानलाभाय परहंससमाह्वयः शांतिदांत्यादिभिः सर्वैः साधनैः सहितो भवेत् त्रिदंडिनां नियमाः परहंसानां न संतीत्या
हात्रिः स्नानं त्रिषवणं प्रायुनियमास्तु त्रिदंडिनां न तत्परमहंसानां युक्तानामात्मदर्शिनां मौनं योगासनं योगस्तितिक्षै
कांतशीलिता निस्पृहत्वं समत्वं च सप्तैतान्येकदंडिनः परमहंसस्य तुर्याख्यश्रुतिशासनात् शांतो दांतः सत्त्वसमः प्रण

वाभ्यासतत्परः श्रवणादिरतः शुद्धो निदिध्यासनतत्परः ब्रह्मभावेन संपूर्य ब्रह्मांडमखिलं स्वतः आत्मतत्वस्थ आत्मरतिः
समलोष्टाश्मकांचनः तत्वंपदैकवाक्यार्थविष्णुरूपः स्वयं सदा तथा निवसेत्परमोहं सोयं चक्रापि कथंचन निर्द्वंद्वो नित्य
सत्वस्थः सर्वत्र समदर्शनः तुरीयः परमो हंसः साक्षान्नारायणो यतिः प्रपंचमखिलं यस्तु ज्ञानाग्नौ जुहुयाद्यतिः आत्म
न्यग्नीन्समारोप्य सोग्निहोत्री न चेतरे परमहंसधर्मानुक्त्वा वेदांतश्रवणावश्यकर्तव्यमभिधत्ते पराशरः एकदंडधरा मुंडाश्च
मर्मत्रिपरिग्रहाः ज्ञानशिखा ज्ञाननिष्ठा ज्ञानयज्ञोपवीतिनः ज्ञानमेव परं तेषां पवित्रं ज्ञानमुच्यते ब्रह्मचर्यमहिंसा
च सत्यमस्तेयमार्जवं वेदांतश्रवणं ध्यानं भिक्षोः कार्याणि नित्यशः एकाकी निस्पृहस्तिष्ठेत न केनापि सहालपेद् द्यान्नारा
यणेत्येवं प्रतिवाक्यं सदा यतिः नमो नारायणेत्येवं नमस्कृतवंतं प्रति नारायणेत्येवं प्रतिवाक्यं दद्यादित्यर्थः अथ यतिवस्त्रं
अत्रिः कौपीनाच्छादनं वासः कंथां शीतनिवारिणीं पादुके चापि गृह्णीयात्कुर्यान्नान्यस्य संग्रहं यदि वा कुरुते रागादधि
कस्य परिग्रहं नरकं रौरवं गत्वा तिर्यग्योनिषु जायते कौपीनयुगलं कंथा एकदंडपरिग्रहः इतः परमहंसस्य नाधिकं तु विधी
यते तत्र च कौपीनयुगलं आच्छादनवासः कंथा पादुके एतावानेव परिग्रहो नान्य परमहंसस्येत्यर्थः कंथानिर्माणप्रकारमा
ह स एव विशीर्णान्यमलान्येव चैलानि ग्रथितानि तु कृत्वा कंथां बहिर्वासो धातुरागेण रंजितां देवलः रथ्यासंचक्रवस्त्राणि भि
त्रासर्वत्र लभ्यते भूमिशाय्यकृविस्तीर्णयितपाकेनउस्थिताः वस्त्राणां च धातुरागेण काषाय यता अत्रिः काषायं ब्राह्मणस्योक्तं

Indira Gandhi National Centre for the Arts

नान्यवर्णस्य कस्यचित् भिक्षाश्रमे सदा प्रोक्तं धातुरक्तं तु योगिनां यतिधर्मसमुच्चये क्षौमशाणमयं वापि वासः कांक्षेत कौशि-
कं अजिनं वापि धर्मज्ञः साधुन्यस्तानपीडयन् उपानहौ गृहीतव्ये कार्पासमयमच्युत ऊर्णाकारोज्जवं वापि यद्वान्यात्स्याद-
याचितं वैराग्यतारतम्येन विशेषमाह विष्णुः कौपीनाच्छादनार्थं तु वासोऽर्हस्य परिग्रहं कुर्यात्परमहंसस्तु दंडमेकं तथै-
व च यतिधर्मसमुच्चये सचैलः स्यादचैलो वा कंथाप्रावरणोऽपि वा एकवस्त्रेण वा विद्वान्नव्रतं भिक्षुश्चरेद्यथा वसिष्ठः एकशाटीप-
रिहितोऽजिनेन वा एकशाटीति अर्द्धमधस्तात्परिधानार्थमुपर्याच्छादनार्थं च अजिनपक्षे कौपीनमपि अथ यतिभिक्षा मनुः
एककालं चरेद्भैक्षं न प्रसज्येत विस्तरे भैक्षे प्रसक्तो हि यतिर्विषयेष्वपि सज्जति अत्र भैक्षकार्यस्य भोजनस्यैककालता विधीय-
ते न पुनर्भैक्षचरणे भैक्षे प्रसक्तो हीति वाक्यशेषेण द्विकालभोजनप्रतिषेधस्याभिमतत्वात् न च भैक्षाचरणस्यापि एककालताऽवि-
धाने एकवारमेव भोजनं स्यादिति वाच्यं एकवारकृतभिक्षाचरणेन भिक्षां लब्ध्वा भुक्त्वा किंचिदवशेषयित्वा द्वितीयभोजनस्यापि
संभवात् भैक्षचरणस्यावृत्तिस्तु न प्राप्नोति भैक्षचरणभोजनपर्याप्तान्नलाभरूपदृष्टार्थत्वेनैकवारमेव कर्तुमुचितत्वात् एकाराम-
स्य भृत्यार्थमपि भैक्षचरणाभावात् अशक्तस्तु सायं प्रातर्भिक्षेत तदाह वसिष्ठः ब्राह्मणकुले वा यल्लभेत तद्भुंजीत सायंप्रातर्म-
धुमांसवर्जं भिक्षाकालमाह मनुः विधूमे सन्नमुसले व्यंगारे भुक्तवज्जने वृत्ते शरावसंपाते भिक्षां नित्यं यतिश्चरेत् भुक्तवज्ज-
न इति भुक्तवंतो जना यस्मिन् काले एवं विधूमादिशब्दैरपि कालविशेषो लक्ष्यते मेधातिथिस्तु विधूम इत्यादिना प्रथमपाक- ५२

कालनिवृत्तिरुक्ता सन्नमुसल इत्यनेन द्वितीयपाकप्रवृत्तिरुक्ता सन्नं उलूखले स्थापितं व्रीह्यवघातार्थं मुसलं यस्मिन् का-
ल इत्यर्थात् जघन्यं कालमाह बौधायनः विधूमे सन्नमुसले व्यंगारे भुक्तवज्जने काले पराह्णे भूयिष्ठे भिक्षाटनमथाचरेत् अप-
राह्णे भूयिष्ठ इत्यनेन सायाह्नोऽभिमतः याज्ञवल्क्यः अप्रमत्तश्चरेद्भैक्ष्यं सायाह्ने नाभिलक्षितः वर्जितो भिक्षुकैर्ग्रामे यात्रामा-
त्रमलोलुपः यात्रामात्रं यावता प्राणयात्रा भवतीत्यर्थः यमोऽपि भैक्ष्यं भैक्षं चरेन्नित्यं सायाह्ने वाग्यतः शुचिः एकवासा विशुद्धा-
त्मा मंदगामी युगांतदृक् मनुः अलाभे न विषादी स्याल्लाभे चैनं न हर्षयेत् प्राणयात्रिकमात्रः स्यात् मात्रासंगाद्विनिर्गतः मीयंत
इति मात्रा विषयाः तेषां संगाद्विनिर्गतः अत एव हर्षविषादौ न कार्यौ मनुः अभिपूजितलाभांश्च जुगुप्सेतैव सर्वशः अभिपूजित-
लाभैस्तु यतिर्मुक्तोऽपि बध्यते सर्वशः सर्वकालं एकमप्याह अभिपूजितभिक्षां न गृह्णीयादित्यर्थः मुक्तोऽपि बध्यत इति तु अर्थवादः
अवणादिमुमुक्षूपायवानित्यर्थः बध्यते पूर्वोक्तमित्यभिनिविष्टो भवतीत्यर्थः भिक्षालाभार्थं गुणोऽपि न प्रकाश्य इत्याह मनुः नचो-
त्पातनिमित्ताभ्यां न नक्षत्रांगविद्यया नानुशासनवादाभ्यां भिक्षां नित्यं यतिश्चरेत् उत्पातः केतूदयः निमित्तं ग्रहदौस्थित्यादि
नक्षत्रविद्या ज्योतिषं अंगविद्या सामुद्रिकं अनुशासनं राजानीति वादो हेतूपन्यासः एतैरुपायैर्भिक्षां न लिप्सेतेत्यर्थः यत्नः स्ना-
ता शुचिः शुचौ देशे कृतजप्यः समाहितः भिक्षार्थी प्रविशेद्ग्रामं रागद्वेषविवर्जितः भिक्षार्थं गमने प्रकारमाह बौधायनः ऊर्ध्वं
जान्वोरधो नाभेः परिधायैकमंबरं द्वितीयमंतरं वासः पात्री दंडी च वाग्यतः सव्येनादाय पात्रं तु त्रिदंडं दक्षिणे करे उपतिष्ठेत स्व-

Indira Gandhi National Centre for the Arts

र्यंक्तिध्यात्वाचैकत्वमात्मनः उक्त्वा विरजसंमंत्रमाक्रम्तोनप्रदक्षिणं कृत्वा पुनर्जपित्वाच येपंथानइत्यपि योसौ विस्त्वाख्य
आदित्येपुरुषोत्त न्दिस्थितः सोहंनारायणोदेवइतिध्यात्वाप्रणम्यतं भिक्षापात्रादिकमध्यर्थमुपमुच्चाप्युपानहौततोग्रामंब्रजे
न्मंदंयुगमात्रावलोककः ध्यायन्हरिंचतच्चित्तइदंचसमुदीरयेत् विष्णुस्तिर्यगधोर्ध्वमेवैकुंठोविदिक्षांदिक्षां यातुमां
सर्वतोरामोधन्वीचक्रीचकेशवः भिक्षांकथंयाचेतेत्यपेक्षायामाहसएव नवत्पूर्वंवचोदयेत् गोदोहमात्रमाकांक्षेत
भैक्षस्यपंचविधत्वमाहाशनाः माधूकरमसंक्लृप्तंप्राक्प्रणीतमयाचितं तात्कालिकोपपन्नंचभैक्षंपंचविधंस्मृतं मनः
संकल्परहितानगृहान्त्रिः सप्तपंचकान्मधुवदाहरणंयत्तुमाधूकरमितिस्मृतं असंक्लृप्तंएतान्गृहान्गमिष्या
मीतिसंकल्परहितं अष्टौभिक्षायदापाहसंवर्त्तः अष्टौभिक्षाः समादायसमुनिः सप्तपंचवा अद्भिःप्रक्षाल्यतास्सर्वास्ततो
तोश्नीयाद्विजोत्तमः सप्तभिक्षापक्षमाहवसिष्टः मुंडोममोयरिग्रहः सप्तागाराण्यसंकल्पितानिचरेद्भैक्षं चरेन्माधूकरीं
त्रिंवल्मीकनिचयोयमी अक्रोधनः प्रहृष्टात्मातयः स्तद्धिसनातनं शंखः सप्तागारंचरेद्भैक्षंभिक्षकंनानुभिक्षयेत् ना
स्वादयेद्रसनयानाश्नीयात्कस्यचिद्गृहे माधूकरंप्रशंसतियमः चरन्माधूकरंभैक्षंयतिर्म्लेच्छकुलादपि एकान्नंनतुभुं
जीतबृहस्पतिसमोयदि यथालब्धंतदश्नीयात्साज्यसंस्कारवर्जितं भैक्षंमाधूकरंनामसर्वपातकनाशनंएकस्यैवान्नं
एकान्नंवौचायनोपिअपिभैक्षंसर्ववर्णेभ्युनत्वेकान्नंद्विजातिषु एकत्रलोन्नाघोभिक्षुः याचप्ररणमिच्छनिदातास्वर्गमवा



प्नोतिभोक्ताचुजीनकिल्विषेभैक्षंमाधूकरं एकागारभिक्षामाधूकरयोः विकल्पोमैत्रायणीयश्रुतौ त्रीनवैणवान्दंडान्
दक्षिणेपाणौधारयेदेकंवापद्येकंतदासशिखंवपनंकृत्वाविसृज्ययज्ञोपवीतंत्रिषुवर्णेष्वेकागारंभैक्षमश्नीयान्माधूक
रींवेतिसाचद्विविधा पाणिपात्रेणमृदादिपात्रेणचेति पाणिपात्रमुक्तंकाठकब्राह्मणे चतुर्षुवर्णेषुभैक्षचर्यंचरेत्पाणिपा
त्रेणान्नंकुर्यादौषधवत्प्राश्नीयात्प्राणसंधारणार्थंयथामेदोवृद्धिर्नजायते उदरपात्रमुक्तंमैत्रायणीयश्रुतौ अथप
रिव्राडेकशाटीपरिहितोमुंडोदरपात्रारण्यनिष्ठोभिक्षार्थीग्रामंविशेदासायंप्रदक्षिणेनाविचिकित्सन् सार्ववर्णिकंभैक्ष
चरणमभिशस्तपतितवर्जं पाणिपात्रोदरपात्रयोर्विकल्पउक्तःनारदीयश्रुतौ यतयोभिक्षार्थंग्रामंप्रविशंतिपाणिपात्रमुद
रपात्रंवा पाणयुदरपात्रइत्येतत्रतत्रैवाशनंनतुसर्वान्नस्यैकीकरणं तदुक्तंमुंडकोपनिषदि पाणिपात्रमुदरपात्रंवा गेहेगेहे
विशेत्करतलमात्रेणनापरंगृह्णीयात्पदेपदेगच्छन्भुंजन्कुलाकुलेषुसर्वाशीति प्रतिगृहंचाचमनंनिषेधमाहशौनकः
पाणिपात्रंचरन्योगीनसकृद्भैक्षमाचरेत् तिष्ठन्भुंज्याच्चरन्भुंज्यान्मध्येनाचमनंतथा मध्येचाचमनमाहगौतमः हविःप्रत्य
यथाचम्यनिराहारोभवेद्गृही पात्रयाचम्यतथाभिक्षुर्निराहारोगृहेगृहे एवंचविहितप्रतिषिद्धत्वाच्चाचमनस्यविकल्पः मृ
दादिपात्रमप्युक्तंवचनांतरेपाणिनाशकलेनवेति भिक्षार्थंगतस्यभिक्षाग्रहणप्रकारमाहबौधायनः अतिगम्यगृहाद्भिक्षां
नवत्पूर्वंप्रणोदयेत्गोदोहमात्रंतिष्ठेच्चवाग्यतोधोमुखस्ततः दृष्ट्वाभिक्षांप्रदृष्टियुतांदातुश्चकरसंयुतां त्रिदंडंदक्षिणेत्वंगे

Indira Gandhi National Centre for the Arts

॥ मोक्षव०॥ ततः संधायवाङ्मनाउत्थाप्येत्वकचवंदक्षिणेनकरेणस पात्रंवामकरेक्षिप्त्वाश्लेषयेद्दक्षिणेनतुप्राणायामत्रिकमाचेतनिर्दे
तविगतस्पृहः कवचंभिक्षांछादनं गोमुखभिक्षाचोक्तायतिधर्मसमुच्चये आस्येनतुयदाहारंगोवन्मृगयतेमुनिरिति अस
५४ क्तमभिक्षादिलक्षणमाहोशनाः शायनोत्थानात्प्राग्यत्प्रार्थितंभक्तिसंयुतैः तत्प्राक्प्रणीतमित्याहभगवानुशनामुनिः भिक्षा
टनसमुद्योगात्प्राक्केनापिनिमंत्रितं अयाचितंहितंभैक्षंभोक्तव्यंमनुरब्रवीत् उपस्थानेचययोक्तंभिक्षार्थंब्राह्मणेनहि
तात्कालिकमितिप्रोक्तंतदत्तव्यंमुमुक्षुणा सिद्धमन्नंभक्तजनैरानीतंयन्मठंप्रति उपपन्नंतदित्याहुर्मुनयोमोक्षकांक्षिणः
भिक्षाः पंचविधाह्येतासोमपानसमास्मृताः तासामेकतमयापिवर्त्तयन्सिद्धिमाप्नुयात् एतासांपंचविधानामेवभिक्षाणांद्विविध
त्वमाहदत्तात्रेयः याचितायाचिताभ्यांचभिक्षाभ्यांकल्पयेत्स्थितिं माधूकरंयाचितंस्यात्प्राक्प्रणीतमयाचितंप्राक्प्रणीतप
देनायाचिततात्कालिकोपपन्नानामपिग्रहणं निमंत्रणपूर्वंभिक्षामाहक्रतुः अयाचितयथालाभंभोजनाच्छादनंभवेत् निमं
त्रितोयवाश्नीयात्स्वगुणान्नप्रकाशयेत आतुराणांतुएकस्यैवगृहेप्रत्यहंभिक्षायामपिनदोषः तदुक्तंपराशरेणयतीनामा
तुराणांतुवृद्धानांदीर्घरोगिणां एकान्नेननदोषोस्तिएकस्यैवदिनेदिने भैक्षदेशेनृपज्ञातिपुत्रमित्रादियोषितं उपकारकथास्व ५४
न्यंमनसापिनचिंतयेत् इतिनिषिद्धामपिपुत्रमित्रादिभिक्षांमात्रकरंप्रत्यन्यनुजानाति क्रतुः सुजीर्णेतिकृशोयोगीनिर्दंतोक्षि
णेंद्रियः पुत्रमित्रगुरुभ्रातृपत्नीभ्योभैक्षमाहरेत येभ्योभिक्षाग्राह्यातानाह बौधायनः अथभैक्षचर्याब्राह्मणानांशालीनयाया

वराणांप्रवृत्तेवैश्वदेवेभिक्षांलिप्सेत त्रिष्वपिवर्णेष्वित्युक्तंमैत्रायणीयश्रुतौ त्रिषुवर्णेष्वेकागारंभैक्षमश्नीयात् चात्
र्वर्णिकमुक्तंकाठकब्राह्मणे चतुर्षुवर्णेषुभैक्षचर्यंचरंति यसोपियश्चरेत्सर्ववर्णेषुभैक्षमन्यवहारतः नसकिंचिदुपाश्नीया
दायोभैक्षमितिस्थितिः मैत्रायणीयश्रुतावपि सार्ववर्णिकंभैक्षचरणंमभिशस्तपतितवर्जमिति एतेषुपक्षेषुपूर्वपू
र्वचभिक्षायाअलाभेउत्तरचकर्त्तव्या अतएवबौधायनः ब्राह्मणक्षत्रियविशांभिक्षाणामन्नमाहरेत् असंभवेतुपूर्वा-
स्याप्याददीतोत्तरोत्तरं सर्वेषामथवावेत्तमश्नुहयमनश्नता भैक्षंशूद्रादपिग्राह्यंप्राणरक्ष्याविजानता अहरहयमनश्नते
तिउपवासद्वयेजातेभिक्षान्नंशूद्रादपिग्राह्यमित्यर्थः विजानतेति प्राणरक्षणस्यावश्यकत्वंजानतेत्यर्थः यद्वाजानताज्ञा
नार्थिनेत्यपिकश्चित अतएवमनुः जीवितात्ययमापन्नोयोन्नमत्तियतस्ततः लिप्यतेनसपापेनपद्मपत्रमिवांभसा
नात्पोमूत्रपूरीषाभ्यांनाग्निर्दहनकर्मणा नवायुस्पर्शदोषेणनान्नदोषेणमस्करी केभ्योनग्राह्याभिक्षेत्यपेक्षायामु
च्यते बौधायनः भिक्षांनचुंपंचाहंसप्ताहंवाकदाचन यस्मिन्नादेजमूर्खास्तुपजेचांडालवेश्मतत् साधुंचापतितंविंद्यंयोय
तिः परिवर्जयितसतस्यसुकृतंदत्वादुष्कृतंप्रतिपद्यते योदरिद्रः स्वपमुखोप्यापिभिक्षांप्रयच्छतितस्यभिक्षानग्राह्यात
दाहशौनकः आत्मानंपीडयित्वातुभिक्षांयःसंप्रयच्छति साभिक्षाहिंसिताज्ञेया नादद्यात्तादृशींयतिः अत्रिः अतिगम्य
गृहंलोभात्नपुनस्तद्गृहंविशेत् पावत्तोदरपूर्तिस्यात्तावद्भैक्षंसमाचरेत् सक्तुमथधिकंभिक्षुरादादानोव्रजत्यधः

Indira Gandhi National
Centre for the Arts

उदक्यावोदितं चान्नं विज्ञानं शूद्रचोदितं प्राग्यंगे वायसेक्कं तंतदन्नं वर्जयेद्यतिः उदक्या रजस्वला प्राग्यं गेहकृक्तिकादौ अ
यसेलोहपात्रे अत्रिः पित्रर्थकल्पितं पूर्वमन्नं देवादिकारणात् वर्जयेत्तादृशीं भिक्षां परबाधाकरीं तथा अनिंद्यं वै व्रजेद्गे
हं निंद्यं चैव विवर्जयेत् अनाहूते विशेद्द्वारि गेहे नैवावृते व्रजेत नवीक्षेत द्वाररंध्रेण भिक्षालिप्सुः क्वचिद्यतिः नकुर्यात्क
स्यचिद्द्वेषं न द्वारं ताडयेद्यतिः तेच सव्यापसव्येत भिक्षाकाले व्रजेन्महान् कुटुंबसंकरं चैव मलिनोपहितं गृहं पीडयान्नं
प्रयच्छेद्यः स्तद्गृहं वर्जयेद्यतिः नाश्नंति यस्य चेद्देवा नाश्नंति हव्यलीपतेः स्त्रीजितान्नं न चाश्नीत तदन्नं वर्जयेद्यतिः विक्रिब
कस्य मृगयाजीव्यहर्तुश्च पापिनः कुलटीषंढयोरन्नमुद्यतं संत्यजेद्यतिः श्रोत्रियान्नं न भिक्षेत श्रद्धाभक्तिबहिष्कृते व्रात्य
स्यापि गृहे भिक्षेत श्रद्धाभक्तिपुरस्कृते विष्णुः स्वहस्तस्य गृहे भिक्षेन्नित्यं तेष्वेव नित्यशः आमावेवकुगेहानां तेषु भिक्षेदलो
लुपः अप्राप्तौ भिक्षामाह मेधातिथिः पृथक्कृता तथा भिक्षा घाता मार्जारमूषकैः वाताहता च त्यक्त्वा भिक्षां चोपहताम
वेत् यातु पर्युषिता भिक्षा नैवेद्ये कल्पिता तु या तामभोज्यां विजानीयात दाता तु नरकं व्रजेत नैवेद्यं च विष्णुव्यतिरिक्ता या देवता
याः तदाह यमः विष्णुनैवेद्यसंशुद्धं मुनिभिर्भोज्यमुच्यते अन्यदेवस्य नैवेद्यं भुक्त्वा चांद्रायणं चरेत् भोजनेतिकर्तव्यतामा
ह बौधायनः भैक्षचर्यादुपाहृत्य शुचौ देशे न्यस्य पादान् प्रक्षाल्य आदित्यस्याग्रे निवेदयेदुत्पन्नमिति ब्रह्मणे निवेदयेद्
स्तजज्ञानमिति विज्ञायते आधानात्प्रभृति यजमान एवाग्नयो भवंति तस्य प्राणो गार्हपत्यो ऽपानोन्वाहार्यपचनो व्यान आहव ५५

नीय उदान समानौ सभ्यावसथ्यौ पंच एते ग्नयः आत्मस्था आत्मन्येव जुहोति स एष आत्मयज्ञ आत्मनिष्ठ आत्मप्रतिष्ठ आ
त्मानं क्षेमं नयतीति विज्ञायते तेन तेभ्यो दयापूर्वं संविभज्य शेषमद्भिः संसृज्यौषधवत्प्राश्नीयात् प्राश्य आचम्य ज्योतिश्च
त्यादिभिरुपतिष्ठते उद्वयं तमसस्परीति वाङ्म आसन्नसोः प्राण इति जपित्वा याचितमसंक्लृप्तमुपपन्नं यदृच्छया याऽहारमात्रं
भुंजीत केवलं प्राणयात्रिकमिति अथाप्युदाहरंति अष्टौ ग्रासा मुनेर्भक्ष्याः षोडशारण्यवासिनः द्वात्रिंशत्तु गृहस्थानाम
मितं ब्रह्मचारिणां ग्रासप्रमाणमाह व्यासः चतुरंगुलमुत्सेधं चतुरंगुलमायतं एतद्ग्रासप्रमाणं तु व्यासेन परिभाषितं
वर्ज्यमन्नमाहात्रिः हितं मितं सदाश्नीयात् यत्सुखेनैव जीर्यति धातुः प्रकुप्यते येन तदन्नं वर्जयेद्यतिः मधुमांसं वर्ज
येद्यतिः मधुमांसवर्जनमाह वसिष्ठः ब्राह्मणकुलेवा यल्लभते तद्भुंजीत सायंप्रातर्मधुमांसवर्जमिति सायंप्रातरि
तित्वग्न्यक्तविषयं एककालं चरेद्भैक्षमिति मनूक्तेः भिक्षार्थं गते नचयद्वन्यते तद्देवयाह्यमित्याहात्रिः गोदोहमंन्नया
कं वा सक्तुपेषणमेव वा एककालं प्रतीक्षेत दर्शनेन विना यतिः भिक्षाचरस्य स्पर्शदोषविशेषमाह जाबालः भिक्षाटने
च संन्यसी अमेध्यं पदि संस्पृशेत् भिक्षां गृह्य ततः स्नात्वा प्राणायामान् समाचरेत् जमदग्निः श्वकाककोडवेश्याभिः ख
रोष्ट्रस्पर्शने यतिः सचैलः सजलेमग्नः शुध्येत्कृत्वाघमर्षणं देवलः उदक्याश्वचांडालचौरनग्नकापालिकान् पतिता
न् पितृघ्नान् स्पृष्ट्वा भिक्षां भिक्षुः परित्यजेत इष्टकाकाष्ठरथ्यमंचे नौकापांगजहस्तयोः तृणौघजनसंघाते स्पृष्टास्पृ

Indira Gandhi National Centre for the Arts

॥ मो॰प॰॥

५६

श्चिर्न विद्यते जाबालः अमेध्यनिचयं चैव स्पृष्ट्वा देवलकं यतिः सपादशौचविधिवत्स्नात्वा विशुध्यात्वा विशुध्यति पादशौच
स्थितौ पादावस्पृश्यं स्पृशतो यदि पादशौचपरित्यागे आचांतः शुचितामियात् भोजनेतिकर्तव्यतोक्ता नृसिंहपुराणे
ततो निर्वर्त्यं तत्पात्रं संस्थाप्याचम्य संयमी चतुरंगुलिपद्मात्मपात्रं समात्रं समाहितः सर्वव्यंजनसंयुक्तं पृथक्पात्रे नि
वेदयेत् सूर्यादिदेवभूतेभ्यो दत्वा ग्रं प्रोक्ष्य वारिणा भुंजीत पर्णपुटके पात्रे वा वाग्यतो यतिः शुष्कपात्रं यतिर्नित्यं क्षाल
येन्मंत्रपूर्वकं न दुष्येत्तस्य तत्पात्रं यज्ञेषु चमसा इव कूर्मपुराणेपि आदित्ये दर्शयित्वान्नं भुंजीत प्राङ्मुखोत्तरः भुक्त्वा
प्राणाहुतीः पंच मासान्नष्टो समाहितः आचम्य देवं ब्रह्माणं ध्यायीत परमेश्वरं प्राणाग्निहोत्रप्रकारश्चाथर्वणोपनिषदि
अथातः शारीरयज्ञं व्याख्यास्यामः अस्मिन्नेव पुरुषशरीरे विनाप्यग्निहोत्रेणाति नापि सांख्ययोगयोगेन संसारविमु
क्तिर्भवति स्वेन विधिना न्नं भूमौ निक्षिप्य या ओषधयः सोम राज्ञीरिति तिसृभिरन्न यत इति द्वाभ्यामनुमंत्रयेत् या ओ
षधयः सोम राज्ञीर्बह्वीः शतविचक्षणाः बृहस्पतिप्रसूतास्ता नो मुंचन्त्वंहसः याः फलिनीर्या अफला अकोशा याश्च को
शिनीः बृहस्पतिप्रसूतास्ता नो मुंचन्त्वंहसः जीवलां नघारिषां मा ते बध्नाम्योषधीं यातयायुरुपाहरादप रक्षांसि जंघ
न अन्नपतेन्नस्य नो धेह्यनमीवस्य शुष्मिणः प्रप्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे यदन्नमग्निर्बहुधा विरा
द्रुद्रैः प्रजग्धं यदि वा पिशाचैः सर्वं तदीशानो अभयं कृणोतु शिवमीशानाय स्वाहा अंतश्चरसि भूतेषु गुहायां वि

५६

श्वतोमुखः त्वं यज्ञस्त्वं विष्णुस्त्वं वषट्कारः आपो ज्योती रसोमृतं आपः पुनंतु पृथिवीं पृथिवी पूता पुनातु मां पुनंतु
ब्रह्मणस्पतिर्ब्रह्म पूता पुनातु मां यदुच्छिष्टमभोज्यं यद्वा दुश्चरितं मम सर्वं पुनंतु मामापोऽसतां च प्रतिग्रहं आपो
मृतमस्यमृतोपस्तरणमसि अमृतं प्राणे जुहोम्याशिष्यां तोसि प्राणाय प्रदानाय स्वाहा अपानाय स्वाहा व्यानाय स्वाहा
समानाय स्वाहा उदानाय स्वाहेति कनिष्ठिकयांगुल्यंगुष्ठेन च प्राणे जुहोति अनामिकयापाने मध्यमया व्याने प्रादेशि
न्या समाने सर्वाभिरुदाने तूष्णीमेकामेकर्षौ जुहोति द्वे आहवनीये एकां दक्षिणाग्नावेकां गार्हपत्ये एकां सर्वप्रायश्चि
त्तीये अथापिधानमस्यमृतत्वायोपदधामीति उपस्पृश्य पुनरादाय पुनरुपस्पृशेत् सव्ये पाणावपो गृहीत्वा हृदयमन्वालभ्य
जपेत् प्राणोग्निः परमात्मा पंचवायुभिरावृतः अभयं सर्वभूतेभ्यो न भयेऽहं कदाचनेति विश्वोसि वैश्वानरो विश्वरूपो वि
श्वं त्वया धार्यते जायमानं विशंतु त्वाहुतयः सर्वाः यत्र ब्रह्मा विश्वामृतोसीति महानयं पुरुषो योंगुष्ठाग्रे प्रतिष्ठितः तम
द्भिः परिषिंचामि सोस्यांतेऽमृताय यो नावित्येवमात्मा ध्यायेताग्निहोत्रं जुहोमीति सर्वेषामवसूनं भवति अथ यज्ञपरि
वृती हैमिद्यति स्वेशारीरे यज्ञं परिवर्तयामीति चत्वारस्त्रय अग्नयस्ते किं नामधेयाः तत्र सूर्योग्निर्नाम सूर्यमंडलाकृतिः सहस्र
रश्मिपरिवृत एकर्षिर्भूत्वा मूर्ध्नि तिष्ठति यस्माद्उक्तो दर्शनाग्निर्नाम चतुराकृतिराहवनीयो भूत्वा मुखे तिष्ठति शारीरोग्नि
र्नाम जराप्रणुदा हविरवस्कंदं चंद्राकृतिर्दक्षिणाग्निर्भूत्वा हृदये तिष्ठति तत्र कोष्ठाग्निर्नामाशितपीतलीढखादितानि सा

Indira Gandhi National Centre for the Arts

म्यक्श्रपयित्वा गार्हपत्योभूत्वा नाल्यां तिष्ठति प्रायश्चित्तीयस्त्वधस्तात् देवलः नित्यं प्रत्यादित्येनिष्टमुत्सलोघमेधा-
न्तांतधूमेकाले ग्रामं प्रविश्य भैक्षार्थं सर्वतः पर्यटन् अग्रतोऽसु गमात्मवल्लोक्यासंकल्पितानि विष्टतद्वाराण्यन्यवर्जन्
नासक्तः प्रविशेत् प्रविष्टः संजल्पप्रणामकुहकविस्मयविडंबनपरिहासयाचनप्रेक्षितादि परिहरेत् गोदोहमात्रं-
स्थित्वा व्रजेत् भिक्षां लब्ध्वा नप्रहृष्येदलब्ध्वा न कुप्येदंतावसायिवियरिपंथिज्ञातीश्वरप्रेतसूतकभिक्षां नोपलभ्यां प्रति-
हतां गृह्णीयादात्मनः संस्कृतां परबाधाकरीं वर्जयेत् मधुमांसकुबीजविरहितां गृहीत्वा तद्बीजमेकांतत स्तेनैव पात्रे-
ण त्येन वा रूक्षीभूत्वा मात्रयाभुंजीत मात्रया प्राणमात्रया भिक्षां प्रत्यां साम्राह यमः प्राजापत्यसहस्रं च भैक्षं वत्कलया
धृतं प्राजापत्यसहस्राद्धि भैक्षमेवातिरिच्यते अश्विडंव्यः कुशाग्रेण मासि मासि त्र्यं पिबेत् न्याय्यतो यस्तु भिक्षार्थी पू-
र्वोक्तान्नु विशिष्यते तमकांचनवर्णेन गवां मूत्रेण यावकं पिवेद्द्वादशावर्षाणि न तद्भैक्षसमं भवेत् शाकभक्षाः पयोभक्षा
येऽन्ये यावकभक्षकाः सर्वे भैक्षभुजस्तस्य कलां नार्हंति षोडशीं न भैक्षं परयाकालं नक्षैक्षं प्रतिग्रहः सोमपानसमं भैक्षं त-
स्माद्भैक्षेण वर्तयेत् विष्णुः न भिक्षायां नवेद्दोषो न च भिक्षा प्रतिग्रहः सोमपानसमा भिक्षा तस्मादहरहश्चरेत् शातात-
पः भिक्षा माधूकरी नाम सर्वपापप्रणाशिनी अवधूता च पूता च सोमपानं दिने दिने भिक्षाहारो निराहारो भिक्षा नैव प्रतिग्र-
हः श्रोत्रियान्नं च भैक्षं च हुतशेषं च यद्धविः आनखाद्बोधयेत्पापं तप्ताग्निरिव कांचनं गंगायाः सलिलं पुण्यं शालग्रामशि-

लातथा भिक्षान्नं पंचगव्यं च पवित्राणि युगे युगे कण्वः अश्विडंयः कुशाग्रेण मासि मासि समश्नुते निरपेक्षस्तु भि-
क्षाशी स कृतस्मादिशिष्यते अक्रोधिण्येकवद्भूतं मन्यंते प्रत्मानवाः निरीक्षंते न्नावयुक्तात स्रुह्यंयत्ततो व्रजेत् अत्रिः
नैव सव्यापसव्येन भिक्षाकाले व्रजे गृहात् अनंतरं क्रमाद्भिक्षां प्रशस्तां नानुकीर्तयेत् संन्न्येवकुर्गेहानां नतु तेष्वेव नि-
त्यशः भिक्षाटनमुपक्रम्य कश्चिद्योगेन भैक्षमुक्नातिक्रमेद्गृहं मोहात् यत्र बाधो न विद्यते जमदग्निः अश्नन्माधूकरीं भि-
क्षां नैवेद्येक्त विसर्जिते अतः परं न गृह्णीयात् किंचिदन्नमुपस्थितं सर्वस्मिन्माधूकररूपे नैवेद्ये न गवति समर्पिते सति
अन्यत्किमपि न गृह्णीयादित्यर्थः व्यासः अश्रद्दधानस्य नोक्तव्यं चोरस्यापि विशेषतः नत्वेव बहुयाज्यस्य यश्चोपनयते
बहून् अत्रिः अयाचितामाहृतां भिक्षां प्रसादेन प्रनोदितां भोज्यां प्रजापतिर्मेने अपि दुष्कृतकारिणः भैक्षादन्यन्न याचेत न
चैवोयविशेत्क्वचित् अयाचितां नावमन्येत न चैनां श्रावयेत्पुनः अन्येषु न श्रावयेदित्यर्थः भिक्षाटने स्त्रियः काश्चित् श्रोत्रि-
याणां गृहे गृहे तासां विलोकनं कार्यं यथामात्रस्वस्तथा आत्मसंमितमाहारमाहरेदात्मवान्यतिः अत्यंतक्षुधित-
स्यापि समाधिर्नैव जायते कात्यायनः आहारस्य तु द्वौ भागौ तृतीयमुदकस्य च वाय्वोः संचारणार्थाय चतुर्थमवशेष-
येत् यमः आहारस्य च तत्र भागं अर्द्धं वायादहरेद्यतिः प्रवाच्यैवारुजः शाक्रप्रसंगतश्च वर्जयेत् अन्नसंगाद्बलं दर्पाद्विषा-
पासक्तिरेव च कामक्रोधस्तथा लोभः पतनं नरके तथा आश्वलायनः उपाहस्तस्तु यो भैक्षात् गत्वा तीर्थमकर्द्दमं प्रक्षा-

Indira Gandhi National
Centre for the Arts

॥मोक्षप्र०॥
५८

त्यां तद्धितिदेशे भैक्षपात्रं निधाय तत्र मृत्तोयेन पृथक् पादौ हस्तौ प्रक्षालयेदथ आचम्याथ द्विराचम्य प्राणांस्त्र्युपुनराचमेत्
अपोशानादिकृत्वा तत्पंचप्राणाहुतीः यदं केशकीटादिनिर्व्याप्तं पिंडमुत्सृज्य दूरतः हस्तं प्रक्षाल्य तस्मात् पक्षिप्राणी
ततः परं केशादिमुखसंलग्नं क्लिष्टास्याः संक्रतत्क्षणात् अपां द्वादशगंडूषैः क्षाल्यास्यं भोजनं ततः वामभागेन संसक्तं
निधायैव कमंडलुं यमः प्रोक्षितं प्रणवेनैव हुतं मध्यात्मिकादिषु शरीरं व्रणवत्पश्येत् लेपनं व्रणलेपवत् गंगातोया
भिषिक्तो च भिक्षायो आतियोगवित् तत्र ऋतशातैः इष्टाफलं प्राप्नोति मानवः गंगातोयं च भैक्षं च वै समानं विशेषतः
आनरवान्मोचयेत्पायं मंत्रपूतं हविर्यथा पवित्रभिक्षास्तात्तिकां दोषय श्रुतौ आहारशुद्धौ सत्वशुद्धिः सत्वशुद्धौ ध्रुवा
स्मृतिः स्मृतिलंभे सर्वग्रंथीनां विप्रमोक्ष इति हारीतोपि गुरवेति वेदितमनुज्ञातमप्रतसंमितं प्राशुः यदन्नं ब्रह्मचा
रीवाप्तसिद्धिमवाप्नोति मोक्षसिद्धिं तु भिक्षुकः विष्णुः भैक्षं यवागूं तक्रं वा पयो यावकमेव वा फलं मूलं विपक्वं च कणपि
ण्याकसक्तवः इत्येते वै क्रमशाहाराः योगिनः सिद्धिकारकाः त्वङ्मूलपत्रपुष्पाणि ग्राम्यारण्यफलानि च कणयावक
पिण्याकशाकतक्रं पयोदधि भिक्षां सर्वरसोपेतां हिंसावर्जं समाचरेत् अज्ञानवेदनं कृत्वा ब्रह्मभावेन भावितः पंचप्रा ५८
णाहुतीः दद्यात् मंत्रस्कंधे श्रुतचोदितैः ओंकारपूर्वास्वाहांतामंत्रास्तैस्तत्समाचरेत् नैवाहुतीस्पृशेद्योगी दंतो दंत्यां
कदाचन नास्वादयेद्रसं तत्र जिह्वयाधर्मवित्क्वचित् अनेन विधिना हुत्वा पंचप्राणाहुतीः पृथक् शेषमोषधवप्राश्य स्थि

त्यर्थं श्रुतिशासनात् पूर्वोक्त प्राणाग्निहोत्रप्रकारस्यानेनसह विकल्पः विष्णुः मिष्टमिष्टेन कुर्वीत रागद्वेषौ न वै सा
मिताशातो भवेल्लित्यं भिक्षुर्मोक्षपरायणः कामदर्यादियो दोषा न भवंति मिताशिनः अंतर्जानु तथा कृत्वा बाहू पादौ त
थाशुचिभाजनं वै समादाय भिक्षुः सव्यकरेण तु दक्षिणेन करेणैव चिंतयेनांतरात्मना ध्यायन् संभोजनं कुर्याद्धावा
न्नावमृष्येत वेत न स्पृशेत्सव्यहस्तेन भुंजानो लंकदाचन न पादौ न शिरो वस्तिं न पदा भाजनं स्पृशेत् हारीतः नोच्छिष्टं
दद्यान्नोत्सृजेन्न विकुत्सयेत् नातिमात्रमश्नीयात् महाभारते भुक्तान्यम्लानि तिक्तानि कषायकटुकानि च नास्वादयी
त भुंजानो रसांश्च मधुरांस्तथा यात्रामात्रं च भुंजीत केवलं प्राणधारणं असंरोधेन भूतानां हृष्टिं लिप्सेत मोक्षवित न चा
न्यमन्नं लिप्सेत भिक्षमाणः कथंचन असंरोधेनेति यथा भूतानां पीडा न भवति तथेत्यर्थः अथ पर्यटनं तत्र मनुः संरक्ष
णार्थं जंतूनां रात्रावहनि वा सदा शरीरस्यात्यये चैव समीक्ष्य वसुधां चरेत् ग्रैष्महैमंतिकान् मासान् अष्टौ पर्यटनेत
दयार्थं सर्वभूतानां वर्षास्वेकत्र संवसेत् निवासे विशेषमाह कण्वः एकरात्रं वसेद्ग्रामे नगरे पंचरात्रकं वर्षाभ्योन्यत्र वा
र्षिकान्मासांश्चतुरो वसेत् गौतमोपि न द्वितीयामपर्तुरात्रिं ग्रामे वसेत् ध्रुवशीलो वर्षास्विति च अपर्तुर्वर्षत्वर्ज
मिति कल्पतरुः मत्स्यपुराणेपि अष्टौ मासान् विहारः स्याद्यतीनां नियतात्मनां एकत्र चतुरो मासान् वार्षिकान् नि
वसेत्पुनः अविमुक्तप्रविष्टस्य तु न कदाचिदपि पर्यटनमित्युक्तं तत्रैव अविमुक्तप्रविष्टानां विहारो नैव विद्यते न

Indira Gandhi National Centre for the Arts

।मोक्षप्र०॥ देहोनविताततद्दृष्टंज्ञात्वैवरातनं चातुर्मास्येएकत्रनिवासप्रयोजनमाहमेधातिथिः संरक्षणार्थंजंतूनांवसुधातल
५८ वासिनां आषाढादीश्चतुरआमासात्कार्त्तिकाद्यतिः धर्मार्थिजलसंपन्नेग्रामांतेनिवसेद्यतिः पर्यटनेविशेषतः ।
कोशादियरिमाणमाहहारीतः दिवाकोशादियोजनांतंगच्छेच्छून्यदुर्गमवर्जं कोशादर्वाक्योजनात्परतोनगच्छे
दित्यर्थः शून्यंदुर्गमंतरालेयदिनस्यात् एकाकीवविचरेदित्याहमनुः एकएवचरेन्नित्यंसिध्यर्थमहोसयकः
सिद्धिमेकस्यसंपश्यन्नजहातिनहीयते एकएवेत्यनेनपूर्वपरिचितपरित्यागउक्तः असहायवानितिअपूर्वा।
स्यापिपरित्यागमाह सिद्धिमेकस्येति एकस्यसर्वसंगविरहिणः सर्वत्रममत्वशून्यस्यसिद्धिंपश्यन्नेकएवविच
रेत अन्यथापुत्रादिषुकृतममत्वोनतान्जहातितैश्चस्वयंनहीयतइत्यर्थ इतिकल्पतरुः अत्रान्यथान्नाद्याधा
हारन्नियामेधातिथिरेवंव्याचचक्षेएकः पूर्वसंस्कृतपरित्यागवान् असहायवानितिपूर्वसहायत्वेनकृतस्यप्र।
त्यादेःपरित्यागउक्तः यदाएकस्यैवसिद्धिंपश्यतितदानजहाति नपुत्रादिस्तेनत्यक्तोभवतिमदीयत्वाभिमानपूर्वक
त्वात्त्यागस्य अभिमानाभावेत्यक्तस्यत्यागायोगात् अतोनहीयतेनपुत्रादिनावियुज्यते संगेसतिकृत्यागेमहदुःखं
स्यादिति अत्रार्थांजस्याभावात् माधवोन्यथाव्याचख्यौ एकस्यासहायस्यविचरतोरागद्वेषादिप्रतिबंधाभावात्ब्रह्म
ज्ञानादिलक्षणांसिद्धिंनिश्चित्वतस्वयमेकाकीवविचरन्नजहातिसिद्धिमित्यनुषंगः तथाचसिद्धावप्रत्यूहेनप्रवर्त्तते ५८

प्रेत्यचसिद्धैर्नहीयते किंतुपारंगच्छतीत्यर्थः इदंतुएकाकिनोविचरणंकृतश्रवणस्य श्रवणार्थंतुगुरुसंनिधानस्य
सगुरुमेवाभिगच्छेत्समित्पाणिःश्रोत्रियंब्रह्मनिष्ठमितिश्रुत्याभ्यनुज्ञानात् यतेरेकाकित्वाभावेबाधकमाहदक्षः एको
भिक्षुर्यथोक्तस्तुद्वावेवमिथुनंस्मृतं त्रयोग्रामःसमाख्यातऊर्ध्वंतुनगरायते नगरंहिनकर्त्तव्यंग्रामोवामिथुनंतथा ए
तत्त्रयंप्रकुर्वाणस्वधर्माच्च्यवतेयतिः राजवार्त्तादितेषांचभिक्षावार्त्तापरस्परं स्नेहपैशून्यमात्सर्यंसन्निकर्षान्नसंशयः य
दातुकृतश्रवणस्यापिमननादौअशक्तत्वंतदाद्वौविचरेतामित्याहश्रुतिः वर्षासुध्रुवशीलोष्टौमासैकाकीयतिश्चरेद्द्वौ
वाचरेत् चरेतामित्यर्थः अपरिग्रहः सन्विचरेततदाहाहदस्मृतिः नचाददीतपाथेयंयतिः किंचिदनापदि पक्वमाप
त्सुगृह्णीयात्यावदन्नोपयुज्यते पाथेयमेकरात्रस्यपानीयंदुर्गमेपथि गृह्णीयान्नाधिकंचान्नंनेषजंक्तयथेच्छयापर्यट
नदेशानाहाङ्गिराः हिमवद्विंध्ययोर्मध्यः ख्यातःपुण्यतमःश्रुतौ देशःसरस्वतीतीरेकरदायास्तुपश्चिमेदेशौवैशद्विना
पूर्वंयविशीकरणायवै योगज्ञानतपोध्यानसिध्यर्थंवैमहात्मनां तस्मिन्देशेसदाभिक्षुःस्वधर्ममनुपालयन्पर्यटेत्तुस
दायोगीवीक्षयन्वसुधातलं गयागमनेविशेषउक्तोवायुपुराणे दंडंप्रदर्शयेद्भिक्षुर्गयांगत्वानपिंडदः दंडंविष्णुपदेस्थ
हापितृभिःसहमुच्यते गयायांमुंडपृष्ठेचक्रमयेयूपेवदेतथा दंडंप्रदर्शयेद्भिक्षुःपितृभिःसहमुच्यते पर्यटनेकालविशेषमाहस
एवनराशैनैवमध्याह्नेसंध्ययोर्नैवपर्यटेत् नशून्येनचदुर्गेवाप्राणबाधकरेनच यत्रप्रभुर्जगल्लायस्तत्रयोगीवसेत्सदाभि

dhi National
Centre for the Arts

॥ मोक्ष०॥
६०

क्षार्थं प्रविशेद्ग्रामे वा सार्थं वा दिनत्रयं एकरात्रं वसेद्ग्रामे पत्तने च दिनत्रयं पुरे दिनद्वयं भिक्षुर्नगरे पंचरात्रकं वर्षास्वेक
त्र तिष्टेत स्थाने पुण्यजलावृते ग्रामः कर्षकनिवासः पत्तनपुरनगराणामवांतरभेदोल्पमहत्वभेदाद्द्रष्टव्यः कथंचिदे
दित्यपेक्षायामाह स एव आत्मवत्सर्वभूतानि पश्यन् भिक्षुश्चरेन्महीं अंधवत्कुब्जवच्चापि बधिरोन्मत्तमूकवत् नामगो
त्रादिचरणं देशो वा संश्रितं कुलं वयो वृत्तं बलं शीलं ख्यापयेन्नैव सद्यतिः विभुः ग्रामांते निर्जने देशे नित्यकाले निकेत
नः पर्यटेत्कीटवद्भूमिं वर्षास्वेकत्र संवसेत् वर्षास्वेकत्र निवासे हेतुमाह यमः जले जीवाः स्थले जीवा आकाशे जीव
मालिनि जीवमालाकुले लोके वर्षास्वेकत्र संवसेत मासद्वयनिवासमप्याहात्रिः मासद्वयं चतुष्कं वा एकत्र निवसेद्यतिः
नैकत्र निवसेद्ग्रामे वर्षाभ्योन्यत्र सद्यतिः कठश्रुतावपि चतुरो वार्षिकान्मासान्ग्रामे नगरे वा वसेत् आषाढ्यां कर्तव्य
विशेषमाह मेधातिथिः आषाढ्यां पौर्णमास्यां तु कारयेद्वपनं यतेः अत्र संप्रदायविदः पठंति गुरुं नत्वा शिरस्यां प्रक्षाल
नं तदनंतरं आचम्य वाग्यतो यन्नात सवासा क्षौरमाचरेत् अंतर्धाय तृणं किंचित्तत्र निक्षेपयेद्यतिः क्षुरं संदर्शनं चैव तथा
नखनिकृंतनं अग्निमं च द्विषड्द्वारं वपनैः प्रक्षालयेज्जले गच्छेरमादाय तीरेण श्मश्रुकेशान् लिकृत्य च शिरोरुहास्ततो ना
साश्रितांश्च वपयेद्यतिः कारयेच्च क्षुरस्थानां नखानां च निकृंतनं द्विषड्द्वारं निमज्ज्याप्सु तीरगत्वोपविश्य च प्रतिस्था
नं द्विषड्द्वारं संमृज्याथ मृदं तथा पुनराप्लुत्य तत्तीरं गत्वा गंडूषमाचरेत पंचैकदशावारोश्च समपगाचमयन्नतः प्राणाया ६०

मांस्ततः कुर्यात्पंचैकादशसंख्यया क्षौरस्नानं यतीनां तु व्यासवर्यैः प्रकीर्तितं ततो वसथमागत्य व्यासपूजां कुर्यात्
अत्रिः वपनानंतरं स्नात्वा पूजयेत्पुरुषोत्तमं मनसा कर्मणा वाचा पूजयेच्च परस्परं यतिधर्मसमुच्चये देवं कृष्णं मुनिं व्या
सं भाष्यकारं गुरोर्गुरुं गुरुं देवं गणाध्यक्षं डं गं दिवी सरस्वती गणेगणेशः अध्यक्षः क्षेत्रपालः अत्र संप्रदायात् श्रीकृ
ष्णव्यासभाष्यकाराणां प्रधानदेवतात्वं अन्याश्चावरणदेवताः तत्र श्रीकृष्णस्य सनत्कुमारसनकसनंदनसनत्सुजा
ताः व्यासस्य सुमंतुजैमिनिवैशंपायनपैलाः भाष्यकारस्य पद्मपादविश्वरूपत्रोटकहस्तामलकाचार्याः तत्र श्रीकृष्णपंच
कं मध्ये तस्य दक्षिणतो व्यासपंचकं वामे आचार्यपंचकं अन्ये च ब्रह्मविदाचार्या यथासंनिवेशं भगवतः पुरतः पूज्याः
गणेशाग्नेये ईशान्ये क्षेत्रपालः वायव्ये दुर्गा निर्ऋत्ये सरस्वती यथादिशं च लोकपालाः भगवतः सर्वे ब्रह्मरुद्रौ अत्र च
भगवान् मूलमंत्रेण पूजनीयः अन्ये तु प्रणवादिभिर्नमोंतैस्तत्तन्नाममंत्रैः पूज्याः एवं पूर्वोक्तप्रकारेण संपूज्य गोपीचं
दनादि मृत्तिकादंतकाष्ठदोरकादि दद्यात अत्र च तन्मासपर्यंतं मृदं गृह्णीयादित्याह मेधातिथिः प्रशस्तां मृत्तिकां कृष्णां गृ
ह्णीयाच्छुचिशुक्रयोः पूर्णिमा च ततो मासानाषाढ्यां मृत्तिकां दद्यात् शुचिशुक्रौ ज्येष्ठाषाढौ वृद्धयाज्ञवल्क्यः प्राग्दृष्टेर्मृ
दमादाय कृष्णां किंचिदपीडयन् प्राग्दृष्टेः ज्येष्ठाषाढयोरित्यर्थः मृत्तिकेति दंतकाष्ठपत्रादीनामपि उपलक्षणं शिष्टाचारा
त् आषाढ्यां एकत्र निवाससंकल्पः कर्तव्य इत्याहात्रिः द्वादश्यां पूर्णमास्यां वा कुर्यात्संकल्पमात्मवित् संकल्पमंत्रमाह

National
Centre for the Arts

सएव असतिप्रतिबंधेक्तमासान्वैवार्षिकानिह निवत्स्यामीतिसंकल्प्यमनसाबुद्धिपूर्वकंप्रायेणप्राहविप्राणिसंकु
लंवर्त्महृश्यते आषाढ्यादिचतुर्मासंकार्त्तिक्यंतंतुसंवसे माधवश्चतुरोमासान्सर्वभूतहितायवै स्वापंयास्यतिशेषा
ङ्केरव्येलक्ष्मासहजगत्पतिः स्मश्चैवोत्थितोयावत्तावत्सनातनः अहंतावन्निवत्स्यामि सर्वभूतहितायवै अयंच
संकल्पोनाविमुक्तनिवासवतः अविमुक्तप्रविष्टानांविहारोनैवविद्यतइतिमत्स्यपुराणीयवाक्येनअविमुक्तप्रवेशास
मयेतच्चैवनिवाससंकल्पस्यकृतत्वात्चातुर्मास्यनिवासस्यपृथगारंभाभावात् अग्निष्टोमारंभेनैवारब्धत्वेनदीक्षिणी
यादौपृथगारंभाभावान्नातिदेशप्राप्तान्वारंभणीयेतिवच्चातुर्मास्यनिवाससंकल्पप्रवृत्तिः नचविहाराभावसंकल्पेजा
तेपिचातुर्मास्यनिवाससंकल्परूपंकर्मांतरमेवविधीयतइतिवाच्यं तयोः समनियतत्वेनान्यतरसंकल्पेनैवापरस्यसि
द्धत्वेनपृथगनुष्ठानायोगात् चातुर्मास्यनिवासदेशमाहात्रिः नासमानसहायेषुनिवसेद्योगवित्क्वचित् वसेत्समानशी
लेषुस्वशीलेषुतपस्विषु निरामयंनिराबाधंप्रसन्नसलिलान्वितं मेध्यंगवकुलेचैवधनिनांकुलसंकुलं नस्रायचज
नाः सर्वेरवद्दस्त्रिपरिपालकाः अदधानामुदायुक्ताशांताः कल्याणवादिनः प्रपद्यंतियथाम्नायंविद्वांसर्वरसाचितं दृ
ढानन्तुक्रमेणैवनमस्कृत्यविधानतः अनेनविधिनाभिक्षुराषाढ्यांसमाहितः स्थानादस्मिन्व्रजेन्नावद्यावद्भवतिपंचमी
प्रपश्चिमेनयुज्येतपंचम्यूर्ध्वंव्रजेद्यदि कृच्छ्रमेकंचरेद्भिक्षुर्यदिद्वंतैर्निगच्छति तेषुमासेषुमासेषुकेशादीन्नृतुसंध्येन ६१

वापयेत् नदीश्चनतरेत्तत्रकेशान्दूर्ध्वंनचव्रजेत् वापयेद्यदिकेशादीनुत्तरेच्चनदींयदि प्राणायामांस्त्रिंशत्कृत्वाज
येत्रिकशातत्रयं वर्षाभेदंयतिकुर्याद्यतिः कश्चिदनापदिनापदि प्राजापत्येनकृच्छ्रेणमुच्यतेनात्रसंशयः यदात्त
मासद्वयनिवासपक्षः तदाभाद्यांक्षौरं कृत्वासंधिषुवापयेदितिवचनात् यदामासचतुष्टयेनिवासः तदानांतरा
वपनंकुर्यात् चातुर्मास्यस्यमध्येतुवर्जयेद्वपनंयतिरितिमेधातिथ्युक्तेः चातुर्मास्येएकत्रनिवासप्रयुक्तोयंतरी
वपननिषेधः मासद्वयनिवासपक्षेप्रयोजकाभावात् पुरोडाशाकपालेनाम्नावेक्षणीयवादीनकपालेनेतिवत् अत
संधिषुवापयेदित्येवप्रवर्त्तते मासद्वयनिवासपक्षेयदामलमासोभवतितदाक्षौरद्वयमाहात्रिः अधिमासोयदा
विप्रतदाक्षौरद्वयंभवेत् मासद्वयेनप्रथमंमासैकेनतथापरं अथपात्राणि तत्रयाज्ञवल्क्यः यतिपात्राणिमृद्वे
णुदार्वलाबुमयानिच सलिलंशुद्धिरेतेषांगोवालैश्चावघर्षणं हारीतः मृद्दारुविदलालाबुपर्णपात्राणिपात्रेष्वाभिद्वा
र्यशमंप्रविशेत विदलोवंशः शंखलिखितावपि काष्ठालाबुविदलपार्थिवानांभिक्षुर्नेद्यनाजनंतस्यगोवालरज्ज्वा
सोदकंपरिघर्षणंप्रात्याङ्क्विंशौचं नाशाचमेन्नस्तौनिक्षिपेत्नाशुविस्पृशेत् तुत्काचांतः पुनराचम्यद्रव्याण्यभ्युक्षये
त रक्तंयच्चान्यदविरुद्धंस्यात् मनुः अलाबुंदारुपात्रंचमृन्मयंवैदलंतथा एतानियतिपात्राणिमनुःस्वायंभुवोऽब्रवीत्
यमः हिरण्मयानिपात्राणिकार्ष्णायसमयानिच मणीनांयानिपात्राणिवर्जयेत्तानिभिक्षुकः कांस्यायसंलोहंस्कवा

Indira Gandhi National
Centre for the Arts

॥मोक्षप्र०॥
६२

र्णरूप्यपात्रेषु ताम्रकांस्यमयेषु च भिक्षां दत्वा न धर्मोऽस्ति गृहीत्वा नरकं व्रजेत् तेषां शुद्धिमाह मनुः अतैजसानि पात्रा
णि तस्य स्युर्निर्व्रणानि च तेषामद्भिः स्मृतं शौचं चमसानामिवाध्वरे अद्भिरिति याज्ञवल्क्यो गोलोमैर्वा घर्षणसहिता
भिरद्भिरित्यर्थः इयं च शुद्धिर्भिक्षार्थप्रायोगिकी न तु अमेध्याद्युपघाते चमसदृष्टांतात् तत्रापि अमेध्याद्युपघाते द्रव्य
शुद्धिप्रकरणोक्ता द्रष्टव्या भोजनपात्रमाह बौधायनः स्वयमाहृतपर्णेषु स्वयं शीर्णेषु वा पुनः भुंजीत न वटाश्वत्थ
करंजानां कपर्णके कुंतीतिंदुकयोर्वापि कोविदारार्कयोस्तथा पात्राभावे त्वयं नावे मृदादिपात्र एव भुंजीत न कांस्या
दिपात्रे इत्याह स एव आपद्यपि न कांस्ये तु मलाशी कांस्यभोजनः सौवर्णे राजते ताम्रमये वा त्रपुसीसयोरिति अ
त एव देवलः तन्नैक्षं गृहीत्वा एकांते तेन पात्रेणान्येन वा तूष्णीं भुंजीत तेन पात्रेण भिक्षापात्रेणेत्यर्थः कण्वः तार्णपा
त्रं च पाषाणमिति अत्रिः मृद्दारुजं च वैणवं वैणवं तांतवं फलं उक्तानि यतिपात्राणि ब्रह्मणा विश्वयोनिना करे कर्प
टके चैव आयसे ताम्रभाजने भुंजन्भिक्षुर्न लिप्येत लिप्यंते गृहमेधिनः एवमाहृत्य पर्णेषु कृत्वा यर्णमयीपुटीं भिक्षा
र्थं पर्यटेद्भिक्षुस्तैजसेन कदाचन अयमर्थः भिक्षापात्रं तैजसं नैव भवति भोजनं तु आयसे ताम्रभाजने वान्यनुज्ञाय ६२
ते अथ यत्याह्निकं शयनादुत्थितो यतिः कीर्तयेन्मधुसूदनं कीर्तनात्तस्य पापानि नाशमायांत्यशेषतः इत्यादि ब्राह्मे
मुहूर्ते चोत्थायेत्यादि आह्निकं प्रकाशोक्तमनुसंधेयं शौचे तु विशेषः यतीनां तु चतुर्गुणमित्यादि आचमने विशेष उक्तः

संप्रदायविद्भिः वस्त्रित्वा धौतकौपीनं गंडूषान्द्वादशाचरन् आचम्य प्रयतो भूत्वा प्राणायामाष्टकाचरेत् लघुशौ
चे विशेषः षड् गंडूषांस्ततः कृत्वा प्राणायामत्रयं चरेदिति शंखः यतिश्च ब्रह्मचारी च नाचामेच्चर्मवारिणा वानप्रस्थो
गृहस्थश्च दैवे पित्र्ये च कर्मणि स्नाने विशेषमाह व्यासः चतस्रो घटिकाः प्रातररुणोदय इष्यते यतीनां स्नान
कालोऽयं गंगांभःसदृशः स्मृतः उषस्युषसि यत्स्नानं संध्यायामुदिते रवौ प्राजापत्येन तत्तुल्यं सर्वपापप्रणाशनं
स्नानं कृत्वा विष्णुपादोदकं ग्राह्यमित्युक्तं ब्रह्मांडपुराणे पृथिव्यां यानि तीर्थानि तेषां स्नानस्य यत्फलं विष्णोः पादो
दकं मूर्ध्नि दधन् सर्वमवाप्नुयात् स्कंदपुराणेपि अयमेव परो धर्मस्त्विदमेव परं तपः इदमेव परं तीर्थं विष्णुपादांबु
यः स्पृशेत् स चैवावभृथस्नातः स च गंगाजले प्लुतः विष्णुपादोदकं कृत्वा शंखे यः स्नाति मानवः यतिपादोदकम
पि ग्राह्यमित्युक्तं तत्रैव यतिपादोदकं राजन् हंति पापं पुराकृतं सप्तजन्मार्जितं सद्यः श्रद्धया शिरसा धृतं स्नानेतिक
र्तव्यतामाह संप्रदायविदः नागमुद्रा त्वधो धार्या ऊर्ध्वं तु मुद्रा ब्रह्मणः तृतीया दंडभागे तु धार्या परशुमुद्रिका तस्योप
रि संधार्या शंखमुद्रा तु वैष्णवी नागद्वयं विहायोर्ध्वं चतुरंगुलमानतः दंडं कार्पाससूत्रेण वेष्टयेत्संप्रदायतः इत्युक्त
मुद्रासहितं दंडं दक्षिणकरे गृहीत्वा वामांसे वस्त्रं कृत्वा गुरोर्दक्षिणभागे स्थित्वा गुरुमभिवंद्य तदनुज्ञां प्राप्य गच्छेत् तत
उक्तं संप्रदायविद्भिः अभिवंद्य गुरून् ज्येष्ठान् देवादीन् परिगृह्य च हारादि विंबमपादं दंडं मूलेषु रादधन् ततो निर्ग

Indira Gandhi National
Centre for the Arts

त्यविशादीन् हस्ताद्दक्षिणतो व्रजेत् ततो जलाशयं गत्वा गुरून् ज्येष्ठान् विलोकयेत् तेषामधःप्रदेशे कमंडलुं च दंडं शौक
मंडलं तु संस्थाप्य वामवस्त्रं च कृत्वा विष्णुं स्मरेज्जले ततो दंडस्य मूलेन तथा शेषेण स्पृशेज्जलं कुर्याज्जलस्य च दिव्यानां दे
वानां वंदनं क्रमात् ततः — स्थापयेद्दंडं मूलाग्रं जलमध्यतः अथवा कचित्वस्त्रादौ स्थापयेत्प्रागुदङ्मुखः ततो मृ
दं समानीय पश्चोक्तां शुचिदेशतः प्रक्षाल्य तीरे संस्थाप्य कुर्याद्भागत्रयं ततः ततः एकेन भागेन पादशौचं समाचरेत् अ
न्यस्यान्येन भागेन कटिशौचं समाचरेत् जलांतस्तिस्र निमज्जिकटिं प्रक्षालयेत् ततः कौपीनेति सृत्तिमज्जिभरः प्रत्येक
मेव तु ततस्तु क्षालयेत्सम्यक् मृज्जलाभ्यां कमंडलुं वामहस्तस्य पृष्ठे तु संस्थाप्य स्नानमृत्तिकां दंडं कमंडलुं चैव स्थ
क्षाचामे यथाविधि वामः वस्त्रं ततो दंडे स्थाप्य यहाशुचिस्थले दक्षिणे शौस्नानमृदं संस्थाप्य विभजेत्त्रिधा चुलुके जला
मादाय तद्वामेन पिधाय च प्रणवेन हिद्द्वारमंत्रिमंत्र्य च तेन तां संप्रोक्ष्य प्रणवेनैव द्विषद्केनाभिमंत्रयेत् ततः प्रथमं ता
गां तु गृहीत्वा स्वल्पिकां मृदां करस्थां वारि पश्य सूर्याय प्रदर्श्य प्रक्षालयेत्पुनः पुनः किंचित्समादाय हस्तयोरुपलिप्य च स
र्याय दर्शयित्वोर्ध्वमुखं कक्षे च लेपयेत् जलेनाधोमुखं विकृत्वे जमालिप्य जलं स्पृशेत् एवं वारत्रयं कुर्यात्कक्षयोरुप
लेपयन् द्वितीयात्किंचिदादाय हस्तयोरुपलिप्य च सूर्याय दर्शयित्वा तु विप्रलिप्य भुजौ हृदं जलं स्पृशेत् तत श्चैव किंचिदा
दाय मृत्तिकां हृदयारभ्य चानाभेरालिप्य सलिलं स्पृशेत् पुनश्चैवा समारभ्य पृष्ठमारभ्य तु लेपयेत् आपादांतु जलं स्प ६३

---

क्षाद्दक्षिणेन करेण तु तृतीयं भागमादाय वामेनोरू विशोधयेत् गंगायां तन्मुखो न्यत्र सूर्यदेवादिसन्मुखः यस्य प्र
सादादित्यादि मंत्रेण त्रिर्निमज्जुरुं ततो दक्षिणभागे तु स्थित्वा च देतदे ता ज्येष्ठानां वंदनं कृत्वा ज्येष्ठानुक्रमतः पु
नः अधस्ताद्दक्षिणं कृत्वा वामहस्तेन दक्षिणं पादं स्पृष्ट्वा विशेत्तोयं नाभिदघ्नं शनैः शनैः प्रवाहाभिमुखो नद्यामन्यत्र
विसंमुखः त्रिर्निमज्ज्य मृदं वांसे संस्थाप्य प्रागुदङ्मुखः अवम्य द्विस्त्रिरायम्य प्राणान् प्रोक्ष्याभिमंत्र्य च मृत्तिकां पूर्ववं
तां च स्कंदादाय हस्तयोः रुपलिप्याथ सूर्याय वक्षुषोर्वा प्रदर्श्य च ललाटबाहुहृदयं कमेणैव विलेपयेत् एवं वारत्रयं
कृत्वा गृहीत्वा शेषमृत्तिकां प्रणवेनाय आलोड्य कुर्यात् पक्षारमज्जनं द्विराचम्यत्रिरायम्य प्राणान् पश्चाद्यथाविधिन्या
सादि कृत्वा प्रणवं जपेद्दष्टोत्तरं शतं अथवापि यथाशक्ति ततो ब्रह्मानुचिंतयन् नाम्नां तु केशवादीनां मेकैकं नाम संस्म
रन् क्त्वा द्वादशवारं तु शिखावदनबाहुषु हृदयं च निषिंचेत्तु त्रिभिः शंखाख्यमुद्रया जलेन तिलकं कृत्वा द्विराचम
न पूर्वकं अंगन्यासादिकं कृत्वा गत्वा गुरुसमीपतः तेषां पादोदकं किंचिच्छिर आदौ तु पूर्ववत् ततस्तु त्रिः पिबेद्देवं वि
ष्णोः पादोदकेन च ततः प्रक्षाल्य कौपीनं निष्पीड्य परिधाय च ऊरू प्रक्षाल्य मृत्तोयैः हस्तौ प्रक्षालयेन्मृदा एकं पदं
स्थले कृत्वा द्विराचम्य यथाविधि प्राणायामत्रयं कृत्वा द्विषद्द्वाराभिमंत्रितं जलं संप्रोक्ष्य वस्त्रादीनं गवस्त्रेण मार्ज
येत् ज्येष्ठानां संनिधौ विद्वानुपविश्य तु मार्जनं कंठादूर्ध्वं यतिः कुर्यादितरत्र यथासुखं मुखं त्वष्टगुणेनादौ पाद

॥मोक्षप०॥ क्षिप्येनमार्जयेत् शिरश्चतुर्गुणैनैवमानान्नेद्विगुणेनतु एवमेकगुणेनैवपादपर्यंतमार्जनं कौपीनसहितंडोरमा
६४ दौवध्नीतवाग्यतः कौपीनमंगवस्त्रंचजलेचोत्सृत्यनिक्षिपेत् वामेवस्त्रंततः कृत्वाविसृष्टेचांगवस्त्रके कौपीने
मृज्जलेक्षिप्तापादौप्रक्षालयेन्मृदा ततआचम्यविधिवत्प्राणायामान्षडाचरेत् अज्ञानकृतहिंसादिप्रत्यवा
यनिवृत्तये आद्योर्ध्वपुंड्रंतर्जन्याकुर्यात्स्यात्रयेयतिः प्रथमंधारयेन्मूर्ध्निप्रणवस्यार्द्धमात्रया द्वितीययालला
टेक्तहृदयेतुतृतीयया प्राणायामत्रयंकृत्वाऋष्यादिन्यासपूर्वकं प्रणवार्थानुसंधानंपंचीकरणपूर्वकं संध्यांतु
विधिवत्कुर्यात्किंचित्कालंसमाहितः यतेःसंध्यामाहबौधायनः वारुणीभिःसायंसंध्यामुपतिष्ठेतमैत्रीभिःप्रातः
सायंप्रातरग्निहोत्रमंत्रान्जपेत् प्रणवजपमाहुःसंप्रदायविदः अष्टोत्तरशतंवापिसहस्रंवाष्टसंयुतं प्रणवंतुज
पेत्पश्चात्प्राणायामत्रयंचरेत् यतेर्ब्रह्मयज्ञमाहबौधायनः अपरिमितावाचोपरिमितानिसामानिअपरिमितानिय
जूंषि अथैतस्यैवांतोनास्तिपत्ब्रह्मतत्प्रतिगृह्णन्नाचक्षीतसप्रतिगरइत्येवमेवोपासीताशरीरविमोक्षणात्ब्रह्म
मूलिकोवेदसंन्यासीवेदहस्यमूलंप्रणवःप्रणवात्मकंतध्यायन्प्रणवोब्रह्मब्रह्मनूयायकल्यतइतिहोवाच ६४
प्रजापतिःप्रणवाभ्यासेनैवऋक्यजुसामान्यभ्यस्तानिभवंतीत्यर्थःभगवत्पूज्यामाहुःसंप्रदायविदः ततोथसं
विधायाप्युपद्मंष्टदलंलिखेत् संचिंत्यसगुणंविष्णुंतत्रपंचोपचारतःसंपूज्याथजपेन्मंत्रंतारेणाष्टोत्तरंशतं ततो

दक्षिणहस्तस्थंतोयंक्षादशवारतः अभिमंत्र्यशिरःप्रोक्ष्यतथान्यदभिमंत्रितं जलंपिबेदथाचम्यडोरंप्रक्षाल
येन्मृदा कर्णयोस्तत्संस्थाप्यकौपीनंक्षालयेन्मृदा अंगवस्त्रंचघटिकांतयोः कृत्वायथाविधि वामहस्तस्पृष्ट
श्चोतुसंस्थाप्याचमनंचरेत् आर्द्रमुद्रांततोवक्षांदंडमूलेतुतर्पयेत् ततोदंडस्यमध्येतुप्रणवेनैवतर्पयेत् द्विष
ड्वारंतथाग्रेतुतर्पयित्वासमुत्थितः अन्येतु त्रित्रिस्तारेणदेवर्षीन्दंडाग्रेत्रिपितृंस्ततः ततउत्थायदंडस्यमूलाग्र
न्यांस्त्रीज्जलंजलादिगुरुदृहानांवंदनंचयथाक्रमं कृत्वाभिषेकंदंडस्यततोयायान्मठंप्रति देवंसंस्थाप्यवि
धिवद्गुर्वादीनभिवंदयेत् शोधयित्वांगवस्त्रादिप्रसार्यचशुचिस्थले प्रागग्रमुदगग्रंवादंडंनाजसिधारयेत् गुरू
पदिष्टमार्गेणन्यासध्यानादिवाचरेत् स्वयंपालिततुलसीपत्राद्यैस्वाहृतैर्हरिः गंधपुष्पाद्युपचारान्कृत्वाकस्थित
आसनेजपमालांगृहीत्वाक्तप्रणवार्थमनुस्मरन् जपेद्वादशसाहस्रंप्रणवस्यप्रयत्नतः सहस्रंश्चवणाथीतुयो
गाभ्यासीशतंजपेत् निर्विकल्पसमाधिस्थःजपेत्किंचिदसक्षयः पूजाकर्तव्यतामाहनारदःभिक्षाटनंजपोध्यानं
तपःशौचंसुरार्चनं कर्तव्यानिषडेतानियतीनांनृपदंडवत् कात्यायनःत्रिकालमेककालंवापूजयेत्पुरुषो
त्तमं व्यासः अन्योरानीतकुसुमैरर्चयेज्जगदीश्वरं नरूढानीतैकुयक्षीतैर्नार्चयेत्कृत्रिमनृपतिःपक्वंचतुल
सीपत्रंऋक्षंपर्युषितंचयत् आनीयतत्प्रयत्नेनपूजयेत्पुरुषोत्तमं नावपुष्पैर्यजेद्योगीवाद्यैर्वाविहायात्वितः

Indira Gandhi National Centre for the Arts

विष्णोः पादोदकं जुष्टं नैवेद्यस्य च भक्षणं निर्माल्यं शिरसा धार्यं महापातकनाशनं जपपूजादिषु वाक्यमलोये
व्यासआह यदि वाक्यमलोयस्यात्तज्जपादिकथंचन आह रैदैलवं मंत्रं जपेद्वाविष्णुमव्ययं मेधातिथिः स्नानं
त्रिषवणं प्रोक्तं बहूदकवनस्थयोः हंसे तु सकृदेव स्यात् परहंसे न विद्यत इति परमहंसस्य स्नानाद्यकरणेन प्रत्य
वायः यत्तु आरुणश्रुतौ त्रिसंध्यादौ स्नानमाचरेदिति व्यासः प्रातर्मध्याह्नयोः स्नानं वानप्रस्थगृहस्थयोः त्रिषव
णं तत्रिषवणमेकतु ब्रह्मचारिण इति तत्परमहंसव्यतिरिक्तविषयं त्रिषवणस्नानाशक्तं प्रत्याह कपिलः प्रातस्ना
नेत्वशक्तश्चेत्कापिलं स्नानमाचरेत् नाभेरधः प्रक्षाल्य पाणिमुकटिं प्रक्षाल्य मृज्जलैः जलार्द्रकर्पटेनांगशोधनं कापि
लं स्मृतं सायंप्रातरसामर्थ्ये सायमेवाथवा पुनः तत्राप्यसामर्थ्ययुक्तेमंत्रस्नानं विधीयते पराशरः चक्षुरोगी शि
रोरोगी कंठरोगी तथाधिकः ज्ञानस्नानं प्रकुर्वीत शिरःस्नानफलं लभेत् कालदोषादिसामर्थ्यात् न शक्नोति यदा
द्यसौ ऋषिभिस्तु तदा ज्ञात्वा मंत्रैर्दृष्टं तु मार्जनं आग्नेयं भस्मना स्नानमवगाह्य च वारुणं आपोहिष्ठेति ब्राह्मं वायव्यं
रजसा गवां यत्तु सातपवर्षीयं तत्स्नानं दिव्यमुच्यते स्नानान्येतानि चापत्सु व्याधितस्योदकं विना स्नाने प्रशक्तः स्ना ६५
यीत नित्यमुष्णेन वारिणा तैलाभ्यंगो न कुर्वीत ब्राह्मणो वातरोगिणं प्राणायामप्रकारश्च आह्निकप्रकाशात् अवगंतव्यः
परमहंसानां विशेषश्चोच्यते यतिधर्मसमुच्चये वेदो हस्तस्तस्य मूलं प्रणवो यस्य सोस्ति सः हस्तमूली यतिः स स्यात्तस्य

क्त वेदोपरिग्रहः न चातुर्थ्यमंत्रवदाचरेदिति श्रुतिवचनविरुद्धमिति वाच्यं सर्वेषु वेदेषु पारमावर्तयेत् इत्येनेनोप
निषद्भागाभ्यासस्य विहितत्वेन तदंतर्गतप्रणवाभ्यासस्यापि विहितत्वात् अतएवमनु आत्मज्ञाने शमे च स्याद्वेदाभ्या
से च यत्नवान् वेदाभ्यासः प्रणवाभ्यासः प्रणवैरेव प्राणायामाभ्यासः कर्तव्यः प्राणायामे फलमुक्तं मनुना दह्यंते
ध्मायमानानां धातूनां हि यथा मलाः तथेंद्रियाणां दह्यंते दोषाः प्राणस्य निग्रहात् ततो वेदांतश्रवणं वर्तव्यमित्युक्तं यतिध
र्मसमुच्चये ब्रह्मचर्यमहिंसा नित्यमहिंसासत्यमार्जवं वेदांतश्रवणं ध्यानं भिक्षोः कार्याणि नित्यशः त्वंपदार्थविवेकाय
संन्यासः सर्वकर्मणां श्रुत्या विधीयते यस्मात्तत्त्यागी पतितो भवेत् नित्यश इत्यनेन अकरणे प्रत्यवायश्रवणेन
च वेदांतश्रवणस्याहरहः कर्तव्यतावगम्यते तच्च साक्षात्कारपर्यंतमावश्यकं साक्षात्कारफलकस्य श्रवणस्यावृत्तिर
सकृदुपदेशादित्यधिकरणे अवघातवद्दृष्टार्थत्वेनावृत्तौ सिद्धायामपि नित्यश इत्यनेन तत्त्यागी पतितो भवेदिति च वि
विदिषोरहः कृत्यत्वेनाप्यावश्यकत्वमिति दिक् शेषं श्रवणप्रकरणे वक्ष्यते ततः पूर्ववत् मध्याह्ने स्नानं कृत्वा भिक्षार्थं
गच्छेत् भिक्षाग्रहणं भोजनेतिकर्तव्यता भिक्षाप्रकरणे द्रष्टव्या भिक्षानंतरमवस्थानमाह संवर्तः अरण्ये निर्जने विप्रः
पुनरासीत भक्तिमान् एकाकी संयतो नित्यं नवेदाझूर्तिनिर्घृतिः नृसिंहपुराणेपि अथाचम्य विरुद्धानि रूपतिष्ठेत्तमा
स्करं जपध्यानेतिहासैश्च दिनशेषं नयेद्बुधः दक्षोपि इतिहासपुराणाभ्यां षष्ठसप्तमकौ नयेत् पुराणस्याप्यध्यात्म

Indira Gandhi National
Centre for the Arts

॥मो०ध०॥ नागस्यैव श्रवणं न त्वन्यन्नागस्य आध्यात्मिकीं कथां मुक्त्वा वृथाजल्पो न्यग्म्यत इत्यत्रिवाक्येन प्रतिषेधात् सायं पुनः
॥६६॥ पूर्ववत्स्नानं कृत्वा वारुणीं सायं संध्यामुपतिष्ठेतेति बौधायनोक्तां सायं संध्यां कृत्वा पंचीकरणादि कृत्वा सायमग्निहो
त्रमंत्रानुजपेत् सायं प्रातरग्निहोत्रमंत्राननुजपेदिति बौधायनोक्तेः ततो रात्रेः प्रथमयामे श्रवणादीन्संहृत्य परमात्मानं
ध्यायेत् तदुक्तं नृसिंहपुराणे कृतसंध्यस्ततो रात्रिं नयेद्देवगृहादिषु हृत्पुंडरीकनिलये ध्यात्वात्मानमकल्मषं ततोनु
मौ स्वापं कुर्यात् मंचकं शुक्लवस्त्रं स्त्रीकथा लौल्यमेव च दिवास्वापश्च यानं च यतीनां पतनानि षट् इत्यत्रिवचनेन मंचका
देर्निषेधात् मंचकशब्देन खट्वाकाष्ठमंचकयोर्द्वयोरपि ग्रहणं इत्याह्निकं अथ निषिद्धानि अत्रिः नाध्येतव्यं न वक्तव्यं न श्रो
तव्यं कदाचन एतैः सर्वैः सुनिष्पन्नो यतिर्भवति नेतरः इदं च वेदांतातिरिक्तविषयं आध्यात्मिकीं कथां मुक्त्वेत्यत्रिवचनात्
महाभारते वानप्रस्थगृहस्थाभ्यां न संगृह्येत केनचित् येन केनचिदाच्छिन्नो येन केनचिदाशितः यत्रक्वचनशायी च
तं देवा ब्राह्मणं विदुः शंखलिखितौ शीतोष्णवातवर्षाणि नात्यंतं परिहरेत् नात्यंतं प्रतीकारं कुर्यात् नाकारयेन्नानुमन्ये
त प्रतीकारं व्याध्युपद्रवे जात इति शेषः विष्णुः निराशीः स्यान्निर्नमस्कारः देवलः परिव्राजको दीक्षाप्रभृति सर्वारंभान् प ६६
रिव्रजेत् चतुर्मासानंतरं केशश्मश्रुवपनं कारयेत् अधीतः श्मश्रुरोमाणि विद्याचारकुलवयोवृत्तानि परेभ्यो न कथयेत् स
र्वारंभान् गृहादीनामिति शेषः चतुर्मासाभ्यंतरं यत्र तत्रेति क्रियाविशेषणं अधीतः अस्नातः अत्रिः स्थावरं जंगमं बी

जं तैजसं विषमायुधं षडेतानि न गृह्णीयाद्यतिर्मूत्रपुरीषवत् रसायनक्रियां वादं ज्योतिषं क्रयविक्रयौ विविधानि
च शिल्पानि वर्जयेत्परदारवत् नगरेक्षणं द्यूतं प्रमदां सुहृदं तथा नर्त्यं नृत्यमुदकं वा वमनं पश्येत्कदाचन स्कं
दा[illegible]वारेषु रेसाः शर्खल्वेग्रमेव सहृद्दे न वसेत यतिः षट्सु स्थानेष्वेतेषु कर्हिचित् रागं द्वेषं मदं मायां द्रोहं मोहं परात्मसु
षडेतानि यतिर्नित्यं मनसापि न चिंतयेत् मंचकं शुक्लवस्त्रं च स्त्रीकथालौल्यमेव च दिवास्वापश्च यानं च यतीनां पतना
नि षट् आसनं पात्रलोपश्च संचयः शिष्यसंग्रहः दिवास्वापो वृथाजल्पो यतेर्बंधकराणि षट् आसनादेर्लक्षणमा
ह स एव एका[illegible]हात्परतो ग्रामे पंचाहात्परतः पुरे वर्षाभ्योऽन्यत्र यत्स्थानमासनं तदुदाहृतं उक्तानां यतिपात्राणा
मेकस्यापि न संग्रहः भिक्षोर्भैक्षभुजश्चापि पात्रलोपः स उच्यते गृहीतस्य त्रिदंडादेर्द्वितीयस्य परिग्रहः कालांतरोप
भोगार्थं संचयः परिकीर्तितः शुश्रूषालाभपूजार्थं यशोर्थं वा परि— ग्रहः शिष्याणां न तु कारुण्यात् स ज्ञेयः शिष्यसंग्रहः
विद्या दिनं प्रकाशत्वात् अविद्या रात्रिरुच्यते विद्याभ्यासे प्रमादो यः स परिस्वाप उच्यते आध्यात्मिकीं कथां मुक्त्वा भैक्ष
चर्यां सुरस्तुतिं अनुग्रहप्रदप्रश्नात् वृथाजल्पोऽन्य उच्यते भिक्षोः षट् मोक्षसाधनान्याह स एव अजिह्वः षंडकः पंगुरं
धो बधिर एव च मुग्धश्च मुच्यते भिक्षुः षड्भिरेतैर्न संशयः इदमिष्टमिदं नेति योऽश्नन्नपि न सज्जति हितं सत्यं मितं वक्ति त
मजिह्वं प्रचक्षते सद्योजातां वयो नारीं तथा षोडशवार्षिकीं शतवर्षां च यो दृष्ट्वा निर्विकारः स षंडकः भिक्षार्थं गमनं यस्य

Indira Gandhi National
Centre for the Arts

॥मो॰ध॰०॥ विण्मूत्रकरणाय च योजनान्न परं याति सर्वथा यं गुरेवसः तिष्ठतो व्रजतो वापि यस्य चक्षुर्न दूरगं चतुर्युगात्तु यं
त्यक्त्वा परिव्राट् सोऽध उच्यते हिताहितं मनोरमं वचः शोकावहं तु यत् श्रुत्वा योन शृणोतीव बधिरः स प्रकीर्तितः
॥६१॥ सांनिध्ये विषयाणां यः समर्थो विकलेंद्रियः सुप्तवद्वर्तते नित्यं स भिक्षुर्मुग्ध उच्यते बहूदपरिशिष्टे योऽन्धवेत्पू
र्वसन्न्यासी तु स्थो वा धर्मतो यदि तस्मै प्रणामः कर्तव्यो नेतराय कदाचन छेदनं दोपमहं च पाकार गृहमाश्रमं
स्वाहा स्वधा वषट्कारो विषयाणां च संनिधिः स्तुति निंदा कि यावादो परमर्मावघट्टनं तृष्णा क्रोधो नृतं मायालोभ
मोहौ प्रियाप्रिये शिल्पं व्याख्यानियोगश्च कामो रागः परिग्रहः अहंकारो ममत्वं च चिकित्सा धर्मसाहसं प्राय
श्चित्तप्रदानं च मंत्रौषध्यगदाशिषः एकान्नं मदमात्सर्यं गंधपुष्पविभूषणं ताम्बूलाभ्यंजने क्रीडा नो गाकांक्षा रसा
यनं कत्थनं कुत्सनं स्वस्ति ज्योतिषं क्रयविक्रयौ क्रियाकर्मविवादश्च गुरुवाक्यविलंघनं संधिश्च विग्रहो या
नं संचयः न्मकृवाससी कृत्तोत्सर्गो दिवा स्वापो भिक्षाधारस्तु तैजसः विषं चैवायुधं वीजं हिंसा तैक्ष्ण्यं च मैथुनं
त्यागोत्सर्गे च सीमंते प्राप्ते क्षौरकर्मणि उपवीते विवाहे च यतिर्भुक्त्वा दवं चरेत् प्रतिषिद्धानि चैतानि सेवमानो व्रजत्य ।६१।
धः नैकदेशे नृपज्ञातिपुत्रमित्रादि योषितं उपचारकथास्वन्यां मनसापि न चिंतयेत् आगच्छ गच्छ तिष्ठेति स्वाग
तं स्तुह देपि वा संन्यासं न संनं च ब्रूयात्ः स्तुतिर्निंदा परायणः संन्यासं सन्मानं न स्नानमाचरेद्भिक्षु ज्ञादिनिधं

नश्रुते पितृमातृक्षयं कृत्वा स्नात्वा शुध्यति सांबरः न कुर्यात्सूतकं भिक्षुः श्राद्धपिंडोदकक्रियां त्यक्तं संन्यासयो
गेन गृहधर्मादिकं व्रतं गोत्रादि चरणं सर्वं पितृमातृकुलं धनं संभाषणं सह स्त्रीभिरालापप्रेक्षणं तथा नृत्यं गा
नं प्रहासं च परीवादांश्च वर्जयेत् मेधातिथिः न संभाषेत् स्त्रियं कांचित् पूर्वदृष्टां न च स्मरेत् कथं च वर्जयेत्तासां न
पश्येल्लिखितामपि सुजीर्णापि सुजीर्णस्तु रिक्तासु स्त्रीषु न विश्वसेत् सुजीर्णस्वपि कंथासु सज्यते जीर्णमंबरं
क्रतुः अर्थज्ञाख्यासनानां तु वाक्यस्यार्थनिभाषणैः याजनाध्यापनव्याख्यावस्त्रनां डपरिग्रहैः मिथुनेक्षणसं
कल्पैः संकरास्युर्यतिः सदा मनुः नादृष्टः कस्यचिद्ब्रूयान्न चान्यायेन पृच्छतः जानन्नपि हि मेधावी जडवल्लोकमा
चरेत् विष्णुपुराणे जरायुजांडजादीनां वाङ्मनःकर्मभिः क्वचित् युक्तः कुर्वीत न द्रोहं सर्वसंगांश्च वर्जयेत् लोक
यात्राप्रयत्नेन वर्जयेदात्मचिंतकः नान्योपनिषदं विद्यान्नान्यसेन्मुक्तिहेतुकीं उपनिषद्विद्यां मुक्त्वान्यां विद्यां ना
न्यसेदित्यर्थः क्रतुः निरुजश्च युवा चैव भिक्षुर्नावसथे वसेत् स दूषयति तत्स्थानं दृष्ट्वा न पीडयतीति च अत्रिः
यच्छं वा यदि वा पक्वं पाचयेद्यः क्वचिद्यति स्वधर्मस्य तु लोपे न तिर्यग्योनिं व्रजेद्यतिः जाबालः अन्नदानपरो भि
क्षुर्वस्त्रादीनां परिग्रही उभौ तौ मंदबुद्धित्वात्पूतीनरकगामिनौ वायुपुराणे यस्तु प्रव्रजितो भूत्वा पुनः सेवेत
मैथुनं षष्टिर्वर्षसहस्राणि विष्ठायां जायते कृमिः अरण्यागारेषु घोरेषु आस्वर्ज्यवति दारुणः स तिर्यक्स्यात्ततो

Indira Gandhi National
Centre for the Arts

गृध्रः श्वा वैद्याद्‌श्वा वत्सराः खरो विंशतिवर्षाणि दश वर्षाणि शूकरः अपुष्पफलितो वृक्षो जायते कंटकान्वितः त
तो दावाग्निना दग्धः स्थाणुर्भवति कामुकः स्थावरात्परिभ्रष्टो योनिमन्यां स गच्छति पूर्णे वर्षसहस्रांते जायते ब्र
ह्मराक्षसः क्षुत्पिपासापरिश्रांतो क्रव्यादो रुधिराशनः क्रमेण लभते मोक्षं कुलस्योत्सादनेन च चांडालगर्भसंभू
तो जायते ब्रह्मराक्षसः अंगिराः न तीर्थसेवी नित्यं स्यात् नोपवासपरो यतिः न चाध्ययनशीलः स्यात् न व्याख्यानप
रो भवेत् नाकिंचिन्निषजादन्यदथान्यद्दंतधावनात् विना भोजनकालं तु न दद्यादात्मवान् यतिः यतिधर्मविहीनस्तु सं
साराम्नातिवर्त्तते हर्षक्रोधौ न कुर्वीत मनःपूतं समाचरेत् प्रतिग्रहं न गृह्णीयान्नैव चान्यं प्रदापयेत् प्रेरयेद्वा तथा भिक्षु
स्वप्नेपि न कदाचन विष्णुः वानप्रस्थगृहस्थाभ्यां प्रीतिं यत्नेन वर्जयेत् दत्तात्रेयः जायाभ्रातृसुतादीनां बंधूनां च शुभा
शुभं श्रुत्वा दृष्ट्वा न कंपेत हर्षशोकौ त्यजेद्यतिः हारीतः छेदने भेदने पाके यतिर्यस्तु प्रवर्त्तते तादृशं कश्मलं दृष्ट्वा प्रा
यश्चौचं विधीयते तिलधान्यहिरण्यं च गोभूदासीगृहादिकं तदादाय निषिद्धं तु यो भुंक्ते न त्यजेद्यतिः स साधुभिर्बहि
कार्यः स्मृतौ सोपतितो यतिः तं दृष्ट्वा भिन्नमर्यादं स्नानं कुर्यात्सहांबरं प्रेतशौचं सचैलस्नानं अंगिराः संन्यासं चे
वयः कृत्वा पुनरुद्विजते द्विजः निकृतस्य निष्कृतिः कार्या स्वधर्मात्प्रच्युतस्य च विष्णुः आरूढो नैष्ठिकं धर्मं पुनरा
वर्त्तयेद्यतिः आरूढपतितो ज्ञेयः सर्वधर्मबहिष्कृतः स निंद्यः सर्वलोकानां पितृपक्षश्च जायते चांडालाः प्रत्यव

६८

सिताः परिव्राजकतापसाः तेषां जातान्यपत्यानि चांडालैः सह वासयेत् नैष्ठिकानां वनस्थानां यतीनामवकीर्णि
नां शुद्धानामपि लोकेस्मिन् प्रत्यापत्तिर्न विद्यते इदमवबहिस्तु न यथापि स्मृतेराचाराच्चेत्यधिकरणन्यायेन सि
द्धमुत्तरमीमांसायां विष्णुः आविकं त्वधिकं वस्त्रं तूलीतूलपटी तथा प्रतिगृह्य यतिश्चैतान् पतते नात्र संशयः बह
च परिग्रहे पतत्यसौ ध्रुवं भिक्षुर्यस्य भिक्षोर्यदि यद्भवेत् धीपूर्वे रेतउत्सर्गो द्रव्यसंग्रह एव च कांचनं च तिला गावो भू
मिर्धान्यं धनं स्त्रियः प्रतिगृह्य यतिश्चैतान् पतते नात्र संशयः भूमिर्गावो हिरण्यं च यतेर्यस्य परिग्रहः तादृशं कश्म
लं दृष्ट्वा सचैलो जलमाविशेत् अभयं सर्वभूतेभ्यो दत्वा यस्तु निवर्त्तते हंति जातानजातांश्च प्रतिगृह्णाति यस्य च अ
न्नदानपरो भिक्षुश्चत्वारो हंति दानतः दातारमन्नमात्मानं यस्मै वान्नं प्रयच्छति क्रतुः माधूकरं समाहृत्य ब्राह्मणेभ्यो
ददाति यः स याति नरकं विप्रो भोक्ता चांद्रायणं चरेत् कात्यायनः द्रव्यस्त्रीमांससंसर्गात् मधुमाद्विकलेहनात्तवि
चारस्य परित्यागाद्यतिः पतनमृच्छति विचारस्य वेदांतवाक्यविचारस्य व्यासः क्रोधलोभपरो नित्यं निद्रालस्यप
रस्तथा विषादी छायरा चैव श्रेयसो भ्रश्यते यतिः दक्षः पारिव्रज्यं गृहीत्वा तु यः स्वधर्मे न तिष्ठति श्वपादेनांकयित्वा
तं राजा शीघ्रं प्रवासयेत् जीवद्धं तैजसं पात्रं क्षौमं कौशं गैरिकं तांबरं निशान्नं च दिवा स्वप्नो यतीनां पतनानि षट् दासी
दासं गृहं यानं गोभूधान्यं धनं रसान् प्रतिगृह्य यतिर्ग्रामं हन्यात्कुलशतत्रयं कृष्णवस्त्रं च यानं च तांबूलं स्त्रियमेव च

Indira Gandhi National
Centre for the Arts

॥मो॰द॰५०॥ प्रतिगृह्य कुलं हन्यात् प्रतिगृह्णाति यस्य च पुष्पं ज्ञात्वा स्वापद्रवं वा फलमूलतृणादिकं भैक्षाचर्यकृतसंन्यासी नरके प
तति ध्रुवं यः स्वधर्मान् परित्यज्य यदन्यत् कुरुते द्विजः न तस्य निष्कृतिः कार्या स्वधर्मात् प्रच्युतो हि सः अंगिराः आ
६९ रूढपतितो हंति दत्तापूर्वान् दत्ती यरात्रानिस्तारयति तानेव यदि संन्यस्य कुव्यवस्थितः द्वे त्रे गावो हिरण्यं च यतेर्यस्य
परिग्रहः तादृशं कन्यकं दृष्ट्वा सचैलो जलमाविशेत् विधवां कंचुकोपेतां सधवां कंचुकं विना यतिं च कंचुकोपेतं दृ
ष्ट्वा चक्षुर्निमीलयेत् चत्वारि पतनीयानि यतीनां मनुरब्रवीत् औषधं संन्निधानं च पक्वान्नं कांस्यभोजनं एकान्नी द्वि
तीयैव भेषजी वस्तुसंग्रही चत्वारो नरकं यांति मनुः स्वायंभुवोब्रवीत् औषधं दत्तविक्रीतं वा पतनकराणं स्वय-
मौषधं न दत्तं स्यात् न्यनुज्ञातत्वात् संनिधानं स्त्रीणां एकान्नी एकगृहान्ना द्वितीयाः रहस्य मिष्टावान् भेषजी वैद्यः म
नुः न तापसैर्ब्राह्मणैर्वा वयोभिरथ वा श्वभिः आकीर्णं भिक्षुकैर्वान्यैरगारमुपसंविशेत् महाभारते आश्वमेधि
के संचयं अश्वन कुर्वीत स्नेहवासं च वर्जयेत् पूताभिरद्भिर्नित्यं वै कार्यं कुर्वीत मोक्षवित् उपस्पृशेदधृताभिरद्भिश्च
पुरुषः सदा तथा प्रसादाद्यादन्यन्न गृह्णीयात् कथंचन यावदाहारयेत्तावत् प्रतिगृह्णीत नाधिकं परेभ्यो न प्रतिग्रा ६९
ह्यं न च देयं कदाचन दैन्यभावाच्च भूतानां संविभज्य सदा द्विजः नाददीत परस्वानि न गृह्णीयादयाचितः न किंचिद्वि
षयं भुक्त्वा स्पृहयेत् तस्य वै पुनः न शिल्पजीविकां जीवेद्धिरण्यं नोत कामयेत् न द्वेष्टा नोपदेष्टा च भवेत निरुपस्कृतः

श्रद्धापूतानि भुंजीत निमित्तानि च वर्जयेत् आर्जवीर्युक्तानि कर्माणि हिंसायुक्तानि यानि च लोकसंग्रहधर्मं च नैव कु
र्यान्न कारयेत् सर्वभावान् अतिक्रम्य लघुमात्रः परिव्रजेत् समः सर्वेषु भूतेषु स्थावरेषु चरेषु च परं नोद्वेजयेत् किंचित्
न च कस्यचिदुद्विजेत् विश्वास्यः सर्वभूतानाम् अग्र्यो मोक्षविदुच्यते अनागतं न च ध्यायेत् नातीतमनुचिंतयेत्
वर्त्तमानमुपेक्षेत कालाकांक्षी समाहितः न चक्षुषा न मनसा न वाचा दूषयेत् क्वचित् न प्रत्यक्षं परोक्षं वा किंचिद्
दुष्टं समाचरेत् इंद्रियाण्युपसंहृत्य कूर्मोंगानीव सर्वशः क्षीणेंद्रियमनोबुद्धिर्निरीक्षेत निरिंद्रियः निर्द्वंद्वो निर्नमस्कारो
निःस्वाहाकार एव च निर्ममो निरहंकारो निर्योगक्षेम एव च निराशीः सर्वभूतेषु निरासंगो निराश्रयः सर्वज्ञः सर्वतो मु
क्तो मुच्यते नात्र संशयः निमित्तानि नैमित्तिकानि सीमंताद्युन्नोढानानि वर्जयेदित्यर्थः अत्रः श्लो॰ प्रथम प्रायश्चित्ता
नि वायुपुराणे व्रतानि यानि भिक्षूणां तथैवोपव्रतानि च एकैकापक्रमे तेषां प्रायश्चित्तं विधीयते उपेत्य तु स्त्रियं कामा
त् प्रायश्चित्तं विनिर्दिशेत् प्राणायामसमायुक्तं कुर्यात्सांतपनं तथा ततश्चरति निर्देशात् कृच्छ्रस्यांते समाहितः पुनरा
श्रममागम्य चरेद्भिक्षुरतंद्रितः स्त्रीभिः सह नर्मयुक्तमविवचनं न युक्तमिति तत्रैवोक्तं न नर्मयुक्तं वचनं हिनस्तीति मनी
षिणः तथापि च न कर्त्तव्यं प्रसंगो ह्येष दारुणः दत्तात्रेयः प्राणायामशतैर्युक्तं कृच्छ्रमब्दं समाचरेत् तथैव च पुनःश्रा
तः कुर्यात्सांतपनव्रतं ततश्चरित निर्दिष्टकृच्छ्रस्यांते समाहितः ततश्चाश्रममागत्य चरेद्भिक्षुरतंद्रितः पराकं चि

Indira Gandhi National
Centre for the Arts

॥ मो॰ ७० ॥ कलत्रं च सकृद्गत्वा स्त्रियं चरेत् इदं पूर्वोक्तं वायुपुराणीयप्रायश्चित्तेन सह विकल्पते अभ्यासे तु गृहस्थस्य य
७० तिश्चैव स्वंडितो यदि कामतः पराकत्रयसंयुक्तमवकीर्णिव्रतं चरेत् इच्छयावलोकने दत्तात्रेयः इच्छया यदि तां
यत्नः येत्प्राणायामांस्तु षोडश रेतस्खलने प्रायश्चित्तमाह देवलः रेतस्कन्ने तु दुर्बलत्वात् प्राणायामांस्तु षोडश
रेतसेकं तु विनिद्रस्तु मोहात कुर्यात्तु कामतः प्राजापत्यत्रयं कृत्वा प्राणायामशतं चरेत् स्त्रियं दृष्ट्वा यदा स्वप्ने रेतः क्ष
रति वै क्वचित् स वासा स्नुत्य शुध्यर्थं कुर्यात् षोडश संममान् रात्रिञ्जोषे यदा स्वप्ने रेतो मूत्रमवासृजेत स्नानं कृत्वा
विशुध्येत षोडश प्राणसंयमैः पुनः प्रसंगे कृत तस्य द्विगुणं तु विधीयते स्कन्ने ज्ञाते तु सुप्तश्चेद् यवासस्तदा भवेत्
निद्रास्कन्ने यदुक्तं स्यात् दिवा तद्विगुणं भवेत् रात्रौ तु द्वारणे स्नात्वा द्वादशैव तु धारयेत् स्वप्नसेके प्रबुद्धश्चेत् द्वाद
शान्निर्यतिः शौचं कृत्वा विशुध्येत षोडश प्राणसंयमैः उपवासं यतिः कुर्यात् पुनस्तु द्वारते यदि प्राणायामैर्विशुद्धात्मा
विरजा जायते पुनः पुनरिति पुनः द्वारणे प्राणायामास्त्रयः कपिंजलाधिकरणन्यायेन आलिंगनादि पुरस्कन्ने
वियोगे चेन्द्रिये यदा कुर्याद्द्वैनजपेद्द्वन्दं ततः शुद्धिमियाद्यतिः कपिलः पूर्वसंयोगं न स्मरेत् प्रमादात्स्मरणे आच ७०
म्य प्राणायामशतं कृत्वा पुनराचमेत् स्वप्ने संयोगे स्नात्वा त्रिकसहस्रं जपेत् कंडूयन द्वारणे उपवासः चितिते त्रि
रात्रं सकृत संगमने द्वादशरात्रमुपवसेत् त्रिलक्षं जपेदभ्यासे सकृदंत्यजागमने वायुपुराणेपि स्कन्दे देदिं द्रिय दौ

र्बल्यात् स्त्रियं दृष्ट्वा यतिर्यदि तेन धारयितव्या वै प्राणायामास्तु षोडशादिवा स्कन्नस्य विप्रस्य प्रायश्चित्तं विधीयते त्रि
रात्रमुपवासश्च प्राणायामशतं तथा रात्रौ स्कन्नः शुचिः स्नातो द्वादशैव तु धारणा प्राणायामेन शुद्धात्मा विरजा जा
यते द्विजः दंडं विना भिक्षाग्रहणे प्रायश्चित्तमाह जमदग्निः विहाय दंडं गृह्णानो द्वादशैव तु धारयेत् बहिर्दंडं प्रतिष्ठा
प्य गृह्णानः षोडशैव तु भिक्षामिति शेषः वायुपुराणे एकान्नं मधुमांसं वा ह्यामश्राद्धं तथैव च अभोज्यानि यतीनां च प्रत्य
क्षलवणानि च एकैकाणे एकान्नं मधुमांसं वा ह्यामश्राद्धं तथैव च अभोज्यानि यतीनां च प्रत्यक्षलवणानि च ऐं ति
क्रमे तेषां प्रायश्चित्तं विधीयते प्राजापत्येन कृच्छ्रेण ततः पापात्प्रमुच्यते अत्रिः नैकं च परपाकान्नं संमिश्रं यो भि वै
यतिः त्रिरात्रोपोषितो भूत्वा प्राणायामशतं चरेत् यमः यदि पर्युषितं भैक्षमद्याद्भिक्षुः कथंचन तदा चांद्रायणं कुर्या
त्पतिः शुध्यर्थमात्मनः भिक्षुर्हि भोजनं कुर्याद्वक दाचित् ज्ञान दुर्बलः स्वस्थावस्थो यदा लौल्यात्तदा चांद्रायणं च
रेत् यमः आखुं जंबुकमार्जारखरकाकोष्ट्रशूकरान् क्रोडवानरं तं श्यां च नरास्थि ग्रामकुक्कुटान् नकुलं मद्यमां
डं च यूपकाष्ठं विधर्मिणं अपविघमसन्मार्गं चितिकाष्ठं चितिं तथा वसनं नीलिकारक्तं धर्मभेत्तारमेव च अमेध्यनिव
ये खड्गं सष्ट्वा देवकं यतिः स्पृष्ट्वा पापं त्र्यहं वै देशेषु नंगवेजलाशयं शौचं कृत्वा यथान्यायं क्षालयेत्तु मृदांभ
सा यदेवोपहतं त्वंगं मृद्भिर्द्वादशभिर्यतिः निमज्य तु ततस्तोये कुर्यादाचमनं यतिः प्राणायामत्रयं कृत्वा त्रिर्जपेद

Indira Gandhi National
Centre for the Arts

॥मो॰ध॰॥
७१

घमर्षणं अंतर्जले यथान्यायं शुद्ध्यर्थं योगदीक्षितः भैक्षाधारं समादाय त्रिवेणेनाभ्युद्य वारिणा निमज्य च ततस्तोये
शुद्ध्यर्थं करयोस्तदा एतदेवाह संस्पृष्टान्भिक्षान्भिक्षोर्विशुध्यति यदा पात्रं न संलग्नं तदा शुध्यति नान्यथा संलग्ने
तस्य पात्रे तु सद्यस्तत्त्यागो विधीयते सव्यहस्तेन केवलेनेत्यर्थः ताम्बूलाभ्यंजनं चैव कांस्यपात्रे तु भोजनं कृत्वा चो
यवसे भिक्षुस्त्रःगंधादिविभूषणं धृत्वेति शेषः आहारग्रहणे रात्रौ प्राणायामाद्दश स्मृताः जलग्रहणे रात्रौ प्राणा
यामाद्दश स्मृताः भुक्त्वा शेषं न कुर्वीत प्रमादात्कुरुते यदि प्रतिग्रासं तदा कुर्यात्त्रीस्त्रीन्प्राणायामान्यतिः वि
शीर्णं च सलेपं च पात्रं सोपहतं यदा तत्र मोहाद्यतिर्भुक्ते चरेदिंद्रव्रतं सकृत् देवलः दृष्टं चूर्णघ्रया खंडै कुद्यादिभि
रुदक्यया श्वषंडकाककचांडालैरन्यैरंत्यावसायिभिः एतान्यन्नयन्न भुंजीत भुक्त्वा चांद्रायणं चरेत् एतैर्दृष्टं मन्नं न
भुंजीत एतान्यन्नयन्नपि न भुंजीतेत्यर्थः पतितान्नं सकृद्भुक्त्वा प्रायश्चित्ती भवेद्यतिः तप्तकृच्छ्रत्रयं कृत्वा शुध्यते ना
त्र संशयः त्र्यानहो दिनाभिक्षाटने प्रायश्चित्तमाह यमः त्र्यानहो दिनाभिक्षुः कृत्वाभिक्षाटनादिकं मार्गे मूत्रादिसंकी
र्णे सम्यक्स्नानेन शुध्यति अज्ञानाद्यामवेद्धिंसा यतेर्भिक्षाटने क्वचित् प्राणायामत्रयं कुर्यान्नियाचम्य विशुध्यति ७१
स्वस्थावस्थो यदा भुंक्ते पुनराहत्य तद्दिने अन्यग्रामे थवा तस्मिन्तप्तकृच्छ्रं समाचरेत् यदा ग्रामद्वये भिक्षुश्चरेद्भि
क्षां प्रमादतः धर्मध्वकुत्रालोलुपस्तदा चांद्रायणं चरेत् अशक्तः प्राणरक्षार्थं पुनर्मूलफलादिकं भक्षयन्नैव दु

---

ष्येत भैक्षं दंतधावनं यथा न पीड्यते कायो नैवांतकवशं नयेत् तथा धर्मं चरेद्भिक्षुः यत्नेनैवं स्वस्वदक्षया स्वस्था
वस्थस्य पुनर्भोजने निषिद्धेपि अशक्तस्य पुनर्मूलफलभोजनेन दोषः ततोप्यशक्तस्य सायंप्रातर्न तिष्ठेत्येतद्द्वय
भोजनद्वयमभ्यनुज्ञातमिति तात्पर्यं पक्वान्नं मधु मांसं च अत्रं विष्टादिदूषितं हंतकारं च नैवेद्यं पत्यक्षलवणं
तथा एतद्भुक्त्वा यतिर्मोहात्प्राजापत्यं समाचरेत् यत्यन्नं यतिपात्रस्थं यतिना प्रेरितं च यत् अन्नत्रयं न भोक्तव्यं भुक्त्वा ।
चांद्रायणं चरेत् अत्रिः ज्ञातीनां तु कुले भिक्षुर्न भिक्षेत कथंचन आचरेत्तु यदा भिक्षां तदा चांद्रायणं चरेत् इदं
तु कुटीचकादिव्यतिरिक्तविषयं कुटीचकस्य तु भिक्षां बंधुभ्य आददीतेति बंधुभ्य एव भिक्षोपादानस्य विहितत्वा
त् अत्रिः प्राणायामशतं कुर्याद्भुक्त्वा शूद्रान्नमापदि अत्रापदि शूद्रान्नभोजनस्य अन्नं शूद्रादपि ग्राह्यं प्राणरक्षा
विजानतेति वाक्येनाभ्यनुज्ञातत्वेन प्राणायामशतस्य नैमित्तिकत्वमिति केचित् अन्ये तु शूद्रान्नभोजनस्याभ्यनु
ज्ञातत्वेनाल्पदोषत्वेन तत्परिहारार्थं तैवास्य प्राणायामशतस्येति प्रायश्चित्तरूपतामाहुः अत्रिः सगोत्रमसगोत्रं वा
यद्गृहे सूतकं भवेत् न तावच्छुध्यते भूमिर्यावन्न स्यादनिर्दशा भिक्षुर्नैव च भिक्षेत भिक्षेच्चांद्रायणं चरेत् सगोत्रं गृ
हस्वामिगोत्रं असगोत्रं कन्यागोत्रं निषिद्धान्नं यदा कश्चीयादनुज्ञा यत्र नास्ति वै अतिकृच्छ्रं तदा भिक्षुः कुर्याच्छुध्यर्थ
मात्मनः निषिद्धान्नं अभिशस्तपतिताद्यन्नं शूद्रान्नस्याभ्यनुज्ञातत्वात् जमदग्निर्गंधं घ्रात्वा सुरायाश्च तथामूत्रपु

Indira Gandhi National
Centre for the Arts

॥मोह्वाप्र॥ रीषयोः क्रव्यादपूतिगंधं च प्राणायामो विधीयते उद्धृत्य वामहस्तेन भाजनं योन्नमश्निवै गृध्रोच्छिष्टं तु तच्छेयं
भुक्त्वा चांद्रायणं चरेत् भुंजानस्य यदा विप्रोः कदाचिच्च्यवते गुदं अन्नं चास्य गतं त्यक्त्वा कृत्वा शौचं समाहितः स्ना
७२ नं कृत्वा यथान्यायं त्रिः प्राणायामांश्चरेत् अहोरात्रोषितो भूत्वा पंचगव्यं पिबेत्ततः आश्वलायनः विनांगुष्ठेन
नाश्नीयात् न लिहेच्छिद्रहस्याकरं अश्नन् यदि लिहेद्धस्तं तदा चांद्रायणं चरेत् विश्वामित्रः मत्स्यमांसादिबहुलं
यद्गेहे पच्यते नित्यं तद्गृहं वर्जयेद्विप्रो यदि विद्वांसमाचरेत् द्वादशप्रयमान् कृत्वा ततः पापात्प्रमुच्यते प्रयमाः
प्राणायामाः मृद्भस्मोदकमन्नं वाऽभोज्यान्नाददेद्यतिः आददानः प्रमादेन प्रायश्चित्तं समाचरेत् त्रिंशत्प्राणा
यामान् कृत्वा जपेत्त्रिकशतत्रयं अज्ञानादर्द्धमेवैतत्प्रायश्चित्तं विधीयते अभ्यासादधिकं किंचिद्वर्द्धते दिनसं
ख्यया इदं तत्प्रायश्चित्तमात्रे विश्वामित्रः एकान्नं तु त्र्यहं भुक्त्वा निरंतरमनापदि प्राणायामशतं कुर्याच्छुध्यं
र्थं यतिरात्मवान् एकान्नं एकस्यैव गृहस्थस्यान्नं हिंसायां प्रायश्चित्तमुक्तं वायुपुराणे अहिंसा सर्वभूतानां-
कर्मणा मनसा गिरा अकामादपि हिंसेत यदि भिक्षुः पशून्मृगान् कृच्छ्रातिकृच्छ्रं कुर्वीत चांद्रायणमथापि ७२
वा विशेषमाह जमदग्निः कृकलासे शशे चैव मंडूकगृहगोधिके कुक्कुटादिषु भूतेषु दशाहं त्वार्द्रभोजनं मा
जरिमूषिके सर्पे स्थूलमत्स्येषु पक्षिषु नकुलादिषु भूतेषु चरेच्चांद्रायणव्रतं पिपीलिकायां सूक्ष्मायां प्राणा-

यामास्त्रयस्त्रयः एतेषु हतेष्विति शेषः यूकायां मत्कुणानां च मशके पंच निर्दिशेत् एतेषां वधे पंच प्राणायामा इति
शेषः मूलांकुरेषु भग्नेषु पुष्पेषु च फलेषु च स्थावराणां चोपमर्द्दे प्राणायामास्त्रयस्त्रयः धान्यं हद्वेल्लतां यस्तस्था
वरं जंगमं तथा उत्पाटयति मूढात्मा अवीचीनरकं व्रजेत् अवीचिनरकपातपरिहारार्थं पूर्वोक्ताः त्रयः प्राणा
यामाः प्रायश्चित्तमिति तात्पर्यं अज्ञानतः प्राणिवधे प्रायश्चित्तमुक्तं मनुना अह्ना रात्र्या च यान् जंतून् हिनस्त्यज्ञा
नतो यतिः तेषां स्नात्वा विशुध्यर्थं प्राणायामान् षडाचरेत् यमः दशद्वादशविंशाख्यांचतुर्विंशतिमेव वा प्राणा
यानभ्यसेच्चलघ्वाहारो जितेंद्रियः अहोरात्रेण विसानाज्जंतून् हिंस्याद्यदा मुनिः प्राणायामान् दशष्टौ वा प्राय
श्चित्तं विधीयते स्वयंपाके प्रायश्चित्तमाह स एव कणयिण्याकतक्रं वा शाकं मूलफलादिकं पक्वं वाथ अथवापा-
कं पचन् ज्ञानतो यतिः आचरेत्त्रीणि कृच्छ्राणि प्राकृतान्येव शुद्धये अभ्यासाद्बुद्धिपूर्वं हि पाकदोषान्न मुच्यते
स्पर्शदोषे प्रायश्चित्तमुक्तं दक्षेण परिशिष्टे स्वर्णं रजतं ताम्रं तैजसं यच्च किंचन स्पृष्ट्वा परिव्राट् शूद्रं च सवासा
जलमाविशेत् द्रव्यं तु मुदितं स्पृष्ट्वा त्रिरात्रेण शुचिर्भवेत् दंशे प्रायश्चित्तमाहात्रिः श्वखरोष्ट्रजंबुकैर्दष्टो नरवा
नरासभैः क्रव्यादैर्दंष्ट्रिभिश्चान्यैः प्रायश्चित्तं यतिश्चरेत् स्नात्वा स्मृत्वा हरिं कुर्याद्द्वादशप्राणसंयमान् स्वशरीरे-
स्वयमेव रुधिरोत्पादने प्रायश्चित्तमाहात्रिः स्वकायेस्त्वयमुत्पाद्य शोणितं वै यतिः क्वचित् प्राणायामत्रयं कृत्वा

Indira Gandhi National Centre for the Arts

॥मोक्ष०॥ तथाचमन्यविशुध्यति स्वशरीरव्रणे कृम्युत्पत्तौ प्रायश्चित्तमाह देवलः व्रणे तु कृमिसंभूतौ नद्याणे मधुमांसयोः
७३ उपवासत्रयं कृत्वा प्राणायामशतं चरेत् मस्तके कृम्युत्पत्तौ यूकायां जातसंभूतौ उपवासं समाचरेत् तांबूलभ
क्षणेऽन्यं गेकांस्यपात्रे च भोजने एकैकातिक्रमे तेषां प्राणायामशतं चरेत् वर्षास्वसति बाधके पर्यटने प्रा-
यश्चित्तमाह हारीतः वर्षाकाले विना यस्त्वारण्यं संत्यजेद्यदि कृच्छ्रार्धं तु यतिः कुर्यात्स्वकृच्छ्रं व्रतसंयमान्व
तिक्रांतं चरेत् कृच्छ्रं लोभमोहादिना त्यजन् आरण्यमित्यनुषंगः दंडविवागमने प्रायश्चित्तमाह देवलः अदं-
डो न गृहं गच्छेदि शुद्धे पवित्रकाहने यदि गच्छेत्यति गृहं प्राणायामत्रयं चरेत् पुत्रमित्रादिसंभाषणे प्रायश्चित्त
माह सत्यकामः दंडग्रहणं कृत्वा पुत्रमित्रादिसंभाषणं न कुर्यात् अज्ञानात्कृसंभाषणं कृत्वा प्रायश्चित्तेन यु-
ज्यते उपवासमेकं कृत्वा प्राणायामशतं चरेत् तद्गृहं गच्छति स्वाधीनं करोति भिक्षां गृह्णाति प्राजापत्यव्रतं कृ
त्वा प्राणायामशतं चरेत् तं दृष्ट्वा डरवं कुर्वन्न स्नुयात यन्प्रायश्चित्तेन युज्यते उपवासं चयं कृत्वा प्राणाया
मशतं चरेत तत्गृहं पुत्रादि गृहं तं पुत्रादिकं इदं कुटीचकारि रिक्तमित्युक्तं अत्रिः यदि कश्चित्प्रमादेन दिवा ७३
स्नानं समाचरेत् स्वानपानादिकं कर्म प्राजापत्यं समाचरेत् इति संध्यातिक्रमणे भिक्षुप्रायश्चित्तं समाचरेत जये
ष्टत्रिक सहस्रं च प्राणायामां श्वपीडजा सुवर्णादिग्रहणे प्रायश्चित्तमाहात्रिः तिलधान्यसुवर्णानि गोभूयानगृहा

दिकं दासीदासं रसं गंधं याचिता याचितं तु यत् हृदिस्तोकं पुरा कृत्वा तत्सर्वं तु परित्यजेत् संत्यज्य सर्वं तद्द्रव्यं
चरेच्चांद्रायणं यतिः प्रहीणं तु यदा दद्यात् तिस्तिलकुशादिकं प्रतिग्रहेत्तदन्नं भौचरेत्कृच्छ्रं जपेत्त्रिकं — व्यादानं
यतिर्यो वै करोति च नराधमः पच्यते नरके घोरे यावदाभूतसंप्लवे अद्वैताश्रममाश्रित्य द्वैताचारेण वर्तते रुदंति पि
तरस्तस्य हा कष्टं पतितं पुनः लब्धुं द्रव्यं परित्यज्य उपवासत्रयं चरेत् प्राणायामशतं कृत्वा त्वपुतं जपमाचरेत् इ-
दं तु प्रायश्चित्तं द्रव्यादानैर्द्वैतवादे च द्रष्टव्यं यानारोहणे प्रायश्चित्तमा[illegible] स एव मममर्थत्रिविक्रमश्च गजं हयमेव
च शकटं वा रथं वापि समारुह्य च कामतः व्रतं सांतपनं कुर्यात् प्राणायामास्तु कामतः स्वयंपाके पाचने च प्रायश्चि
त्तमाह स एव स्वयं पक्त्वा तु यो भुंक्ते तस्य सांतपनत्रयं पाचयित्वा तु यो भुंक्ते तस्य कृच्छ्रं विधीयते मार्कंडेयपुराणे
मूत्रोच्चारं तु यः कृत्वा अकृत्वा शौचमात्मनः मोहाद्भुक्त्वा त्रिरात्रं स गव्यं पीत्वा विशुध्यति गव्यं घृतं मूत्रं कृत्वा व
जेन्मार्गे स्मृति चं शाश्वत्जलं पिबेत् उपोष्य रजनीमेकां पंचगव्येन शुध्यति दत्तात्रेयः क्षौरं मे दूषदेशे तु कृत्वा कृच्छ्रं समा
चरेत् प्राणायामशतं कृत्वा तस्माद्भिक्षुर्विशुध्यति इदं तु कक्षोपस्थशिखावर्जं ऋतुसंधिषु वापयेदिति निषिद्धस्थो
पस्थमुंडनस्यानुष्ठाने प्रायश्चित्तं ऋतुः तांबूलभक्षणेऽन्यं गेकांस्यपात्रे भुक्तौ भोजने एकैकातिक्रमे तेषां प्राणायामाद
शस्मृताः दंडात्मनोरंतरेऽन्येषां गमने प्रायश्चित्तमाह सत्यकामः स्त्रीशूद्रयोर्दंडांतेषां प्राणायामा दशस्मृताः दंडा

Indira Gandhi National Centre for the Arts

॥मो०प्र०॥

७४

त्मनो रंतरेऽन्येषां गमने प्रायश्चित्तमाह सत्यकामः स्त्रीशूद्रयोर्दंडांतरगमने प्राणायामांस्त्रीन् करोति श्वखरोष्ट्रांत
रगमने प्राणायामान् षडाचरेत् श्वशूकरचांडालांतरगमने प्राणायामान् द्वादश वायुपुराणे अदंडो नैव तिष्ठेत यतिः
कुत्रचिदात्मवान् यदि तिष्ठेत्त्रिदिनं प्राणायामशतं चरेत् दंडात्मनोस्तु चांडालव्यवधानेन भिक्षुकः प्राणायामशतं
कुर्यात्मात्रान्नेदेत तथैव च शूद्रेण व्यवधाने तु प्राणायामांस्तु षोडश द्वादशाष्टौ च चत्वारि विट्क्षत्रियद्विजोत्तमैः दंडा
त्मनोर्मध्ये चंडालादिभिर्व्यवधाने इदं प्रायश्चित्तमित्यर्थः प्रातःस्नानाद्यकरणे प्रायश्चित्तमुक्तं तत्रैव प्रातःस्नानं
विना कामात्प्राणायामशतं चरेत् त्र्यहमेव तु सायाह्ने मध्याह्ने तु सहस्रकं प्रेतश्राद्धे यतिर्भुक्त्वा चरेच्चांद्रायणत्रयं पित
स्थानं विनान्यत्र पाद्यं भुक्त्वा तदेव तु श्राद्धदिने विना श्राद्धं भुक्त्वा सांतपनं चरेत् श्राद्धशेषं भुक्त्वेदं प्रायश्चित्तमित्यर्थः
उपपातके प्रायश्चित्तमाह बागलेयः उपपातकिनो भिक्षोर्लघ्वाहारो जपस्तपः मौनं कालत्रये स्नानं विहिता निविशे
षतः सहस्राणि यमान् कुर्यात्प्रणवस्यायुतं जपेत् अरण्ये व्रतमेतत्तु कृत्वा भिक्षुर्विशुध्यति इदं च यस्मिन्नुपपात
के विशेषतः प्रायश्चित्तमनाम्नातं तत्रैव एवमग्रेपि महापातकमाह स एव महापातकजाद्दोषाच्चतुर्थतु सदाय ७४
तिः त्रिकालं स्नान जयेद्योगी प्राणायामायुतं तथा ततः शतसहस्रं तु प्रणवानां जपेद्यतिः सामान्यप्रायश्चित्तमाह तु हा
रीतः यश्नौ चाकृषे दश कुर्वीत वाच्ये विंशतिमेव च मानसे त्रिशतं चापि पातके प्राणसंयमान् वाक्कषे वाचिकादिसम

निव्याहारात्कायिक इत्यर्थः व्रतलोपे सामान्यतः प्रायश्चित्तमाह बागलेयः व्रतानि यानि भिक्षूणां तथैवोपव्रतानि
च एकैकातिक्रमे तेषां प्रायश्चित्तं विधीयते अहोरात्रोषितो भूत्वा ननु प्रायश्चित्तप्रकाशोक्तैः प्रायश्चित्तैर्यतिपुर
स्कारेण विहिते श्वन्नुध्यते किं वैकैकेन नाद्यः एकस्मिन्निमित्ते एकैकस्य निरयेद्दस्यैव निरासकत्वादगमे समुच्च
यासंभवाद्विकल्प एव न चान्यमहत्तरयोरतुल्यत्वान्न विकल्प इति वाच्यं यथैकस्मिन्नेव पातके रहस्यत्वकृतप्राय
श्चित्तान्यत्वं तथैव यतिकृतत्वकृतप्रायश्चित्तान्यत्वसंभवात् न द्वितीयः प्रायश्चित्तप्रकाशे गृहस्थशौचाद्येद्वया
यतीनां च चतुर्गुणमित्यनेन यतीनां चतुर्गुणं शौचं विधाय शौचवच्छुद्धिरेतेषामिति चतुर्गुणप्रायश्चित्तस्य यतिपुर
स्कारेण विविधानात्तुल्यत्वासंभवादिति चेत् उच्यते यतिपुरस्कारेण विहितप्रायश्चित्तचातुर्गुण्यस्य विषयविशेष
विहितप्रायश्चित्तातिरिक्तविषयत्वं यत्किंचित्प्राचीनमग्नीषोमीयात्तेनोपांशु चरंतीत्यस्य सावकाशस्य यावत्या
वाचा कामयीत तावत्यादीक्षणीयायामनुब्रूयादिति निरवकाशातिरिक्तविषयत्वमिव कल्प्यते चातुर्गुण्यमपि तीर्थया
त्रोपवासप्राणायामकल्पनयैव न तु होमब्राह्मणभोजनादिना स्वाहास्वधावषट्कारादीनां दानादीनां च निषेधात्
इदं तु यतिप्रायश्चित्तं वपनं विनैवेति सांप्रदायिकीः तेषामयमाशयः ऋतुसंधिषु वापयेदित्यत्र न तावदपूर्वविधिः वपन
स्य मुंडोममोपरिग्रह इति वसिष्ठवचनेन प्राप्तत्वात् न च तत्रैव वपनानुवादेन ऋतुसंधिरूपकालो पूर्वविधि

Indira Gandhi National
Centre for the Arts

धि: तस्याप्यपक्षेप्राप्तत्वात् नवतत्रैवनियमविधिः तथाच्च यदिवपनंकुर्यात्तदाऋतुसंधिष्वितिवचनन्यक्तौवपनाक
रणेप्रत्यवायाभावात्शिष्टाचारविरोधः नचवापयेदेवेतिनियमः अन्यदापिनापनेनदोषइतिशिष्टाचाराख्याहतिः त
स्माहृतुसंधिष्वेवेतिपरिसंख्यैवयुक्ता। अतएवप्रयागादावपियतीनामन्यकालेनवापनमितिविस्थलीसेतुकृतःनत
द्युक्तं परिसंख्यायामपिऋतुसंधावपिवपनावश्यकत्वाभावात् शिष्टाचारविरोधः किंचैवंपक्षेपक्षेतुयज्वनामित्यत्रापि
परिसंख्यायांप्रायश्चित्तप्रयागादिषुमुंडनाभावप्रतिवंदीडरूहरा वस्तुतस्तु ऋतुसंधौवापयेदित्युक्तयत्रापिस्वा
ध्यायोध्येतव्य इत्यत्राधीतेनैवस्वाध्यायेनैवार्थज्ञानंभावयेदितिवन्नियमविधिः तेनान्यकालस्यावपनस्यचार्थान्निवृत्ति
रितिनकोपिशिष्टाचारविरोधःयज्वनांचपर्वणिवपनस्यकृत्वर्थतयाप्रयागप्रायश्चित्तादौनैमित्तिकेवपनेनकोपि।
विरोधः मुंडोममोपरिग्रहइतिविहितमुंडत्वानुवादेनऋतुसंधिष्वितिविधानात्सामान्यतःप्राप्तं प्रयागादावपिमुंडनं
नचत्यैवेतितत्वं एकस्मिन्निमित्तेलघुगुरुप्रायश्चित्तद्वयविधीनेतुकामाकामकृतत्वविषयत्वेनव्यवस्था इदंस
र्वंब्रह्मसाक्षात्कारपर्यंतं विद्वत्स्तुनकिंचिमकर्त्तव्यमस्तिकृतकृत्यस्ययोगिनःनैवास्तिकिंचित्कर्त्तव्यमित्युक्तत्वात्
अथाभ्यागतनमस्कारः तत्रसंप्रदायविदः अभ्यागतेयतौस्थायीयतिलिंगेनशिष्टंविज्ञायास्योत्थितोभूत्वावामव
स्त्रादिसंयुतः चात्कर्मास्यकिंयदितिपृष्टातेनोत्तरेकृते अभ्यागतोपदिज्येष्टस्तस्यैनस्त्वामिसंयुतःतस्यदंडमधोभू।

त्वा तेनत्यक्तंयथाविधि योग्यदेशेषुस्तंस्थाप्यतस्मैआसनमादरात् दत्वोपविष्टेतस्मिन्गुरुडासनमास्थितःतदनुज्ञां
गृहीत्वाथपंचांगगतिपूर्वकं अभ्यागतिप्रयुक्तंतत्पदग्रहणमादरात् यथोपदेशंकृत्वासतत्पादौमूर्ध्निधारयेत् आघा
यदक्षिणंसेतुधारयित्वाततः सुधीः गुरुडासनआसीनोजोडिकाधीतपूर्वक अनुज्ञयास्यपंचांगनमस्कारपुरःसरं
गृहीत्वापूर्वत्पादावस्यांष्टांगनमस्क्रिया तदनुज्ञानुसारेणविपद्वादशसंख्यया जोटिमादायविधिवत्कर्णयोर्हरिये
त्पुनःविधायैकंनमस्कारंतांगृहीत्वायथाविधि पंचांगेनप्रणम्याथगरुडासनमास्थितःक्षमापय्ययथादेशंशौचंपर्यंक
माचरेत पर्यंकशौचंवदत्यते अभ्यागतेज्येष्टेकनिष्टस्यायंनमस्कारविधिःअभ्यागतेकनिष्टेज्येष्टस्यविधिमाङ्स्तएवअ
भ्यागतः तेज्येष्टे कनिष्टस्मायंनमस्कारविधिः अभ्यागतेकनिष्टेज्येष्टस्यविधिमाङ्स्तएव अभ्यागतःकनिष्टश्चेतेना।
स्याथाभिवंदितः गृहीत्वातस्यदंडाग्रंपूर्ववत्स्थापयेत्ततः स्थायीस्वासनआसीनशिष्यद्वारासनेकृचितस्मैदद्यात्ततस्त
त्रभूम्यांधिष्ठाय अभ्यागतेनार्द्रमुक्तकदिवस्त्राग्रसंयुतांद्विगुणीकृतवस्त्रंताचूर्वोरुपनिधायच यथोपदेशंपंचांगनमस्का
रेकृतेसति उत्थायतस्यस्कंधादिग्रहणविधिनाचरन् स्वासनेसंविशेन्नूयसउत्थायद्वितीयकं वस्त्रंनिक्षिप्यवस्त्रेणस
म्यकयुक्तेनसंयुतः अभिवंद्योपविशत्यान्नगरु डासनपूर्वकं प्रणमदिद्यथापूर्वंकृत्वागसडआसने उपविश्यांजलिंकृ
त्वाभक्तियुक्तोभवेत्तदा स्थायीतुस्वसमीपेतंस्थापयित्वाकरवासनेअभ्यागतिप्रयुक्तंतत्पादग्रहणमादरात् कारयेत्स

Indira Gandhi National
Centre for the Arts

॥ मोक्ष१०॥ समीपस्थे स्तत्कनिशैर्यथाविधि जोटीनमस्कृतितद्वत्पर्यकंशौचमथथ तद्दिनेतस्यभिक्षादियथाशक्तिविचारयेत
७६ त् पर्यंकशौचंत्वेवंपठंति मृद्भिनागंविभज्याथगरुडासनमास्थितः पादयोस्तमृदः पंचचतस्रस्तिस्रएवच द्वेचैकांचमृ
दंदद्याच्छौचेपर्यंकसंज्ञके अयमेवनमस्कारः पर्वण्यपि तत्रा न्यनुज्ञापंविशेषः पर्वनमस्कारेति आतुरनमस्कारनि
षेधमाहाश्विः आतुरंननमेदातुरोननमेदिति इतिनमस्कारविधिः अथयोगपट्टविधिब्रह्मचर्यममानित्वमहिंसासत्यमा
र्जवं वेदांतश्रवणंध्याननिष्ठोः कार्याणिनित्यशाइतिवेदांतश्रवणस्य स गुरुमेवाभिगच्छेदितिगुरोः सकाशात्कृत
स्यपूर्णतायांयोगपट्टविधिमाह : संप्रदायविदः अधीतविद्यःसन्यस्थेद्दद्यात्तोगपटंगुरुः पादौमृदाद्भिः प्रक्षाल्या
पाडुकाभ्यांगृहंव्रजेत् द्विगुणंकटिसूत्रंचबध्वावासोवगुंठ्यच उच्चासनेप्रकल्प्योपविशेच्चाज्ञयागुरोः सन्यादिष्टमु
पन्यस्यवेदांतेकिंचिदेवतु गुरुणाविधिवन्यासपूर्वशंखाभिषेचनं वासोमात्रादिकंदत्वा गुरुणायतिभिः सहततोना
मप्रकर्तव्यंगुरुणासर्वसंमतं तीर्थाश्रमवनारण्यगिरिपर्वतसागराः सरस्वतीभारतीचपुरीनामयतेर्दश श्रीपादसंज्ञया
वाच्यंनामतस्ययथातथा अधारन्यत्वपाकार्यदीक्षाव्याख्यादिकंतथा योगपट्टोविदातव्यःशिष्येसम्यक्परीक्षितेइ ७६
त्याज्ञांगुरुणादत्तांगृहीत्वाशिरसास्वयंउस्थायचततः सम्यक्कुर्यात्पादग्रतरं बौधायनशौनकौ यतीनांप्रेतसंस्का
रविधिंव्याख्यास्यामः गृहस्थस्नात्वानुहात्माविशेषतोगंधपुष्पादिभिरलंकृत्यशिक्यैशरीरमारोप्यघोषितजयशब्दै

नेरीणंखैरपिग्रामात्प्राचीमुदीचींचगत्वाशुद्धदेशंसमभ्युक्षेत् नदीतीरेवास्यवृक्षस्यवाधस्ताद्देवयजनंदंडायाम
प्रमाणंखात्वालवणंप्रसिच्यदर्भांस्तीर्यगायत्र्याशरीरंप्रक्षाल्यपुरुषसूक्तेनस्नापयित्वागंधाद्यैरलंकृत्यविश्लोहव्यं
रक्षस्वेतिशरीरंनिधायइदंविष्णुर्विचक्रमइतिदक्षिणहस्तेदंडंमत्त्वानिधायहंसशुचिषदितिहृदयदेशेजपयेत ब्रह्मज
ज्ञानमितिमूर्द्धदेशेजपयेत पुरुषसूक्तेनचक्षुवोर्मध्येजपेत मपूर्वाहृनिनिर्वापणेनवादेवयजनंपूरयेत अग्निनाग्निः
समिध्यतइत्यनुमंत्रयेत् नतत्रशेषसंस्कारोनाशौचंनोदकक्रिया तस्माद्भूमिखनंखात्वाभृदाचाछादयेत्क्रांस
र्वसंगनिवृत्तस्यध्यानयोगरतस्यच नतस्यदहनंकार्यंनाशौचंनोदकक्रियानिदध्यात्प्रणवेनैवबिलेभिक्षोकलेवरं
प्रोक्षणंखननंचैवसर्वंतेनैवकारयेत एकोदिष्टंजलंपिंडंनाशौचंनोदकक्रिया नकुर्यात्पार्वणादन्यत्ब्रह्मीभूताययति
नवेत्र स्नीभूतस्यतुपतेनदाहाद्याः कर्मचन प्रजायते : सपिंडीकरणंनस्याद्यतीनांचैवसर्वदा अहन्येकादशेप्राप्तेपार्व
णंतुविधीयते अस्नीभूतेत्यनेनैकवाक्यतयायतीनामितियरः महंसस्यग्रहणं कुटीचकादेरचास्वविदस्तुदहना
दिक्रियाकलापःकार्यएव अनग्नेर्दहनंकार्यंपूर्वभिक्षोर्यथाविधिविडषत्कुनकर्तव्यमेकोद्दिष्टादिकर्हिचिदितिस्मृति
समुच्चयोदाहृतवचनात पूर्वभिक्षुकुटीचकःद्वादशादिनकर्तव्यमुक्तंबौधायनेननारायणबलिंचास्यकुर्वीतद्वादशेऽ
निकुर्यादिक्षोर्महापूजांपायसंचनिवेदयेत् अग्नौकृत्वानुतच्छेषंव्याहृतीभिसमाहितः यतीनगृहस्थसाधून्वागृही

Indira Gandhi National
Centre for the Arts

॥ मोक्षप्र॰॥ त्वाह्वादनावरान् अभ्यर्च्य गंधपुष्पाद्यैर्मांचैर्हदि ज्ञानामभिः संगोज्य द्रव्येचान्नेन दक्षिणांच निवेदयेत् त्रयोदशां द्विजश्रे
ष्ठमात्मज्ञं संयतेंद्रियं विष्णुं यथा तथाभ्यर्च्य पाद्यार्घ्यैर्विधानतः दद्यात् पुरुषसूक्तेन पुष्पहव्यादिकं क्रमात् वस्त्रालंका
७१ रकाद्यानि यथाशक्ति प्रदापयेत् उच्छिष्टसंनिधौ तस्य दर्भानास्तीर्य भूतले अन्नं स्वधास्तु स्वधास्वधेति बलिं हरेत् एवं
यः कुरुते विद्वान् नारायणबलिं द्विजः विष्णुलोकमवाप्नोति पुरुषैर्नात्र संशयः एवं यतिसंस्कारकर्तुः फलमुक्तं तेनैवा-
यतीन् वहन् स्पृष्ट्वा चैव स्नानमात्रेण शुध्यति अश्वमेधफलं सर्वं प्राप्नुवंति पृथक् पृथक् इति यतिसंस्काराः अथ
वैराग्यं तत्र वैराग्यस्य मोक्षासाधारणनिदानज्ञानसाधनश्रवणसंन्यासयोरधिकारिविशेषणत्वेन तेन विना श्रवणादि
प्रयोज्यमोक्षासिद्धेर्मुमुक्षुणा संसारस्य दुःखमयत्वादिप्रतिसंधानेन तदवश्यं संपादनीयं तथा च श्रुतिः परीक्ष्य लोका
न् कर्मचितान् ब्राह्मणो निर्वेदमायात् नास्त्यकृतः कृतेन तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् महाभारते च वैराग्यं पुनरे
तस्य मोक्षस्य परमो विधिः ज्ञानादेव च वैराग्यं जायते येन मुच्यते परमविधिशब्देन परमं साधनमुच्यते ज्ञानां संसारस्य दु
ःखमयत्वादिज्ञानात् अथ किं वैराग्यं न तावद्रागाभावः विषयांतरएव रागवतो रोगिणश्च तथात्वेनातिव्याप्तेः सुषुप्तौ ७१
तद्व्यवहारायत्या रागसामान्याभावस्यापि वक्तुमशक्यत्वात् प्रहरावलंबिशरावादिकज्ञानावसरे च रागसामान्याभा
वसत्त्वेन विरक्ततापत्तेः किंतु दिव्यादिव्यविषयसंप्रयोगेपि विषयदोषदर्शनजनितरागद्वेषविरहविशिष्टोपेक्षात्मि

कांतःकरणवृत्तिविशेष एव एतदेवाह भगवान् पतंजलिः दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यमि
ति व्याख्यातं चैतत् भगवता भाष्यकारेण व्यासदेवेन स्त्रियोन्नपानमैश्वर्यमिति दृष्टविषये वितृष्णस्य स्वर्गवैदेह्यप्रकृ
तिलयत्वप्राप्तावानुश्रविकविषये वितृष्णस्य दिव्यादिव्यविषयसंप्रयोगेपि चित्तस्य विषयदोषदर्शिनः प्रसंख्यानबला
त् अनाभोगात्मिका हेयोपादेयशून्या वशीकारसंज्ञेति ऐश्वर्यमाधिपत्यं अनुश्रवो वेदः ततोधिगता आनुश्रविकाः स्व
र्गादयः देहरहिता विदेहाः अंतःकरणे प्रलीनाः तेषां भावो वैदेह्यं अन्ये तु प्रकृतिमेवात्मानमभिमन्यमानाः प्रकृत्युपा
सकाः प्रकृतौ साधिकारायामेव लीनाः तेषां भावः प्रकृतिलयत्वं तत्प्राप्तिविषये आनुश्रविकविषये वितृष्णो हि स्व
र्गादिविषये वितृष्ण इत्युच्यते ननु यदि वैतृष्ण्यमात्रं वैराग्यं तदा विषयबाधेपि तदस्तीति तदपि वैराग्यं स्यादित्यत आ
ह दिव्यादिव्येति दिव्यादिविषयप्रयोगेपि विषयदोषदर्शिनश्चित्तस्य वैतृष्ण्यं तस्मिन् सति प्रसंख्यानबलात् तापत्रयपा
रीतता विषयाणां दोषः तत्परिभावनया च साक्षात्कारः प्रसंख्यानं तद्बलात् आभोगात्मिका तामेव विवृणोति हेयोपादेय
शून्येति उपेक्षात्मिकांतःकरणवृत्तिरित्यर्थः ननु वैराग्यस्य चातुर्विध्यं श्रूयते तथा चागमिनः यतमानसंज्ञाव्यतिरेकसं
ज्ञैकेंद्रियसंज्ञा वशीकारसंज्ञेति चतस्रः संज्ञा इति विहितं चैतत्पतंजलिभाष्यटीकायां वाचस्पतिमिश्रैः रागादयः ख
लु कषायाश्चित्तवर्तिनः तैरिंद्रियाणि यथास्वं विषयेषु प्रवर्त्यंते तन्मा प्रवर्तिषतेति तत्परिपालनाय आरंभः प्रयत्नः सा यत

Indira Gandhi National Centre for the Arts

॥मोक्ष५०॥ मानसंज्ञावैराग्यं तदारंभे सति केचित् कषायाः पच्यंते पक्ष्यंते च केचित् तत्र पच्यमानेभ्यः पक्वानां व्यतिरेकेणावधा
रणं व्यतिरेकसंज्ञा बाह्येंद्रियप्रवृत्तिजनकस्य रागस्यांतःकरणस्यौत्सुक्यमात्रेणावस्थानात् एकेंद्रियसंज्ञावैराग्यं औ
॥१८॥ त्सुक्यमात्रस्यापि निवृत्तिरुपस्थितेष्वपि दिव्यादिव्यविषयेषूपेक्षाबुद्धिसंज्ञात्रयात्पराव्शीकारसंज्ञावैराग्यमिति
अन्ये त्वन्यथा चातुर्विध्यं वर्णयंति यतमानसंज्ञा नाम वैराग्यसाधनानामनुष्ठानं व्यतिरेकसंज्ञा नाम केषु चिद्विषयेषु
रागेक्षीणे एतानींद्रियाणि स्वविषयेषु जितान्येतानि तेतव्यानीति विभेदेनावधारणं एकेंद्रियसंज्ञा नाम बाह्येंद्रियविषये
षु रूपादिषु रागद्वेषयोः क्षते सति मनसि विद्यमानस्य रागादेः क्षयः वशीकारसंज्ञा तु पूर्वोक्तैव तथा च कथमेकविधमे
व वैराग्यलक्षणं चाव्याप्तमिति चेत् न यतमानसंज्ञादित्रयस्य मुख्यवैराग्यसाधनतयाऽलक्ष्यत्वेन तत्र लक्षणागमनो
बाधकाभावात् तत्र वैराग्यशब्दस्य गौणतायाः एवं पातंजलैरभिहितत्वात् अथ वैराग्यहेतवः तत्र देहादिभ्यो वैरा
ग्याय पंचस्य दुःखमयत्वं प्रस्तूयते तज्ज्ञाने सत्येव वैराग्यस्य जायमानत्वात् तदुक्तं विष्णुपुराणे आध्यात्मिकादि मैत्रे
य ज्ञात्वा तापत्रयं बुधः उत्पन्नज्ञानवैराग्यः प्राप्नोत्यात्यंतिकं सुखं तापत्रयं दुःखत्रयं उत्पन्नज्ञानवैराग्यः उत्पन्ने ज्ञा ॥१८॥
नवैराग्ये यस्य स तथा ज्ञानं वात्र ब्रह्मविषयकं आत्यंतिकोलयो मोक्ष इति कल्पतरुः ज्ञानं हेयत्वज्ञानं कृतश्रवणा
दिरिति शेषः तापभेदास्तत्रैव आध्यात्मिको वै द्विविधः शारीरो मानसस्तथा शारीरो बहुभिर्भेदैर्भिद्यते श्रूयतां च सः

शिरोरोगप्रतिश्यायज्वरशूलभगंदरैः हृदकासस्तथा श्वासः प्लीह इत्यनेकधा प्रतिश्यायो नासिकारोगः प्रति
श्यायस्तु पीनस इत्यभिधानात् तथाक्षिरोगातीसारकुष्ठाद्यामयसंज्ञितैः भिद्यते देहजस्तापो मानसं श्रोतुमर्हसि का
मक्रोधभयद्वेषलोभमोहविषादजः शोकासूयावमानेर्ष्यामात्सर्यादिभवस्तथा मानसोपि हि जश्रेष्ठ तापो भवति नैक
धा इत्येवमादिभिर्भेदैस्तापो ह्याध्यात्मिकः स्मृतः मृगपक्षिमनुष्याद्यैः पिशाचोरगराक्षसैः सरीसृपाद्यैश्च नृणां जायते
चाधिभौतिकः शीतोष्णवातवर्षांबुवैद्युतादिसमुद्भवः तापो द्विजवरश्रेष्ठ कथ्यते चाधिदैविकः गर्भजन्मजराज्ञान
मृत्युनारकजं तथा दुःखं सहस्रशो भेदैर्भिद्यते मुनिसत्तम सुकुमारतनुर्गर्भे जंतुर्बहुमलावृते उल्बसंवेष्टितो भग्न
पृष्ठग्रीवास्थिसंहतिः अत्यम्लकटुतीक्ष्णोष्णलवणैर्मातृभोजनैः अतितापिभिरत्यर्थं वर्द्धमानातिवेदनः प्रसारणा
कुंचनादौ नांगानां प्रभुरात्मनः शकृन्मूत्रमहापंकशायी सर्वत्र पीडितः निरुच्छ्वासः सचैतन्यः स्मरन् जन्मशतान्य
थ आस्ते गर्भेतिदुःखेन निजकर्मनिबंधनः जायमानः पुरीषासृङ्मूत्रशुक्रविलुंठितः प्राजापत्येन वायुना तेन पीड्यमा
नास्थिबंधनः अधोमुखो वै क्रियते प्रबलैः सूतिमारुतैः क्लेशान्निष्क्रांतिमाप्नोति जठरान्मातुरातुरः मूर्च्छामवाप्य म
हतीं संस्पृष्टो बाह्यवायुना विज्ञानभ्रंशमाप्नोति जातश्च मुनिसत्तम कंटकैरिव तुन्नांगः क्रकचैरिव दारितः पूतिव्र
णान्निपतितो धरण्यां कृमिको यथा कंडूयनेपि चाशक्तः परिवर्त्तेप्यनीश्वरः स्नानपानादिकाहारमप्याप्नोति परेच्छया

Indira Gandhi National Centre for the Arts

॥ मोक्षध०॥ अशुचिसंस्तरे सुप्तः कीटदंशादिभिः सदा नद्यमाणोपि नैतेषां समर्थो विनिवारणे जन्मदुःखान्यनेकानि जन्मनोनंत
राणि च बालभावे यदाप्नोति आधिभौतादिकानि च तथाज्ञानमनसाच्छन्नो मूढांतःकरणो नरः न जानाति कुतः को
॥१८१॥ हं कारणं किमकारणं किं कार्यं किमकार्यं वा किं वाच्यं चैव किं नोच्यते को धर्मः कश्च वै धर्मः तस्मिन्वर्त्तेत वा कथं किं
कर्त्तव्यमकर्त्तव्यं किं वा किं गुणदोषवत् एवं पशुसमैर्मूढैरज्ञानप्रभवं महत् अवाप्यते नरैर्दुःखं शिश्नोदरपराय
णैः अज्ञानं तामसो भावः कार्यारंभप्रवृत्तयः अज्ञानिनां प्रवर्त्तंते कर्मलोपास्ततो द्विजनारकं कर्मणां लोपे फ
लमाहुर्मनीषिणः तस्मादज्ञानिनां दुःखमिह चामुत्र चोत्तमं जराजर्जरदेहश्च शिथिलावयवः पुमान् विविक्त
शीर्णदशनो वलिस्नायुशिरायुतः दूरप्रनष्टनयनो व्योमांतर्गततारकः नासाविवरनिर्यातलोमपुंजश्चलद्वपुः
प्रकटीकृतसर्वास्थिसंहतिशिथिलो जडः प्रशांतजठराग्नित्वात् अल्पाहारोल्पचेष्टितः कृच्छ्राच्चंक्रमणोत्थाना
शयनासनचेष्टितः मंदीभवच्छ्रोत्रनेत्रो गलल्लालाविलाननः अनायत्तसमस्तैश्च करणैर्मरणोन्मुखः तत्क्षणेप्यनु
भूतानामस्मर्त्ताखिलवस्तुनां सकृदुच्चारिते वाक्ये समुद्भूतमहाश्रमः श्वासकासमहायाससमुद्भूतप्रजागरः अ ॥१८१॥
न्येनोत्थाप्यतेन्येन तथा संवेश्यते जरी भृत्यात्मपुत्रदाराणामपमानपराहतः प्रक्षीणाखिलशौचश्च विहाराहार
संस्पृहः हास्यः परिजनस्यापि निर्विण्णाशेषबांधवः अनुभूतमिवान्यस्मिन्जन्मन्यात्मविचेष्टितं संस्मरन्यौ

वनेत्यर्थं निःश्वसत्यतितापितः एवमेतानि दुःखानि जरायामनुभूय वै मरणे यानि दुःखानि दुःखानि प्राप्नोति शृणु
तान्यपि श्लथग्रीवांघ्रिपादोथ ग्रस्तो वेपथुना नरः मृडग्लानिपरीतांगो मुहुर्ज्ञानलवान्वितः हिरण्यधान्यतनय
भार्याभृत्यगृहादिषु एते कथं भविष्यंतीत्यतीवममताकुलः मर्मभिद्भिस्तथा रोगैः क्रकचैरिव दारुणैः शरैरिवांतकस्याग्रे
छिद्यमानासुबंधनः विवर्त्तमानताराक्षिर्हस्तपादं मुहुः क्षिपन् संशुष्यमाणताल्वोष्ठपुटो घुरुघुरायते निरुद्धकंठो दो
षौघैरुदनखासपीडितः तापेन महता व्याप्तस्तृषा चार्त्तस्तथा क्षुधा क्लेशाद्दुःक्रांतिमाप्नोति यमकिंकरपीडितः त
तश्च यातनादेहं क्लेशेन प्रतिपद्यते एतान्यन्यानि चोग्राणि दुःखानि मरणे नृणां देवलः यदुःखं पीड्यमानस्य यद्दुःख
मातुराज्ञये नान्यत्तदु.....यमं लोके जीवतामंतरे तयोः विष्णुपुराणे गर्भवासादियावत्पुनर्जन्मोपपादकं समस्ता
वस्थतातवद्दुःखमेव हि देहिनां क्षुत्तृष्णोपशमास्तद्वच्छीताद्युपशमाः सुखं मन्यते बालबुद्धित्वात् दुःखमेव हि तत्पु
नः अत्यंतस्तिमितांगानां व्यायामेन सुखैषिणां भ्रांतिज्ञानावृतांगानां प्रहारेपि सुखायते तथा अग्नेः शीतेन तोय
स्य तृष्णार्त्तस्य च क्षुधा क्रीयते सुखकर्त्तृत्वं तद्विलोमस्य चेतरैः तथा नरके यानि दुःखानि यायदेतन्नवानि वै प्रा
प्यंते नरके विप्र तेषां संख्या न विद्यते न केवलं द्विजश्रेष्ठ नरके दुःखपद्धति स्वर्गेपि पातभीतस्य क्षयिष्णो र्नैवास्ति नि
र्वृतिः पुनश्च गर्भे भवति जायते च पुनः पुनः गर्भे विलीयते भूयो जायमानोस्तमेति च जातमात्रश्च म्रियते बाल

Indira Gandhi National
Centre for the Arts

॥मोक्षध०॥ न्नावेश्यश्चैवने मध्यमं वा वयः प्राप्य वार्द्धके वा ध्रुवा मतिः यावज्जीवति तावच्च दुःखैर्नानाविधैः प्लुतः तंतुकारणपक्ष्मौ
घैरास्ते कार्पासबीजवत् पक्ष्मौघैरंशुसमुद्भैर्व्यसनाशीतथोत्थैः पालने च सदारुणं भवंत्यनेकदुःखानि तथैवे
॥८७॥ ष्टविपत्तिषु यद्यात्वीतिकरं पूर्वं सांवत्सरमैत्रेयजायते तदेव दुःखदुःखस्य मूलत्वमुपगच्छति कलत्रमित्रपुत्रात्मा गृ
हक्षेत्रधनादिकैः क्रीयते न तथा भूरिसुखं पुंसां यथाऽसुखं अथ संसारानित्यता तत्र विष्णुः एकमस्मिन्निरालंबे
काले संततयायिनि नतं भूतं प्रपन्नं प्राप्स्यत्स्थितिर्यस्य न वै ध्रुवा गंगायाः सिकता धारा तथा वर्षति वासवे शक्या ग
णयितुं लोके न व्यतीताः पितामहाः चतुर्दश विनश्यंति काले सर्वे सुरेश्वरा चतुर्दश मनवः लोकप्रधानाः बहू
नींद्रसहस्राणि दैत्येंद्रनियुतानि च विनष्टानीह कालेन मनुष्येष्विह का कथा राजर्षयश्च बहवः सर्वे समुदिता गु
णैः देवा ब्रह्मर्षयश्चैव कालेन निधनं गताः ये समर्था जगत्यस्मिन् सृष्टिसंहारकारिणः तेऽपि कालेन हीयंते कालो
हि बलवत्तरः महाभारते अविश्रान्तमनालंबमपाथेयमदैशिकं तमःकांतारमध्वानं कथमेको गमिष्यति अदैशिकं मा
र्गोपदेशरहितं तमःकांतारं तमसा दुर्गमं यदा विसंज्ञः स्थिरनिश्चलेक्षणः प्रयत्नहीनः श्वसनाद्यधिष्ठितः तमोमहा ८७
श्वभ्रमिवोपनीयसे तदा क्व दाराः क्व सुताः क्व बांधवाः स्थिरः निश्चेष्टः तथा क्षणं क्षणं स्वध्रुवजीवितस्य किं बंधुभिर्मित्र
परिग्रहैश्च विहाय यो गच्छति सर्वमेव क्षणेन गत्वा न निवर्त्तते च किं ते धनैः किं तव बंधुभिर्वा किं ते दारैर्ब्राह्मण यो मरि

ष्यसि आत्मानमविद्य गुहां प्रविष्टं पितामहास्ते क्व गताः पिता च गुहां प्रविष्टं दहरविद्योक्तरीत्येति कल्पतरुः तुल्य
जातिवयोरूपान् हतान् पश्यसि मृत्युना कथं ते नास्ति निर्वेदो लोहो हि हृदयं तव मस्तकस्थायिनं मृत्युं यदि पश्येदयं
जनः आहारोऽपि न रोचेत किमुताकार्यकारिता वक्तृकल्पेति रुद्रयोगजागर्त्ये प्रस्तुतकविसर्जनक न यस्यादेवो
युरकविहन्यसे मर्त्यो चिन्नेषि किं मर्त्य न सन्नीतं विमुंचति अजातं नैव गृह्णाति कुरु यत्नमजन्मनि महता पूर्वपुण्येन
क्रीतेयं कायनौस्तया पारं क्लेशोदधेर्गंतुं त्वरयावन्न भिद्यते एवं मत्यहिते लोके काले नोपनिपीडिते सुमहद्धैर्यमा
स्थाय मनो मोक्षे निवेशय अथ विषयनिंदा तत्र महाभारते विषयाणां च दौरात्म्यादिंद्रियाणां च चापलात् मनसश्चा
नवस्थानात् सर्वदुःखेषु वर्त्तते विषयान् प्रत्यनुसरन् प्राप्नोति क्षमहद्भयं श्येनच्छायामनुत्पन् कपिंजलः इवात्
ये जन्मांतरशतान्यस्ता विषयेषु मतिर्नृणां जरजीर्णस्य वसस्येतु सा हि दुःखेन वर्त्तते देवलः नु क्रान्तितानि यान्येव मोक्ष
व्यानि पुनर्नृभिः इति हृष्टांततं सिद्धं पुनरुक्तमिदं जगत् महाभारते दुष्प्रपातमार्गे हि स्यन्र्योगे रतिस्तता दर्शनि रस
ने घ्राणे श्रवणे च विशेषतः ततोऽस्य जायते तीव्रा वेदना तत्क्षणात्मिका कंद तालु प्रलुप्दितं स्वदुःखाहृद्ध्यानं स्पष्टं आस्वा
दस्पृहि सर्वस्य जिह्वाग्रे संधिविग्रहः दिवसे दिवसे चैव रात्रौ रात्रौ तथा सदा नोक्तव्यमिति यः खिन्नो दोषबुद्धिः सज्ज्य
ते जिह्वोपस्थनिमित्तं हि पतनं सर्वदेहिनां अहेरिव गणाद्भीतो मिष्टान्नाद्विषादिव राक्षसीभ्य इव स्त्रीभ्यः स वि

ndhi National
Centre for the Arts

॥मो॰ध॰णा॥ यामधिगच्छति इषुपात इत्यल्पकालोपलक्षणं विशेषतोल्पकालीनारतिः कंठताल्विंत्यत्र स्वाह्लस्य यावत्कंठ
तालुसंयोगस्तावदेव मिष्टतातो न किमपीत्यर्थः तत्र हेतुः आस्वाद्यस्येति संधि अनुकूलवेदकता माधुर्यादिना
८२ विग्रहः प्रातिकूल्यावेदनं कटुकादिव्यंजनेन श्रीभगवद्गीतासु मात्रास्पर्शास्तु कौंतेय शीतोष्णसुखदुःखदाः आग
मापायिनोनित्यास्तांस्तितिक्षस्व भारत यं हि न व्यथयंत्येते पुरुषं पुरुषर्षभ समदुःखसुखं धीरं सोमृतत्वाय कल्पते
मात्रा मीयंत इति विषया उच्यंते तेषां स्पर्शा संबंधाः द्वंद्वः विषयासक्तचित्तस्तु कश्चिन्मोहं न विंदति अन्नेन विषया
संगतस्माद्योगी विवर्जयेत् मार्कंडेयपुराणे हासोस्थि संदर्शन मक्षियुग्ममत्युज्ज्वलं तत्कलुषं वसायाः कुचादिपी
नं पिशितं घनं तत् स्थानं रतेः किं नरकं न योषित् महाभारते पर्स्यजिह्वा सहसंस्यात् जीवेच्च शरदां शतं अवेक्षेत ग
तीनृणां कर्मदोषसमुद्भवाः निरये चैव पतनं यातनाश्च यमक्षये विप्रयोगं प्रियैश्चैव संप्रयोगं तथाप्रियैः जरया चा
भिभवनं व्याधिभिश्चोपपीडनं देहादुत्क्रमणं चास्मात् पुनर्गर्भेषु संभवे योनिकोटिसहस्रेषु सृतीश्चास्यांतरात्मनः दे
हेषु च समुत्पत्तिं शुभाशुभं धर्मेषु चेति याज्ञवल्क्यो विवेकोत्पत्तये जीवात्मनो गर्भ ग्रहणपूर्वकं शरीर ग्रहण प्रकार ८२
माह स्त्रीपुंसयोश्च संयोगे विशुद्धे शुक्रशोणिते पंचधातून्स्वयं षष्ठ आदत्ते युगपत्प्रभुः ऋतुकाले स्त्रीपुंसयोः संयोगे
विशुद्धे वातपित्तश्लेष्मदुष्टग्रंथिपूयक्षीणमूत्रपुरीषगंधिरेतांसि बीजानि इति स्मृत्यंतरोक्तदोषरहिते स्थित्वा पं

चधातून् पृथिव्यादिपंचमहाभूतानि शरीरारंभकतया स्वयं षष्ठः चिदात्मा प्रभुः शरीरारंभकारणादृष्टयोगित
यास्वयं समर्थो युगपदादत्ते स्वयं स्वी करोति तथा शारीरके स्त्रीपुंसयोः संयोगे योनौ रजसाभिसंसृष्टं शुक्रं तत्क्षणमेव
सहगर्भात्मना गुणैश्च सत्वरजस्तमोभिः सह वायुना प्रेर्यमाणो गर्भाशये तिष्ठति तथा इंद्रियाणि मनः प्राणो ज्ञानमा
युः सुखं धृतिः धारणा प्रेरणं दुःखमिच्छाहंकार एव च प्रयत्न आकृतिर्वर्णस्वरद्वेषौ भवाभवौ तस्यैतदात्मजं सर्वमा
नादेरादिमिच्छतः इंद्रियाणि ज्ञानकर्मेंद्रियाणि वक्ष्यमाणानि मनश्चांतःकरणं साधारणं प्राणापानव्यानोदानसमान
इत्येवं पंचभेदभिन्नः शारीरो वायुः प्राणः ज्ञानमवबोधः आयुः कालविशेषावधिकं जीवनं सुखमनुकूलवेद
नीयांतःकरणवृत्तिविशेषः धृतिश्चित्तस्थैर्यं धारणा प्रज्ञा मेधा च प्रेरणं ज्ञानकर्मेंद्रियाणामधिष्ठातृत्वं आकृतिराकारः
वर्णो गौरत्वादिः स्वरः मंजुलादिः भवः विभवः संपत्तिः अभवः तदभावः एतत्तस्यात्मजं प्रागुद्भवीयकर्मजं अ
दिमिच्छतः शरीरं जिघृक्षमाणस्य शुक्रशोणितस्य कार्यरूपपरिणतिक्रममाह स एव प्रथमे मासि संक्लेदभूतो धातुवि
मूर्छितः मास्यर्बुदं द्वितीये तु तृतीये चेंद्रियैः पुनः आकाशाल्लाघवं सौक्ष्म्यं शब्दं श्रोत्रं बलादिकं वायोश्च स्पर्शनं चेष्टां
व्यूहनं रूक्षमेव च पित्तात्तु दर्शनं पक्तिमौष्ण्यं रूपं प्रकाशतां रसात्तु रसनं स्नेहं शैत्यं क्लेदं समार्दवं भूमेर्गंधं तथा घ्राणं
गौरवं मूर्तिमेव च आत्मा गृह्णात्यजः सर्वं तृतीये स्पंदते ततः स्थैर्यं चतुर्थे त्वंगानां पंचमे लोहितोद्भवः षष्ठे बलस्य च

...i National
Centre for the Arts

र्णस्य नखरोमणां च संभवः मनश्चैतन्ययुक्तोसौ नाडीस्नायुशिरायुतः सप्तमे चाष्टमे चैव त्वङ्मांसस्मृतिमानपि
॥मो० द० प०॥ पुनर्धात्री पुनर्गर्भमोजस्तस्य प्रधावति अष्टमे मास्यतो गर्भो जातः प्राणैर्वियुज्यते नवमे दशमे चापि प्रबलैः सू
॥८२॥ तिमारुतैः निःसार्यते बाण इव यंत्रच्छिद्रेण सज्वरः धातुपुष्टिव्यादिपु मूर्छितो लोलीभूतैः क्षीरनीरवदेकीभू
तद्रुतियावत् प्रथमे गर्भमासे संक्लेदभूतो द्रवरूपतां प्राप्नुवत्तिष्ठते नक्तदिनतया परिणमत इति द्वितीये तु
मास्यर्बुदमीषत्कठिनमांसरूपं भवति अयमभिप्रायः कोष्मपवनजठरदहनाभ्यां प्रतिदिनमीषदीषच्छोष्यमाण
शुक्रसंपर्कादिदितद्रवीभावं भूतजातं विंशद्भिर्दिनैः काठिन्यमापद्यत इति तथा च सुश्रुते द्वितीये शीतोष्मानिलैरभि
पच्यमानो भूतसंघातो जायते तृतीये मास्यंगेंद्रियैश्च युक्तो भवति आत्मा गृह्णातीति सर्वत्र संबध्यते गगनात्म
धिमानं शब्दं घनं क्रियोपयोगिता सौक्ष्म्यं सूक्ष्मेक्षित्वं श्रोत्रं श्रवणेंद्रियं बलं दार्ढ्यं आदिग्रहणात् सुषिरत्वं विविक्त
ता च आकाशात् शब्दं शौचं विविक्तत्वं सर्वच्छिद्रसमूहांश्चेति गर्भोऽभिलिषद्दर्शनात् पवनात् स्पर्शेंद्रियं चेष्टा गमनाग
मनादिकं व्यूहनमंगानां द्विविधं प्रसारणं कर्कशत्वं रौक्ष्यं च शाश्वत् स्पर्शनं च पित्तात्तेजसो दर्शनं चक्षुरिंद्रियं प ॥८२॥
क्तिं पुक्तस्यान्नस्य पाचनं औत्सुक्यमुष्णस्पर्शनं अंगानां रूपं श्यामादि प्रकाशतां भ्राजिष्णुतां क्लेदे आर्द्रतां तथा
भूमेर्गंधं घ्राणेंद्रियं परिमाणं मूर्तिः एतत्सर्वं परमार्थतो जन्मरहितोऽप्यात्मा तृतीये मासि गृह्णाति ततश्चतुर्थमा-

---

सि स्पंदते चलति तथा च शारीरके चतुर्थे मासि चलनाज्जलादावभिप्रायं करोति तृतीये मासि प्रादुर्भूतस्यांगसं
घस्य चतुर्थे मासि स्थैर्यं स्थिरता भवति पंचमे लोहितस्योद्भवं षष्ठे बलस्य वर्णस्य करुहरोमणां च संभवः असौ-
पूर्वोक्तो गर्भः सप्तमे मासि मनसा चेतनया च युक्तो नाडीभिर्वायुवाहिनीभिः स्नायुभिरस्थिबंधनैः शिराभिर्वातपित्त
श्लेष्मवाहिनीभिश्च संयुतः तथाष्टमे मासि त्वङ्मांसेन स्मृत्या च युक्तो भवति तथाष्टममासिकस्य गर्भस्य ओजः
कस्य न गुणविशेषः धात्री गर्भं च पुनः पुनः सतेचं चलतया शीघ्रं गच्छति अतोष्टमे मासि जातो गर्भः प्राणैर्वियुज्यते
अनेनौजस्थितिरेव जीवनहेतुरिति दर्शयति ओजःस्वरूपं स्मृत्यंतरे दर्शितं हृदि तिष्ठति यच्छुद्धमीषद्रक्तं सपीत
कं ओजः शारीरं संख्यातं तन्नाशान्नाशमृच्छति एवं करचरणचक्षुरादिसंपूर्णांगेंद्रियो नवमे दशमे वा मासेऽपि
शब्दात् प्रागपि सप्तमेऽष्टमे वा अत्यापासाहितदोषवशात् प्रबलप्रसूतिहेतुप्रभंजनप्रेरितोऽस्थिचर्मादिनिर्मित
वपुर्यंत्रस्य छिद्रेण सूक्ष्मरुधिरेण सज्वरोऽसह्यरवाभिभूयमानो निःसार्यते यथा धानुर्यंत्रेष्क धन्वप्रेरितो बाण
इवातिवेगेन निर्गमसमनंतरं च बाह्यपवनस्पृष्टो नष्टप्राचीनस्मृतिर्भवति जातः स वायुना स्पृष्टो न स्मरति जन्मम
रणं कर्म च शुभाशुभमिति निरुक्तेऽभिधानात् वैराग्यार्थं कायस्वरूपविवरणं कृतं याज्ञवल्क्येन तस्य षोढा शरीर
णि षट्त्वचो धारयंति च षडंगानि तथा स्नायूंश्च सहस्रध्याशतत्रयं तस्यात्मनो यानि जरायुजांडजशरीराणि तानि ष

Indira Gandhi National Centre for the Arts

त्येकं षट्प्रकाराणि रक्तादिषट्धातुपरिपाकहेतुभूतषडग्निस्थानयोगित्वेन तथाह्यन्नरसो जाठरेणाग्निना प्र
॥मोद्व७०॥ त्येकं षट्प्रकाराणि रक्तादिषट्धातुपरिपाकहेतुभूतषडग्निस्थानयोगित्वेन तथाह्यन्नरसो जाठरेणाग्निनापच्यमानो रक्ततां प्रतिपद्यते रक्तं च रक्तकोशस्थेनाग्निना पच्यमानं मांसत्वं मांसं च स्वकोशानलपरिपक्वमस्थितां
८३ अस्थ्यपि स्वकोशाग्निपरिपक्वं मज्जात्वं मज्जापि स्वकोशपावकपरिपच्यमाना चरमधातुतया परिणमते च
रमधातोस्तु परिणाम एव नास्तीति स एव प्रथमकोश इत्येवं षट्कोशाग्नियोगित्वात् षट्प्रकारत्वं शरीराणां ता
नि च शरीराणि षट्त्वचो धारयंति रक्तमांसमेदोस्थिमज्जाशुक्राख्याः षट्धातव एव रंनास्तं भत्वगिव बाह्याभ्यंत
ररूपेण स्थिताः त्वगिवाच्छादकत्वात् त्वचस्ताः षट्त्वचो धारयंति तदिदमायुर्वेदस्पष्टमेव तथांगानि षडेव कर
गुगं चरणयुगं उत्तमांगं गात्रमिति अस्थां षष्टिसहितं शतत्रयमिति स्थालैः सह चतुःषष्टिर्दन्ता वै विंशतिर्नखाः
पाणिपादशलाकाश्च तेषां स्थानचतुष्टयं षष्टिगुल्फीनां हे पार्ष्णी गुल्फे शुच चतुष्टं पंचत्वार्यरत्निकास्थीनि जंघ
योस्तावकं तथा ऽष्टिच त्वारिंशान्च पंच ग्रीवाप्ष्टदशास्थि स्यात् जत्र्वेकं च तथा हनुः तन्मूले द्वे ललाटाक्षिगंडना
सा ह्यनालिका पार्श्वका स्थालकैः सार्धमर्बुदौ श्व द्विसप्ततिः द्वौ शंखकौ कपालानि चत्वारि शिरसस्तथा उरः सप्त
दशास्थीनि पुरुषस्यास्थिसंग्रहः स्थालानि दंतमूलप्रदेशस्थान्यस्थीनि द्वात्रिंशत् तैः सह द्वात्रिंशद्दंताः एवं चच
तुःषष्टिर्भवंति नखाः विंशतिः हस्तपादस्थानि शलाकाकाराण्यस्थीनि मणिबंधस्योपरि वर्तमानान्यंगुलिमू ॥८३॥

---

लस्थानि विंशतिरेव तेषां नखानां शलाकास्थां च स्थानचतुष्टयं भवति द्वौ करौ चरणौ चेत्येवमस्थां चतुरुत्त
रशतं विंशतिरंगुलयस्तासां मध्ये एकैकस्यास्त्रयस्त्रयोस्थिखंडाः एवमंगुलिसंबद्धान्यस्थीनि षष्टिर्भवं
ति पादयोः पश्चिमौ भागौ पार्ष्णी तयोरस्थ्नी द्वे एकैकस्मिन् पादे द्वावित्येवं चतुर्षु गुल्फेषु चत्वारि अस्थीनि भवंति
बाह्वोररत्निप्रमाणानि चत्वार्यस्थीनि जंघयोश्च तावदेव चत्वार्येवेति च तुः सप्ततिः जघोरु संधिर्जानुः कपोलो
गल्ः ऊरुः सक्थि तत्फलकं असो भुजसिरः अक्षः कर्णनेत्रयोर्मध्ये शंखादधोभागः तालूषकं काकुदं श्रोणी
ककुद्मनी तत्फलकं तेषामेकैकशास्थनी द्वे द्वे विनिर्दिशेत् एवं चतुर्दशास्थीनि भवंति भगास्थि गुह्यास्थि
एकं पृष्ठे पश्चात् भागे पंच चत्वारिंशत् अस्थीनि भवंति ग्रीवा कंधरा सा पंचदशास्थिर्भवति वक्षोंसयोः संधि
र्जत्रु प्रतिजत्र्वेकैकं हनुः चुबुकं तच्चाप्येकमस्थीत्येवं चतुःषष्टिः तन्मूले तस्य हनोः मूले द्वे अस्थिनी ललाटं भालं
अक्षि वक्त्रः गंड वकपोलादयोर्मध्यदेशः तेषां समाहारो ललाटाक्षिगंडे तत्र प्रत्येकमस्थियुग्मं नासा घ्राणसंज्ञकाः
स्थिमती पार्श्वकाः कक्षाधः प्रदेशसंबंधास्थीनि तदाधारभूतानि स्थालकानि तैः स्थालकैः रर्बुदैश्चास्थिविशे
षैः सह पार्श्वकादि सप्ततिः पूर्वोक्तैश्च नवतिसाकमेकाशीतिर्भवंति शंखः कर्णयोर्मध्यप्रदेशावस्थिविशेषौ शंखकौ शि
रसः संबंधीनि चत्वारि शिरोवक्षस्त्त सप्तदशास्थिकमित्येवं त्रयोविंशतिः पूर्वोक्तैश्च सह षष्ट्यधिकं शतत्रयं पुरु

Indira Gandhi National
Centre for the Arts

॥ मोक्ष७०॥ षस्यास्थिसंग्रहः कथितः सविषेंद्रियादिकमपि वैराग्याय ज्ञेयमिति तत्त्वरूपमथाह स एव गंधरूपरसस्पर्शशब्दाश्च
विषयाः स्मृताः नासिका लोचने जिह्वा त्वक् श्रोत्रं चेंद्रियाणि तु हस्तौ पायुरुपस्थं च जिह्वा पादौ च पंचवै कर्मेंद्रियाणि
॥८४॥ नीषात्मनश्चैवाज्ञयात्मकं नाभिरोजो गुदं शुक्रं शोणितं शीरवकौ तथा मूर्द्धा सकंठ हृदयः प्राणस्यायतनानि तु वपा
वसावहननं नाभिक्लोमयकृतप्लिहा क्षुद्रांत्रं वृक्कौ वस्तिपुरीषाधानमेव च आमाशयोथ हृदयं स्थूलांत्रं गुदएव
च उदरौ च गुदौ कोष्टौ विस्तारोयमुदाहृतः कनीनके चाक्षिकूटे शष्कुली कर्णपत्रकौ गंडौ शंखौ भ्रुवौ दंतवेष्टावौ
ष्टौ ककुंदरे वंक्षणौ हृषणौ हस्तौ श्लेष्मसंघातकौ स्तनौ उपजिह्वा स्फिजौ बाहू जंघोरूश्च वपिंडिका तालूदरं वस्तिशी
र्षं चिबुकं गलशुंडिके अवटुश्चैवमेतानि स्थानान्यत्र शरीरके अक्षिचर्मचतुष्कं च पद्हस्तहृदयानि वा नवच्छिद्राणि तान्ये
वप्राणस्यायतनानि तु शिराशतानि सप्तैव नव स्नायुशतानि च षट्पंचाशच्च जानीत शिराधमनिसंज्ञिताः त्रयोलक्षा
श्च विज्ञेयाः श्मश्रुकेशाः शरीरिणां सप्तोत्तरं चर्मशतं देहे च संधिशतं तथा रोम्णां कोट्यस्तु पंचाशत्चतस्रः कोट्य एव
च सप्तषष्टिस्तथा लक्षाः सार्द्धस्विदायने सह वायवीयैर्विगण्यंते विभक्ताः परमाणवः यद्यप्येको न वेदेषां भावानां ॥८५॥
चैव संस्थितिः रसस्य नव विज्ञेया जलस्यांजलयो दश सप्तैव तु पुरीषस्य रक्तस्याष्टौ प्रकीर्तिताः षट् श्लेष्मा पंच पि
त्तं तु चत्वारो मूत्रमेव च वसा त्रयो द्वौ तु मेदो मज्जैकोर्द्धं तु मस्तके श्लेष्मौजसस्तावदेव रेतसस्तावदेव तु इत्येतदस्थिरं कर्म

यस्य मोक्षाय कृत्पसौ मनः अंतःकरणं उभयात्मकं ज्ञानकर्मेंद्रियात्मकं वपा प्रसिद्धा वसा मांसस्नेहः अवहननं पु
प्फसः प्लीहा आयुर्वेदप्रसिद्धा वृक्कौ च मांसपिंडौ वस्तिमूत्राशयः पुरीषाधानं पुरीषाशयः आमाशयो अपक्वान्न
स्थानं हृदयं हृत्पुंडरीकं स्थूलांत्रगुदोदराणि प्रसिद्धानि बाह्याभ्यंतरवलयात् अंतर्गुदवलये द्वे तौ च गुदवलयौ
कोष्ठौ कोष्टे नाभेरधः प्रदेशे नवोऽयं च प्राणायतनस्य विस्तार उक्तः पूर्वश्लोके तु संक्षेपः अत एव पूर्वश्लोकस्था
नां केषांचिदिह पाठः कनीनिके चेत्येतत्प्राणायतनस्य पंचनमेव कनीनिके ऽक्षितारे अक्षिकूटे अक्षिनासयोः
संधी शष्कुली कर्णशष्कुली कर्णपत्रकौ कर्णपाल्यौ दंतावेष्टौ दंतपाल्यौ ककुंदरौ जघनकूपकौ वंक्षणौ जघनो
रुसंधी हृषणौ सर्वोक्तौ स्तनौ च श्लेष्मसंघातकौ उपजिह्विका घंटिका स्फिजौ कटिप्रोथौ जंघोरू च पिंडिका जं
घयोरूर्वोश्च पिंडिका मांसलप्रदेशाः गलशुंडिके हनुमूलगलयोः संधी शीर्षं शिरः अवटुः शरीरमध्यः कश्च
नानिम्नप्रदेशः तथाक्ष्णोः कनीनिकयोः प्रत्येकं श्वेतपार्श्वद्वयं यद्वाक्षिपुटचतुष्टयं शेषं प्रसिद्धमेव एतानि कुत्सिते
शरीरे स्थानानि तथाक्षियुग्मं कर्णयुग्मं नासाविवरद्वयमास्यं पायूपस्थमेतानि पूर्वोक्तानि नवच्छिद्राणि
प्राणस्यायतनान्येव शिरा नाभिसंबद्धाश्च त्वारिंशत्संख्याका वातपित्तश्लेष्मवाहिन्यः सकलकलेवर व्यापिन्यो
नानाशाखाः सप्त सप्तशतसंख्याका भवंति तथांगप्रत्यंगसंधिबंधना स्नायवो नवशतानि धमन्यो नाभेरुद्गता

...dhi National
Centre for the Arts

॥मोक्षध०॥ श्चतुर्विंशतिसंख्या घ्राणादि वायुवादिभ्यः शाखाभेदेन द्विशतं भवंति पेशयः पुनर्मांसशलाकाकाराः ऊरुपिंडिकाजंघोरुल्यंग
॥८५॥ संधिसंबंधिन्यः पंचशतानि भवंति पुनश्चासामेव एकोनविंशच्छतालीत्यच शाखोपशाखाभेदेन नवविंशतिलक्षाणि
तथा नवशतानि षट्पंचाशच्च भवंतीत्येवं हि सामश्रव प्रभृतयो मुनयो जानीत शारीरिणां भ्रमश्रूणिके शाश्वमिलिताः संत
स्वयोलक्षाविज्ञेया मर्माणि मरणकराणि क्लेशकराणि च स्थानानि तेषां सप्तोत्तरं शतं विज्ञेयं अस्थ्नां तु द्वे शते संधयः स्ना
युशिरादिसंधयः पुनरनंताः रोम्णां कोट्य इत्यत्र तु सकलशरीरस्थ धिरादिसंख्या माह पूर्वोदितशिकैः शरणादिसद्धि
तानां रोम्णां परमाणवः सूक्ष्मसूक्ष्मतराविभागाः स्वेदस्रवणसुषिरैः सह चतुः पंचाशत्कोषस्तथा सप्तोत्तरषष्टिलक्षासा
र्द्धः पंचाशत्षहस्रसहिताः वायवीर्यैर्विभक्ता यवनयरिमाणुभिः इथ कृता विगलपंते एतच्च शास्त्रदृष्ट्यानि हि तं च का
रादिकरणपथगोचरत्वाभावादस्यार्थस्य इममति गतदनमर्थशिरादिभाव संस्थानरूपं ते मुनयो भवतां मध्ये यदिक
श्चिदनुवेत्ति सोपि महानतोयत्नतो बोद्धव्याभाव संधिसंस्थितिः रसस्येत्यनेन शारीररसादिपरिमाणमाह सम्यक्परिण
ताहाररसो रसः तस्य परिमाणं नवांजलयः पार्थिवपरमाणुसंश्लेषनिमित्तस्य जलस्यांजलयो दश विज्ञेयाः पुरी ॥८५॥
षस्य वर्चस्कस्य सप्त वा रक्तस्य जाव राल्परिपाकाणादित्तलोहिः तस्यांन्नरसास्पाष्टावंजलयः प्रकीर्तिताः श्लेष्मणः क
फस्य षडंजलयः पित्तस्य तेजसः पंच मूत्रस्योच्चारस्य चत्वारो वसायामांसस्नेहस्य त्रयो मेदसो मांसरसस्य द्वावंजली म

ज्जाऽस्थिसुषिरगतस्यैकोंजलिः मस्तके पुनरर्द्धांजलिः मज्जाश्लेष्मौजसश्लेष्मसारस्य तथा रेतस श्चरमधातोः स्ता
वदेवार्द्धांजलिरेव एतच्च समधातुपुरुषाभिप्रायेण विषमधातोस्तु नायं नियमः वैलक्षण्याच्छरीराणां मस्यायित्वाच्चथै
वच दोषधातुमलानां च परिमाणं न विद्यत इत्यायुर्वेदस्मरणात् तदेतदीदृशमस्थिस्नायाघ्यारच्चमेतदशुचिनिधानं वर्षा
स्थिरमितिस्यतु द्विरसौ कृती पंडितो मोक्षाय समर्थो भवति वैराग्यस्य मोक्षहेतुत्वात् अस्थिमूत्रपुरीषादिप्राचुर्यज्ञा
नस्यैव वैराग्यहेतुत्वात् अतएव व्यासः सर्वाशुचिनिधानस्य कृतघ्नस्य विनाशिनः शारीरकस्यापि कृते मूढाः पापानि
कुर्वंति यदि नाम स्वकायस्य यदंतस्तद्बहिर्भवेत् दंडमादाय लोकोयं शुनः काकांश्च वारयेत विष्णुपुराणे इति संसारदु
खार्कतापतापितचेतसा विमुक्तियादप ब्राय्यमते कु त्रसुखं ननु णां अथ स्वर्गदूषणं तत्र महाभारते स्वर्गकामो यजेतेति
श्रूयते सततं श्रुतिः फलं प्रकल्प्य पूर्वं हि ततो यज्ञः प्रवर्त्तते अत्रापि च विशेषोस्ति दिविनीचोत्तममध्यमः न तत्राप्यस्ति संतो
तोपि दृष्ट्वा दीप्तां परश्रियं कृतस्य कर्मणः स्वर्गे भुज्यते कृतभिः फलं तच्चान्यत् क्रीयते कर्ममूलच्छेदेन भुज्यते आब्रह्मभव
नो देते दोषा ब्रह्मन् सुदारुणाः स्वर्गभाजः पार्थ पतंति तस्मात् स्वर्गं न कामयेत् सुहृत् ज्ञाति सजातीयैर्यथेष्टक्षीणे पिते त्यज्य
ते मानवो हि तथा तस्मिन् क्षीणपुण्ये मत्र्यं त्यजंति सर्वे सेश्वरदेवसंघाः मार्कंडेयपुराणे स्वर्गेपि दुःखमतुलं यदारो
हणकालतः प्रभृत्यहं पतिष्यामीत्येतन्मनसि वर्तते नरकांश्चापि संप्रेक्ष्य महद्दुःखमवाप्यते एतां गतिमहं गंते त्पद्दर्शि

Indira Gandhi National
Centre for the Arts

॥मो॰द॰प॰॥ मनिर्वृतिः ननु चातुर्मास्यफलस्याक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवतीति श्रुत्या विनाशित्वश्रवणेन ततः पाताभावान्न
सर्वस्य स्वर्गस्य क्षयित्वमिति चेत् तद्यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयत इति श्रुत्या यत्
॥८६॥ कृतकं तदनित्यमिति श्रुत्या यत् कार्यं तद्विनाशीति नियमेन च तस्यापि चिरकालस्थिरत्वावगमात् न च श्रुतेः सामान्यरूपाया अक्षय्ये
ति विशेषेण संकोचः व्याप्तेरपि व्यभिचारणाभावात् कार्यमिति वचनानुरोधात् चातुर्मास्यफलातिरिक्तत्वेन संकोच इति वा
च्यं अद्वैतश्रुतेः संकोचापत्तेरित्यलं विस्तरेण अथ कामादिवर्जनं तत्र कामस्वरूपमाह हारीतः स इष्टलक्षणेनेकवि
धः कामो येनाभिभूतः अतस्मिन् वस्तुनि कामानां लोको ह्यनेन जन्मसंसारकामावर्ते निमज्जति स एषोऽनलः कामः कामो हि भ
गवान् वैश्वानर इति श्रुतेः महाभारते हृदि कामद्रुमश्चित्रो मोहसंचयसंभवः क्रोधमानमहास्कंधो विधित्सापरिगाह
तः तस्य चाज्ञानमाधारः प्रमादः परिषेचनं अभ्यसूयापलाशो हि पूर्वदुष्कृतसारवान् संमोहस्कंधविटपः शोकशाखा
भयंकरः मोहनीभिः पिपासाभिर्लताभिः परिवेष्टितः तस्यानुत्तायमूलस्य मूलमन्युद्धरेद्बलात् त्या गाप्रमादतीक्ष्णेन ॥८६
सौम्येन परमासिना सौम्येन शांतिरूपेण हारीतः संकल्पात्कामः संभवति आशायाश्च प्रवर्धते स्नेहाग्निरिव भाति तच्छा
करणप्रकारमाह स एव तस्यासंकल्पो नियमनं महाभारते सर्वे योगा येन कामस्य क्रोधस्य च विनिग्रहः कार्यः श्रेयोऽर्थिनातौ
हि श्रेयोविघातार्थमुद्यतौ साधकाधुक कामानां चेत् लभ्यं किं न वांछसि मधुपत्रयसि दुर्बुद्धे प्रपातं किं न पश्यसि य यत्तत्य

---

जति कामानां तत्सुखस्यातिपूर्यति कामानुसारी पुरुषः कामाननुविनश्यति यः कामानाप्नुयात्सर्वान् यश्चैतान् केव
लान् त्यजेत् प्रापणात् सर्वकामानां परित्यागो विशिष्यते मार्कंडेयपुराणे कामः सर्वात्मना हेयो हातुं चेच्छक्यते न शक्य
तो मुमुक्षा प्रति कर्तव्यः सा वै तस्यापि भेषजं अथ क्रोधत्यागः तत्र क्रोधस्वरूपमाह हारीतः क्रोधो हि तमोरूप इति तमो
गुणाधिक्येन प्रज्वलनात्मकोंतःकरणवृत्तिविशेष इत्यर्थः तथा क्रोधाग्निनाभिभूतः स्वेषामप्यब डामतो नानुगमनी
यो विश्वसनीयश्च भवति कार्याकार्यवाच्यावाच्यानि न वितर्कयति हितवादिनो गुरूनप्यतिक्रामत्यत्याविष्टः प्रेतलो
कायात्मानं नयति तत्र घोरं निरयप्रायां यातनामनुभवन् क्रूरक्रव्यादासु तिर्यक्योनिषु जायते तत्र सर्वासां प्रजानां
वध्यो भवति क्रमान्मनुष्यतां प्राप्य सर्वजनविद्विष्टतामुपैति क्रोधनिरोधसाधनमाह स एव तस्य क्षमा नियमनं वि
ष्णुपुराणे मूढानामेव भवति क्रोधो ज्ञानवतां कुतः हन्यते तात कः केन यतः स्वकृतभुक् पुमान् महाभारते न पंडि
तः क्रुध्यति नाभिपद्यते न वापि संसीदति न प्रहृष्यति न चाति कृच्छ्रव्यसनेषु शोचति स्थितः प्रकृत्या हिमवानिवाचलः
धन्यास्ते पुरुषव्याघ्रा ये बुद्ध्या कोपमुत्थितं निरुंधंति महात्मानो दीप्तमग्निमिवांभसा कामक्रोधयोर्निदानं विदित्वा मू
लोच्छेद एव यतनीय इति ज्ञापयितुं तत्प्रतीकारः श्रीभगवद्गीतासु अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः अनि
च्छन्नपि वार्ष्णेय बलादिव नियोजितः श्रीभगवानुवाच काम एष क्रोध एष रजोगुणसमुद्भवः महाशनो महापाप्मा

Indira Gandhi National Centre for the Arts

॥मो०ध०॥ विशेषेणेह वैरिणं धूमेनाव्रीयते वह्निर्यथादर्शो मलेन च यथोल्वेनावृतो गर्भस्तथा तेनेदमावृतं आवृतं ज्ञानमेते
न ज्ञानिनो नित्यवैरिणा कामरूपेण कौंतेय दुःपूरेणानलेन च इंद्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते एतैर्विमोह
॥ ८७ ॥ यत्येष ज्ञानमावृत्य देहिनं तस्मात्त्वमिंद्रियाण्यादौ नियम्य भरतर्षभ पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनं अ
थ लोभवर्जनं महाभारते एको लोभो महाग्राहो लोभात्पापं प्रजायते ततः पापादधः प्राप्तिस्ततो दुःखं प्रपद्यते पा
पानां विधयो विष्ठानं लोभमेकं नराधिप लोभात्पापानि कुर्वंति स्वविदो येपि मानवाः क्रोधो लोभश्च निंदा च पैशु
न्यमत्सरं तथा एवमेतानि राजेंद्र लुब्धानामकृतात्मनां असंतोषोऽसुखायैव लोभादिंद्रियविभ्रमः ततोस्य नश्यते
प्रज्ञा विद्येवाभ्यासवर्जिता देवलः अथातः पापदोषान्मनोवाक्कायशारीरजानव्याख्यास्यामः तत्र मोहरागद्वेषमाने
लोभमदशोकमत्सराहंकारभयहर्षमोघचिंताश्चेति द्वादशमानसाः तेषां च त्रिविधो मोहसंभवः सर्वपाप्मना अज्ञा
नं संशयज्ञानं मिथ्याज्ञानमिति त्रिकं अज्ञानादिस्वरूपमाह रावाविज्ञानं सर्वविषाणामर्थानां स्वयमूहनं दोषैर
थर्षणं चेति ज्ञानमज्ञानमन्यथा अश्रेयःश्रेयसोर्भेदेऽप्रमाणं संशयो भवेत् मिथ्याज्ञानमिति प्राक् रहिते हितदर्शनं ॥ ८७ ॥
वत्यधर्मादिज्ञानमविद्यातश्च संशयः अभ्यासमन्यथाज्ञानं पापिष्ठमुपजायते अज्ञानाद्दुःखसंप्राप्तिः संशयाद्ध्यते
पुनः मिथ्याज्ञानात्पतत्येव मूढस्तामिस्रयोनिषु आवृता विषयाः सर्वे दोषैर्देवि यथा तनुः गुणतो हृदितानकृत्वा रागो

रागस्य लक्षणं दृष्टानुविविधयानुगुणतः स्वरससुंदरतामभिनीय यो रागस्तेषु सरागपदेनोच्यत इत्यर्थः स संनि
षदिज्ञानात्संकल्पादभिमानतः सुखाच्च जायते रागो विषयेषु शरीरिणां ज्ञानाद्वेषादसामर्थ्यात्क्लेशादन्यप्रसं
गतः वियोगात्कालतः शोकात्धर्माच्च विनिवर्त्तते निवर्त्तते चेद्रागोयं पुंसो द्वेषादिहेतुभिः भूय उत्पद्यते पश्चात् ज्ञा
नान्नश्यति केवलं अथ द्वेषवर्जनं तत्र द्वेषस्वरूपं सविभागमाह स एव अतिप्रसक्तोऽभीतेषु रागो भवति दोषकृत् पर
स्त्रीषु परस्वेषु द्वेषप्रार्थनयापि च रागो मर्षोभ्यसूया च द्रोहो मिथ्यावितर्कितं दुःखार्हं चेति दोषज्ञैर्द्वेषः षोढाभिधीयते यो
कस्मात् हृदये जंतोः समुत्तिष्ठति वैकृतः परानिष्टचिकीर्षायाः स रोष इति कीर्तितः पुराभावसमुत्थेन दोषेणैवाभिदे
शितः किंचिदृष्टैव यो द्वेषस्तदमर्षस्य लक्षणं परस्य दृष्ट्वा श्रुत्वा वा स्वगुणान्यधिकान्गुणान् नाभिनंदति यो द्वेषात्सा
भ्यसूयेत्युदाहृता सुहृदामपि यो नित्यमर्थानभिजिघांसति असौ द्रोह इति पापस्तदाक्षर्दैहिलक्षणं यः साधूनपदो
षांश्च मन्यते दोषकारिणः मिथ्यावितर्कितं चेति तदाक्षर्भवदोषकं लोभाद्वेषाच्च संकल्प्यवितथं पापकर्मणां दुःखार्हमिति
विज्ञेयं पूर्वदुष्कृतसंभवं दुःखाभिघातभेदाच्च द्वेषोयं षड्विधो भवेत् तन्निवृत्युपायमाह स एवाज्ञानात्कालात्ययाद्धर्मा
त[illegible]प्रीतेश्चापि निवर्त्तते विष्णुपुराणे तावन्मयेणाभिहितं पदेतदखिलं जगत् तदाशोच्येषु भूतेषु द्वेषं प्राज्ञः करोति कः अ
त्यभ्रशाणि भूतानि हीनशक्तिरहं परां मुदं तथापि कुर्वीत हानिर्द्वेषफलं यतः सर्वभूतात्मकता तज्जगन्नाथे जगन्मये पर

Indira Gandhi National Centre for the Arts

मात्मनिर्गोविंदे मित्रामित्रकथाकुतः अतत्वग्रहणंतापो देवपृथुर्ज्ञानिसंप्लवः स्वेदोद्विरोगः पारुष्यंत्रासश्च द्वेषदोषजाः अ
यमानस्वरूपं सएव सर्वज्ञोत्कृष्टमात्मानं सर्वेभ्योयोभिमन्यते समानइतिविज्ञेयोपथेष्टस्य ष्टाकुक्रियः अथतृष्णास्व
रूपमाह सएव परार्थपरत्नोगांश्चपरसामर्थ्यमेव च दृष्ट्वाश्रुत्वाचयातृष्णाजायते लोभएवसः नास्तितृष्णासमंदुःखंना
स्तित्यागसमंसुखं तस्मात्तुलोभसंज्ञांतां तृष्णांविज्ञाय परित्यजेत् पापापिमेदिनीकृत्स्नांतृष्णानाशयश्चाम्यतिविवर्द्ध
तेहियथोपिसाग्निरेवविवास्मोः दुःखादित्वाद् रंतत्वात् दुर्मेधत्वात् दत्ततितः पश्चात्वोकाव दत्वाश्चनकश्चिछ्येयसे
तृषा हृद्दह्यातातपः कस्तृष्णांत्यजमधेदीगैर्दीर्घेरुत्तरलोचनां युरोदीर्घापदन्यात्तेचायांसायंतनीमिव विस्तधुरा
ऌमनोरथानांनसमाप्तिरस्तिवर्षायुतेनाथवाब्दलक्षैः पूर्णेषुपूर्णेषुपुनर्नराणांमुदेतिसंघश्चमनोरथानां पश्चा
गताः यौवनिनश्चजातादारैश्चसंयोगमिताःप्रसूताः दृष्टासुतास्तत्तनयेषुसूतिं दृष्टुंपुनर्वाञ्छतिमेतरात्मा इद्या
मितेषामपिचेत्यसूतिंमनोरथोमेभविताततोन्यः पूर्णोपितत्राथपरस्पजन्मनिवार्यतेकेनमनोरथस्यच आमृत्युतो
नैवमनोरथानामंतोस्तिविज्ञानमिदमभाय मनोरथासक्तियरस्यचित्तंनजायतेवैपरमार्थसंज्ञं पूर्णेवर्षसहस्रंमेवि ॥८८॥
षयासक्तचेतसः तथाप्यनुदिनंतृष्णाममैतेष्वेवजायते तस्मादेतामहंत्यक्त्वाब्रह्मण्याध्यायमानसं निर्द्वंद्वोनिर्ममोभू
त्वाचरिष्यामिमृगैः सह महामात्रारते तस्माहिसर्वपापिष्ठानित्योद्वेगकरीमता अधर्मबहुलाचैवघोरापापानुबंधिती

आसन्नानपरतोभावान्दत्तचित्वापदेपदे भोगोहरितवुध्येवहरंनीतोस्मितृष्णया यौवनंजरयाग्रस्तंमारोगंयव्या
धिभिर्हतं जीवितंमृत्युराग्न्येतितृष्णैकानिरुपद्रवा जीर्यंतिजीर्यतः केशादंताजीर्यंतिजीर्यतः जीर्यतिजीर्यतःस
र्दंतश्रोत्रानतुजीर्यते जीर्यतःहृदस्यएवंहितृष्णाचित्तेनवर्द्धमानेनवर्द्धते अकर्तव्येषुसाध्वीवतृष्णाप्रेरयतेनरंतेमेव
सर्वपायेभ्योलज्जामातेवरक्षति अकृतस्यागमोनास्तिकृतेनाशोनविद्यते अकस्मादेवलोकोयंतृष्णादासीकृतस्तया
अकृतस्यभोजकादृष्टासंपादनेनप्राप्तुमयोग्यस्यविषयादेः कृतेअदृष्टादिसामग्रीसंपादनेनप्राप्तस्यनाशाः ज्ञेष
ः कालात्पूर्वमेव तथ तृष्णाखनिरगाधेयंदुःपूराकेनपूर्यते पामहद्भिरपिद्विती: पूरणैरवखन्यते पूरकैः विषया
नोगलक्षणवस्तुभिः अवखन्यतेखननेनेवगर्त्तःप्रभवति एवमन्योगर्त्तः पूरकैः पूर्णोभवतितृष्णातुपूरकैर्विष
यैरधिकेवभवति तथा सुखंनिराशाः स्वपितिनैराश्यंपरमंसुखं आशांनिराशातःकृत्वासुखंस्वपितिपिंगलासा
र्वसंपदस्तस्यसंतुष्टंयस्यमानसां उपानगूढपादस्यननुचर्मावृतैवभूः एतस्यसर्वभूस्वर्मावृतेव केवलपदानु
वस्यचर्माभावात् अंतोनास्तिपिपासायाः संतोषः परमंसुखं तस्मात्संतोषयेवेह धनमिच्छंतिपंडिताः यतइयिवांवी
हियवंहिरण्यंपशवस्त्रियः नालमेकस्यतत्सर्वमितिमत्वाशमंव्रजेत् नालमेकस्येत्यलंशब्दः पर्याप्तौ मदस्वरूपमा
हदेवलः कुलवुद्धिवपुर्विद्याविरैश्वर्यविभूतिभिः स्वैरेतैर्बधितेयोन्यंतन्मदस्येहलक्षणं देवासुरमनुष्याणामुत्ति

Indira Gandhi National
Centre for the Arts

॥ मोक्षध० ॥ त्मामदहेतवः मदेनैव विनेशुस्तेतस्मात्याज्योमदो बुधैः उद्रिक्ताः पूर्वोक्तकुलश्रुध्यादयः हर्षास्तेकावलेपाश्च दंभोदर्पोथग
र्विता अन्येचतेद्विधाभावास्तेमदस्यविकल्पजाः अनिष्टयोगजाद्द्वेषात्स्नेहादिष्टवियोगजात क्लेशाद्वा हृदियद्दुःखंस
८७ शोकइतियद्यते अनित्याः सर्वभावाश्चेच्छोकस्तत्रनिरर्थकः अथवायदिनित्यास्युस्तुकुतः शोकः प्रवर्त्तते शोकनिदानंत
चैव नैवंहिशोचेत्तत्वस्यस्तामसोवापिकेवलं शोकाद्दुःखमवाप्नोतिसमासेनेह रागतः नैवंहिशोचेदितिएवमुक्त
प्रकारेणपर्यालोचयन्नशोचत असौतामसोपितमोगुणाभिभूतोविमोहाकुलतयाज्ञानशून्यत्वा तन दुःखमाप्नोति
वापिशब्दोऽनास्थायां रागतः रजोगुणप्रभूतविषयाभिलाषेण अन्वयव्यतिरेकेणरजसएवदुःखहेतुत्वेनशोका
निदानतयादुःखमाप्नोतीत्यर्थः महाभारते यदिमेपश्यतः कालोभूतानिनिविनाशयेत स्यान्मेहर्षश्चशोकश्चक्रोधश्चै
वशाश्वते भूतानांनिधनेदृष्ट्वासीतसामिवसागरेनैतत्सम्यक्विजानंतोनवाप्नुवंतिवज्रभृक नाहंकर्त्तानकर्त्तात्वंक
र्त्तायस्तुसदाप्रभुः सोयंपचतिमांकालोवृक्षेफलमिवागतं दग्धमेवानुदहतिहतमेवानुहन्यते नश्यतेनष्टमेवाथलब्ध
व्यंलभतेनरः बुद्धिमंतंकृतप्रज्ञंशुश्रूषुमनसूयकं दांतंजितेंद्रियंवापिशोकोनस्पृशतेनरांबुद्धिमंतंचमूढंचशूरंभीरुं ॥ ८७ ॥
कविंजडं दुर्बलंबलवंतंचभाव्यंभोजजतेनरांदेवलः इदंममेतियः स्वाम्यमात्मनोर्थेष्वभिमन्यते अजानन्तदनित्यत्व
ममत्वमितितद्विदुः अहमित्यभिमानेनयः क्रियासुप्रवर्त्तते कार्यकारणयुक्तस्तु तदहंकारलक्षणं अहंकारममता

भ्यांबध्यंते सर्वदेहिनः संसारविनियोगेभ्युतान्यांमुक्तस्तमुच्यते मार्कंडेयपुराणे यस्मिन्यस्मिन्ममत्वेनसंवित
पुंसः प्रजायते ततः स्तेतसमादायदुःखान्येवप्रयच्छति संवितदुःखरूपविषयेभ्यः सकाशात्दुःखानिगृहीत्वाम
मतायुक्तेभ्यः प्रयच्छतीत्यर्थः मार्जारभक्षितेदुःखंयादृशंजलकुक्कुटेनतादृकममताशून्येकलविंकेथमूषके क
लविंकेभटके महाभारते नात्यक्त्वासुखमाप्नोतिनात्यक्त्वाविंदतेपदं नात्यक्त्वाचाभयः शेतेत्यक्त्वासर्वंसुखीभव
हतोदेहः पुरंदग्धंप्रधानंकुंजरोहतः लोकसाधारणेष्वेषुमिथ्याज्ञानेनतप्यते प्रत्यूषपटहोराज्ञसमान्यः पुरवा
सिभिः ममेदमितियोभावस्तस्यसमीतिकारकः अपिचभवतिमैथिलेनगीतंनगरमुपाहितमग्निनाभिवीक्ष्यमम
नखलुतुषोपिदह्यतेस्मिन्स्वयमिदमाहकिलस्मभूमिपालः अनंतंबतमेवित्तंपश्यमेनास्तिकिंचनमिथिलायांप्र
दीप्तायांनमेचकिंनदह्यते स्वात्माविचार्यंनमम सर्वावापृथिवीमम यथाममतथान्येषामितिमत्वानमेव्यथा एषज्ञस्तप
विष्टोहंगृहेमेशीतमिवहृदं शीस्वामिपरिनिर्वाणिस्कखमासचकेवल धेनुर्वत्सस्यगोपस्यस्वामिनस्तस्करस्यच पया
विवतियस्तस्याधेनुस्तस्येतिनिश्चयः एवंचममताभिमानेनस्वामिनोमदीयेतिदृष्टाश्चमद्दृत्यर्थः देवलः अयैहंममेतिचा
त्मायंसंसारेपरिवर्त्तते नाहकस्यचिन्नमेकश्चिदितिपश्यन्नबध्यते विष्णुपुराणे अहंममेत्यविद्येयंव्यवहारस्तथानय
परमार्थस्त्वसंलाप्योगोचरेवचसांनसः अविद्यातरुसंभूतिवीजमेतद्विधास्थिति पंचभूतात्मकेदेहेदेहीमोहतमोवृतः

Indira Gandhi National
Centre for the Arts

॥मोक्ष०॥ अहमेतदितीत्युच्चैः कुरुते कुमतिर्मतिं अकाशवाय्वग्निजलपृथिवीभ्यः पृथक्स्थिते आत्मन्यात्ममयं भावं कः करो
तिकलेवरे कलेवरो यस्मिन्गेयं हि गृहक्षेत्रादिकं च कः अदेहेचात्मनि प्राज्ञो ममेदमिति मन्यते अदेहेचात्मनि स्थितइत्य
॥ ९०॥ नुकर्षः आत्मनो देहादन्यत्वनिश्चये देहसंबंधि गृहक्षेत्रादौ मदीयत्वमात्मीयत्वं प्राज्ञो न कोपि जानातीत्यर्थः एवमग्रेपि
इत्थं च पुत्रपौत्रादौ तद्देहोत्पादिते तु कः करोति पंडितः स्वाम्यमनात्मनि कलेवरे सर्वदेहोपभोगाय कुरुते कर्म मानवः
देहं चान्यद्यदा पुंसस्तदा बंधाय तत्परं देहमिति लिंगमात्रं देहस्यान्यत्वनिश्चये सति कर्म बंधाय न भवतीत्यर्थः यद्वा देहो
होपभोगाय क्रीयमाणं कर्म कालेनांतरीयकमन्यत् कर्मांतरं देहं च कुरुते देहांतरमारभते तत्परं बंधाय भवति तस्माद्देह
संबंधिषु ममता न कार्येत्यर्थः मन्मयं हि यथा गेहं लिप्यते वै मृदंभसा पार्थिवोयं तथा देहो मृदंभालेपनसंस्थितिः पंचभूता
त्मकैर्भोगैः पंचभूतात्मकं वपुः आप्याय्यते यदि ततः पुंसो गर्वोत्र किं कृतः देवलः आत्मबाधाकरं श्रुत्वा हृष्ट्वा वा पत्युपस्थि
तं उद्वेगो जायते यस्य हृदये तन्न यं स्मृतं तावन्न यस्य भेतव्यं यावन्न यमनागतं आगतं तु भयं दृष्ट्वा प्रहर्तव्यमभीतवत् न
वितव्यं न भवत्येव नास्ति कर्मव्यतिक्रमः इत्येवं दृष्टतत्त्वानां न कश्चिज्जायते भयं आत्मनोभ्युदयं दृष्ट्वा परस्य व्यसनानि दृष्ट्वा ॥९०॥
नंदो मानसो जातो हर्ष इत्यभिधीयते सर्वद्रव्येषु नित्येषु क्षणिकेषु धनेषु च न हर्षस्यावकाशोस्ति हि मत्त्रयं यदि पश्यसि द्र
व्यमनित्यं वा पश्य मिनित्यत्वेनित्यप्राप्तत्वान्न हर्षः अनित्यत्वे चावश्यं भाविनाशवत्त्वात्तत्प्राप्य हर्षो न कर्तव्य इत्यर्थः माध्र

स्थ्यमपि दोषाय परेषां व्यसनागमे किंतु नर्मदिना वेनप्रमोदः परविद्वेषे मोघचिंतामाह स एव प्राह यथा चिंत
यन्नर्थान्मनसा परस्परान् मोघचिंतेति तामाक्षः स्वधर्मकर्मोपघातिनां अपरस्परान् सातत्येन परस्परविवे
करहितान् अर्थविषयध्यानपरंपरा वा नितियावद्विकल्पतरुः भोगैश्वर्यधनीदीनि लोभाद्यः संस्मरेद्बुधा
समोघचिंतया तस्मान्नंदं तिबुद्धिं च कर्म च तस्माद्धिद्वरगां चिंतां त्यक्त्वा सोकं च कर्मजं आरभेत घुवं कर्म भद्रि
वंयाणं च सर्वज्ञः रागसंकल्पजान्ग्रंथीन्हृदयेषु हृदार्पितान् उच्छिंद्येता — मेधावी तत्त्वज्ञानातिनाद्भुतं
आत्मदोषक्षयोपायमनित्याभेध्यतां च नोः हितं च सर्वभूतानां चिंतयेन्मनसा सकृत् एते मनोभवा दोषाश्च
दग्धाग्निवद्धेतवः मोहादयः समारब्धा ता देवासुरविमोहनाः सत्संगात्मनसो गुप्ते ज्ञानधर्मप्रसंगतः त्या
गाच्च व्यसनादीनां हानीर्गच्छंति मानसाः अप्रकाशाकरो बुद्धिः तमसा हृत्य सर्वतः प्रथमं जायते मोहो देहि
नां हृदि पाप्मजः मोहाद्रुत्पद्यते रागो रागाद्द्वेषः प्रवर्तते त्रिभिरेतैर्नवन्येव पापं शारीरवाङ्मयं तस्माच्छरीरः
सर्वेषु मानसेषु पितत्रयं सर्वान्दोषानुपरित्यक्तुं चीनेतान्प्रथमं त्यजेत् श्रीभगवद्गीतासु ध्यायतो विष
यान्पुंसः संगस्तेषूपजायते संगात्संजायते कामः कामात्क्रोधोभिजायते क्रोधाद्भवति संमोहः संमोहात्स्मृ
तिविभ्रमः स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति महाभारते एकशत्रुर्न द्वितीयोस्ति कश्चित् अज्ञा

Indira Gandhi National
Centre for the Arts

॥मोक्षध०॥ नतुल्यः पुरुषस्य राजन् येनावृतः कुरुते संप्रमत्तो घोराणि कर्माणि सुदारुणानि रागो द्वेषः काममोहौ पापा
॥९२॥ नांचैव याक्रिया विचिकित्सा क्रोधमानौ दंभो सूयामदस्तथा क्रौर्यं हिंसा च मात्सर्यं कुत्सा तंद्रा तथैव च अज्ञा
नमेतन्निर्दिष्टं तस्मान्मोह्योयसेचनं क्षम याक्रोधमुच्छिंद्यात् कामं संकल्पवर्जनात् सत्वसंसेवनाद्धीरो निद्रा
मुच्छेत्तुमर्हति अप्रमादाद्भयं रक्षेत् स्वासं रक्षेत्क्षज्ञसेवनात् इच्छां द्वेषं च कामं च धैर्येण विनिवर्त्तयेत् भ्रमं प्रमो
हमावर्त्तमभ्यासाद्विनिवर्त्तयेत् निद्रां च प्रतिभां चैव ज्ञानाभ्यासेन तत्ववित् उपद्रवांस्तथा रोगान्हित
जीर्णमिताशनात् लोभं मोहं च संतोषाद्विषयास्तत्वदर्शनात् अनुक्रोशादधर्मं च जयेद्धर्ममुपेक्षया आय
त्याच जयेदाशां द्वन्नं संगविवर्जनात् अनित्यत्वेन च स्नेहं क्षुधं योगेन पंडितः कारुण्येनात्मनो मानं तृष्णां च
परितोषतः उत्थानेन जयेत्तंद्रीं वितर्कं निश्चयाज्जयेत् मौनेन बहुभाष्यं च शौर्येण च भयं त्यजेत् सत्वसंसेव
नात् सात्विकाहारसेवनात् दोषइशीलनात् योगाभ्यासात् प्राणायामादिति विद्यासागरः भ्रमं प्राणायामा
दिजनितं मोहं धीयवस्त्वनन्यथाज्ञानं आवर्त्तः धीयवस्तुनि मनसो नवस्थानं प्रतिभा ध्यानवेलायां वाह्यस्मृतिः ॥९२॥
ज्ञानाभ्यासेन परमात्मपरिचयेन उपद्रवान् आलस्यादीन् अधर्मं हिंसां अनुक्रोशात् कारुण्यात् उपेक्षया
फलापेक्षया धर्मकाम्यं आयत्या उदर्कापेक्षया आशां मनोरथं तथा द्रव्येषु समतीतेषु येगुणास्तान चिंता-

येत् ताननाद्रियमाणस्तत्स्नेहबंधाद्विमुच्यते दोषदर्शी भवेत्तत्र यत्र रागः प्रवर्त्तते अनिष्टं वर्द्धितं पश्येद्यथा
क्षिप्रं विमुच्यते दोषो यथा ते शारीरे मानसे वाप्युपस्थिते यस्मिन्नशक्यते कर्तुं यत्नस्तत्स्तान् विवर्जयेत् भैषज्य
मेतद्दुःखस्य यदेतन्नानुचिंत्यते चिंत्यमानं हि नात्येति भूयश्चापि प्रवर्त्तते प्रज्ञया मानसं दुःखं हन्याच्छारीरमो
षधैः एतद्विज्ञानसामर्थ्यं न बालैः समतामियात् बालैः अज्ञैः तन्मानसं दुःखं ज्ञानी न प्राप्नुयादित्यर्थः तथा यम
र्यसिद्धिः परमान्हर्षयेत् तथैव कालव्यसनं न मोहयेत् सुखं च दुःखं च तथैव मध्यमं निषेवते यः स धुरंधरो नरः
यां यामवस्थां पुरुषोऽधिगच्छेत्तस्यां वसेतापरितप्यमानः एवं प्रवृद्धं प्रणुदेन्मनस्त्वं संतापकं वा सकरं शरीरे धृ-
त्या शिश्नोदरं रक्षेत्पाणिपादं च चक्षुषा चक्षुःश्रोत्रे च मनसा मनो वाचं च विद्यया निद्रा सर्वात्मना त्याज्या स्वप्नदो
षान्वेदयन् स्वप्ने हि रजसा देही तमसा चाभिभूयते अर्थेंद्रियाश्रयः तत्र मनुः इंद्रियाणां विचरतां विषयेष्वप
हारिषु संयमे यत्नमातिष्ठेद्विद्वान्यंतेव वाजिनां इंद्रियाणां प्रसंगेन दोषमृच्छत्यसंशयः संनियम्य तु तान्येव ततः
सिद्धिं नियच्छति न जातु कामः कामानामुपभोगेन शाम्यति हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते न तथैतानि शक्यं
ते संनियंतुमसेवया विषयेषु प्रदुष्टानि यथा ज्ञानेन नित्यशः श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रात्वा च यो नरः न हृष्य-
ति ग्लायति वा स विज्ञेयो जितेंद्रियः इंद्रियाणां तु सर्वेषां यद्येकं क्षरतींद्रियं तेनास्य क्षरति प्रज्ञा दृतेः पादादिवोद

Indira Gandhi National
Centre for the Arts

॥मोक्ष९०॥ कं कामोभिलाषः कामानां विषयाणां शब्दादीनां इतिर्निरस्त्र महाभारते नस्वल्पेथरसज्ञस्य कामः क्वचनजायते
श्रवणदर्शनाद्वापि स्पर्शनाद्वापि जायते अरसज्ञस्य तज्जन्यसुखानभिज्ञस्य तथा श्रीभगवद्गीतायां विषया विनि
॥८३॥ वर्तंते निराहारस्य देहिनः रसवर्जं रसोप्यस्य परं दृष्ट्वा निवर्तते यततो ह्यपि कौंतेय पुरुषस्य विपश्चितः इंद्रिया
णि प्रमाथीनि हरंति प्रसभं मनः तानि सर्वाणि संयम्य युक्त आसीत मत्परः वशे हि यस्येंद्रियाणि तस्य प्रज्ञा प्रतिष्ठि
ता रागद्वेषविमुक्तैस्तु विषयानिंद्रियैश्चरन् आत्मवश्यैर्विधेयात्मा प्रसा इति श्रीमत्सकलसामंतचक्रचूडाम
णिमरीचिमंजरी नीराजितचरणकमल श्रीमन्महाराजाधिराजप्रतापरुद्रतनूज श्रीमहाराजमधुकरसाह
सूनुचतुरुदधिवलयवसुंधराहृदयपुंडरीकविकासदिनकर श्रीमन्महाराजाधिराज श्रीवीरसिंहदेवोद्योजित
श्रीहंसपंडितात्मज श्रीपरशुराममिश्रसूनुसकलविद्यापारावारपारीणधुरीणजगद्दारिद्र्यमहागजपारींद्रवि
द्वज्जनजीवातुश्रीमन्मित्रमिश्रकृते वीरमित्रोदयाभिधनिबंधे मोक्षप्रकाशे वैराग्यपेत्त्ववः दमधिगच्छति प्रसादे स
र्वदुःखानां हानिरस्योपजायते प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते इंद्रियाणां विचरतां यन्मनोनुविधीयते ॥८२
तदस्य हरति प्रज्ञां वायुर्नावमिवांभसि रसवर्जमिति रसो राग इति गीताभाष्ये परं दृष्ट्वा परमात्मानं साक्षादव
गम्य विमुक्तोपि मन एव मनुष्याणां कारणं बंधमोक्षयोः बंधस्य विषयासंगि मुक्त्यै निर्विषयं मनः महाभार

ते उद्धरेदात्मनात्मानं नात्मानमवसादयेत आत्मैव ह्यात्मनो बंधुरात्मात्मनस्तस्य येनात्मैवात्मना जितः अ
नात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत जितात्मनः प्रशांतस्य परमात्मा समाहितः शीतोष्णसुखदुःखेषु तथा मा
नापमानयोः आत्मनांतःकरणेन आत्मानं जीवं एवमुक्तं भवति विषयेष्वासक्तस्य मनसः शत्रुत्वं विषयासंगर
हितस्य तु तस्यैव हितकारित्वान्मित्रत्वं अथ तत्पदार्थनिरूपणं तत्र श्रुतौ तत्त्वमसीति महावाक्ये क्षेत्रज्ञं चापि
मां विद्धीति स्मृतौ च तदस्मत्पदार्थस्येश्वरस्य युष्मत्क्षेत्रज्ञपदार्थस्य जीवस्य चाभेदः प्रतिपाद्यते तस्मादेव च
वाक्याद्द्वैतब्रह्मसाक्षात्काररूपाया वृत्तेरुत्पत्तिः तत्र शुद्धये स्तत्त्वंपदार्थयोरभेदो भवति तत्र तत्पदा-
र्थस्येश्वरचैतन्यस्य विवेकाय तटस्थस्वरूपलक्षणे उच्येते तत्र यतः सर्वाणि भूतानि भवंत्यादियुगागमे
यस्मिंश्च प्रलयं यांति पुनरेव युगक्षये तस्य लोकप्रधानस्य जगन्नाथस्य भूपते इति महाभारतीयवचनेन
कृअहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथेति भगवद्वचसा यतो वा इमानि भूतानि जायंते येन जातानि जी
वंति यत्प्रयंत्यभिसंविशंति तद्विजिज्ञासस्व तद्ब्रह्मेति श्रुत्या जन्माद्यस्य यत इति न्यायेन च जगज्ज
न्मादिकारणत्वं ब्रह्मणो लक्षणमुक्तं भवति एकैकस्य लक्षणत्वे कर्तृत्वं प्रतियात्मकत्वं नानात्मकत्वं वा स्यान्न
तूपादानत्वं श्रूयते च तथा घटादेरपि मृदादिवैवोत्पत्तिस्थितिलया दृष्टाः तस्माज्जगदुपादानत्वमेव लक्षण

Indira Gandhi National Centre for the Arts

॥मो॰ह॰१०॥ यद्यपि कूटस्थमचलं ध्रुवमित्यादिना निर्विकारत्वावगमेन मया ततमिदं सर्वं जगदव्यक्तमूर्त्तिना मत्स्थानि स-
र्वभूतानि न चाहं तेष्ववस्थित इति भगवद्वचसा संगत्वावगमेन जगदुपादानत्वमनुपपन्नं तथापि परिणामु-
॥८३॥ पादानत्वे दुग्धादिवद्विकारित्वसंगित्वदोषप्रसंगो न तु विवर्त्तोपादानत्वे अज्ञानशबलिताया रज्जोः सर्पो-
पादानत्वमिवाज्ञानपदवाच्यमायाशबलितस्य ब्रह्मणोऽपि प्रपंचोपादानत्वं प्रपंचे सत्ताजाड्यरूपोभयधर्मो-
पलब्धेः भगवद्गीतायामपि सर्वभूतानि कौंतेय प्रकृतिं यांति मामिकां कल्पक्षये पुनस्तानि कल्पादौ विसृजा-
म्यहं प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् मामिकां मदधिष्ठितां
मच्छक्तित्वेन कल्पितामिति वा कल्पक्षये प्रलये स्वां प्रकृतिं स्वस्मिन् कल्पितां मायाख्यामज्ञानरूपामनिर्व-
चनीयामवष्टभ्य स्वसत्तास्फूर्त्तिभ्यां दृढीकृत्य प्रकृतेर्वशात् चिदंशावरणविक्षेपात्मकाविद्यामायापदवा-
च्यशक्तिद्वयवशात् अत्र केचित् यत इति ब्रह्मण एव प्रकृतत्वात्तस्यैवोपादानत्वं न तु मायायाः तस्याः सहका-
रत्वमिति वदंति अन्ये तु प्रकृतिं यांति मामिकामिति गीतावचनेन मायाया एवोपादानत्वं प्रधानं पुरुषं चाप्य- ॥८३॥
पि विश्य स्वेच्छया हरिः क्षोभयामासेति विष्णुपुराणवचसो बोधकत्वमेव ब्रह्मण इति प्राहुः वस्तुतस्तु प्रकृ-
तिं स्वामवष्टभ्य विसृजामीति भगवद्वाक्येन विवर्त्तपरिणामस्युपादानत्वं ब्रह्ममाययो रज्ज्वज्ञानयोरिवेति

तत्त्वं मायाज्ञानपदयोः पर्यायत्वं मायाज्ञानपदयोः पर्यायत्वं मायाया अनिर्वाच्यत्वं चोक्तं नारदीये नासद्रूपा
न सद्रूपा माया नैवोभयात्मिका अनिर्वाच्या ततो ज्ञेया भेदबुद्धिप्रदायिनी मायैवाज्ञानशब्देन बोध्यते श्रुतिस-
म्मा: इयमेव च चिन्मात्राश्रिता तद्विषयिणी च भेदबुद्धौ हेतुः तदुक्तं तत्रैव मायिनो माययाभेदं पश्यंति परमा-
त्मनि तथयोः सोऽज्ञो ह्यपि परमोऽहंकारेण संयुतः देहीति प्रोच्यते भूतैरज्ञो ज्ञानं हि वेदनं मायिनो जीवाः अहंका-
रेण प्रथमेन मायाकार्येण अहमिति प्रथमो भास इति संप्रदायविदः मोहरूपाविद्यापर्वकार्यमहंकारः पंचभू-
तात्मके देहे देही मोहतमोवृतः अहमेतदितीत्युच्चैः कुरुते कुमतिर्मतिमिति विष्णुपुराणादित्यपि केचित् न च ये मा-
यया भेदं पश्यंति ते जीवाः जीवत्वे सति भेदसिद्धिरित्यन्योन्याश्रय इति वाच्यं भेदजीवमाययानामनादित्वात् भ-
दो प्रकृतिं पुरुषं चैव विध्यनादी उभावपीति गीतोक्तेः इयमेव च ब्रह्मण अध्यस्तद्वैतप्रपंचस्फूर्त्तिहेतुरविद्येत्यु-
च्यते तदुक्तं नारदीये तस्य शक्तिः परा विष्णोर्जगत्कार्यपरिश्रमा भावाभावस्वरूपा सा विद्याविद्येति गीयते य-
दा विश्वं महाविष्णोर्भिन्नत्वेन प्रतीयते तदा ह्यविद्या संसिद्धा भवेद्दुःखस्य साधनं अत एव भेदाधिकारिकाणि स-
कलानि शास्त्राण्यविद्यावद्विषयाणीत्युच्यंते ब्रह्माकारांतःकरणरूपा विद्यापीयमेव भावस्वरूपाया अस्या
एव विद्यात्वाभिधानात् तत्स्वरूपमुक्तं तत्रैव ज्ञातृज्ञेयाद्युपाधिस्त्यक्त्वा यदा भवति सत्तम सर्वैकभावना बुद्धिः सा

Indira Gandhi National
Centre for the Arts

विद्येत्यभिधीयते सर्वैकत्वभावनाबुद्धिः सर्वस्य प्रपंचस्यैकब्रह्माधिष्ठानतया बुद्धिः लिंगपुराणेपि आत्माकारेण
॥मोक्ष१०॥ संवित्तिर्बुद्धिर्विद्येति कीर्त्यते अतएव महावाक्यादीनामपि वेदांतवाक्यानां जीवब्रह्मरूपानुवादेन ब्रह्मात्मैक्यबोधकानां
॥९५॥ मविद्याव द्विषयत्वं एतस्या एव पंचपर्वत्वमुक्तं ब्रह्मपुराणे तमोमोहो महामोहस्तामिस्रो ह्यंधसंज्ञितः अविद्या पंच
पर्वैषा प्रादुर्भूता महात्मनः महात्मन ईश्वरात्प्रेरिताया अविद्यायाः पंचपर्वरूपाणि कार्याणि प्रादुर्भूतानीत्यर्थः एता
न्येव पर्वाणि पातंजलैरविद्यास्मिता रागद्वेषाभिनिवेशाः क्लेशा इति सूत्रेण संज्ञांतरेणाभिधीयंते तत्र शरीरे मनुष्यो
हमित्याकारानात्मन्यात्मख्यातिः सर्वक्लेशमूलभूता तमोरूपाविद्येत्युच्यते अनित्याशुचिदुःखानात्मसु नित्यशुचि
सुखात्मख्यातिरिति सूत्रात् बुद्धिपुरुषयोरभेदाभिमानो मोहोस्मितेत्युच्यते दृग्दर्शनशक्त्योरेकात्मतेवास्मिते
ति सूत्रात् साधनरहितस्यापि सर्वं सुखं भूयादिति विपर्ययविशेषो रागइत्युच्यते सुखानुशायी रागइति सूत्रात्
दुःखसाधने विद्यमानेपि किमपि दुःखं मे माभूदिति विपर्ययविशेषस्तामिस्रो द्वेषइत्युच्यते दुःखानुशायी द्वेषइति सू
त्रात् अनित्यैरपि शरीरेंद्रियादिभिर्वियोगो मे माभूदिति सर्वजनीनो मरणत्रासरूपोंधतामिस्रोऽभिनिवेश इत्यु ॥९५॥
च्यते स्वरसवाही विदुषोपि तथारूढ इति सूत्रात् इयमेव संसारमूलनिदानरूपा मूलाज्ञानरूपा च माया सां
ख्यैः प्रकृतिरित्युच्यते मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति वचनात् इयांस्तु विशेषः तस्या जडाया

अपि स्वतंत्रायाः स्वत एव जगत्कारणत्वमिति सांख्याः ईश्वराधिष्ठिताया इत्यौपनिषदाः रचनानुपपत्तेश्च
नानुमानमिति न्यायात् प्रपंचोत्पत्तौ तु प्रकृतेर्महान् महतोऽहंकार इति तस्माद्वा एतस्मादा
त्मन आकाशः संभूत आकाशाद्वायुरिति प्रक्रियाभेदमात्रमिति न कश्चिद्विशेषः तस्मात् चिद्रूपत्वे सति प्रपं
चोपादानत्वं ब्रह्मणो लक्षणं सिद्धं अत्रेदं चिंत्यते किं ताद्रूप्यलक्षणं जीवस्येश्वरस्य वा अत्र केचित् ईश्वरस्य ब्रह्म
ण एव प्रक्रांतत्वात् यत इत्यनेन तस्यैव परामर्शात् शुद्धस्यैवोपादानत्वमित्याहुः तन्न यः सर्वज्ञः सर्वविद्यस्य
ज्ञानमयं तपः तस्मादेतद्ब्रह्म नामरूपमन्नं च जायत इति श्रुत्या तस्य लोकप्रधानस्य जगन्नाथस्य भूत इति
नारतश्च सा च सर्वज्ञत्वादिगुणविशिष्टस्येश्वरस्यैव प्रपंचोपादानत्वावसायात् एवं चैतदीश्वरगतं शाखा
चंद्रन्यायेन तदस्य तटस्थेयं ब्रह्म लक्षयितुं शक्नोतीति तस्यापि लक्षणमित्युच्यते अत्रापि केचित् मायाविद्या
भेदमाश्रित्य वियदादिबाह्यप्रपंचस्य ईश्वराश्रितमायापरिणामत्वात् ईश्वर उपादानं अंतःकरणाद्यांतरप्रपं
चस्य जीवाश्रिताविद्यापरिणामत्वाज्जीव उपादानं घटादेरिदमंशसामानाधिकरण्येनैव भानात् ईश्वरचैतन्यो
पादः सुखादेस्तु अहमंशसामानाधिकरण्येनैव प्रतीतेर्जीवचैतन्य एवाध्यास इति तत्तत्तस्य तस्यैवोपाद
नत्वं यत्तु एतस्माज्जायते प्राणो मनः सर्वेंद्रियाणि च खं वायुर्ज्योतिरापश्च पृथिवी विश्वस्य धारिणीति श्रुत्यैकस्यै

Indira Gandhi National Centre for the Arts

॥मोक्षप्र०॥ वबाह्यांतरोपादानत्वं प्रतिपाद्यते तज्जीवेश्वरयोर्भेदाभिप्रायेणेति वदंति अथेश्वरस्वरूपं चिंत्यते तत्र केचि
त्मूलप्रकृतिं प्रकम्य जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवतीति श्रुत्या शुद्धसत्त्वप्रधाना
॥९५॥ माया मलिनसत्त्वप्रधानाविद्येति भेदं प्रतिपादनात् मायाप्रतिबिंबितं चैतन्यमीश्वरो विद्याप्रतिबिंबितं जीवः
विक्षेपशक्तिर्मायाऽवारणशक्तिरविद्येति मतेपि तथेति वदंति केचित्तु कार्योपाधिरयं जीवः कारणोपाधि
रीश्वर इति श्रुत्या विद्याप्रतिबिंबितं चैतन्यमीश्वरोंतःकरणप्रतिबिंबितं जीवः शुद्धचैतन्यं चेति त्रैविध्यं जी
वईशो विशुद्धा चिदित्यनुसारेण कल्पयंति अन्ये तु चैतन्यचातुर्विध्यं कल्पयंति तत् यथा स्थूलसूक्ष्मदे
हद्वयाधिष्ठानचैतन्यं कूटस्थं अंतःकरणप्रतिबिंबितं जीवः सर्वप्राणिधीवासनासु प्रतिबिंबितमीश्वरोन
वच्छिन्नं ब्रह्मेति तत्रापि ईश्वरस्याधिदैवतं चतस्रोऽवस्थाः मायातत्कार्योपाधिरहितः शुद्धः मायोपहित
ईश्वरः अपंचीक…तभूतकार्यसमष्टिसूक्ष्मशरीरोपहितो -- हिरण्यगर्भः पंचीकृतभूतकार्यसमष्टिस्थूल
शरीरोपहितो विराट् एवमध्यात्मं तिस्रः सुषुप्तौ विलीनांतःकरणोऽज्ञानमात्रसाक्षी प्राज्ञः स्वप्ने व्यष्टिसूक्ष्म ९५
शरीरसाक्षी तैजसः जागरे व्यष्टिस्थूलशरीरसाक्षी विश्वः यथैतदवस्थासाक्षी ईश्वरः तथैतदवस्थाभि
मानी जीवोपि त्रिविधः स एव पारमार्थिको व्यावहारिकः प्रातिभासिक इत्युच्यते एतानेव भेदानाश्रित्य वदंत्ये

वमथान्येपि समस्तकरणैः पुमान् वर्तमानस्तदा तस्य जाग्रदित्यभिधीयते मनोबुद्धिरहंकारश्चित्तं चेति चतु
ष्टयी यदाव्यवस्थितस्त्वेतैः स्वप्न इत्यभिधीयते सुषुप्तः करणैर्भिन्नस्करीयः परिकीर्त्यते परस्तुरीयातीतो
सौ शिवः परमकारणमित्यादि लिंगपुराणीयवचांस्युपपद्यंत इति प्रतिबिंबेश्वरवादिनः तदेतदयुक्तं वि
भेदजनके ज्ञाने नाशमात्यंतिकं गते इति विष्णुपुराणे मायिनो मायया भेदं पश्यंति परमात्मनीति नारदीये च
जीवेश्वरभेदस्यैकोपाधिकस्यैवावसायात् उभयोः प्रतिबिंबत्वे उपाधिद्वयस्वीकारापत्तेः ममैवांशो जीव-
लोके जीवभूतः सनातन इति भगवदुक्तं जीवस्य स्वांशत्वं चनोपपद्येत नहि प्रतिबिंबस्य प्रतिबिंबांतरं अंशो
भवति स्वाभिन्नबिंबाभिन्नत्वेन तत्समर्थने जीवेनापि एवं वक्तुं शक्यत्वेन भगवता स्वमहिमोपवर्णनासामंजस्या
त् बिंबत्वं प्रतिबिंबत्वं यथा पूषणि कल्पितं ईश्वरत्वं च जीवत्वं तथा कल्पितमात्मनीत्यादि पराशरपुराणवच
साम सामंजस्याच्च तस्माद्बिंबचैतन्यमेवेश्वर इति सिद्धं अयमेव च सर्वज्ञ इत्युच्यते तदुक्तं लिंगपुराणे एक ए
व हि सर्वज्ञः सर्वज्ञस्ते क एव सः एष सर्वाधिपो देवेष्वंतर्यामी महाद्युतिः श्रुतावपि यः सर्वज्ञः सर्वविदिति न त्विदं सर्व
ज्ञत्वं सर्वविषयकज्ञानाश्रयत्वं तज्ज्ञांतःकरणाभावादीश्वरस्य न संभवति न च सकलप्राणिधीवासनोपरक्ता
ज्ञानोपाधिक ईश्वरः तस्य च सर्वविषयवासनासाक्षितया सर्वज्ञत्वमिति वाच्यं सर्ववासनावत्त्वेन जीवस्यापि

Indira Gandhi National
Centre for the Arts

॥ मो॰ह॰प॰॥ तथात्वापत्तेरिति चेत् अत्र केचित् यथा जीवस्यांतःकरणपरिणामाः चित्प्रतिबिंबग्राहिणस्तत्संयोगात् विष
यज्ञातत्वं तस्य तथेश्वरस्यापि स्वोपाधिमायापरिणामाश्चित्प्रतिबिंबग्राहिणः संतीति तत्प्रतिबिंबिते स्फुर
।८६। णे विद्यमानविषयाणां अतीतानां अविद्यापरिणामरूपसत्त्वात् अनागतानां च सृष्टेः प्राक् मायायाः सृज्यमान
निखिलपदार्थस्फुरणरूपेण विवर्त्तमानत्वात् तत्संबंधेन त्रिकालवर्त्तिनो विश्वप्रपंचस्यापरोक्ष्यात् सर्वज्ञत्वोपप
त्तिरिति वदंति वस्तुतस्तु ब्रह्मणः स्वरूपज्ञानेन स्वसंसृष्टसर्वावभासकत्वात् सर्वज्ञत्वं अतीतानागतयोरपि
अविद्यायां संस्कारात्मना सत्त्वेन संसर्गसंभवात् जीवचैतन्यस्य तु अंतःकरणवृत्तिप्रतिफलितस्यैव प्रमातृ
त्वात् यद्विषयाकारा वृत्तिरुदेति तद्विषयस्यैव ज्ञानमिति किंचिज्ज्ञत्वोपपत्तिरिति तत्त्वं अयमेवेश्वर उपादानमा-
पि सन् कर्तृत्वेन निमित्तमप्युच्यते तदुक्तं लिंगपुराणे सर्वेषामेव भूतानां यदुपादानकारणं निमित्तकारणं चा
द्यः स शिवः पंचधा स्मृतः विष्णुपुराणेपि स एव सृज्यः स च सर्गकर्त्ता स एव पात्यत्ति च पाल्यते च ब्रह्माद्यवस्था
भिरशेषमूर्त्तिर्विष्णुर्वरिष्ठो वरदो वरेण्यः ननु कर्तृत्वं न तावन्न्यायमत इव कार्यानुकूलज्ञानचिकीर्षाकृतिम ८६
त्त्वरूपं चिकीर्षाकृत्योः प्रतीतावहश्याकृतत्वेन व्यवस्थानात् तयोर्नित्यत्वाभ्युपगमे द्वैतापत्तिरिति चे-- त् न कार्यानु
कूलज्ञानवत्त्वं सृष्टव्यालोचनारूपज्ञानवत्त्वं वा कर्तृत्वं ज्ञानं च स्वरूपात्मकमिति नोक्तदोषः न च सर्वज्ञत्वे सो-

कामयत स्वयमकुरुतेति श्रुत्या ज्ञानेच्छाकृतिमत्त्वस्य प्रतीतेस्तद्वत्त्वमेव तत्त्वमिति वाच्यं कारणांतरसृष्टिवदि
च्छाकृत्योरपि सर्जनोपपत्तेर्लाघवात् पूर्वोक्तमेव न्याय्यः अयं चेश्वरः साक्षीत्युच्यते तदुक्तं महाभारते भूता
त्मा परमात्मा च मुक्तानां परमा गतिः अव्ययः पुरुषः साक्षी क्षेत्रज्ञोक्षर एव च श्रुतावपि साक्षी चेता केवलो निर्गु
णश्चेति अत्र केचित् यद्यपि जीवोपाधिनाऽविद्ययोपहितो न साक्षी स्यात् अंतःकरणात्मकसाक्षिसंसर्गविशि
ष्टेन पुरुषांतरांतःकरणप्रत्यक्षतापत्तेः तथापि अंतःकरणोपहितः स एव साक्षी सुषुप्तावपि सूक्ष्मरूपेणांतः
करणसद्भावान्न साक्षिताविच्छेदः तथा चांतःकरणविशिष्टः प्रमाता तदुपहितः साक्षीत्युपाधिभेदात् साक्षि
प्रमात्रोर्भेदोपपत्तेर्जीव एव साक्षीति वदंति तन्न पूर्वोक्तश्रुतिस्मृत्योर्विरोधात् तयोर्जीवाभेदाभिप्रायेणेश्वर-
स्य साक्षित्वप्रतिपादनपरत्वेऽसामंजस्यात् तस्मात् परमेश्वरस्यैव रूपभेदः कश्चित् साक्षी तदवभास्यश्चाहं
कारांतःकरणसुखदुःखादीति न किंचिदनुपपन्नं अत एव श्रुतावपि एवमेवायं पुरुषः प्राज्ञेनात्मना संपरिष्व-
क्तो न बाह्यं किंचन वेद नांतरमिति जीवाभेदेन निर्दिष्टः अपरे तु अस्पृष्टजीवेश्वरविभागं कूटस्थचैतन्यमेव साक्षी
केवलनिर्गुणपदस्वरसादिति वदंति तदपि न तत्रैव एको देवः सर्वभूतेषु गूढः सर्वव्यापी स र्वभूतांतरात्मा कर्मा-
ध्यक्षः सर्वभूताधिवास इति ईश्वरचैतन्यस्यैवोक्तेः केवलनिर्गुणपदयोस्तु पारमार्थिकरूपकथनपरत्वा

Indira Gandhi National
Centre for the Arts

॥मोक्षप्र०॥ त अयमेव चेश्वरोऽन्तर्यामीत्युच्यते तदुक्तं लिंगपुराणे एष सर्वाधिपो देवोऽन्तर्यामी महाद्युतिः उपास्यमानः
सर्वस्य सर्वसौख्यः सनातनः श्रुतावपि सर्वभूतान्तरात्मेति अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशादित्यधिकरणे
॥९७॥ च सिद्धं अयमेव चेश्वरो जीवानां शुभकर्मसु प्रेरयिता तदुक्तं महाभारते ईश्वरेण नियुक्ता हि साध्वसाधु च भारत
कुर्वन्ति पुरुषाः कर्मफलमीश्वरगामि तत् ईश्वरगामि ईश्वरायत्तं अन्नादो वसुदान इति श्रुतेः श्रुतावपि एष ह्ये
व साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते एष ह्येवासाधु कर्म कारयति तं यमधो निनीषत इति नन्वीश्व
रस्य धर्मे प्रेरयितृत्वे कं चित्प्रेरयित्वा सुखं प्रयच्छति कं चित्पापे प्रेरयित्वा दुःखं प्रयच्छतीति रागद्वेषयुक्तत्वेन वैष
म्यनैर्घृण्ये प्रसज्येयातां फलस्याविप्रयोजकेश्वरगामित्वं च प्रसज्येतेतिचेत् न जीवधर्माधर्मसापेक्षस्यैव प्रेरयि
तृत्वात् तदुक्तं महाभारते ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहं समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रिय इति तथा
जन्मजन्म यदभ्यस्तं दानमध्ययनं तपः तेनैवाभ्यासयोगेन तच्चैवाभ्यसते पुनरिति च सिद्धं चैतद्वैषम्यनैर्घृण्ये न
सापेक्षत्वात्तथा हि दर्शयति प्रशस्तत्वाच्छ्रुतेरित्यधिकरणेऽन्यां अथेश्वरस्य जगदुपादानत्वरूपं तटस्थलक्षणं ता ॥९७॥
वत्सांख्यप्रक्रिययोच्यते तत्र मायाशबलितस्यैवोपादानत्वेन मायातो नार्थान्तरं प्रधानस्वरूपमुक्तं विष्णुपुराणे
अव्यक्तं कारणं यत्तत्प्रधानमृषिसत्तमैः प्रोच्यते प्रकृतिः सूक्ष्मा नित्यं सदसदात्मकं अक्षय्यं नान्यदाधारममेय

मजरं ध्रुवं शब्दस्पर्शविहीनं तु रूपादिभिरसंहितं त्रिगुणं तज्जगद्योनिरनादिप्रभवाप्ययं तेनाग्रे सर्वमेवासी
द्व्याप्तं वै प्रलयादनु वेदवादविदो विद्वन्नियता ब्रह्मवादिनः पठन्ति चैतमेवार्थं प्रधानप्रतिपादकं नाहो न रात्रि
र्न नभो न भूमिर्नासीत्तमो ज्योतिरभूच्च नान्यत् श्रोत्रादिबुध्यानुपलभ्यमेकं प्राधानिकं ब्रह्म पुमांस्तदासीत् अ
व्यक्तं कार्यात्मनाभिव्यक्तिरहितं सदसदात्मकं कार्यकारणात्मकं नान्यदाधारं अनन्याधारं अजरं अपक्षयशू
न्यं ध्रुवं नित्यं त्रिगुणं सत्त्वरजस्तमोरूपं त्रिगुणानां साम्यावस्था प्रकृतिरिति सांख्याः जगद्योनि जगत्कारणं स
र्वस्य हि कार्यजातस्य सुखदुःखमोहात्मकत्वात्तत्कारणीभूतगुणत्रयात्मकप्रधानजन्यत्वं पठन्तीत्युक्तं तामेवऋ
चमाह नाहो न रात्रिरिति प्राधानिकं प्रधानं पुमांश्च सृष्टेः पूर्वमासीत् प्रधानस्य सृष्टेः पूर्वं सद्भाव उक्तो मंत्रोपनिष
दि नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमापरो यत् किमावरीवः कुह कस्य शर्मन्नंभः किमासीद्गहनं
गभीरं न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत्प्रकेतः आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किंचना
स तम आसीत्तमसा गूढमग्र इति तस्मिंश्च प्रधाने ईश्वरप्रेरिते कार्योत्पत्तिरित्युक्तं विष्णुपुराणे ततस्तत्परमं ब्र
ह्म परमात्मा जगन्मयः सर्वगः सर्वभूतेशः सर्वात्मा परमेश्वरः प्रधानं पुरुषं चापि प्रविश्यात्मेच्छया हरिः क्षोभया
मास संप्राप्ते सर्गकाले व्ययाव्ययौ यथा संनिधिमात्रेण गन्धः क्षोभाय जायते मनसो नोपकर्तृत्वात्तथासौ +

Indira Gandhi National Centre for the Arts

॥मोक्ष१०॥ परमेश्वरः स एव क्षेत्रज्ञो ब्रह्मन् क्षेत्रस्य परमेश्वरः स संकोचविकासाभ्यां प्रधानत्वेपि च स्थितः विका
॥९८ राणुस्वरूपैश्च ब्रह्मरूपादिभिस्तया व्यक्तस्वरूपश्च तया विभुः सर्वेश्वरेश्वरः ततस्तत्परमं ब्रह्मेती
श्वरस्वरूपमुक्तं प्रधानपुरुषौ व्यक्ताव्यक्तौ परिणाम्यपरिणामिनौ प्रधाननिमित्तभूताविति यावत् क्षो
भयामास प्रलयकाले वियुक्ततया स्थितौ प्रधानपुरुषौ स्वकालशक्त्योद्भूतये ब्राह्मशक्त्या संयोज्य सृष्ट्युन्मु
खौ चकारेत्यर्थः यथा संनिधीति यथा गंधः संनिधिमात्रेण मनसः क्षोभाय जायते तेन तूयकर्तृत्वात् तदनुकू
लक्रियाकारित्वात् संकोचविकासाभ्यामिति संकोचो गुणसाम्यं विकासो गुणक्षोभः ताभ्यामुपलक्षितः
विकारैः स्वरूपैर्महाभूतमहदादिरूपैः ब्रह्मरूपादिभिर्जीवभेदैरप्युपलक्षितः व्यक्तस्वरूपः समष्टि
व्यष्टिदेहात्मकश्च विभुर्देवेत्यर्थः प्रविश्य क्षोभयामासेत्युक्तं प्रवेशश्च चिदात्मा साधानरूप इत्युक्तं
श्रीभागवते सा वा एतस्य संद्रष्टुः शक्तिः सदसदात्मिका माया नाम महाभाग ययेदं निर्ममे विभुः कालवृत्त्या ९८
तु मायायां गुणमय्यामधोक्षजः पुरुषेणात्मभूतेन वीर्यमाधत्त वीर्यवान् सदसदात्मिका कार्यकारणात्मिका।
कालवृत्त्या कालशक्त्या क्षुभितायां मायायां आत्मभूतेन आत्मांशभूतेन पुरुषेण प्रकृत्यधिष्ठातृरूपेण।
वीर्यं चिदाभासं भगवद्गीतायामपि मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहं संभवः सर्वभूतानां ततो भवति

भारत महत् सर्वकारणत्वात् महत् वृद्धिहेतुत्वाद्ब्रह्मेति गर्भं चिदाभासं पुरुषेण क्षेत्रज्ञेनेत्युक्तं मार्कं
डेयपुराणे प्रधानं कारणं यत्तदव्यक्ताख्यं महर्षयः यदाहुः प्रकृतिं सूक्ष्मां नित्यां सदसदात्मिकां ध्रुव
मक्षय्यमजरममेयं चान्यसंश्रयं प्रलयस्यानु तेनेदं व्याप्तमासीत् क्षोभतः गुणसाम्यात्ततस्तस्मात् क्षेत्रज्ञा
धिष्ठितात् मुने गुणभावाद्व्यज्यमाने सर्गकाले ततः पुनः प्रधानतत्त्वमुद्भूतं महान्तं तत्समावृणोत् यत्तु विश्व
धात्री त्वजाख्या च ध्रुवा च प्रकृतिः स्मृता तामजां लोहितां शुक्लकृष्णामेकां बहुप्रजां जनित्रीमनुशेते स्मजु
षमाणस्वरूपिणीं तामेवाजामजोन्यः स्वक्तभुक्तभोगां जहाति च अजा जनित्री जगतां साजेन समधिष्ठिता
दुर्वन्भूवस्कमतानीति लिंगपुराणेऽजाधिष्ठितत्वमुक्तं तत्राजपदेन क्षेत्रज्ञ उच्यते पूर्वोदाहृतमार्कंडेयपुराणी
यवाक्ये क्षेत्रज्ञाधिष्ठितादित्युक्तेः तस्मादीश्वराधिष्ठितेन क्षेत्रज्ञेनाधिष्ठितात्प्रधानान्महदाद्युत्पत्तिः ईश्व
राधिष्ठितत्वं प्रधानस्यापि तदुक्तमग्निपुराणे प्रकृतिं पुरुषं विष्णुः प्रविश्याक्षोभयत्ततः सर्गकाले महत्तत्त्व
महंकारस्ततोऽभवत् ननु प्रधानमेव कार्योत्पत्तौ प्रवर्ततां किमीश्वराधिष्ठानेनेति चेत् अचेतनरथादिवत्
चेतनाधिष्ठानमंतरेण प्रवृत्त्यनुपपत्तेः न च गोपयस अंबुस्थलस्थितजलस्य च निम्नप्रदेशे प्रवृत्तिवद
त्रापीति वाच्यं तत्रापि योऽप्सु तिष्ठन्नित्यादिना पुरुषाधिष्ठितयोरेव प्रवृत्तिरित्युक्तमुत्तरमीमांसायां प्रवृ

Indira Gandhi National
Centre for the Arts

॥मोक्षध०॥ नैश्वर्ययोर्ध्रुवश्चेन्नशापीत्यत्र किंच त्रयाणां गुणानां साम्यावस्थारूपस्य प्रधानस्य जडस्य कदाचित् महत्त्वा-
९९ कारेण परिणामः कदाचिन्नेति विनिगमनायां हेतुर्वाच्यः औपनिषदां मते तु सर्वज्ञस्वतंत्रेच्छेश्वरस्वैरितत्वमे
व विनिगमकमिति व्यतिरेकानवस्थितेश्चानपेक्षत्वादित्यधिकरणे उक्तं क्षेत्रज्ञाधिष्ठितादिति सा जेनस
मधिष्ठितेति प्रकृतिपुरुषविष्णुप्रविश्यैति पूर्वोदाहृतवचनजातविरोधश्च अथ प्रकृत्यादितत्त्वेषु सांख्या
नाः परिभाषाः तत्र देवलः तत्र सांख्यानाममूलप्रकृतिः सप्तप्रकृतिविकृतयः महत्तत्त्वमहंकारः पंच
तन्मात्राणि षोडशविकाराः पंचपंचेंद्रियाणि अर्थाश्च पंचभूतविशेषाश्च त्रयोदश करणानि तेषां त्री
ण्यंतःकरणानि दशबहिःकरणानीति पंचपंचेंद्रियाणि पंचकर्मेंद्रियाणि पंचकर्मेंद्रियाणि पंचबुद्धींद्रिया
णि एवं दश अर्थाः रूपादयः भूतविशेषाः पृथिव्यादयः स्वयमुक्तं व्याचष्टे स एव अथ मूलप्रकृतिरव्य
क्तं महानहंकारः पंचतन्मात्राणीति प्रकृतिविकृतयः शब्दतन्मात्रं स्पर्शतन्मात्रं रूपतन्मात्रं रसतन्मात्रं गं
धतन्मात्रमिति तन्मात्राणि द्विविधानींद्रियाणि मनो तन्मात्रविकाराः चक्षुःश्रोत्रघ्राणजिह्वात्वचो बु ९९
द्धींद्रियाणि रूपरसगंधस्पर्शशब्दास्तेषामर्थाः वाक्पाणिपादपायूपस्थाः कर्मेंद्रियाणि भाषणंक्रिया
गमनमुत्सर्गः प्रीतिरिति कर्मेंद्रियार्थाः वाय्वग्न्यबाकाशपृथिव्यो भूतविशेषाः दशेंद्रियाणि बुध्यहंका

रमनांसि च करणानि तेषां मनोबुध्यहंकाराश्चांतःकरणानि दशबहिःकरणानींद्रियाणि च गुणसाम्य
लक्षणमव्यक्तं प्रधानं प्रकृतिर्विधनमित्यनर्थांतरं अध्यवसायलक्षणो महान् बुद्धिर्मतिरुपलब्धिरित्यना-
र्थांतरं अभिमानलक्षणोहंकारो वैकारिकोऽभिमान इत्यनर्थांतरं सत्तामात्रलक्षणानि तन्मात्राणि स्वानुग्र
हलक्षणानींद्रियाणि अक्षाणींद्रियाण्युच्यंते संकल्पलक्षणं मनः इंद्रियार्थलक्षणविषयविशेषा भूतानीत्य
नर्थांतरमिति गुणसाम्यलक्षणमिति सत्त्वरजस्तमसां साम्यमविकृतत्वं तदेव लक्षणं यस्य तत्तथा अध्यव
सायो निश्चयः सत्तामात्रलक्षणानि भोगसाधनानि स्वानुग्रहलक्षणानि आत्मनो भोगकारकाणि इदमेव प
रिभाषांतरेणोक्तं महाभारते अष्टौ प्रकृतयः प्रोक्ता विकाराश्चापि षोडश तत्र तु प्रकृतीरष्टौ प्राहुरध्यात्मचिं
तकाः अव्यक्तं च महांश्चैव तथाहंकार एव च पृथिवी वायुराकाशमापो ज्योतिश्च पंचमं एताः प्रकृतयस्त्वष्टौ
विकारानपि मे शृणु श्रोत्रं त्वक् चैव चक्षुश्च जिह्वा घ्राणं च पंचमं शब्दस्पर्शौ च रूपं च रसो गंधस्तथैव च वाक् च
हस्तौ च पादौ च पायुर्मेढ्रस्तथैव च एते विशेषा राजेंद्र महाभूतेषु पंचसु बुद्धींद्रियाण्यथैतानि सविशेषाणि मैथि
ल मनः षोडशकं प्राहुरध्यात्मगतिचिंतकाः देवलेन मूलप्रकृतेः प्रकृतित्वं सप्तानां प्रकृतिविकृतित्वमुक्तं महा
भारते तु प्रधानस्य महदादीनां सप्तानां च एताः प्रकृतयस्त्वष्टाविति प्रकृतित्वमेवोक्तमिति परिभाषाभेदमात्रमि

Indira Gandhi National
Centre for the Arts

।।मोक्ष२०।। तिन किंचिदनुपपत्तिं यमस्त्तमनो बुद्धिरहंकारः खानिलाग्निजलानिभूः एताः प्रकृतयस्त्वष्टौ विकाराः षो
डशापरे श्रोत्रादिरसनघ्राणत्वक् संकल्प एव च शब्दरूपरसस्पर्शगंधवाक्पाणिपायवः पादावुपस्थइ
।।१८८।। तितेविकाराः षोडशापर इति मनोंतर्नव्याष्टौ प्रकृतयः संकल्पमंतर्नव्य षोडशविकारा इत्याह तदपि श्रौत
र्नवानंतर्नवभेदमात्रं न तु पदार्थांतरं अत एव सांख्यकारिका मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृति-
विकृतयः सप्त षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः तत्रोत्पत्तिक्रममाह देवलः सर्वपूर्विका प्र
कृतिः प्रकृतेर्महानुत्पद्यते महतोहंकारः अहंकारात्तन्मात्राणींद्रियाणि च तन्मात्रेभ्यो विशेषा इत्युत्प
त्तिक्रमः सर्वपूर्विका सर्वेभ्यः प्रथमा एतेन यद्विष्णुपुराणे प्रधानतत्वमुद्भूतं महांतं तत्समावृणोत् नृसिंहपुरा
णे तस्मात्प्रधानमुद्भूतं ततश्चापि महानभूत् इति प्रधानस्यापि जन्यत्वं प्रतीयते तच्चिरस्तं पूर्वैदाहृत त्रिगुणं
तज्जगद्योनिमनादिप्रभवाप्ययमिति विष्णुपुराणे अजा जनित्री जगतां साजेन समधिष्ठितेति लिंगपुराणे चा
नादित्वाभिधानात् पूर्वत्रापि उद्भूतं कार्यक्षममिति वा घटाद्याकारेण मृत्पिंड उद्भूत इतिवत् महदाद्याकारेणोद्भूत ।१८८।
मिति वा द्रष्टव्यं सर्गक्रममुक्तो मत्स्यनार-तेपि अव्यक्ताच्च महानात्मा जायते नृपसत्तम प्रथमं सर्गमित्येतं प्रा
हुः प्राधानिकं बुधाः महतश्चाप्यहंकारो जायते वै नराधिप द्वितीयं सर्गमित्याहुरेतं बुध्यात्मकं बुधाः अहं

काराच्च संभूतं मनोभूतमिवात्मकं तृतीयः सर्ग इत्येष आहंकारिक उच्यते समुद्धृतानि मनसो महाभूतानि पा
र्थिव चतुर्थं सर्गमित्येतन्मानसं परिचक्षते शब्दस्पर्शश्च रूपं च रसो गंधस्तथैव च पंचमं सर्गमित्याहुर्भौतिकं
तत्वचिंतकाः श्रोत्रं त्वक्चैव चक्षुश्च जिह्वा घ्राणं च पंचमं सर्गं षष्ठमित्याहुश्चिंतात्मकमिति स्मृतं तिर्यक्स्रो
तस्त्वधःस्रोतो जायते वै नराधिप नवमं सर्गमित्येतदाहुरार्जवकं बुधाः एते वै नव सर्गास्ते तत्वानि च नराधिप च
तुर्विंशतितत्वानि यथा श्रुतिनिदर्शनात् भूतमिवात्मकं भूतात्मकमिव भूतानां कारणमित्यर्थः चिंतात्मकं
राजसाहंकारप्रभवं तिर्यक्स्रोतः मनुष्यादिसर्गः अधःस्रोतः स्थावरादिसर्गः ऊर्ध्वस्रोतो देवादिसर्गः आर्जव
कं ऋजुभावेन जातं सात्विकमित्यर्थः यद्यपि उदाहृतदेवलवाक्ये अहंकारात्तन्मात्राणि इंद्रियाणि चोत्पत्तिः तन्मा
त्रेभ्यो भूतानां विशेषाणामुत्पत्तिः प्रतीयते शास्त्रवाक्ये च अहंकारान्मनसः ततो भूतानीत्यस्य शब्दादितन्मात्रा
णामुत्पत्तिरिति विरोधः तथापि त्रिविधाहंकारात्सर्वेषामुत्पत्तिरित्यत्र तात्पर्यं अहंकारात्सात्विकान्मनः राज
सादिंद्रियाणि तामसात्तन्मात्राणीत्यतो न विरोधः यत्तु समुद्धृतानि मनसो महाभूतानीति तत्र मनः पदेन मनः
कारणाहंकार उच्यते तस्मात्तामसाद्भूतानीत्यर्थः यदपि शब्दादीनां भूतेभ्य उत्पत्तिरिति तदपि कार्यरूपाणां न
तु तन्मात्राणां तन्मात्रेभ्यस्तु भूतोत्पत्तिरित्युक्तं विष्णुपुराणे गुणसाम्यात्ततस्तस्मात् क्षेत्रज्ञाधिष्ठितान्मुने गु

Indira Gandhi National Centre for the Arts

॥मो॰प्र॰॥ णसाम्यात्ततस्तस्मात्क्षेत्रज्ञाधिष्ठितान्मुने गुणव्यंजनसंभूतिः सर्गकाले द्विजोत्तम गुणानां व्यंजनं व्यज्यंते ते
नेति व्यंजनं महत्तत्वं तथा प्रधानतत्वमुद्भूतं महांतं तत्समावृणोत् सात्त्विको राजसश्चैव तामसश्च त्रिधा महा

॥१०१॥ न् प्रधानतत्वेन समं त्वचा वीजमिवावृतं वैकारिकस्तैजसश्च भूतादिश्चैव तामसः त्रिविधोयमहंकारो महत्त
त्वादजायत भूतेंद्रियाणां हेतुः स त्रिगुणत्वान्महामुने यथा प्रधानेन महान् महता स तथा वृतः भूतादिस्तु
विकुर्वाणः शब्दतन्मात्रकं ततः ससर्ज शब्दतन्मात्रादाकाशं शब्दलक्षणं शब्दमात्रं तथाकाशं भूतादिः स समा
वृणोत् आकाशस्तु विकुर्वाणः स्पर्शमात्रं ससर्ज ह बलवानभवद्वायुस्तस्य स्पर्शो गुणो मतः आकाशं शब्दमा
त्रं तु स्पर्शमात्रं समावृणोत् ततो वायुर्विकुर्वाणो रूपमात्रं ससर्ज ह ज्योतिरुत्पद्यते वायोस्तद्रूपगुणमुच्यते स्पर्शमा
त्रस्तु वै वायू रूपमात्रं समावृणोत् ज्योतिश्चापि विकुर्वाणं रसमात्रं ससर्ज ह संभवंति ततोंभांसि रसाधाराणि तानि
च रसमात्राणि चांभांसि रूपमात्रं समावृणोत् विकुर्वाणानि चांभांसि गंधमात्रं ससर्जिरे संघातो जायते तस्मात्त १०१
स्य गंधो गुणो मतः तस्मिंस्तस्मिंस्तु तन्मात्रा तेन तन्मात्रता स्मृता तन्मात्राण्यविशेषाणि अविशेषास्ततो हि ते न
शांता नापि घोरास्ते न मूढाश्चाविशेषिणः भूततन्मात्रसर्गोयमहंकारात्तु तामसात् प्रधानतत्वमिति उद्भूतं महां
तं प्रधानतत्वं समावृणोत् यथा मृदेव पिंडाद्यवांतरकार्यावस्थामापद्य घटादेरुपादानं तथेश्वराधिष्ठितं

प्रधानमेव महदाद्यवांतरकार्याण्युपादानतयानुव्याप्य उत्तरोत्तरकार्यस्याप्युपादानमिति दर्शयितुं पूर्वपूर्व
कार्येणोत्तरोत्तरकार्यस्य व्याप्तिरुक्ता तदेव दर्शयति सात्त्विक इत्यादिना त्वचा वीजमिवेति यथा त्वक्समंताद्वी
जं व्याप्नोति तादृशं च बीजमंकुरोपादानं तद्वत् वैकारिकः सात्त्विकः तैजसो राजसः भूतादिरहंकारः विकुर्वाणः
क्षुभ्यन् संघातः पृथिवी कादिन्यगुणयोगात् तस्मिन्निति शब्दादीनां तन्मात्रत्वं तन्मात्रवृत्तित्वेनेत्यर्थः यथा प्र
धानतत्वव्याप्तस्य कारणस्य कार्यारंभकत्वमुक्तं तथैव भगवद्वीक्षितादेव कारणात्कार्योत्पत्तिरित्युक्तं श्रीभाग
वते तामसोभूत सूक्ष्मादिर्यतः खं लिंगमात्मनः कालमायांशयोगेन भगवद्वीक्षितं नभः नभसोनुसृतं स्पर्शं विकु
र्वन्निर्ममेनिलं अनिलोपि विकुर्वाणो नभसोरुबलान्वितः ससर्ज रूपतन्मात्रं ज्योतिर्लोकस्य लोचनं अनिलेनान्वि
तं ज्योतिर्विकुर्वत्परवीक्षितं आधत्तांभो रसमयं कालमायांशयोगतः भूतानां नभआदीनां यद्भव्यावरावरं ते
षां परानुसंसर्गात् यथासंख्यं गुणान्विदुः तामसः अहंकार इति शेषः भूतसूक्ष्मं शब्दः तस्यादिः कारणं यत
शब्दात् खं आकाशः आत्मनः लिंगं उपनिषच्छब्दरूपेण प्रकाशकं तं त्वौपनिषदं पुरुषं पृच्छामीति श्रुतेः कालमा
यांशयोगेनेति कालः क्षोभकः माया प्रकृतिः अंशश्चिदाभासः भगवद्वीक्षितमिति भगवता ईश्वरेण वीक्षितं
सिसृक्षाविषयत्वेनावृतं भगवत्प्रेरितादेव शब्दाज्जगदुत्पत्तिर्न तु केवलात् जडात् रचनानुपपत्तेश्चेत्यनुमानमि

Indira Gandhi National Centre for the Arts

॥मोक्ष१०॥ तिन्यायात् परानुसंसर्गादिति परेषां कारणानां उत्तरोत्तरकार्यसंसर्गात् अन्वयात् यथासंख्यं अधिकानुगुणा
नुविद्धरित्यर्थः अत एव मनुः आद्याद्यस्य गुणं त्वेषामवाप्नोति परः परः यो यो यावतिथश्चैषां स स तावद्गुणः स्मृतः एषां
।१०२। महाभूतानां मध्ये यावतिथः यावतां पूरणः तावद्गुणः तावंतो गुणा यस्मिन्स तथा एतत्स्पष्टमुक्तं लिंगपुराणे
क्ष्मा सा पंचगुणा तस्मात् एकोना रससंभवाः त्रिगुणो भगवान्वह्निः द्विगुणः स्पर्शसंभवः अवकाशस्ततो दे
व एकमात्रस्तु निष्कलः एकोनाः एकेन शब्देन ऊनाः रससंभवाः आपः स्पर्शसंभवो वायुः अवकाशः आका
शः एकमात्रः एकः शब्दो मात्रा यस्य स तथा याज्ञवल्क्योपि बुद्धेरुत्पत्तिरव्यक्तात्ततोहंकारसंभवः तन्मात्रादीन्य
हंकारादेकोत्तरगुणानि तु शब्दस्पर्शश्च रूपं च रसो गंधश्च तद्गुणाः यो यस्मादुनितश्चैषां स तस्मिन्नेव लीयते ए
कोत्तरगुणानि एकैकेन गुणेन उत्तरोत्तरम् अधिकानि आकाशादीनि भूतानि तामसाहंकारकार्याण्युक्तानि राज
ससात्विकाहंकारकार्याण्युच्यंते विष्णुपुराणे तैजसानींद्रियाण्याहुर्देवा वैकारिका दश एकादशं मनश्चात्र देवा १०२
वैकारिकाः स्मृताः तैजसानि राजसानि वैकारिकाः सात्विकाः इंद्रियाण्युक्तानि तत्रैव त्वक्चक्षुर्नासिका जिह्वा श्रो
त्रमत्र च पंचमं शब्दादीनामवाप्त्यर्थं बुद्धियुक्तानि वै द्विज पायूपस्थौ करौ पादौ वाक् च मैत्रेय पंचमी विसर्गशिल्पग
त्युक्ति कर्म तेषां च कथ्यते विसर्गपदेन मलरेतसोर्विसर्ग उक्तः तेन पायूपस्थयोर्द्वयोरपि कर्मोक्तं भवति तन्मा

त्रमात्र विशिष्टत्वेन भूतानामविशेषत्वमुक्तं तेषामेव परस्परसंयोगात् विशेषत्वमुक्तं तत्रैव आकाशवायुतेजांसि
सलिलं पृथिवी तथा शब्दादिभिर्गुणैर्ब्रह्मन् संयुक्तान्युत्तरोत्तरं शांता घोराश्च मूढाश्च विशेषास्तेन ते स्मृताः एवं चतु
र्विंशतिस्तत्वान्युक्तानि एतज्ज्ञानस्य फलमाह यमः चतुर्विंशकमित्येतज्ज्ञानमाहुर्मनीषिणः पंचविंशकमव्यक्तं ष
ड्विंशः पुरुषोत्तमः एतज्ज्ञात्वा विमुच्यंते यतयः शांतबुद्धयः पंचविंशतितत्वज्ञो याति विष्णोः परं पदं अत्र मनसः सं
कल्पस्य च भेदं कृत्वा चतुर्विंशतितत्वानि पंचविंशतितमं तत्वं प्रधानं षड्विंशः पुरुषः विष्णुपुराणादौ तु अव्यक्तं गृही
त्वा चतुर्विंशतितत्वानि पंचविंशः पुरुष इति व्यवस्था चतुर्विंशतितत्वानां ब्रह्मांडोत्पादकत्वमुक्तं विष्णुपुराणे नाना
वीर्याः पृथग्भूताः ततस्ते संहतिं विना नाशक्नुवन्प्रजाः स्रष्टुमसमागम्य कृत्स्नशः समेत्यान्योन्यसंयोगं परस्प
रसमाश्रयात् एकसंघातलक्ष्याश्च संप्राप्यैक्यमशेषतः पुरुषाधिष्ठितत्वाच्चाव्यक्तानुग्रहेण च महदाद्या वि
शेषांता ह्यंडमुत्पादयंति ते ततक्रमेण विवृद्धं तु जलबुद्बुदवत्समं भूतेभ्योंडं महाबुद्धे बृहदुदकेशयं प्राकृतं ब्र
ह्मरूपस्य विष्णोः स्थानमनुत्तमं तत्राव्यक्तस्वरूपोसौ व्यक्तरूपी जगत्पतिः विष्णुर्ब्रह्मस्वरूपेण स्वयमेव व्यव
स्थितः मेरुतुल्यमभूत्तस्य जरायुश्च महीधराः गर्भोदकं समुद्राश्च तस्यासन्सुमहात्मनः साद्रिद्वीपसमुद्राश्च
सज्योतिर्लोकसंग्रहः तस्मिन्नंडेभवद्विप्र सदेवासुरमानुषः वारिवह्न्यनिलाकाशैः ततो भूतादिना बहिः वृत्तं दश

Indira Gandhi National
Centre for the Arts

॥मो॰ष १०॥ गुणैरंडं भूतादिर्महता तथा अव्यक्तेनावृतो ब्रह्मन्तैः सर्वैः सहितो महान् एभिरावरणैरंडं सप्तभिः प्राकृतैर्वृतं
नारिकेलफलस्यांतर्बीजं बाह्यदलैरिव जुषन् रजोगुणं तत्र स्वयं विश्वेश्वरो हरिः ब्रह्माभूतस्य जगतो विसृ-
।२०३। ष्टौ संप्रवर्त्तते सृष्टं च पात्यनुयुगं यावत्कल्पविकल्पना सत्वभृद्भगवान्विष्णुरप्रमेयपराक्रमः तमोद्रेकी
च कल्पांते रुद्ररूपी जनार्दनः मैत्रेयाखिलभूतानि भक्षयत्यतिभीषणः संभक्षयित्वा भूतानि जगत्येकार्णवीकृ-
ते नागपर्यंकशयने शेते च परमेश्वरः प्रबुद्धश्च पुनः सृष्टिं करोति ब्रह्मरूपधृक् सृष्टिस्थित्यंतकरणात् ब्रह्म
विष्णुशिवात्मकीं स संज्ञां याति भगवानेक एव जनार्दनः स्रष्टा सृजति चात्मानं विष्णुः पाल्यं च पाति च उपसंह
रते चांते संहर्त्ता च स्वयं प्रभुः पृथिव्यापस्तथा तेजो वायुराकाश एव च सर्वेंद्रियांतःकरणं पुरुषाख्यं हि यज्ज
गत् स एव सर्वभूतेशो विश्वरूपो यतोव्ययः सर्गादिकं ततोस्यैव भूतस्थमुपकारकं स एव सृज्यः स च सर्ग
कर्त्ता स एव पात्यत्ति च पाल्यते च ब्रह्माद्यवस्थाभिरशेषमूर्त्तिर्विष्णुर्वरिष्ठो वरदो वरेण्यः कल्पविकल्पना-
ब्रह्मदिनावसानं यावत् सत्वभृत्सत्वगुणाधिष्ठाता पुरुषाख्यं जगत्पुरुषसंज्ञं पुरुष एवेदं सर्वमिति श्रु- २०३
तेः भूतस्थं पितृपुत्रादिषु स्थितं सर्गादिकं ततोस्य हरेरेवोपकारकं तत्प्रयुक्तैस्तद्विभूतेरेव विस्तारात् यथा
ऋत्विग्भिः कृतं यजमानस्यैवोपकारकं ब्रह्मांडावरणानां परस्परमंतरमुक्तं लिंगपुराणे महदादिविशेषांता

ह्यंडमुत्पादयंति वै जलबुद्बुदवत्तस्मादवतीर्णः पितामहः स एष भगवान्रुद्रो विष्णुर्विश्वगतिः प्रभुः तस्मिं
न्नंडे त्विमे लोका अंतर्विश्वमिदं जगत् अंडं दशगुणेनैव वारिणावृतं बहिः आपो दशगुणेनैव वह्निना बाह्य
तोवृताः तेजो दशगुणेनैव बाह्यतो वायुनावृतं वायुर्दशगुणेनैव नभसा बाह्यतो वृतः आकाशश्चावृतस्त
द्वदहंकारेण शब्दजः महता शब्दहेतुर्वै प्रधानेनावृता स्वयं सप्तैतावरणान्याहुस्तस्यात्मा कमलासनः को
टिकोट्ययुतान्यत्र चांडानि कथितानि तु तत्र तत्र चतुर्वक्त्रा ब्रह्माणो हरयो भवाः सृष्टाः प्रधानेन तदा लब्धाशं-
भोस्तु संनिधिं लयश्चैव तथान्योन्यमाद्यंतमिति कीर्त्तितं सर्गस्य प्रतिसर्गस्य स्थितेः कर्त्ता महेश्वरः सर्गे च रज
सा युक्तः सत्वस्थः परिपालने प्रतिसर्गे तमोद्रिक्तः स एव त्रिविधः क्रमात् आदिकर्त्ता च भूतानां संहर्त्ता परिपाल
कः एवं सांख्यरीत्या परमेश्वराधिष्ठितप्रकृत्युपादनत्वं प्रपंचस्योक्तं इदानीं वेदांतरीत्या ब्रह्मोपादानत्वमु-
च्यते महाभारते अक्षरोग्रे ततो वायुर्वायोर्ज्योतिस्ततो जलं जलात्प्रसूता जगती जगत्यां जायते जगत् अ-
ग्रे प्रथमतः अक्षरः आकाश इति केचित् तन्न अक्षरशब्देन आकाशप्राप्तेः तस्मात् अक्षरमंबरांतधृतेरिति न्या-
येन ब्रह्मैवाक्षरशब्देनोच्यते अग्रे सृष्टेः पूर्वं ततो वायुरिति वाय्वादिका सृष्टिरुच्यते न च तस्माद्वा एतस्मादात्मन-
आकाशः संभूत आकाशाद्वायुर्वायोरग्निरग्नेरापः अद्भ्यः पृथिवीत्याकाशादिका सृष्टिस्तैत्तिरीये श्रूयते कथ

National
Centre for the Arts

।मोक्षप्र०।। मत्वाद्यादिकेतिवाच्यं यथातत्तेजोसृजतेत्यत्रतेजआदिकायामपिसृष्टौश्रुतायांवाक्यांतरालोचनयाकाश
वाय्वोरुपसंहारः एवमत्रापिआकाशायेतेजोतस्तथाह्यहेत्यधिकरणन्यायेनोपसंहारः जगत्यांजायतेज
।१०४। गदितिपृथिव्याओषधयः ओषधीभ्योन्नं अन्नात्पुरुषइत्यादितैत्तिरीयकश्रुत्युक्ताकार्योत्पत्तिर्दृष्टव्या आ
थप्रपंचलयाधिष्ठानंब्रह्मैवेत्युच्यते तत्रविष्णुपुराणे महदादेर्विकारस्यविशेषांतस्यसंक्षये कृष्णेच्छाकारि
तेतस्मिन्प्रवृत्तेप्रतिसंचरे आपोग्रसंतेवैपूर्वंभूमेर्गंधात्मकंगुणं आत्तगंधात्ततोभूमिः प्रलयायतायकल्प
ते प्रनष्टेगंधतन्मात्रेभवत्युर्वीजलात्मिका अपामपिगुणोयस्तुज्योतिषापीयतेतुसः ज्योतिर्वाय्वौलयंयाति
यात्याकाशेसमीरणः आकाशंचैवभूतादिर्ग्रसतेतंथामहान् महांतमेभिस्सहितंप्रकृतिर्ग्रसतेद्विज गुणसाम्य
मनाद्युक्तमन्यूनंवमहामुने प्रोच्यतेप्रकृतिर्हेतुप्रधानंकारणंपरं इत्येषाप्रकृतिस्सर्वाव्यक्ताव्यक्तस्वरूपिणीव्य
क्तस्वरूपमव्यक्तेतस्मिन्मैत्रेयते एवंजगज्जन्मस्थितिलयाधिष्ठानंब्रह्मेतिसिद्धं एतेनब्रह्मणोनिमित्तत्वंचतुर्णां
परमाणूनांस्वकार्यद्व्यणुकादिप्रक्रमेणनिखिलकार्योपादानत्वमितिवैशेषिकादिकल्पितमपास्तं श्रुतिस्मृतिपु ।।१०४।
राणेषुद्व्यणुकादिप्रक्रियायाअनभिहितत्वात् पूर्वोक्तवचनजातविरोधात् अपरिग्रहा— त्यंतमनपेक्षेतिन्या
याच्च युक्तिविरोधाच्च तथाहि सृष्ट्यादौपरमाणुषुजायमानमाद्यंकर्माभिघातजंवाप्रयत्नवदात्मसंयोगजन्यं

---

वादृष्टवदात्मसंयोगहेतुकंवा नाद्यः स्पर्शवद्वेगवद्द्रव्यांतराभावात् नद्वितीयः शरीरमंतरेणात्मनिप्रय-
त्नानुत्पत्तेः नतृतीयः तदानींज्ञानाभावेनअचेतनादृष्टवदात्मनःप्रवर्तकत्वानुपपत्तेः प्रवर्तकत्वेवाप्रवृ
त्तिनैरंतर्यप्रसंगः कालविशेषस्यकारणत्वेएककारणपरिशेषापत्तिः नचपुराणप्रामाण्याभ्युपगमेनेश्वर
सिसृक्षाजन्यंतत्कर्मेतिवाच्यं तर्हितत्प्रामाण्येनवरंब्रह्मोपादानत्वाभ्युपगमोनतुपरमाणूपादानत्वं किंचना-
द्व्यणुककारणीभूतः परमाण्वोः संयोगउपपद्यते सहिव्याप्यवृत्तिर्वाऽव्याप्यवृत्तिर्वानाद्यः द्व्यणुकस्यप्रच
यासंभवेनाधिकपरिमाणत्वानुपपत्तेः नद्वितीयः निरवयवस्यावच्छेदमंतरेणाव्याप्यवृत्तिसंयोगन तासंभ
वात् कल्पितदिक्देशानामपारमार्थिकत्वेनावच्छेदकत्वासंभवात् तस्माद्भयथापिनकर्मतिस्तदभावइति
न्यायेननपरमाणूनामुपादानत्वंकिंतुब्रह्मणइति इदंचतटस्थलक्षणमुक्तं स्वरूपलक्षणमुच्यते विष्णुपु
राणे एकःशुद्धोक्षरोनित्यः सर्वव्यापीतथाप्रमान् सोयंशः सर्वभूतस्यमैत्रेयपरमात्मनः नसंतियत्रसर्वेशे
नामजात्यादिकल्पनाः सत्तामात्रात्मकेज्ञेयेज्ञानात्मन्यात्मनः परेसब्रह्मतत्परंधामपरमात्मासचेश्वरः सवि
ष्णुः सर्वमेवेदंयतोनावर्ततियतिः परमात्माचसर्वेषामाधारःपरमेश्वरः विष्णुनाम्नासवेदेषुवेदांतेषुचगीय
ते एकःसजातीयविजातीयभेदरहितः एकमेवाद्वितीयमितिश्रुतेः शुद्धोविकाररहितः नित्यःविनाशरहितः

Indira Gandhi National Centre for the Arts

॥मोक्षप्र०॥ सर्वव्यापी देशतः परिच्छेदरहितः तथाणुमानिति योऽणुरूपो जीवः सोऽपि परमात्मन अंशः उपाधिकल्पितभेदवान्
॥१०५॥ तेन सजातीयभेदनिरासः न संतीत्यादि नामजात्यादिकल्पनावतो विकारित्वात् तद्रहितस्य सत्यत्वं वाचा
रंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति श्रुतेः सत्तामात्रात्मिके ज्ञानात्मनीति सच्चिद्रूपत्वमुक्तं तस्यैव विश्वा
दिनामानि लक्षकानि तदेवोक्तं गीयत इत्यादिना ऋग्वेदादिकमपरां विद्यामभिधाय पराक्षरमिति स्थितमि
त्युपक्रम्य तद्व्याहृत्या ब्रह्मस्वरूपमुक्तं लिंगपुराणे तदद्रेश्यं तदग्राह्यमगोत्रं तदवर्णकं तदचक्षुस्तदश्रोत्रं तद
पाणि अपादकं तदजातमभूतं च तदशब्दं द्विजोत्तमाः अस्पर्शं तदरूपं च रसगंधविवर्जितं अव्ययं चाप्रतिष्ठं च
तं नित्यं सर्वगं विभुं महांतं तद्बृहंतं च तदजं चिन्मयं द्विजाः अप्राणममनस्कं च तदस्निग्धमलोहितं अप्रमेयं त
दस्थूलमदीर्घं तदनुल्बणं अह्रस्वं तदपारं च तदानंदं तदच्युतं अनपावृतमद्वैतं तदनंतमगोचरं असंवृतं
तदात्मैकपरा विद्या न चान्यथा अशब्दत्वादिपदैर्दृश्यव्यतिरिक्तत्वादिना रूपेण स्वरूपमेव लक्ष्यते अदृश्या १०५
दिगुणको धर्मोक्तेरिति न्यायात् श्रुतावपि अन्यदेव तद्विदितादथो अविदितादधि अन्यत्र धर्मादन्यत्राधर्मादन्य
त्रास्मात्कृताकृतात् अन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वदेति अवचनेनैव प्रोवाचेति दर्शयति चाथोपि स्मर्य
ते इति न्यायाच्च चिन्मयानंदादिपदैस्तु स्वरूपमेव साक्षाल्लक्ष्यते श्रुतावपि सत्यं ज्ञानमनंतं ब्रह्म सत्यं विज्ञा

नमानंदं ब्रह्म यथा सैंधवघनोऽनंतरोऽबाह्यः कृत्स्नो रसघन एवं वा अरेऽयमात्मानंतरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवे-
ति आह च तन्मात्रमिति न्यायाच्च भगवद्गीतायामपि ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते अनादिमत
परं ब्रह्म न सत्तन्नासदुच्यते ब्रह्मपुराणेऽपि विद्यया तदवाप्नोति यत्र गत्वा न शोचति इत्युपक्रम्य शाश्वतं ब्रह्मस्व
रूपमुक्तं यत्तद्ब्रह्म परममव्यक्तमचलं ध्रुवं अव्याकृतमनामयममृतं बाधयोगिपत अव्यक्तं इंद्रियैः अचलं
अविकारि ध्रुवं अविनाशि अव्याकृतं मायाकार्यविद्याया तस्या अव्याकृतत्वं तदपेक्षया ब्रह्मणोऽव्याकृतत्वमि
त्यर्थः अनामयं संसर्वदुःखरहितं अमृतं आनंदरूपं बाधयोगिप्रपंचबाधावधिभूतं एवं च सत्तामात्रात्मिके ज्ञानात्मनी
ति विष्णुपुराणीयवाक्यस्य चिन्मयमानंदमिति लिंगपुराणीयवाक्यस्य अमृतमिति ब्रह्मपुराणीयवाक्यस्य पदैः स
च्चिदानंदरूपता ब्रह्मणः सिद्धा आनंदादयः प्रधानस्येत्यधिकरणन्यायात् अन्यैश्च पदैरतद्व्यावृत्त्या प्रपंचनिषेध
रूपता विसिद्धा अतद्व्यावृत्त्या वेदांतानां ब्रह्मबोधकत्वमुक्तं श्रीभागवते इति रेशोतर्क्यनिजमहिमनि स्वप्रमितिकेऽपर
त्राजातो तन्निरसनमुखब्रह्मकमिति अततद्दृश्यं तन्निरसनपर नाम्नावेदशिरोजन्याप्रमायस्येत्यर्थः ॥ इति श्रीम

वीरमित्रोदये मोक्षप्रकाशे तत्पदार्थनिरूपणं ॥ छ ॥ छ ॥ श्रीमदद्वैतसच्चिदानंदपूर्णब्रह्मणे श्रीकृष्णाय नमः ॥

Indira Gandhi National Centre for the Arts

॥मो०ध०॥ अथ त्वंपदार्थविवेकाय देहेंद्रियप्राणांतःकरणाद्यध्यासाद्विविक्तस्यात्मनस्तत्त्वमिलत्वंतिरूप्यते महावाक्येन
विविक्तस्यैव तस्य ब्रह्माभेदबोधनात् तदुपोद्घातत्वेन शरीररूपोपाधिस्वरूपं निरूप्यते तत्र देवमानुषतिर्यगनुवृत्तौ दे
॥१०६॥ वलः तेषां त्रिविधो मूर्त्तिविशेषो द्युतिमत्सुगंधनिष्पाद्यमनाविलमनिमिषमस्वेदं क्षुत्पिपासानिद्रालस्यवर्जितं यथेष्टा
कृतिबलसंहननमूर्जस्वि निर्मलं परमशुक्लं सुकृतनिरीतं देवताशरीरं अनित्यमक्रमं सर्वरोगायतनं दुःखभाजन
मनेकाबाधमस्थिसंघातं शिरास्नायुनद्धं मांसावलिप्तं त्वक्शतिच्छन्नमन्नरसलालाशोणितमेदोमांसमज्जारेतःपित्ता
निलश्लेष्मगुदवस्तियकृत्प्लीहक्लेदमदमूत्रपुरीषकृमिपूर्णं नवच्छिद्रं संततस्रावं केशरोमनखपर्यंतं दुर्गंधि नित्य
संस्कार्यं जरामरणवशामिति मानुषशरीरं सततोद्विग्नमसंस्कारं विधृतनिष्पंदं क्षुत्पिपासावशं मूढेंद्रियगोचरं दुःखा
तायतनमज्ञानमकर्मण्यमिति तिर्यग्योनिशरीरं तेषां देवतिर्यङ्मनुष्याणां मूर्त्तिविशेषः शरीराकारः अनिष्पाद्यम
योनिजं यथेष्टाकृतिबलसंहननं यथेष्टं आकृतिः आकारः बलं सामर्थ्यं संहननमवयवसंहतता एतानि यत्र तत्तथा
सुकृतनिमित्तं सुकृतफलरूपं अनेकाबाधं अनेकाः अग्निव्याघ्राद्याबाधा यस्मिन् तत् सर्वदेहिसाधारणं दुःखमाह देवलः ।१०६।
इच्छाद्वेषः सुखं दुःखं क्षुत्तृष्णा चेष्टितं भयं उत्पत्तिर्मरणं चेति सामान्यं सर्वदेहिनां अवश्यं प्राणिनः सर्वे रमंते स्वासु यो
निषु अस्मत्समाविशिष्टावानजातिरिति निश्चयः अमेध्यमतिदुर्गंधि निस्सारं दुःखभाजनं अध्रुवं बहुदुःखं शरीरं ग

जवासिनां विण्मूत्रकृमिसंपूर्णं रोगायतनमातुरं शरीरं यापंतीहसदास्नानाशनादयः शय्याचंक्रमणं स्थानमासनं
वयथाक्रमं स्वजातिं नपरित्यक्तुमिच्छंति प्राणिनः कश्चित् देही देहं परित्यज्य नेंद्रस्थानमपीहते तस्मात्कीलोणिजंतूनां
स्वजात्या रमते नृणां नानाविधदुःखोत्पादकमपि शरीरं परमप्रेमास्पदत्वेन गृहं नपुनःपुनर्दुःखमेव प्रतिपद्यत इति तात्पर्यं
अस्थिस्थूणं स्नायुयुतं मांसशोणितलेपनं चर्मावनद्धं दुर्गंधि पूर्णं मूत्रपुरीषयोः जराशोकसमाविष्टं रोगायतनमातुरं रजस्व
लमनित्यं च भूतावासमिमं त्यजेत् एतादृशे देहे ममतां त्यजेदित्यर्थः देहे ममताकारिणां निंदोक्ता विष्णुपुराणे कशरी
रमशेषाणां श्लेष्मादीनां महाचयः क्व कांतिशोभासौरभ्यकमनीयागुणोदयाः मांसासृक्पूयविण्मूत्रस्नायुमज्जास्थि
संहतौ देहे चेत्प्रीतिमान्मूढो भविता नरकेऽपि सः स्थावरशरीरस्वरूपमाह मनुः उद्भिज्जाः स्थावराः सर्वे बीजकांड
प्ररोहिणः ओषध्यः फलपाकांता बहुपुष्पफलोपगाः अपुष्पाः फलवंतो ये ते वनस्पतयः स्मृताः पुष्पिणः फलिनश्चै
व वृक्षास्तूभयतः स्मृताः गुच्छगुल्मं तु विविधं तथैव तृणजातयः प्रतानाश्चैव वल्ल्यश्च वीरुधः परिकीर्तिताः तमसा बहुरूपे
ण वेष्टिताः कर्महेतुना अंतःसंज्ञा भवंत्येते सुखदुःखसमन्विताः उद्भेदनं उद्भित् ततो जायंत इत्यर्थः बीजकांडप्ररोहिणः
बीजात्कांडाच्च प्ररोहंति मूलस्कंधादिना वृद्धीभवंति फलपाकांताः फलपाकः अंतो नाशो यासामित्यर्थः पक्वे हि फले व्री
ह्यादयो नश्यंति बहुना च पुष्पेण फलेनोपगताः कदल्यादयः वनस्पतयः अश्वत्थादयः वृक्षाश्चाम्रादयः ये संहता

Indira Gandhi National Centre for the Arts

॥मो०ध०॥ भूमौबह्व्यएकमूलाअनेकमूलाश्चलताउत्तिष्ठंतिनचवृद्धिंमहतींप्राप्नुवंति तासांसंघातोगुच्छगुल्मशब्दवाच्यः तगरु
कुब्जकादिःतयोस्तुभेदः पुष्पवदपुष्पकृतःकुशकाशाद्युलपांशखुखीभ्रूतपःप्रतानाःदीर्घभूमिगतास्तृणजाती
॥१८७॥ हाः वल्ल्योव्रतत्यःभूमेरुत्पद्यवृक्षमन्यंचोच्चंपरिवेष्ट्योर्ध्वमारुहंति तमसाबहुरूपेणविविधदुःखानुभवरूपेण यद्य
पिसर्वंत्रिगुणंतथापितेषांतमोधिकंन्यूनेसत्वरजसी अतस्तमोबाहुल्यान्नित्यं दुःखादियुक्ताअधर्मफलमनुभवंती
त्यर्थः महाभारतेपि जंगमानांचसर्वेषांशरीरेपंचधातवःप्रत्येकशःप्रपद्यंतेयैःशरीरंविचेष्टितं त्वङ्मांसंचतथास्थीनि
मज्जास्नायुश्चपंचमःइत्येतदिहसंघातंशरीरेपृथिवीमयं तेजोग्निश्चतथाक्रोधश्चक्षुरूष्मातथैवचअग्निर्जरयतेचापि
पंचाग्नेयाःशरीरिणःश्रोत्रंघ्राणमथास्यंचहृदयंकोष्ठमेवच आकाशात्प्राणिनामेतेशरीरेपंचधातवः श्लेष्मापित्तमथ
स्वेदोवसाशोणितमेवच इत्यापःपंचधादेहेभवंतिप्राणिनांसदा प्राणात्प्रणयतेप्राणीव्यानाद्व्यानयतेसदा गच्छत्यपा
नोवाङ्गेवसमानोहृद्यवस्थितः उदानादुच्छ्वसितिप्रतिभेदाच्चजायते इत्येतेवायवःपंचचेष्टयंतीहदेहिनं पंचधातवइति
अत्रपंचभूतानीतिदृष्टव्यं तत्रत्वगादिपार्थिवं तेजआदितैजसं श्रोत्राद्याकाशमयं श्लेष्माद्यम्मयंप्राणादिवायुमयंएवं ।१८७।
पांचभौतिकमित्यर्थः एतद्विरोधादेवविजातीयानामनारंभकत्वात्आरंभकत्वेगंधमरसंकार्यंस्यात्तस्मात्पार्थिवमि
वेदंशरीरमबादीनांतूपष्टंभकत्वमितिवैशेषिकमतमपास्तं विजातीयानामपिपटतंतूनांतंतुकेशानांचपटरज्ज्वाद्यारंभ

कत्वदर्शनाच्च द्रव्यत्वसाक्षाद्व्याप्यजात्यासजातीयत्वाभिधानमनुकूलतर्काभावादुपेक्षणीयं नचकार्येगंधतापत्तिः स्फुरन्न्य
सुरभिकपालारब्धेघटेपिसंयोगरूपादिवत्गंधस्याप्यव्याप्यवृत्तितायाःप्रतीयमानत्वेनक्षणमप्यपह्नोतुमशक्यत्वात्न
चसकपालगंधएवनतुघटगंधइतिवाच्यंसंयोगरूपादेरपिअवयववृत्तित्वेनोपपत्तौअव्याप्यवृत्तित्वाभावप्रसंगात्नचा
वयविनिनिरूपत्वेनाप्रत्यक्षतापत्तिः घ्राणस्यद्रव्याग्राहकत्वेपिगंधेनावयव्यनुमानेनस्यात् जायतेचदूरतोपिगंधाद्घ्राणे
कमलप्रतीतिःतस्मात्संयोगादिवत्गंधस्याप्यव्याप्यवृत्तित्वेनविजातीयपार्थिवजलीयाद्यवयवाद्यारब्धेपिशरीरेगंधवत्वर
सवत्वसंभवान्नकिंचिदनुपपन्नं एवंदेवमनुष्यतिर्यक्स्थावरशरीराणांस्वरूपमुक्तं मध्येतेभ्योजीवस्वरूपस्यविवेकः
क्रियते तस्यप्रश्नोत्तराभ्यांस्वरूपमुक्तंमहाभारतेभरद्वाजउवाच यद्यग्निमारुतौभूमिःखमापश्चशरीरिषुजीवःकिंल
क्षणःस्तत्रेत्येतदाचक्ष्वमेनघ यदिप्राणयतेवायुर्वायुरेवविचेष्टते श्वसित्याभाषतेचैवतस्माज्जीवोनिरर्थकःजंतोःप्रमी
यमाणस्यजीवोनैवोपलभ्यते वायुरेवजहात्येनमूष्मभावश्चनश्यति यदिवातोपमोजीवःसंश्लेषोयदिवायुना वायुमंडल
वद्दृश्येतगच्छेत्सहमरुद्गणैः यद्यग्नीति जीवच्छरीरचेष्टानांभूतैरेवान्यथासिद्धौतद्व्यतिरिक्तआत्मानास्तीतिभारद्वाजीयप्रश्न
तात्पर्यंतदेवस्पष्टयतियदिप्राणयतइत्यादिना चेष्टाश्वसनभाषणानांप्राणवायुनैवसिद्धौजीवोव्यर्थइत्यर्थः जंतोरितिम
रणसमयेपिदेहभिन्नत्वेनानुपलभ्यमानत्वात्जीवोनास्तीत्यर्थः ऊष्मविरहश्चवायुविरहादेवोपपन्नःप्राणविरहादेवम

Indira Gandhi National
Centre for the Arts

॥मो०ध०॥
१०८

रणादेरप्युपपत्तिः नचवातोपमइति वायुवज्जीवोपिनचाक्षुषः प्रणवायुवज्जीवोपितेनसहैवगच्छेदितिशंक्यार्थः तर्हि
तद्वत्त्वचोपलभ्येत गच्छेत्सदमरुन्नलेरिति यादिशं वायुसमूलायांतितांदिशंगच्छेत तथाचकथंधर्माधर्मवशेनश्रुतौश्रूय
माणगतिरुपपद्येत तस्मान्नातितिष्ठजीवसद्भावेप्रमाणमितिप्रश्नतात्पर्यं तचोत्तरंभृगुरुवाच नपंचसाधारणमत्रकिंचि
त्शरीरमेकोवहतेंतरात्मा सवेत्तिगंधांश्चरसान्श्रुतीश्चस्पर्शांश्चरूपंचगुणांश्चयेन्ये पंचात्मकेपंचगुणप्रदर्शीसर्वगात्रा
नुगतोंतरात्मा सवेत्तिदुःखानिसुखानिचात्रतद्विप्रयोगंतुनवेत्तिदेहः नपंचसाधारणमिति यदिशरीरेपंचभूतेष्वेकत
ममपिगंधाद्यनेकानुसंधातृभवेतन्नवेज्जीवान्यथासिद्धिः नचैवंकिंचिदस्ति तस्माद्योहंचक्षुषाद्राक्षंसोहंस्पृशामीत्येव
माकारानुसंधाताकश्चिदेकोंगीकर्त्तव्यः नहीदमनुसंधानमिंद्रियाणामुपपद्यतेरूपग्राहकस्यचक्षुषोगंधग्राहकतानुपप
त्तेः तदुक्तंयाज्ञवल्क्येन महाभूतानिसत्यानियथात्माहितथैवहि कोन्यथैकेननेत्रेणदृष्टमन्येनपश्यति वाचंवाकोविजा
नातिपुनःसंश्रुत्यसंश्रुतां अतीतार्थस्मृतिःकस्यकोवास्वप्नस्यकारकः जातिरूपवयोवृत्तविद्यादिभिरहंकृतः शक्तःश
ब्दादिविषयेकर्मणामनसापिवा महाभूतानीति यथाकरणदोषबाधकज्ञानरहितानुभववेद्यत्वान्महाभूतानांप्रामा १०८
णिकत्वंतथाहंप्रत्ययविषयत्वादात्मनोपि नन्वहंप्रत्ययइंद्रियालंबनइत्यतआह कोन्यथेति इंद्रियव्यतिरिक्तस्यात्म
नोभावेएकेननेत्रेणदृष्टस्यनेत्रांतरेणदर्शनेपुरुषांतरस्येवयोहंदक्षिणेनाद्राक्षंसोहंवामेनपश्यामीतिप्रत्यभिज्ञानानुपप

त्तेरित्यपरार्कः तच्चगोलकद्वयेएकचक्षुःसंज्ञावस्यन्यायमतसिद्धत्वादयुक्तंमत्वाएकेननेत्रेणचक्षुषादृष्टमन्येनत्वगिंद्रि
येणपीदमद्राक्षंसोहंस्पृशामीतिप्रत्यभिज्ञानानुपपत्तेरितिव्याचख्यौविज्ञानेश्वरः वाचंवेति अहंप्रत्ययस्यश्रोत्रालं
वनत्वेतत्तत्कर्णशष्कुल्यवच्छिन्नस्यश्रोत्रस्यभेदेनदेवदत्तीयांवाचंश्रुत्वापुनःश्रोत्रांतरेणश्रवणेसेयवागितिप्रत्यभि
ज्ञानानुपपत्तेः अतीतार्थेति वालस्याद्यस्तनपानप्रवृत्तौप्रागभ्यस्तेष्टसाधनतानुभवजन्यस्मरणस्यकारणत्वेत
थाचतज्जनकीभूतसंस्काराधारत्वेनस्थाय्यात्मांगीकार्यइत्यर्थः कोवास्वप्नस्येति इंद्रियेषुलीनेषुस्वाप्नप्रपंचद्र
ष्टृत्वेनापिस्थाय्यात्मसिद्धिः जातीति जात्यादिनिमित्तोगर्वोहंकुलीनइत्येवमादिः प्रतिदिनंभिद्यमानेदेहेस्थाय्यात्मानं
विनाकथंस्यात् शक्तेति शब्दादिविषयोपभोगार्थंमनोवाक्कायैरुद्योगंकुर्यादित्यर्थः अन्यैरपिहेतुभिर्देहाति
रिक्तात्मसिद्धिरित्युक्तंतेनैव वेदेशास्त्रैःसविज्ञानैर्जन्मनामरणेनच आर्त्यागत्यातथागत्यासत्येनह्यनृतेनच श्रे
यसासुखदुःखाभ्यांकर्मभिश्चशुभाशुभैः निमित्तशाकुनज्ञानग्रहसंयोगजैःफलैः तारानक्षत्रसंचारचारैर्ध्यानैःस्व
प्नजैरपि आकाशपवनज्योतिजलभूतिमिरैस्तथा मन्वंतरैर्युगप्राप्त्यामंत्रौषधिफलैरपि वित्तात्मानंवेद्यमानंका
रणंजगतस्तथा अहंकारःस्मृतिर्मेधाद्वेषोबुद्धिःसुखंधृतिः इंद्रियांतरसंचारइच्छाधारणजीविते स्वर्गःस्वप्नश्च
भावानांप्रेरणंमनसोगतिः निमेषश्चेतनायत्नआदानंपांचभौतिकं यतएतानिदृश्यंतेलिंगानिपरमात्मनःतस्मा

Indira Gandhi National
Centre for the Arts

॥मोक्ष५०॥ दस्तिपरोदेहादात्मा सर्वगईश्वरः वेदैरित्यादिहेतुभिर्बुद्धींद्रियशरीरव्यतिरिक्तमात्मानंवित्तजानीतेत्यन्वयः वेदैः
: स्वर्गकामोयजेतेतिकर्मबोधकैः तत्रहियजेतेत्यात्मनेपदमहिम्नास्वर्गादिक्रियाफलस्यकर्तृगामित्वेदेहस्यविनाशि
१०९ त्वेनपक्षाधिकरणन्यायेन स्वर्गभोगायोग्यत्वात् तदतिरिक्तात्मसिद्धिः वेदांतैरपि अविनाशीवाअरेयमात्माअस्थूलम
नण्वह्रस्वमपाणिपादमित्यादिभिः ऽन्यैः मीमांसान्वीक्षिकादिभिः सविज्ञानैः ममेदंशरीरमित्याद्यात्मशरीरभेदावगाह
नुभवसहितैः जन्ममरणयोः सुखदुःखहेत्वोस्तत्साधनधर्माधर्माश्रयदेहातिरिक्तात्मकल्पकत्वं आत्यजिन्मांतरगतकर्म
नन्ययापीडयागत्यागत्यास्वर्गनरकयोर्गमनागमनाभ्यां सत्यानृताभ्यां कालांतरानुसंधीयमानप्रमाणांतरसंवादबाधा
भ्यां श्रेयोहितप्राप्तिः सुखदुःखेशकुनाशकुनैः कर्मभिर्धर्माधर्मैः एतैर्देहस्य स्वाश्रयत्वासंभवात्तद्भिन्न आत्मानुमीयते निमित्तं
भूकंपादि शकुनज्ञानं पिंगलादिपक्षिचेष्टादिलिंगकंज्ञानं ग्रहाः सूर्यादयः तत्संयोगः संचारः तज्ज्योतिःफलैः ताराः अद्भूति
नक्षत्राण्यश्विन्यादीनि तेषुसंचाराः जाग्रत्तेसन्निदिशादित्यदर्शनजन्यैः स्वप्नजैस्वप्नेखरयुक्तरथारोहणदर्शनसूचितैः एत
त्सूचितशुभाशुभफलानांदेहेसंभवादात्मानुमानं आकाशादिभिर्लोगैर्भोक्तानुमीयते तथामन्वंतरांतरेयुगांतरेषुस्थि १०९
तस्यमन्वंतरयुगयोरवस्थानं तेनापिस्थाय्यात्मसिद्धिः मंत्रौषधिफलानांजन्मांतरीयादृष्टसहकारित्वान्नात्प्रतिनिया
तात्मनिष्ठत्वेन तदाश्रयसिद्धिः अहंकारः अहंप्रत्ययः इदंप्रत्ययवेद्येदेहेनोपपद्यते स्मृतिस्तनपानेष्टसाधनताविष

यिणीमेधाधारणाजन्मांतरीयान्यस्तविषयिणी तथाद्वेषोपि बुद्धिः प्रज्ञासापितथैव सुखधृतीच्यानांनशरीरधर्मत्वंविशेषगु
णत्वेसत्यकारणगुणपूर्वकत्वात् शब्दवत् इंद्रियांतरसंचारः एकेनैवेंद्रियेणविषयग्राहकता साह्यंतःकरणेपदित
स्यात्मनोघटतेनतुव्यापिनः शरीरस्य जीवितंप्राणधारणं भावानांशरीरेंद्रियाणांप्रेरणं मनोगतिः निमेषश्च इदंस
र्वंचितनाधीतं साचनदेहधर्मः तद्धेतुभूतेषुभूतेष्वभावात् एतेनचतुर्णामेवभूतानांशरीराकारेणपरिणतानांमदशक्तिवच्चैत
न्यवत्वं चेष्टाचैतन्यस्मृत्यादेर्देहान्वयव्यतिरेकानुविधायित्वादितिलौकायतिकमतमपास्तं नतावच्चेष्टादेर्देहधर्मत्वंमृतदेहे
ऽभावात् देहस्यभूतसमुदायत्वेनभूतानांप्रत्येकशश्चैतन्यवत्त्वाभावेननसमुदायेपितत्संभवः किंचचैतन्यंभूतातिरि
क्तंनवा आद्येत्वदुष्टायातिरिक्ततत्वाभ्युपगमेतेषांसिद्धांतहानिः अंत्येतदात्मकत्वेनविषयविषयिभावरूपकर्मक्रियाविरो
धः स्वप्रकाशात्मस्वरूपज्ञानस्यतुनस्वस्मिन्विषयताऽहमिदमद्राक्षमितिह्रयएवतस्याभ्युपगमात् नापिचैतन्य
स्यदेहान्वयव्यतिरेकानुविधायित्वंस्वाप्नचैतन्येदेहानपेक्षत्वात् तत्वेवाआलोकसापेक्षस्यापिचाक्षुषज्ञानस्यालोकधर्म
त्वाभाववतन्यस्यापिदेहधर्मत्वाभावः सिद्धंचैतदेकआत्मनः शरीरेभावादित्यत्रांक्रव्यतिरेकस्तत्भावभावित्वान्नतूपल
ब्धिवदित्यधिकरणे नचेंद्रियाद्यगोचरेआत्मनिप्रमाणंनास्तीतिवाच्यं तदगोचरेपिवंदृष्टादौप्रमाणसंभववदात्मन्यपि
प्रमाणसंभवात् तदुक्तं महाभारते यथाहिमवतः पार्श्वंपृष्ठंचंद्रमसोयथा नदृष्टपूर्वंमनुजैर्नचतन्नास्तितावता तद्व

Indira Gandhi National Centre for the Arts

॥मोक्ष१०॥ भूतेषु भूतात्मा सूक्ष्मो ज्ञानात्मवानसौ अदृष्टपूर्वश्चैवक्रमं नचासौ नास्ति तावता शरीरनाशेः तस्य नाशो नास्ती
११८ त्युक्तं तत्रैवान शरीराश्रितो जंतुस्तस्मिन्नष्टे विनश्यति यथा समित्कदंबासु नष्टे नश्येत पावकः नजीवनाशो
स्तिहि देहनाशो मिथ्यैतदाहुर्मृत इत्यबुद्धाः जीवस्तु देहांतरगः प्रयाति दशार्द्धतैवास्य शरीरभेदः यथा चिषिन्धेः
पवनस्य भेदा मरीच्ययोर्कस्य नदीषु चापः गच्छंति चापांति च संततास्तु तद्वच्छरीराणि शरीरिणस्तु दशार्द्धतायं च ताम
रणमित्यर्थः भगवद्गीतायामपि देहिनोस्मिन्यथा देहे कौमारं यौवनं जरा तथा देहांतरप्राप्तिर्धीरस्तत्र न मुह्यति
नासतो विद्यते भावो नाभावो विद्यते सतः उभयोरपि दृष्टोंतस्त्वनयोस्तत्त्वदर्शिभिः अविनाशि तु तद्विद्धि येन सर्वमिदं
ततं विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति अंतवंत इमे देहा नित्यस्योक्ताः शरीरिणः अनाशिनोऽप्रमेयस्य तस्मा
द्युध्यस्व भारत य एनं वेत्ति हंतारं यश्चैनं मन्यते हतं उभौ तौ न विजानीतो नायं हंति न हन्यते न जायते म्रियते वा कदा
चितनायं भूत्वा भविता वा न भूयः अजो नित्यः शाश्वतोयं पुराणो न हन्यते हन्यमाने शरीरे वेदाविनाशिनं नित्यं य ए
नमजमव्ययं कथं स पुरुषः पार्थ कं घातयति हंति कं वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोपराणि तथा ॥११८
शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही नैनं छिंदंति शस्त्राणि नैनं दहति पावकः नचैनं क्लेदयंत्यापो न
शोषयति मारुतः अच्छेद्योयमदाह्योयमक्लेद्योऽशोष्य एव च नित्यः सर्वगतः स्थाणुरचलोयं सनातनः अव्यक्तोयम

चिंत्योयमविकार्योयमुच्यते नासत इति असतो नात्मधर्मस्य जन्ममरणादेः आत्मनि सत्त्वं न विद्यते सतः सद्रूपस्यात्म
नोऽभावो नाशो नास्ति उभयोः सदसतोः अंतः निर्णयः तत्त्वदर्शिभिः याथात्म्यविद्भिः यद्वाऽसतो बाध्यमानस्य शरी
रस्य भावः सत्ता न विद्यते सच्चेन्न बाध्येतेति न्यायात् सतः प्रतीयमानस्याभावस्तु अत्यंतं न विद्यते असच्चेन्न प्रतीयेतेति
न्यायात् उभयोः सदसतोः अंतः विलक्षणत्वं दृष्टं तत्त्वदर्शिभिः आचार्यैः तथाचागमापायिनां शरीरादीनां सदस
द्विलक्षणत्वं मिथ्यात्वं सिद्धं विनाशमव्ययस्येति अव्ययस्याबाध्यमानस्यात्मनो विनाशं न कोपि कर्तुं शक्नुयादित्य
र्थः नायं भूत्वेति भूत्वाऽभावित्वरूपं ध्वंसप्रतियोगित्वमपि नात्मनोस्तीत्यर्थः यद्वा न भविता नोत्पत्तिप्रतियोगी तेन
भूत्वा सद्रूपस्यासतो जन्यत्वमपि निरस्तं आत्मनो अविकारित्वमाह याज्ञवल्क्योपि अहंकारेण मनसा गत्या कर्मफ
लेन च शरीरेण च नात्मायं मुक्तपूर्वः कथंचन वर्त्याधारस्नेहयोगात् यथा दीपस्य संस्थितिः विक्रियापि च दृष्टैवम
काले प्राणसंक्षयः अहंकारादिभिरनादिसंसारे न कदाचिदपि आत्मा मुक्तस्तथापि विक्रिया नाशो वा तेषामेवोपाधि
वशादात्मनि भासत इत्यर्थः तत्र दृष्टांतो वर्त्याधारेति यथा दीपस्य विक्रिया जन्मनाशादिकं तैलवशादिकं तैलवशा
त्तथात्मनोपि शरीरकृतं विक्रियादिकं न पारमार्थिकमित्यर्थः केचित्तु यथा हि खलु तैलक्लिन्नानेकवर्तिवर्तिनीनां
ज्वालानां स्थितिः तासां च प्रबलपवनोपनिपातात् नाशः तथैव युद्धादौ नाश इति व्याचिन्वंति तन्मूर्खोक्तं आत्मनो निर्विकार

Indira Gandhi National Centre for the Arts

त्वविरूद्धमित्युपेक्षणीयं षड्भावविकारा अपि नात्मनः संतीत्युक्तं मार्कंडेयपुराणे सा वै मदालसा पुत्रं बालमुत्तान
शायिनं उल्लापनच्छलेनाहरुदमानमविस्मयं शुद्धोसि रे तात न तेस्ति नाम कृतं हि तत्कल्पनयाधुनैव पंचात्मकं
 देहमिदं न तेस्ति नैवास्य त्वं रोदिषि कस्य हेतोः न वा भवान्रोदिति विश्वजन्मा शब्दोयमासाद्य महीशसूनुं विकल्प्यमा
नो विविधैर्गुणैस्ते गुणाश्च भौताः सकलेंद्रियेषु भूतानि भूतैः परिदुर्बलानि वृद्धिं समायांति यथैव पुंसां अन्नांबुपानादि
भिरेव मस्य न तेस्ति वृद्धिर्न च तेस्ति हानिः त्वं कंचुके शीर्यमाणे निजेस्मिन् विमूढता वं सहमावजेथा। शुभाशुभैः कर्म
भिर्देहमेतत्म[illegible]दादि मूढैः कंचुकस्ते पिनद्धः तातेति किंचित्तनयेति किंचिदंबेति किंचिद्दयितेति किंचित् ममेति किंचि
न्नममेति किंचित्त्वं भूतसंघं बहु मानयेथाः यानं क्षितौ यानगतश्च देहो देहेपि चान्यः पुरुषो निविष्टः ममत्वमुर्व्यां न
तथा यथा स्वे देहेतिमात्रं बत मूढतैषा शुद्धः नामरूपधर्मप्रपंचेनासीग: अत एव ते नाम नास्ति नाम वद्देहसंबंधान्नाम
वत्वे स एव दुर्लभ इत्युक्तं देहमिदं न ते स्तीति त्वं कंचुकेति यथा मूढः कंचुके पिनद्धे आत्मानं पुष्टं मन्यते तथा देहात्मै
नैक्याध्यासाद्देहधर्मानात्मन्यध्यस्यति वास्तवे पृथक्त्वेपि देहात्मनोरैक्याभिमानः तदुक्तं तत्रैव मुंजाको डंबरेषीका
मुंजमत्स्यांभसां यथा एकत्वेपि पृथग्भावस्तथा देहात्मनोर्भवेत् देहात्मनोरैक्याध्यासात्मरणमपि आत्मन्यध्येति त
दुक्तं ब्रह्मपुराणे ततः प्रयाणकाले हि दोषैर्नैमित्तिकैस्तथा उष्माप्रकुपितः काये तीव्रवायुसमीरितं शरीरमुपहत्याथ 

रुणद्धि दोषान् रुणद्धि वै प्राणस्थानानि निर्भिंदन्पुनर्मर्माणि पीड्यन्च शैत्यात्प्रकुपितो वायुरूर्ध्वं चंक्रमते ततः सचायं स
र्वभूतानां प्राणस्थानेषु व्यवस्थितः तमसा संवृते ज्ञाने संवृतेषु च कर्मसु स जीवो नाभ्यधिष्ठानाच्च्याव्यते मातरिश्वना सजी
वश्च्याव्यमानश्च कर्मभिः स्वैः पराक्रमैः अष्टांगां प्राणवृत्तिं तां सम्यक्च्यावयते पुनः शरीरं प्रजहात्येवं निरुच्छ्वासं ततोभवेत
एवं प्राणैः परित्यक्तो मृत इत्यभिधीयते यथा बलाहकानुद्योग्निरवद्योतं च तत स्ततः प्रादुष्कालेपृथक्त्वेन पश्यंत्यह तच्च
क्षुषः पश्यंत्येवं विधं जीवं सिद्धादिव्येन चक्षुषा अत्र प्राणवियोगरूपमरणस्य शरीरधर्मत्वेन तत्वात्मधर्मत्वं आत्मनश्च शरी
रीरपृथक्त्वेनैव दिव्यज्ञानविषयत्वात् शरीरोपाधिकस्यैव जीवस्य जन्ममरणाद्यध्यासः पृथक्त्वेन तु ज्ञाते न भवतीति
तात्पर्यं एवं शरीराद्विवेक उक्तः इंद्रियेभ्यश्च अग्निपुराणे चक्षुरादीनींद्रियाणि नात्मा विकरणत्वतः तथा अहं ब्र
ह्मपरं ज्योतिर्वाक्पाण्यंघ्रिविवर्जितं अहं ब्रह्मपरं ज्योतिः पायूपस्थविवर्जितं अहं ब्रह्मपरं ज्योतिः श्रोत्रत्वक्चक्षुरुज्झि
तं अहं ब्रह्मपरं ज्योतिर्जिह्वाघ्राणविवर्जितो करणत्वत इति लोके हि करणं कुठारादिदर्व्यादि वा कर्तुर्भिन्नं कुश्च भिन्नमेव
दृष्टं तद्वदात्मनो विभिन्नमिंद्रियादि अहं ब्रह्मेति वागादिश्रोत्रादिकर्मज्ञानेंद्रियेभ्यो विविक्तस्याहंपदार्थस्य जीवस्य ब्र
ह्माभेद उक्तः प्राणेभ्योपि विवेक उक्तस्तत्रैव प्राणो ह्यात्मा न भवति सुषुप्ते चित्प्रभावतः जाग्रत्स्वप्ने च चैतन्यं संकीर्णत्वान्न
बुध्यते विज्ञानरहिते प्राणः सुषुप्ते जायते यतः तथा अहं ब्रह्मपरं ज्योतिः प्राणापानविवर्जितं अहं ब्रह्मपरं ज्योतिर्ज्ञानो

[Indira Gan]dhi National Centre for the Arts

॥मो०ध०१२०॥ दानविवर्जितं अहं ब्रह्म परं ज्योतिः समानपरिवर्जितं प्राण इति प्राणस्यात्मरूपत्वे चैतन्यमपि तस्यैव स्यात् तत्त्वज्ञा
स्तीत्युक्तं स एष प्राण इति तदेव दर्शयति जाग्रत्स्वप्न इति प्राणधर्मसंस्पर्शादपि न प्राणात्मनोरभेदः तदुक्तं तत्रैव अहं
॥१२२॥ ब्रह्म परं ज्योतिः क्षुत्पिपासाविवर्जितं अंतःकरणाद्विवेक उक्तो मार्कंडेयपुराणे नाहं कोऽहं न च मनो बुद्धिर्नाहं यतस्त
तः अंतःकरणं जडं स्वं परं कस्मान्मम तत्कथं नाहं शरीरं न मनो यतोऽहं पृथक् शरीरात्मसस्तथाहं तत्संतु चेतस्यथवा
पि देहे सुखानि दुःखानि च किं ममात्र अंतःकरणस्यैव हृत्तयो मनो बुद्ध्यहंकाराः तेभ्यो विवेक उक्तो नाहंकार इत्या
दिना अंतःकरणं जडं स्वमिति तद्धर्माध्यासोऽपि निरस्तः बुद्धिरूपदृष्टिरितो भेद उक्तो महाभारते सत्वक्षेत्रज्ञयोरेतदंत
रं पश्य सूक्ष्मयोः सृजते तु गुणानेक एको न सृजते गुणान् मशकोदुंबरौ चैव संप्रयुक्तौ यथा सदा अन्योन्यस्य च ते अ
न्ये संप्रयोगस्तथा तयोः पृथक् तु तौ प्रकृत्या तौ संप्रयुक्तौ च सर्वदा यथा मत्स्योऽन्यो जलं यतः संप्रयुक्तस्तथैव तौ न गुणा
न्विदुरात्मानं स गुणान् वेत्ति सर्वज्ञः सृजते हि गुणान् सत्वं क्षेत्रज्ञः परिपश्यति संप्रयोगस्तयोरेव सत्वक्षेत्रज्ञयोर्ध्रु
वः सत्वं बुद्धिः द्वा सुपर्णा वित्यस्य व्याख्याने पैंगिरहस्य ब्राह्मणे सत्वक्षेत्रज्ञाविति पत्र सत्वपदेन बुद्धेरेव तात्पर्यकारे ।१२२।
व्याख्यातत्वात् गुणान् अध्यवसायान् इदं करोमीत्येवमाकारान् मनोहंकाराभ्यां भेद उक्तो ग्निपुराणे मनोऽपि चा
त्मा न भवति दीपवत्करणत्वतः तथा अहंकारोऽपि नैवात्मा अहमवद्व्यभिचारतः उक्तेभ्यो व्यतिरिक्तोऽयमात्मा सर्वह

द्विस्थितः करणत्वतः चैतन्यस्य मनोरूपहत्यवच्छिन्नस्यैव प्रमातृत्वात् मनसः करणत्वं तस्मादित्यर्थः व्यभिचारतः
सुषुप्त्यादौ व्यतिरेकात् महाभारतेऽपि नित्यं द्वंद्वसमायुक्तं सत्वमाहुर्गुणात्मकं निर्द्वंद्वो निष्कलो नित्यः क्षेत्रज्ञो निर्गुणा
त्मकः सर्वैरपि गुणैर्विद्वान् व्यतिरिक्तो न लिप्यते जलबिंदुर्यथा लोलः पद्मिनीपत्रसंस्थितः एवमेवाप्यसंयुक्तः पुरु
षः स्यात्स संशयः अंतःकरणधर्मसंसर्ग उक्तोऽग्निपुराणे अहं ब्रह्म परं ज्योतिः शोकमोहविवर्जितं उपाध्यर्हतस्य
तु तस्य पृथक्त्वेन ज्ञानं दुर्लभं देशात विविवेकेन दृश्यत्वात् तदुक्तं शरीरेण पृथिव्यापस्तथा तेजो वायुराकाशमेव
च पंचैतानि विजानीयात् महाभूतानि पंडितः श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च बुद्धीन्द्रियाणि जानीयात् पंचैवा
स्मिन्शरीरके मनो बुद्धिस्तथा चात्मा अव्यक्तं चैवमेव च इंद्रियेभ्यः पराण्याहुश्चत्वारि कथितानि तु शब्दं रूपं त
था स्पर्शं रसं गंधं तथैव च इंद्रियार्थं विजानीयात् पंचैव सततं बुधः हस्तपादावुपस्थं च जिह्वैव सततं बुधः कर्मेंद्रिया
णि पंचैव पायुश्चास्मिन्शरीरके चतुर्विंशतितत्वानि एतानि कथितानि तु तथात्मानं तु तं विद्धि पुरुषं पंचविंशकं बलाग्र
शतभागोयः कल्पितस्तु सहस्रशः तस्यापि शतवान्भागो जीवः सूक्ष्म उदाहृतः पंचविंशकमिति क्षेत्राद्विवेक उक्तः सू
क्ष्म इत्यनेन दुर्ज्ञेयत्वमुक्तं न चोत्क्रांतिगत्यागतीनामिति सूत्रे अणुत्वे विप्रत्यागमेतिवालाग्रशतभागस्येत्यादि श्रु
त्युक्तत्वाच्चाणुर्जीवोऽणुः सर्वांगीणसुखाद्युपलब्धिश्च प्रदीपप्रभान्यायेनाश्रयातिरिक्तप्रदेशव्यापि गुणतयोपपन्ने

Indira Gandhi National Centre for the Arts

॥मो॰ह्व॰१०॥ त्वणुपरिपरिमाणएवास्तितिवाच्यं ममैवांशोजीवलोकेजीवभूतः सनातनइत्यनेनेश्वरप्रतिबिंबरूपस्यजीवस्यअं
तःकरणपरिमाणेनैवपरिमाणवत्वेनाणुपरिमाणत्वनियमः यथादर्शतलेप्रतिबिंबितस्यमुखस्यादर्शपरिमाणमे
।११३। वनतुतात्विकंपरिमाणमस्ति किंचसएषप्रविष्टआनखाग्रेभ्यइतिश्रुत्याशरीरव्यापित्वश्रवणाच्चैवंसतिकल्प्यते नचै
षोणुरात्माचेतसावेदितव्यइतिसाक्षादणुत्वाभिधानंकथमितिवाच्यं ततस्तुतंपश्यतेनिष्कलंध्यायमानइतिपरमात्म
नएवप्रकृतत्वात्ध्यायमानलभ्यत्वेनाणुत्वोक्तिः ब्रह्मांशोजीवः तस्यचबंधआविद्यकइत्युक्तंश्रीभगवते एकस्यैव
ममांशस्यजीवस्यैवमहामतेबंधोस्याविद्ययानादिर्विद्ययाचतथेतरः इतरःमोक्षःजीवोब्रह्मांशइत्युक्तंश्रीविष्णुपुरा
णे विष्णुशक्तिःपराप्रोक्ताक्षेत्रज्ञाख्यातथापरा अविद्याकर्मसंज्ञान्यातृतीयाशक्तिरिष्यते यथाक्षेत्रज्ञशक्तिःसावेष्टि
तानृपसर्वगासंसारतापानखिलानवाप्नोत्यनुसंततान् तयातिरोहितत्वाच्चशक्तिःक्षेत्रज्ञसंज्ञिता सर्वभूतेषुभूपाल
तारतम्येनलक्ष्यते परापरब्रह्मस्वरूपाविष्णुशक्तिःईश्वरःअपराक्षेत्रज्ञाख्याजीवस्वरूपा यथाकर्मसंज्ञयातयावेष्टि
तोहिजीवःसकलान्तापाननुभवति तस्माद्ब्रह्मणोंशोऽविद्यावृतत्वेनसकलसुखदुःखादिभाक्त्वेनप्रतीयमानोजीव ॥११३॥
इत्युच्यतेनतुतस्येदंनैजंरूपमितितात्पर्यं योयंजीवःक्षेत्रतः तस्यस्वरूपमाहमनुः योस्यात्मनःकारयितातंक्षेत्रज्ञं
डुर्बुधाः यः करोतितुकर्माणिसभूतात्मोच्यतेबुधैः जीवसंज्ञोंतरात्मान्यः सहजः सर्वदेहिनां येनवेदयतेसर्वंसुखं

दुःखंचजन्मसु अस्यात्मनः शरीरस्य शरीरस्यात्मनोभोगायतनत्वेनगुणेनात्मशब्देनशरीरमुच्यते कारयिता
चेष्टासुप्रवर्तयिता स्वप्रयत्नेनेतिशेषः सभूतात्माभूतपंचकज्ञानेंद्रियकर्मेंद्रियसंघातः देहइतियावत् अंतरा
त्माअंतकरणं आमोक्षप्राप्तेस्तत्संबंधात्सहजः येनेतिसुखदुःखानुभवेतदुत्पत्तौचकरणेनेत्यर्थः केचित्तुक्षेत्रज्ञभूता
त्मजीवपदैःपरमात्मदेहजीवाउच्यंतइतिव्याचक्षतेतन्न पूर्वोक्तक्षेत्रज्ञाख्या तथापरेतियथाक्षेत्रज्ञशक्तिःसावे
ष्टितेतिविष्णुपुराणवचोविरोधात् क्षेत्रज्ञपदेनशरीराभिमानीजीवएवोच्यतइत्युक्तंगीतासु महाभूतान्यहंकारोबु
द्धिरव्यक्तमेवच इंद्रियाणिदशैकंचपंचचेंद्रियगोचराः इच्छाद्वेषःसुखंदुःखंसंघातश्चेतनाधृतिः एतत्क्षेत्रंसमा
सेनसविकारमुदाहृतं एतद्योवेत्तितंप्राहुःक्षेत्रज्ञमितितद्विदः महाभूतान्याकाशादीनि अहंकारःभूतकारणंअभि
मानलक्षणः बुद्धिर्महत्तत्वमध्यवसायलक्षणं अव्यक्तंप्रधानंसत्वरजस्तमसांसाम्यावस्थालक्षणं इतिसांख्य
प्रक्रिययाव्याख्या तंक्षेत्रस्वरूपं औपनिषदानांतुतेध्यानयोगानुगताअपश्यन्देवात्मशक्तिंस्वगुणैर्निगूढामिति
श्रुत्युक्तमनिर्वचनीयमायारूपमव्यक्तं बुद्धिःसऐक्षतेतिश्रुत्युक्तंसर्गविषयमीक्षणं अहंकारःबहुस्यांप्रजाये
येतिश्रुत्युक्तइक्षणोत्तरभावीसंकल्पः इंद्रियाणितथाप्राणइत्यधिकरणसिद्धानिदश पंचज्ञानेंद्रियाणिपंचक
र्मेंद्रियाणि एकंमनःसंकल्पविकल्पात्मकं पंचेंद्रियगोचराः शब्दस्पर्शरूपरसगंधाः इच्छासुखेतत्साधनेवा

Indira Gandhi National
Centre for the Arts

॥मोक्ष१०॥ इदं मे भूयादिति स्पृहा द्वेषः दुःखे तत्साधने वा इदं मे मा भूदिति स्पृहाविरोधिनी चित्तवृत्तिः सुखं निरुपाधीच्छा
विषयीभूता परमात्मसुखव्यंजिका चित्तवृत्तिः दुःखं निरुपाधिद्वेषविषयीभूता चित्तवृत्तिः संघातः पंचमहाभू
॥११४॥ तपरिणामः चेतना प्रमाणसाधारणकारणिका स्वरूपज्ञानव्यंजिका चित्तवृत्तिः धृतिरवसन्नानां देहेंद्रियाणा
मवष्टंभहेतुः प्रयत्नः एतदिच्छादीनामप्युपलक्षणं तेन कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्ये
तत्सर्वं मन एवेति श्रुत्युक्तानां ग्रहणं एतैर्महाभूतादिधृत्यंतं जडं क्षेत्रं ज्ञेन साक्षिणा व्याप्यमानत्वात् तत्रास्थं
क्षेत्रमित्युक्तं भवति सविकारं तथा च विकारित्वमेव क्षेत्रलक्षणं न तु परिगणने तात्पर्यं एतेन शरीरेंद्रियसंघा
त एव चेतनः क्षेत्रज्ञ इति लोकायतिकाः चेतना क्षणिकं ज्ञानमेवात्मेति सुगताः इच्छाद्वेषप्रयत्नसुखज्ञानान्या
त्मनो लिंगमिति नैयायिका इति मतानि निरस्तानि उक्तस्वरूपस्य सविकारित्वेन विनाशित्वात् वेदाविनाशि
नं नित्यमिति वचनविरोधप्रसंगात् एतद्यो वेत्तीति स्वेनैव स्वस्य दर्शने कर्तृकर्मविरोधाच्च तथा च मैत्रायणीय
श्रुतिः अन्यो वायामपरः कोयमात्माख्य इत्युपक्रम्य कतम एष इति मध्ये परामृश्य अस्ति खल्वन्यो भूतात्माख्यो ११४
योऽयं सितासितैः कर्मफलैरभिभूयमानः सदसद्योनिमापद्यते श्वेताश्वतरोपनिषद्यपि यः कर्त्ता सोयं भूतात्मा
करणैः कारयितांतः पुरुष इति स च जीवो ब्रह्मप्रतिबिंबरूपः कलुषितांतःकरणानां देहादिभिन्नत्वेन दुर्ज्ञेय

इत्युक्तं भगवद्गीतायां श्रीभगवानुवाच ममैवांशो जीवलोके जीवभूतः सनातनः मनःषष्ठानींद्रियाणि प्र
कृतिस्थानि कर्षति शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः गृहीत्वैतानि संयाति वायुर्गंधानिवाशयात् श्रो
त्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च अधिष्ठाय मनश्चायं विषयानुपसेवते उत्क्रामंतं स्थितं वापि भुंजानं वा गुणा
न्वितं विमूढा नानुपश्यंति पश्यंति ज्ञानचक्षुषः ममैवेति ममैव परमात्मनोंशः अंश इव अंशो मायाकल्पितः सू
र्यस्येव जलोपाधिकः प्रतिबिंबः नभस इव घटोपाधिनावच्छेदः मिथ्याभेदवान् जीवभूतः कर्त्ता भोक्ता संसारी
ति मृषैव प्रसिद्धिमुपगतः वस्तुतः सनातनो नित्यः उपाधिपरिच्छिन्नस्य वस्तुतः परमात्मस्वरूपत्वात् बिंबत्वं
प्रतिबिंबत्वं यथा भूषणि कल्पितं जीवत्वमीश्वरत्वं च तत्तथा ब्रह्मणि कल्पितमिति पराशरपुराणात् जीवस्य प्र
तिबिंबत्वमवच्छिन्नत्वं वेति संशयेऽखंडार्थनिरूपणे वक्ष्यामः ननु सता सोम्य तदा संपन्नो भवति स्वमपीतो भव
तीति श्रुत्या सुषुप्तावंतःकरणाद्युपाधेर्लयात् ब्रह्मीभूतत्वावगमात् कथं जागराद्यवस्थायां पुनरुपाधिविशिष्ट
तेति चेत् अंतःकरणादिकार्यलयेपि मूलाज्ञानस्याविनाशात् अत एवोक्तं प्रकृतिस्थानीति श्रोत्रत्वक्चक्षूरस
नघ्राणानि पंच षष्ठं मनश्च जाग्रत्स्वप्नजनककर्मक्षये प्रकृतावज्ञाने सूक्ष्मरूपेणावस्थितानि पुनर्जाग्रद्भोगप्र
दकर्मोद्बोधेन भोगार्थं कर्षति कूर्मोंगानीव प्रकृतेराकर्षति विषयग्रहणयोग्यतयाऽविर्भावयतीत्यर्थः शरीर

Indira Gandhi National
Centre for the Arts

॥मोक्ष ३०॥ मिति स्वरः देहेंद्रियसंघातस्वामी एकं शरीरं विहाय यदापरं शरीरं गच्छति तदा इंद्रियाणि गृहीत्वेत्यर्थः तेन
वस्तुतोऽसंसारित्वेपि अनादिमायया देहतादात्म्यापन्नस्य जीवस्य शरीराद्यतिरेकज्ञानं भवति श्रोत्रमि
॥ ११५॥ ति श्रोत्रादीनींद्रियाणि मनश्चाधिष्ठाय तत्तद्विषयं भुंक्ते तेन करणीभूतेंद्रियेभ्यो भोक्तुर्जीवस्य छिदादिकरणी
भूतपरश्वादेः पुरुषस्येव भेदः सिद्धः भवचमरणसमुद्धीरनीरविवेचने हंसानामिव अस्त्युपलंभः तदेतदुक्त
मुत्क्रामंतमिति एतद्विदंतं तत्रैव पतंतो योगिनश्चैनं पश्यंत्यात्मन्यवस्थितं यतंतोप्यकृतात्मानो नैनं पश्यंत्यचेतसः
यतंतो ध्यानादिभिः प्रयतमानाः आत्मनि बुद्धौ अवस्थितं प्रतिफलितं बुद्धिप्रतिबिंबितस्य ब्रह्मण एव जीवत्वा
त् कृष्णसारत्वात्तद्व्यपदेशः प्राज्ञवदित्यधिकरणन्यायात् अकृतात्मानः यज्ञादिभिरशोधितांतःकरणाः नै
नैनं पश्यंति देहेंद्रियाद्यतिरिक्तत्वेनेति शेषः अतएव बुद्धींद्रियमनोरूपोपाधिनिष्ठानामवस्थानां तदेकाध्यासा
दात्मन्यध्यासः तदुक्तं महाभारते पुरुषाधिष्ठिता बुद्धिस्त्रिषु भावेषु वर्तते कदाचिल्लभते प्रीतिं कदाचिदनुशोच
ति न सुखेन न दुःखेन कदाचिदपि वर्तते इंद्रियाणां स्वकर्मभ्यः श्रमादुपरमो यदा भवतींद्रियसन्यासादथस्व ।११५।
पितिर्वै नरः इंद्रियाणामुपरमात् मनोनुपरतं यदा सेवते विषयानेव तद्विद्यात्स्वप्नदर्शनं पुरुषेणाधिष्ठिता अधिष्ठि
तामेरिता या बुद्धिः सा तत्तद्विषयेषु प्रवर्तते तदाकारवृत्त्या विषयान्व्याप्नोति सुखदुःखादिरूपेण परिणमते

च न सुखेनेति न सर्वदा सुखरूपेण न वा दुःखरूपेणेत्यर्थः इंद्रियाणामंतःकरणं तानां यदा स्वविषयेभ्यः श्रमादु
परमः तदेंद्रियसंन्यासादिंद्रियाणां सर्वेषां लयात्स्वापः सुषुप्त्यवस्था यदा तु नित्यानित्यवस्तुविवेकात् विषयेभ्य उप
रमः तदा समाधिरित्युच्यते मनोनुपरतमिति यदेंद्रियाणामुपरमोंतःकरणानुपरमस्तदा स्वाप्नान् विषयान् भुंज
ते सा स्वप्नावस्था अथ रथान् रथयोगान् पथः सृजत इति श्रुतेः संध्ये सृष्टिराह हीति न्यायाच्च तस्माद्देहेंद्रियाद्येका
ध्यासात् जीवो लेलायतीव शोचतीव भवतीति पर्यवसितोर्थः स एव चाद्वैतब्रह्मतत्त्वसाक्षात्कारात्पूर्वमज्ञानकृता
ध्यासिकबंधात् बद्ध इति बंधस्य त्रैविध्यमुक्तं ब्रह्मांडपुराणे अतत्त्वदर्शनात्सोयं त्रिविधं बध्यते सदा प्राकृतेन
च चक्रेण तथा वैकारिकेण च दक्षिणाभिस्तृतीयेन बद्धोत्यंतं विवर्तते इत्येते वै त्रयः प्रोक्ता बंधा अज्ञानहेतवः अ
नित्ये नित्यसंज्ञा च दुःखे च सुखदर्शनं अस्वे स्वमिति च ज्ञानमशुचौ शुचिनिश्चयः रागद्वेषविवृद्धिश्च तदज्ञानमुदाहृ
तं अतत्त्वदर्शनात् अद्वैतब्रह्मसाक्षात्काराभावात् प्राकृतेन चक्रेण प्रधानमहदाद्यष्टकसमुदायेन वैकारिकेण वै
कारिकाणामिंद्रियाणां विषयेषु तत्तदासक्तिरूपेण दक्षिणाभिः काम्येष्टापूर्तादिभिः अज्ञानहेतवः मूलाज्ञानजन्याः मु
ख्यं त्वत्र तदज्ञानमेव येनानित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मत्वाध्यासात् विषयेषु सज्जते तदुक्तं देवलेन
प्रकृतिबंधो वैकारिकबंधो दक्षिणाबंध इति बंधत्रयी तत्राव्यक्तादिभिरष्टभिर्बंधः प्रकृतिबंधः इंद्रियैरिंद्रियार्थैश्च बं

Indira Gandhi National Centre for the Arts

॥गीटी०॥ धो वैकारिकबंधः इष्टापूर्त्तादिभिर्बंधो दक्षिणाबंधः तत्र प्रकृतिबंधो देवतानां दक्षिणाभिराश्रमिणां वैकारेणान्ये-
॥११६॥ षां धर्मज्ञानानिच बंधहेतवः एवमज्ञानकार्याणां बंधकत्वमुक्तं सांख्यरीत्यापि प्राकृतानां गुणानां बंधहेतुत्वमुच्य
ते तत्र मनुः सत्वंरजस्तमश्चैव त्रीन्विद्यादात्मनो गुणान् यैर्व्याप्येमान्स्थितो भावान्महान् सर्वानशेषतः आत्मनः
आत्मोपाधेरंतःकरणस्य यैः सत्वादिभिः इमान्भावान्प्राणिनः महान्बुद्धितत्वं एतेषां गुणानां बंधकत्वे प्रकारश्च
श्रीभगवद्गीतायां सत्वंरजस्तम इति गुणाः प्रकृतिसंभवाः निबध्नंति महाबाहो देहे देहिनमव्ययं तत्र सत्वं निर्मलत्वा
त्प्रकाशकमनामयं सुखसंगेन बध्नाति ज्ञानसंगेन चानघ रजो रागात्मकं विद्धि तृष्णासंगसमुद्भवं तन्निबध्नाति कौं
तेय कर्मसंगेन देहिनं तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनां प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत सत्वं सुखे
संजयति रजः कर्मणि भारत ज्ञानमावृत्य तु तमः प्रमादे संजयत्युत रजस्तमश्चाभिभूय सत्वं भवति भारत रजः
सत्वं तमश्चैव तमः सत्वं रजस्तथा प्रकृतिसंभवा इति त्रयाणां गुणानां साम्यावस्था प्रकृतिः ततो वैषम्येण परिणताः
देहेंद्रियबुद्धिसंघाते देहिनं देहतादात्म्याध्यासापन्नं जीवं वस्तुतोऽव्ययं परब्रह्मरूपत्वेन सर्वविकारशून्य ११६
त्वात् निबध्नंतीव निर्विकारमेव संतं सविकारवत्स्वयोपदर्शयंतीव यथाजलसंभृताघटाः सूर्यप्रतिबिंबाध्यासेन
स्वकंपादिमत्त्वपादर्शयंति परमार्थतस्तु बंधो नास्ति शरीरस्थोपि कौंतेय न करोति न लिप्यत इति तत्रैवोक्तेः तत्र स

त्वमिति प्रकाशकं ततः स्वतावरणतिरोधायकत्वेन चिद्बिंबग्रहणयोग्यं सुखसंगेनांतःकरणवृत्तिप्रतिबिंबि
तानंदांशरूपेण सुखेन संगोध्यासः अहं सुखीत्याकारः ज्ञानसंगेन ज्ञानमंतःकरणवृत्तिरूपं संगोऽहंजानाम्
त्यध्यासः रागः कामः तृष्णाऽप्राप्ताभिलाषः आसंगः प्राप्तस्योपस्थितेपि विनाशे संरक्षणाभिलाषः तयोः समुद्भवोय
स्मात् कर्मसंगेनेति कर्मसु दृष्टादृष्टार्थेषु संगः अहमेतत्फलंभोक्ष्य इत्यभिमानः निबध्नाति वस्तुतोऽकर्त्तारमेव रज
सः प्रवृत्तिहेतुत्वात कर्तृत्वाभिमानिनं करोति अज्ञानजं आवरणशक्तिरूपादज्ञानाद्भूतं मोहनं अविवेकरूपत्वे
न भ्रांतिजनकं प्रमादः वस्त्वविवेकासामर्थ्यं सत्वकार्यप्रकाशाविरोधी आलस्यं प्रवृत्त्यसामर्थ्यं रजःकार्यप्रवृत्ति
विरोधि निद्रा रजःसत्वविरोधिनी तमोगुणालंबना वृत्तिः सत्वं सुखे इति सत्वं विवृद्धं सत् दुःखकारणमभिभूय सु
खे संश्लेषयति एवं रज उत्कृष्टं सत् सुखकारणमभिभूय कर्मणि संजनयति तमस्तु प्रमाणबलेनोत्पद्यमानमपि
सत्वकार्यं ज्ञानमावृत्य प्रमादे संजयति प्रमादपदं निद्रालस्ययोरप्युपलक्षकं रजइति द्वयोर्द्वयोरभिभवेनैकैक
स्याविवृद्धिरुक्ता गुणानामज्ञानजन्यानां बंधकत्वमुक्तं श्रीभागवते पूर्वं गृहीतं गुणकर्मचित्रमज्ञानमात्मन्यवि
विक्तमंगानिवर्त्तितत्पुनरीक्षयैव न गृह्यते नापि विसृज्य आत्मा पूर्वं बंधावस्थायां गुणैः सत्वादिभिः कर्मभिः
प्रवृत्तिरूपैः चित्रमज्ञानं तत्कार्यं देहेंद्रियादिच आत्मन्यविविक्तं एकाध्यासेन गृहीतं तत्पुनरीक्षयैव ब्रह्मसाक्षा

Indira Gandhi National
Centre for the Arts

॥मो॰ध॰ण॥ त्कारेण निवर्त्तते न गृह्यते न निबध्यते नापि विसृज्यः मुक्तः वस्तुत आत्मा न बद्धो नापि मुक्तः किंत्वज्ञानेन कल्पि
तावित्यर्थः गुणानां च बद्धानां बंधकत्वमुक्तं तेषां ज्ञापकमुच्यते महाभारते तत्र यत्प्रीतिसंयुक्तं काये मनसि वा
११७ भवेत् वर्तते सात्विको भाव इत्यपेक्षीत तत्तथा अथ यद्दुःखसंयुक्तमप्रीतिकरमात्मनः प्रवृत्तं रज इत्येव तत्तत्संरभ्य
चिंतयेत् अथ यन्मोहसंयुक्तमव्यक्तविषयं भवेत् अप्रतर्क्यमविज्ञेयं तमस्तदुपधारयेत् संरभ्येति आवेशेन न
चिंतयेदित्यर्थः अव्यक्तविषयं न विवेकेन गृहीतं भावाः विषयो यस्य भगवद्गीतास्वपि सर्वद्वारेषु देहेस्मिन्प्रका
श उपजायते ज्ञानं यदा तदा विद्याद्विवृद्धं सत्वमित्युत लोभः प्रवृत्तिरारंभः कर्मणामशमः स्पृहा रजस्येतानि जा
यंते विवृद्धे भरतर्षभ अप्रकाशोप्रवृत्तिश्च प्रमादो मोह एव च तमस्येतानि जायंते विवृद्धे कुरुनंदन प्रकाशः विषया
वच्छिन्नविदावरणविरोधी विषयाकाराकारितांकरणवृत्तिविशेषः लोभः मदति धनागमे जायमानेप्यनुदिनं
वर्द्धमानोभिलाषः प्रवृत्तिः निरंतरं प्रयतमानता आरंभः कर्मणां क्लिव्यायापासमाधानां व्यापाराणामुद्यमः अशम
: इदं कृत्वेदं करिष्यामीति संकल्पप्रवाहः स्पृहा येन के[illegible]नाप्युपायेन धनोपादित्सा अप्रकाशः सत्यप्युपदेशे स । ।११७।
वर्थाबोधायोग्यत्वं अप्रवृत्तिः अग्निहोत्रं जुहुयादित्यादौ शास्त्रे सत्यपि प्रवृत्त्ययोग्यत्वं प्रमादः तत्तत्कालेक ।
र्त्तव्याप्रतिसंधानं मोहः निद्रा वा कल्पं विपर्ययो वा मनुरपि सत्वरजस्तमांसि प्रकृत्य यो यथैषां गुणो देहे साक ।

ल्येनातिरिच्यते स तदा तद्गुणप्रायं तं करोति शरीरिणं सत्वं ज्ञानं तमोज्ञानं रागद्वेषौ रजः स्मृतं एतद्व्याप्तिमदेते
षां सर्वभूताश्रितं वपुः तत्र यत्प्रीतिसंयुक्तं किंचिदात्मनि लक्षयेत् प्रशांतमिव शुद्धाभं सत्वं तदवधारयेत् यत्तु दुःख
समायुक्तमप्रीतिकरमात्मनः तद्रजोप्रतिघं विद्यात्सततं हारि देहिनां यत्तु स्यान्मोहसंयुक्तमव्यक्तविषयात्मकं अ
प्रतर्क्यमविज्ञेयं तमस्तदुपधारयेत् यो यथैषामित्यादि तमोरजस्तिरोधानेन गुणप्रायं तद्गुणप्रधानं शरीरिणं श
रीराभिमानिनां सत्वं ज्ञानमिति ज्ञानं विवेकः अज्ञानं मोहः रागद्वेषौ नयरूपं रजः रागद्वेषशब्देन तज्जन्यकर्मयोग
उच्यते एतेषां त्रयाणामेतत्सामान्यलक्षणं व्याप्तिमत् सर्वभूताश्रितं सर्वप्राणिषु प्रतिभायेनाश्रितं अप्रतिघं प्रतीघातर
हितं अव्यक्तविषयात्मकमस्फुटविषयस्वभावकं अप्रतर्क्यं तर्कानुमानागोचरः अविज्ञेयमंतर्बहिःकरणाना
मगोचरः मरणसमये तत्तद्गुणाधिक्ये गतिविशेषमुक्तं भगवद्गीतायां यदा सत्वे प्रवृद्धे तु प्रलयं याति देहभृत् तदोत्तम
विदां लोकानमलान्प्रतिपद्यते रजसि प्रलयं गत्वा कर्मसंगिषु जायते तथा प्रलीनस्तमसि मूढयोनिषु जायते कर्मणः
सुकृतस्याहुः सात्विकं निर्मलं फलं रजसस्तु फलं दुःखमज्ञानं तमसः फलं सत्वात्संजायते ज्ञानं रजसो लोभ एव च
प्रमादमोहौ तमसो भवतोज्ञानमेव च ऊर्ध्वं गच्छंति सत्वस्था मध्ये तिष्ठंति राजसाः जघन्यगुणवृत्तिस्था अधो गच्छं
ति तामसाः देहभृत् देहे देहाभिमानी उत्तमविदां उत्तमाः हिरण्यगर्भादयः तद्विदां तदुपासकानां ये लोकाः स्त

Indira Gandhi National Centre for the Arts

॥मो॰ह्व॰५०॥ स्वोपभोगस्थानविशेषः रजसि प्रवृत्ते इत्यनुषज्यते प्रलयं गत्वा प्राप्य कर्मसंगिषु विहितप्रतिषिद्धफलाधिकारि
षु मनुष्येषु मूढयोनिषु पश्वादिषु कर्मणः सुकृतस्य धर्मरूपस्य सात्विकं सत्वनिर्वृत्तं निर्मलं रजस्तमोमला
॥११८॥ मिश्रितं सुखं रजसः रजोजन्यस्य पापमिश्रस्य पुण्यस्य दुःखं दुःखबहुलमल्पसुखं अज्ञानं अविवेकप्रा
यं दुःखं तमसः तामसस्य कर्मणोऽधर्मस्य सत्वात्संजायत इत्यनेन तत्तत्फलकत्वे हेतुरुक्तः ज्ञानं प्रकाशरूपं अ
तस्तदनुरूपत्वात्प्रकाशात्मकं लसं सुखफलं लोभो धनादिप्राप्त्यापि निवर्तयितुमशक्यो धनाभिलाषविशेषः तस्य
विषयदानेनापि पूरयितुमशक्यत्वात्सर्वदा दुःखं प्रमादमोहादिहाराऽज्ञानबहुलमेव फलं जायते अतएव पश्वादि
योनिषु मोहवाहुल्यं ऊर्ध्वं गच्छंतीत्यनेनोक्तानामेव फलानां पूर्वोक्तधीभावेन विशेष उक्तः ऊर्ध्वं देवलोकं मध्ये मनुष्य
लोके अधः तिर्यग्योनौ गुणानां कार्याण्याह मनुः त्रयाणामपि चैतेषां गुणानां त्रयः फलोदयः अग्र्यो मध्यो जघन्यश्च
तं प्रवक्ष्याम्यशेषतः वेदाभ्यासस्तपो ज्ञानं शौचमिंद्रियनिग्रहः धर्मक्रियात्मचिंता च सात्विकं गुणलक्षणं आरंभर
तिता धैर्यमासत्कार्यपरिग्रहः विषयोपसेवा चाजस्रं राजसं गुणलक्षणं लोभः स्वप्नो धृतिः क्रौर्यं नास्तिक्यं भिन्नवृत्ति ११८
ता याचिष्णुता प्रमादश्च तामसं गुणलक्षणं अग्र्यः श्रेष्ठो जघन्योऽधमः ज्ञानं शास्त्रीयं शौचं बाह्याभ्यंतरं धर्म
क्रियाः नित्यनैमित्तिकानुष्ठानं आत्मचिंता वेदांतवाक्यविचारः सात्विकं सत्वकार्यं आरंभरतिता काम्यानां दृष्टार्था

नां च कर्मणामारंभे प्रीतिमत्वं काम्यकर्मनिष्ठतेति यावत् अधैर्यं सत्यप्यर्थवैकल्ये उपद्रवे स्वल्पेऽपि चेतसोऽसमा
श्वासो वा असत्कार्यपरिग्रहः लोकशास्त्रनिषिद्धाचरणं अधृतिः कातर्यं क्रौर्यमकृपालुता स्वल्पेऽप्यपराधे वैरानुबं
धो वा नास्तिक्यं परलोको नास्तीति धीः भिन्नवृत्तिता आचारपरित्यागः याचिष्णुता याचनशीलत्वं महात्मारतेऽपि प्रहर्ष
प्रीतिरानंदः सुखं संशांतचित्तता कथंचिदनिवर्तितदत्येते सात्विका गुणाः अतुष्टिः परितापश्च शोको लोभस्तथाक्षमा
लिंगानि रजसस्तानि दृश्यंते हेत्वहेतुभिः अभिमानस्तथा मोहः प्रमादः स्वप्नतंद्रिता कथंचिदनिवर्तितिविविधास्ताम
सा गुणाः प्रहर्षप्रीत्यानंदसुखानां विषयतारतम्येन तारतम्यं बोध्यं हेत्वहेतुभिः अन्वयव्यतिरेकाभ्यां संक्षेपतो वि
ष्ठा गुणलिंगान्याह मुनः त्रयाणामपि चैतेषां गुणानां त्रिषु तिष्ठतां इदं सामासिकं ज्ञेयं क्रमशो गुणलक्षणं यत्कर्म कृत्वा
कुर्वंश्च करिष्यंश्चैव लज्जति तज्ज्ञेयं विदुषा सर्वं तामसं गुणलक्षणं येनास्मिन्कर्मणा लोके ख्यातिं गच्छति पुष्कलां
न च शोचत्यसंपत्तौ तद्विज्ञेयं तु राजसं यत्सर्वेणेच्छति ज्ञातुं यन्न लज्जति चाचरन् येन तुष्यति चास्यात्मा तत्सत्वगुणल
क्षणं विदुषा आत्मानुत्वं विजानता ख्यातिमिच्छति परलोकनिरपेक्षितयैव यशोर्थं धर्ममनुतिष्ठति असंपत्तौ कर्मणो
असिद्धावपि पुनः कर्मांतरमारभते न शोचते न ततो निवर्तत इत्यर्थः यत्क्रियमाणकर्म सर्वेण जनेन ज्ञातुमिच्छति इदंम
या क्रियमाणं जनो जानात्वित्यर्थः अतएवानुष्ठन्न लज्जतीत्यर्थः आत्मानः आसाधारणं लिंगमाह स एव तमसो ल

Indira Gandhi National
Centre for the Arts

मो०टी०१०।। क्षणं कामो रजसस्तव एव उच्यते सत्त्वस्य लक्षणं धर्मश्रेष्ठमेव यथाक्रमं प्रकृतिकार्याणां त्रिगुणात्मकत्वात् तत्तत्
त्कार्यैक्याध्यासापन्ने आत्मनि कर्तृत्वं नीकृत्वाध्यासेन यस्य यो गुणो वर्द्धते तदा तस्य ते ते आहारादयः प्रियाभ
११९ वंति तदुक्तं भगवद्गीतायां आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्द्धनाः रम्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्वि
कप्रियाः कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः आहारा राजसस्येष्टा दुःखशोकामयप्रदाः यातयामं गतरसं
पूतिपर्युषितं च यत् उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियं आयुः चिरजीवनं सत्त्वं चित्तधैर्यं बलं शारीरसा
मर्थ्यं आरोग्यं व्याध्यभावः सुखं भोजनानंतराह्लादः प्रीतिर्भोजनकालेऽरुचिराहित्यं रम्याः आस्वाद्याः स्नि
ग्धाः सगुणेनाज्यादिकेन वा स्नेहेन युक्ताः स्थिराः रसांशेन शरीरे चिरकालावस्थायिनः हृद्याः हृदयंगमाः दु
र्गंधाशुचित्वादिदृष्टादृष्टदोषशून्याः कटुः तिक्तः तीक्ष्णो मरीच्यादिः अतिरूक्षः स्नेहशून्यः कंगुकोद्रवादिः वि
दाही संतापको राजिकादिः दुःखं तात्कालिकी पीडा शोकं पश्चात्ताद्विदौर्मनस्यं आमयं रोगं यातयाममर्द्धपक्वं
निर्वीर्यस्य गतरसपदे नैवोक्तत्वादिति भाष्यकारः यातयामं पक्वं सत्प्रहरादिव्यवहितं शैत्यं प्राप्तं गतरसमुद्धृतसा ११९
रं मथितदुग्धादीत्यन्ये पूतिदुर्गंधि पर्युषितं पक्वं सद्रात्र्यंतरितत्वेन तत्कालोन्मादकं उच्छिष्टं भुक्तावशिष्टं अमेध्य
मयज्ञार्हं मांसादि च गुणविरहेऽपि तदैक्याध्यासापन्ने आत्मनि सात्त्विकादिकर्तृत्वमपि भवतीति तदुक्तं तत्रैव मुक्त

संगोऽनहंवादी धृत्युत्साहसमन्वितः सिध्यसिध्योर्निर्विकारः कर्त्ता सात्त्विक उच्यते रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्म
कोऽशुचिः हर्षशोकान्वितः कर्त्ता राजसः परिकीर्तितः अयुक्तः प्राकृतस्तब्धः शठो नैकृतिकोऽलसः विषादी दीर्घसू
त्री च कर्त्ता तामस उच्यते मुक्तसंगः त्यक्तफलाभिसंधिः अनहंवादी कर्त्ताहमिति वदनशीलो न भवति स्वगुणश्ला
घाविहीनो वा धृतिः विघ्नोपस्थितावपि प्रारब्धकर्मापरित्यागहेतुरंतःकरणवृत्तिविशेषः उत्साहः इदमहं करिष्या
म्येवमिति निश्चयात्मिका बुद्धिः निर्विकारः सिद्धावपि हर्षशोकाभ्यां यो वदनविकारो विकासम्लानत्वादिस्तेन रहि
तः रागी कामाद्याकुलचित्तः लुब्धः धर्मार्थं स्वद्रव्यत्यागासमर्थः परद्रव्याभिलाषी वा हिंसापरवृत्तिच्छेदनं तदा
त्मकः तत्स्वभावः अशुचिः शौचं शास्त्रीयं तद्धीनः हर्षशोकान्वितः सिध्यसिध्योरिति शेषः अयुक्तः विषयासक्त
चित्तत्वेन कर्त्तव्येष्वनवहितः प्राकृतः शास्त्रासंस्कृतबुद्धिः स्तब्धः गुरुदेवतादिष्वप्यनम्रः शठः परवंचनार्थमन्य
थाजानन्नप्यन्यथावादी नैकृतिकः स्वस्मिन्नुपकारित्वभ्रममुत्पाद्य परवृत्तिच्छेदनेन स्वार्थपरः अलसः अवश्यक
र्त्तव्येष्वप्रवृत्तिशीलः विषादी सततमसंतुष्टः दीर्घसूत्री निरंतरं शंकासहस्रकलिलांतः करणत्वेनातिमंथरप्रवृत्तिः
अंतःकरणवृत्तीनां बुद्धिधृत्यादीनां जीवोपाधीनामपि त्रैविध्यमुक्तं तत्रैव बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु प्रो
च्यमानमशेषेण पृथक्त्वेन धनंजय प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये बंधं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्वि

Indira Gandhi National Centre for the Arts

।मो॰३०।। र्की ययाधर्ममधर्मंचकार्यंचाकार्यमेवच अयथावत्प्रजानातिबुद्धिः सापार्थराजसी अधर्मंधर्ममितियामन्यतेतमसावृ
तासर्वार्थान्विपरीतांश्चबुद्धिः सापार्थतामसी धृत्याययाधारयतेमनः प्राणेंद्रियक्रियाः योगेनाव्यभिचारिण्याधृतिः
।१२७। सापार्थसात्विकी ययातुधर्मकामार्थान्धृत्याधारयतेर्जुन प्रसंगेनफलाकांक्षीधृतिः सापार्थराजसी ययास्वप्नंभ
यंशोकंविषादंमदमेवच नविमुंचतिदुर्मेधाधृतिः सापार्थतामसी बुद्धेरध्यवसायात्मिकायाअंतःकरणवृत्तेः धृतेः पू
र्वोक्तरूपायाः ननुबुद्धिशब्देनवृत्तिमात्रंवावृत्तिमदंतःकरणंवा नप्रथमः।धृत्यादेःपार्थक्येनभेदाभिधानविरोधा
त् नद्वितीयः वृत्तिमदंतःकरणस्यैवकर्तृत्वात्कर्तुः पृथक्भेदाभिधानविरोधादितिचेत् उच्यते वृत्तिमदंतःकरणे
पद्वितंचैतन्यस्यकर्तृत्वेत्रिविधंत्रिविधः कर्तेत्यनेनोक्तं बुद्धिधृत्योरित्यादिनातुनिष्कृष्यवृत्तीनामेवत्रैविध्यमुच्यते य
द्यपिचकामः संकल्पोविचिकित्साश्रद्धाश्रद्धाधृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वंमनएवेत्यनेनोक्तानांवृत्तीनांत्रैविध्यंवक्तु
मुचितं तथापिबुद्धिधृत्यादीनांग्रहणेनान्यासामपिज्ञेयं प्रवृत्तिकर्ममार्गंनिवृत्तिंसंन्यासमार्गं कार्यंकर्मकरणं अका
र्यंसंन्यासेकर्माकरणं भयंप्रवृत्तिमार्गेगर्भवासादिदुःखानुसंधानजं अभयंनिवृत्तिमार्गेदुःखाभावानुसंधानजंबं १२७
धंमिथ्याज्ञानकृतंकर्तृत्वाद्यभिमानं मोक्षंतत्वज्ञानकृताज्ञानाभावः यावेत्तीतिकरणकर्तृत्वोपचारात् अयथा
वत्किंस्विदिदमित्थंनवेतिसंशयरूपेणजानाति विपरीतान्विपर्यस्तान् योगेनसमाधिना अव्यभिचारिण्याऽ

विनाभूतयासमाधिव्याप्तयेतियावत् येनधृत्याख्यप्रयत्नेनमनसः प्राणस्यचेंद्रियाणांचक्रियाःस्वस्वस्यचे
ष्टाधारयतेसाधृतिः सात्विकीतितात्पर्यं ययात्विति प्रसंगेनकर्तृत्वाद्यभिनिवेशेन ययाफलाकांक्षीसन्धर्मका
ममर्थंधारयते नतुमोक्षंकदाचिदपिसाधृतीराजसीत्यर्थः ययेति स्वप्नंनिद्रां भयंत्रासं शोकंइष्टवियोगनिमित्तं
संतापं विषादंइंद्रियावसादं मदंअशास्त्रीयविषयसेवोन्मुखत्वं एतानिययाधृत्यानविमुंचतिसातामसीत्यर्थः
सुखादेरंतःकरणधर्मस्यात्मन्यध्यस्तस्यसात्विकादित्रैविध्येनाहंसुखीत्याद्यभिमानः तस्यत्रैविध्यमुक्तंतत्रै
वीसुखंत्विदानींत्रिविधंशृणुमेभरतर्षभ अभ्यासाद्रमतेयत्रदुःखांतंचनियच्छति यत्तदग्रेविषमिवपरिणामेमृतो
पमं तत्सुखंसात्विकंप्रोक्तमात्मबुद्धिप्रसादजं विषयेंद्रियसंयोगाद्यत्तदग्रेमृतोपमं परिणामेविषमिवतत्सुखंराज
संस्मृतं यदग्रेचानुबंधेचसुखंमोहनमात्मनः निद्रालस्यप्रमादोत्थंतत्तामसमुदाहृतं यत्रसमाधिसुखे अभ्या
सात्अतिपरिचयात् परितुष्टोभवति सर्वस्यदुःखस्यात्यन्तमवसानंगच्छति नतुविषयसुखइवांतेमहत्दुःखंतत्सु
खंसात्विकमित्यर्थः अग्रेज्ञानवैराग्यध्यानसमाधारंभे विषमिवात्यंतायाससाध्यत्वात् परिणामेपरिपाकेऽमृ
तोपमं प्रीत्यतिशयास्पदं आत्मबुद्धिप्रसादजमिति आत्मविषयाबुद्धिस्तस्याः प्रसादोनिद्रालस्यादिराहित्ये
नस्वच्छतयावस्थानंततोजातमित्यर्थः नतुराजसमिवविषयेंद्रियसंयोगजं नवातामसमिवनिद्रालस्यादिजं

Indira Gandhi National
Centre for the Arts

॥मोक्षप०॥ केचित्तु प्रथमार्द्धेन सुखलक्षणमुक्त्वा यत्तदग्र इत्येन श्लोकेन सात्विकं सुखमुक्तमित्याहुः विषयेंद्रियसंयो
गादिनाजीतं न त्वात्मबुद्धिप्रसादात् अत एवाग्रे वनितासंयोगारंभेऽमृतमिव मनःसंयमादिक्लेशाभावात् परि
१२१ णामे तैहिकपारत्रिकदुःखावहत्वात् विषमिव अनुबंधे परिणामे निद्रालस्यप्रमादोत्थं निद्रादेवात्मनो मोहनं मो
हकरं यथा मनोराज्यमात्रजन्यसुखस्य न तात्विकत्वं तथा स्यापीत्यर्थः अंतःकरणवच्छिन्नचैतन्यस्य जीवस्य
ब्राह्मणादिशरीरैक्याध्यासापन्नस्य पश्चत्वादिव्यवहारः तत्र यागादिवैविध्यमुक्तं गीतायां अफलाकांक्षिभिर्य
ज्ञो विधिदृष्टो य इज्यते यष्टव्यमेवेति मनः समाधाय स सात्विकः अभिसंधाय तु फलं दंभार्थमपि चैव यत् इज्य
ते भरतश्रेष्ठ तं यज्ञं विद्धि राजसं विधिहीनमसृष्टान्नं मंत्रहीनमदक्षिणं श्रद्धाविरहितं यज्ञं तामसं परिचक्षते
श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः अफलाकांक्षिभिर्युक्तैः सात्विकं परिचक्षते सत्कारमानपूजार्थं तपो दंभेन
चैव यत् मूढग्राहेणात्मनो यत्पीडया क्रियते तपः परस्योत्सादनार्थं वा तत्तामसमुदाहृतं दातव्यमिति यद्दानं दी
यतेनुपकारिणे देशे काले च पात्रे च तद्दानं सात्विकं स्मृतं यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः दीयते च परि १२१
क्लिष्टं तद्दानं राजसं स्मृतं अदेशकाले यद्दानमपात्रेभ्यश्च दीयते असत्कृतमवज्ञातं तत्तामसमुदाहृतं अफ
लाकांक्षिभिरिति फलार्थत्वेन विधीयमानानामपि कर्मणां फलकामनां विहाय यज्ञेनेत्यादिवाक्यविहितसं

योगसंयुक्तन्यायसिद्धज्ञानार्थत्वेनांतःकरणशुद्ध्यर्थमनुष्ठीयमानानां सात्विकत्वमित्यर्थः यद्वा यज्ञेनेत्यादि
ना नित्यानामेव दुरितक्षयार्थत्वेन क्लृप्तानां ज्ञानार्थत्वेन विधानेन लाघवात् तेषां सात्विकत्वमित्यर्थः यद्यप्येवं
सति विधानं व्यर्थं ज्ञानप्रतिबंधकीभूतदुरितक्षयार्थत्वस्य नित्यताबोधकविधिभिरेवावगमात् न च दुरितक्ष
यार्थत्वावगमेपि ज्ञानप्रतिबंधकीभूततत्क्षयार्थत्वं नावगतं तर्हि गतं लाघवेन तथापि फलांतरस्य ज्ञानस्य
तदिच्छाया वा फलत्वेन काम्यमानस्यैवोत्पत्तेः फलसंबंधबोधकवाक्यस्य न वैयर्थ्यं अभिसंधायेति फलका
मनया दंभ धार्मिकत्वख्यापनाय वानुष्ठितानां यथाशास्त्रं दक्षिणाद्यंगसहितानां कर्मणां राजसत्वं विधिहीन
मिति यथाशास्त्रमननुष्ठीयमानानामन्नदानमंत्रदक्षिणाश्रद्धाविरहितानां यज्ञानां तामसत्वं श्रद्धया आस्ति
क्यबुध्या परया अश्रमाणप्रशांकाकलंकशून्यया फलाभिसंधिरहितैः सत्तप्तं तपः सात्विकमित्यर्थः सत्कारः सा
धुरयं तपस्वीत्येवं स्तुतिः मानः प्रत्युत्थानाभिवादनादिः पूजा पादप्रक्षालनार्चनभोजनदानादिः चलमत्यल्पकाल
स्थायिफलं अध्रुवं फलजनकतानियमशून्यं मूढग्राहेण अविवेकातिशयकृतेन दुराग्रहेण आत्मनः देहेंद्रि
यसंघातस्य परस्य शत्रोरुत्सादनार्थमभिचाररूपं दातव्यमिति दातव्यमेव शास्त्रनोदनावशात् न तु फलाभि
संधिना अनुपकारिणे उपकाराजनकाय देशे कुरुक्षेत्रादौ काले उपरागादौ पात्रे च तत्कर्मर्थे समसी विद्यातपो

Indira Gandhi National
Centre for the Arts

॥मो॰ह॰१०॥ युक्तायेत्यर्थः अयं मां कालांतरेऽपकरिष्यतीत्येवं प्रतिसंधाय फलमुद्दिश्य वा यद्दयते परिक्लिष्टं कथमेतावद्व्य-
यितमिति पश्चात्तापयुक्तं अपात्रेभ्यः नटविटादिभ्यः असत्कृतं प्रियवचनपादप्रक्षालनपूजादिसत्कारशू-
॥१२२॥ न्यं अवज्ञातं पात्रपरिभवयुक्तं कर्तृत्वादीनामौपाधिकानां त्रैविध्यमुक्तं इदमुपलक्षणं प्रकृतिकार्यमात्र-
स्यैव त्रिगुणात्मकत्वात् तदुक्तं भगवद्गीतासु न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः सत्त्वं प्रकृतिजैर्मुक्तं
यदेभिः स्यात्त्रिभिर्गुणैः सत्त्वं प्राणिजातं कार्यजातं वा एवं निबध्नंति महाबाहो देहे देहिनमव्ययमिति एतद्यो वेत्ति
तं प्राहुः क्षेत्रज्ञमिति तद्विद इति ममैवांशो जीवलोके जीवभूतः सनातनः इति देहेंद्रियप्राणांतःकरणैक्याध्यासाप-
न्नं क्षेत्रज्ञमभिमानिनं वस्तुतो ब्रह्मस्वरूपं कल्पितभेदं जीवं वदंत्यौपनिषदः तत्रेदं चिंत्यते जीव एक उतानेकः के-
चिदविद्यैक्यपक्षमालंब्य यदा समस्तदेहेषु पुमानेको व्यवस्थितः तदा हि को भवानहं को हमित्येतदफलं वच इति
विष्णुपुराणवचनेन जीवैक्यमाहुः तेषां मते जीवस्यैकमेव शरीरं भोगायतनं अन्यानि स्वप्नदृष्टशरीराणीव नि-
र्जीवानि तदज्ञानकल्पितं च सर्वं जगत् तस्य स्वप्नदर्शनवद्यावदविद्यध्वंसं सर्वोपि व्यवहारः शुकमुक्त्यादिकमपि स्व- ।१२२।
प्नदृष्टवत्कल्पितमिति कल्पनाबाहुल्यं अन्ये तु ब्रह्मप्रतिबिंबो मुख्यो जीवो हिरण्यगर्भः तत्प्रतिबिंबभूता अन्ये
जीवाभासाः संसारभाज इति नानाशरीरेष्वेकजीववादं वदंति तत्रापि हिरण्यगर्भस्य प्रतिकल्पं भेदेन कस्य

मुख्यजीवत्वमिति विनिगमकाभावः अपरे तु सर्वाणि शरीराण्यधिष्ठायैक एव जीवः कर्मफलानि भुंक्ते नन्वेवं श-
रीरभेदेपि शरीरावयवभेद इव परस्परसुखाद्यनुसंधानं स्यादिति वाच्यं जन्मांतरीयसुखाद्यनुसंधानाभावात् श-
रीरभेदस्य प्रतिबंधकत्वकल्पनेन सुखाद्यननुसंधानोपपत्तेः न च योगिनः शरीरभेदे तन्न स्यादिति वाच्यं तत्र यो-
गसिद्धेरुत्तेजकत्वकल्पनात् तस्माच्छरीरमात्रं भोगवानेको जीव इत्याहुः अत्रापि शुकादीनां मुक्तिश्रवणानां ज-
स्यं इतरे तु मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमित्येकवचनश्रुत्या विद्यैक्येपि तःकरणावच्छिन्नं जीव इति
जीवभेदमाहुः अत्रापि मायिनो मायया भेदं पश्यंति परमात्मनीति नारदीयवचसा मायाया एव जीवोपाधित्वावग-
मादपरितुष्यंत एके त्वविद्यातदवच्छिन्नानि तत्तदंतःकरणप्रतिबिंबितानि जीवाः अविद्यायाश्च जातिवत्प्रत्येकप-
र्यवसायितया नष्टव्यक्तिरिव निरन्वयांतःकरणनाश एव तस्य जीवस्य मोक्ष इति वदंति केचित्तु इंद्रो मायाभिः पु-
रुरूप ईयत इति श्रुत्याविद्यानानात्वावगतेर्जीवभेदः यस्य च यो यो देवानां प्रत्यबुध्यत स तदभवदिति श्रुत्या ब्रह्मसाक्षा-
त्कारो यदा यदविद्यां निहंति तस्यैव मोक्षः न च स्वाविद्यापराविद्याकल्पितप्रपंचयोर्भेदादानंत्यकल्पनाप्रसंगः इ-
ष्टापत्तेः एकमोक्षे तु एकतंतुनाशाजन्यपटनाशेऽवशिष्टतंतुसंयोगात्पटांतरजननवदेकाविद्यानाशेऽविद्यांत-
रैः प्रपंचारंभोपि समर्थनीयः प्रपंचारंभोपि समर्थनीयः प्रपंचैक्याभिमानस्तु अनेकशक्तित्वाद्ज्ञानकल्पितनाना

Indira Gandhi National
Centre for the Arts

॥मोक्षप्र०॥ रजतेर्यो निमानवदित्याहुः इतिश्री
मोक्षप्रकाशे त्वंपदार्थनिरूपणं एवं तत्त्वंपदार्थविवेके सिद्धे ब्रह्मानंदावाप्तिरूपमोक्षसाधनीभूतस्य ब्रह्मतत्त्ववि
॥१२३॥ षयकमूलाज्ञानस्य निवर्तकीयः साक्षात्कारः स तस्य विषयो जगत्कर्तृत्वसर्वेश्वरत्वनियंतृत्वविशिष्टबिंबचैत
न्यस्य तत्पदार्थस्य देहांतःकरणाद्यैक्याध्यासापन्नस्य स्फुरदहमित्यादितद्धर्माध्यासवतोंतःकरणप्रतिबिंबचैतन्य
स्य त्वंपदार्थस्याभेदो महावाक्यार्थो निरूप्यते तत्राहं कर्ताहं भोक्तेति लोकप्रसिद्धजीवानुवादेन परब्रह्माभेद उक्तो
भगवद्गीतायां इदं शरीरं कौंतेय क्षेत्रमित्यभिधीयते एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञमिति तद्विदः क्षेत्रज्ञं चापि मां विद्धि स
र्वक्षेत्रेषु भारत इदं देहेंद्रियप्राणांतःकरणसंघातात्मकं दृश्यं यो वेत्तीति अहमिति देहेंद्रियांतःकरणैक्याध्यासेनात्मा
नं यो मन्यते तमविद्याध्यारोपितकर्तृत्वभोक्तृत्वादिसंसारधर्मं क्षेत्रज्ञं जीवमनूद्य मां विद्धीति सामानाधिकरण्येने
श्वराभेद उक्तः तथा च जीवस्य कर्तृत्वभोक्तृत्वाद्यौपाधिकधर्मपरित्यागेन जगत्कर्तृत्वव्यापित्वादिधर्मपरित्यागेन
चाद्वितीयब्रह्मानंदाभेद उक्तो भवति ननु विरुद्धधर्मवत्त्वेन भिन्नयोर्जीवेश्वरयोः कथमभेद इति वाच्यं बिंबत्वप्रति ॥१२३॥
बिंबत्वप्रत्यग्ब्रह्मणि कल्पितं जीवत्वमीश्वरत्वं च तथा ब्रह्मणि कल्पितमिति पराशरपुराणवचसा कल्पितभेदबिंबप्र
तिबिंबयोर्वास्तवाभेदोपपत्तेः वस्तुतः कूटस्थस्यैव ब्रह्मणोंतःकरणप्रतिबिंबो जीव इत्युक्तं गीतायां ममैवांशो जी

वलोके जीवभूतः सनातन इति श्रुतावपि यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोनुगच्छन् उपाधिना
क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोयमात्मा स्मृतावपि एक एव तु भूतात्मा भूते भूते व्यवस्थितः एकधा बहुधा
चैव दृश्यते जलचंद्रवत् अत एव चोपमा सूर्यकादिवदित्यधिकरणन्यायेन चैकस्यैव परमात्मनश्चैतन्यानं
दघनस्यांतःकरणोपाधिभेदेन भिन्नत्वमिव न तु तात्त्विको भेदः ननु लोके रूपवतो मूर्तस्यैव विप्रकृष्टे उपाधौ प्रति
बिंबो दृष्टः न त्वनिरूपस्यामूर्तस्य सर्वगतस्योपाधिविप्रकर्षाभावे प्रतिबिंबो युक्त इति चेन्न न ह्युभयसर्वांशेन
दृष्टांतो विवक्षितः तथात्वे दृष्टांतदार्ष्टांतिकयोर्भेदो न स्यात् किंतूपाधिकृतवृद्धिह्रासभाक्त्वसाधर्म्येण यथा
हि जलगतं सूर्यप्रतिबिंबं जलगतवृद्धिह्रासचलनभेदैस्तद्वदिव भवति न तु परमार्थतः सूर्यस्य तथात्वमेवं
परमार्थतोऽविकारिणो ब्रह्मणोंतःकरणप्रतिबिंबितस्यांबुवदग्रहणान्न तथात्वं वृद्धिह्रासभाक्त्वमंतर्भाव इत
य सामंजस्यादेवमिति शांकरसूत्रोक्तन्यायेन स्फटिकरक्ततादि तद्धर्मभाक्त्वं न तु परमार्थतः किं च यथा सवितृप्रका
शस्योपाधिकर्मणामंगुलिकरादिवक्रत्वाविक्रतिरेवमंतःकरणोपाधिभेदादपि भेद इव प्रतीयते न तु परमार्थतो
स्ति भेदः प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासादिति न्यायाच्च एवमेव वेदांतेषु अभ्यासेन तत्त्वमसि
श्वेतकेतो इति न वक्तव्यः अहं ब्रह्मास्मीति च एष त आत्मा सर्वांतर एष त आत्मांतर्याम्यमृत इति च प्रद्योतस्मा

Indira Gandhi National
Centre for the Arts

॥मो॰द्व॰१०॥ भेदस्य तद्भावभावनापन्नस्ततोसौ परमात्मना भवत्यभेदी भेदश्च तस्याज्ञानकृतो भवेदिति विष्णुपुराणवचने

॥१२४॥ नौपाधिकत्वावसायात् क्षेत्रज्ञं चापि मां विद्धीत्यनेन बोधितो जीवब्रह्माभेदो न बाधितः तद्विषयकसाक्षात्कारेण
चाविद्यां विधूय परब्रह्मभावं गच्छति तदुक्तं श्रुतौ स यो ह वै तत्परं ब्रह्म वेद ब्रह्मैव भवति ब्रह्मविदाप्नोति परमि
ति च विष्णुपुराणेऽपि विभेदजनके ज्ञाने नाशमात्यन्तिकं गते आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति ननु भेदः
श्च तस्याज्ञानकृतो भवेदिति विभेदजनके ज्ञान इति विष्णुपुराणोक्तेरज्ञानस्यैव भेदकत्वेन जीवोपाधित्वं नान्त
तःकरणस्येति कथमन्तःकरणप्रतिबिम्बितत्वमिति चेत् नायं दोषः अन्तःकरणस्याप्यज्ञानपरिणामत्वेन विरोधा
भावात् सर्वतःप्रसृतसवितृप्रकाशस्य दर्पण इवाज्ञानप्रतिबिम्बितस्यैवान्तःकरणमभिव्यक्तिस्थानं तस्मा
द्यथा दर्पणप्रतिबिम्बस्यैव दर्पणैकदेशप्रतिबिम्बत्वं तथाज्ञानप्रतिबिम्बस्यैवान्तःकरण[illegible]प्रतिबिम्बत्वमविरु
द्धं केवलान्तःकरणस्यैव जीवोपाधित्वे योगिनः कायव्यूहाधिष्ठानानुपपत्तेः न च योगिनो योगप्रभावादन्तःकर
णं कायव्यूहाभिव्यक्तियोग्यं पदेषु व्याप्नोतीति तदवच्छिन्नस्य कायव्यूहाधिष्ठानत्वमिति वाच्यं प्रदीपवदावेश ।१२४।
स्तथा हि दर्शयतीति शास्त्रोपात्ताधिकरणभाष्यादिषु कायव्यूहे प्रतिदेहमन्तःकरणस्य प्रतिदेहं दहनादिवद्भि
न्नभिन्नस्यैवोपवर्णनात् तस्मादविद्याया एव जीवोपाधित्वं जीवस्य च प्रतिबिम्बत्वे एवं सति अन्तर्याम्यधिदेवादि

षु तद्धर्मव्यपदेशादिति न्यायेन यो विज्ञाने तिष्ठन् विज्ञानमन्तरो यमयतीति श्रुत्या च बिम्बचैतन्यस्येश्वरस्यान्तर्या
मितया द्विगुणितचैतन्यद्वैताङ्गीकारोऽप्युपपद्यते अवच्छेदपक्षे तदनुपपत्तेः अत्र केचित् घटसंवृतमाकाशं
नीयमाने यथा घटे घटो नीयेत नाकाशं तद्वज्जीवो नभोपम इति श्रुत्या आकाशमेकं हि यथा घटादिषु पृथक्
भवेत् तथात्मैकोऽप्यनेकश्चेति याज्ञवल्क्यवाक्ये नांशो नानाव्यपदेशादिति न्यायेन चान्तःकरणावच्छिन्नं चैत
न्यं जीवोऽनवच्छिन्नं चैतन्यमीश्वरः तयोश्चाभेदः क्षेत्रज्ञं चापि मां विद्धीत्यनेन बोध्यते अवच्छेदकस्य मिथ्यात्वादि
ति वर्णयन्ति तेषामयमाशयः न तावत्प्रतिबिम्बपक्षः संभवति नीरूपनीरूपस्य चैतन्यस्य नीरूपेऽन्तःकरणे प्र
तिबिम्बायोगात् न च जलेऽतिगम्भीरे मेघोपलक्षावन्तराले गगनप्रतिबिम्बोपपत्तिः तत्रापि गगनाभोगव्यापिनि
सूर्यादिकिरणमण्डले प्रतिबिम्बिते गगनप्रतिबिम्बव्यवहारस्य भ्रममूलत्वात् नापि वीणाध्वनौ वर्णप्रतिबिम्बवदुप
पत्तिः ध्वनेर्वर्णव्यञ्जकतया ध्वनिधर्माणामुदात्तादिस्वराणां वर्णेष्वारोपेण व्यवहारोपपत्तेः न च प्रतिध्वनिरपि पूर्वशब्दप्र
तिबिम्बः पञ्चीकरणप्रक्रियया दुन्दुभ्यादिशब्दानां पृथिवीशब्दत्वेन प्रतिध्वनेराकाशशब्दत्वेन तस्यान्यशब्दप्रति
बिम्बत्वायोगात् न च वर्णरूपप्रतिशब्दः पूर्ववर्णप्रतिबिम्बः वर्णाभिव्यञ्जकध्वनिनिमित्तकप्रतिध्वनेरपि मूलध्वनि
वद्वर्णाभिव्यञ्जकत्वोपपत्तेः तस्मान्नीरूपस्य प्रतिबिम्बायोगात् अवच्छेदपक्ष एव युक्तः न च ब्रह्माण्डान्तर्वर्तिनश्चै

Indira Gandhi National Centre for the Arts

॥मोक्ष ५०॥ तत्वस्य तत्तदंतःकरणोपाधिभिरवच्छेदात्तदनवच्छिन्नचैतन्यस्य ब्रह्मांडाद्बहिरेव सत्त्वात् यो विज्ञाने तिष्ठन् विज्ञानमंतरो
यमयतीत्यंतर्यामिभावेनावस्थानश्रवणं विरुध्येतेति वाच्यं प्रतिबिंबपक्षेपि चैतन्यस्योपाध्यंतर्गतस्यैव बिंबत्वेन बहि
१२५ र्गुणीकृतचैतन्यवृत्तिविरोधस्तुल्यः न हि मुखस्य बहिःस्थितस्य मयूखैस्तं तन्निमित्तेन समये विप्रतिबिंबोस्ति न चावच्छि
न्नस्य जीवत्वपक्षे कर्तृत्वभोक्तृत्वसमयेपि स्वस्तत्तदंतःकरणावच्छेद्यप्रदेशस्य भिन्नत्वात् कृतहानाकृताभ्यागमप्रसं
ग इति वाच्यं प्रतिबिंबपक्षेपि उपाध्यंतर्गतस्य स्वसंनिहितचैतन्यस्यैवांतःकरणे प्रतिबिंबो वाच्यः तथा च तत्तदं
तःकरणगमने बिंबभेदात् प्रतिबिंबभेदावश्यंभावे दोषतौल्यात् न चाविद्याप्रतिबिंबो जीव इति पक्षे नायं दोषः अं
तःकरणद्वारागमनसंभवेनोक्तांतिगत्यादेरुपपत्तेरविद्यारूपोपाधेश्वागमनेन प्रतिबिंबभेदाभावेन कृतहानाकृता
भ्यागमप्रसंगो न दोष इति वाच्यं अविद्यावच्छिन्नो जीव इति पक्षेपि दोषपरिहारस्तुल्यः नन्वेवं यथा ह्ययं ज्योतिरा
त्मा विवस्वानिति एकधा बहुधा चैव दृश्यते जलचंद्रवदिति श्रुतिद्वयं तथा त्वेको ह्यनेकस्वजलाधारेष्विवांशुमानिति या
ज्ञवल्कीयवचनं अत एव चोपमा सूर्यकादिवदिति सूत्रं च विरुध्येतेति चेत् एतेषां यथा जलप्रतिबिंबितः सूर्यो जलवृ १२५
द्धौ वर्द्धत इव तथा ह्रसतीव तथात्मनोप्यंतःकरणावच्छेदेवनाध्यासिकधर्मभाक्त्वं वृद्धिह्रासभाक्त्वमंतर्भावादुभयसा
मंजस्यादेवमिति न्यायादवच्छेदपक्षपरतात्पर्यमित्यन्यत्र विस्तरः च स्फुटतस्तु न प्रतिबिंबो जीवो नाप्यवच्छिन्नः किंतु

कौंतेयस्यैव राधेयत्ववदविकृतस्य परब्रह्मण एवाविद्यया जीवभावः बिंबत्वं प्रतिबिंबत्वमिति पराशरपुराणव
चनेपथ्येति प्रतिबिंबभावं दृष्टांतीकृत्य तथा ब्रह्मणि कल्पितमिति जीवत्वेश्वरत्वयोः कल्पितत्वमात्रोक्तेः ब्रह्मैव
स्वाविद्यया संसरति स्वविद्यया विमुच्यते व्याधकुलसंवर्द्धितराजकुमारवदिति बृहदारण्यकभाष्योक्तेः राजसूनोः
स्मृतिप्राप्तौ व्याधभावो निवर्तते यथैवमात्मनोज्ञस्य तत्त्वमस्यादिवाक्यत इति सुरेश्वरवार्तिकोक्तेश्च अनाद्यविद्यया
च स्वयं जीवभावमापद्य तयैवाविद्यया सर्वप्रपंचसर्वज्ञत्वजगत्कारणत्वेश्वरत्वान्यपि चैतन्यांतरे कल्पयंते पूर्वोदा
हृतानां च वाक्यानां स्वाज्ञानकल्पितपलीवेश्वरभावे तात्पर्यमिति तत्त्वं तस्माज्जीवेश्वरभावस्य बद्धो मुक्त इति व्याख्या
गुणतो मे न वस्तुतः गुणस्य मायामूलत्वान्न मे मोक्षो न बंधनमिति भागवतोक्तेः काल्पनिकत्वावगमात् तदेव जगदपि
मांवि[illegible]दीत्यनेन पारमार्थिको भेदो बाध्यत इति नाभेदबाधः ब्रह्मणि भेदः काल्पनिक इत्युक्तं ब्रह्मपुराणेपि एक ए
व परात्मा सोहि धाम भिन्नः स्फुटं दृश्यते भोक्ता भोज्यं च लोकेस्मिन्न एव परमेश्वरः कुर्वन्नपि चेतनाः कर्म देहेंद्रियगुणाः स
मा चेतनस्तदधिष्ठाता तावत्तात्मानं करोत्यसौ चलत्यचेतनं त्वंशास्तस्य एकोनिकटस्थिते देहे च करणग्राम श्वेष्टते त
दधिष्ठितः आदित्ये त्वनुदिते लोकः कर्माणि कुरुते रविः न तानि कुरुते नाप्यतत्कारयत्यपि कुत्रचित् किंतु स्व
भाव एवैष नैत्यकः सूर्यलोकयोः विन्मात्रः सूर्यवद्ज्ञेयो लोकवत्करणान्यपि स एव परमेश्वर इत्यनेन भेदस्यो

Indira Gandhi National
Centre for the Arts

पाधिकत्वे सति भोक्तृभोग्यादिनवविधप्रपंचस्यापि काल्पनिकत्वमुक्तं भवति सर्वं खल्विदं ब्रह्मेतिवद्बाधायां सा
मानाधिकरण्यात् कुर्वंतीति देहेंद्रियगुणानां चेतनाधिष्ठितानां कर्तृत्वं तदेवात्मन्यारोप्यत इत्यर्थः तत्र दृष्टांत
आदित्ये ह्युदित इति दृष्टांतांतरेण भेदस्य काल्पनिकत्वमाह याज्ञवल्क्यः निश्चरंति यथा लोहपिंडात्तप्ता-
त्स्फुलिंगकाः सकाशात्तथा आत्मनस्तद्वदात्मानः प्रभवंतीति हि जीवपरमात्मनोः पारमार्थिकभेदाभावेऽपि अविद्योपा
धिना जीवात्मानः प्रभवंति कर्तृत्वभोक्तृत्वाद्यभिमानिनो जायंते शुभाशुभकर्मवशात् स्थूलशरीराभिमानि
नो जायंत इति कल्पतरुः पृथग्भावसाम्याल्लोहपिंडदृष्टांतः ब्रह्मपुराणेऽपि एकस्मादेव चैतन्याज्जा-
ताः क्षेत्र ज्ञजातयः लोहाज्ज्वलनसंदीप्तान्मरीचय इव सुताः विभागत्यागसंयोगजन्ममृत्युसमागमैः
वर्जितः सर्वभूतात्मा नभः कुंभेष्विव स्थितः तत्र सक्तः पुरुषो बध्यते प्रकृतेर्वशात् चौरसंपर्कदोषेण
बध्यते शीलवानिव वर्जित इति वस्तुतो जन्मादिभिर्वर्जितोऽपि तत्र सक्तः तदेकाध्यासवान् प्रकृतेर्वशात्तथा
पि तत्र सक्तः तदेकाध्यासवान् प्रकृतेर्वशात् मायाकल्पितबंधात् बध्यत इत्यर्थः श्रुतावपि यथाग्नेः क्षुद्रा व्यु ॥१२६॥
स्फुलिंगा व्युच्चरंति एवमेवास्मादात्मनः सर्व आत्मानो व्युच्चरंति ननु व्युच्चरंतीति जन्मश्रवणात् जाता इति व
वाक्यादपि जीवा उत्पद्यंत इति चेत् न नभः कुंभेष्विव स्थित इति दृष्टांतेन जन्मादिविकारस्यौपाधिकत्वाव

सायात् ननु निस्सरंतीति वर्तमानापदेशाज्जीवपरमात्मनोर्भेदस्याधुनिकत्वप्रतीतेः इदानीं च भेदकस्याभावा
त्कथमिति चेत् नाविद्याया अनादित्वेन भेदस्यापि तथात्वात् वर्तमानापदेशश्चौपचारिकः अनादित्वमुक्तं गी
तायां प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान् कार्यकारणकर्तृत्वे हे-
तुः प्रकृतिरुच्यते पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते प्रकृतिर्माया प्रकृतेरनादित्वं सर्वजगत्कारणत्वा
त् तस्या अपि कारणसापेक्षत्वेनवस्थाप्रसंगात् कल्पतरुस्तु प्रकृतिस्तेजोबन्नलक्षणा अनादिः पुनः सर्गः पुन
प्रलय इति प्रवाहरूपेण पुरुषो जीवः अनादिः परमात्मनोंऽशो ऽभिन्नोऽपि सन्नविद्यया पूर्वं न कदाचित्स्यादि
ति व्याचख्यौ कार्यकारणेति कार्यं शरीरं कार्यग्रहणात् विषया भूतानि च गृह्यंते कारणपदेनेंद्रियाणि गुणाश्च
सुखदुःखमोहात्मका गृह्यंते तेषां कर्तृत्वे तदाकारपरिणामे हेतुः एतेन भोगापवर्गाः सर्वं प्रकृतितो जात इत्युक्तं भ
वति पुरुषस्तु सुखदुःखमोहानां भोग्यानां भोक्तृत्वे तत्प्रयुक्ते फले च हेतुः ननु जीवस्य भोक्तृत्वे पारमार्थिके
ब्रह्माभेदो बाधित इति चेत् न अविद्याकाध्यासेनैव भोक्तृत्वं न तु परमार्थतः तदुक्तं तत्रैव पुरुषः प्रकृतिस्थो
हि भुंक्ते प्रकृतिजान् गुणान् कारणं गुणसंगोऽस्य सदसद्योनिजन्मसु प्रकृतिर्माया तामधिष्ठायैव तादात्म्येनोपगतः
प्रकृतिस्थ इति भाष्यकारः कार्यकारणसंघातस्थ इति कल्पतरुः तादृश एव सन् प्रकृतिजान् गुणान् सुखदुःखमो

Indira Gandhi National
Centre for the Arts

॥मो०व०॥ हान्भुंक्ते गुणसंगः त्रिगुणात्मकप्रकृतितादात्म्याभिमानः स एव कारणं भोक्तृत्व इत्यर्थः न त्वसंगस्य तस्य स्व
तः संसार इत्यर्थ इति केचित् गुणेषु कार्यकारणलक्षणेषु संगो विपरीतग्रहोऽहं ममेति प्रत्ययः सदसद्योनिषु
॥१२७॥ कारणमिति कल्पतरुः गुणसंगः गुणेषु सुखदुःखमोहात्मकेषु संगोऽभिलाषः काम इति यावत् स एवास्य स
दसद्योनिजन्मसु कारणं स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते तत्संपद्यत इ
ति श्रुतेरिति कश्चित् सदसद्योनिजन्मसु सद्योनयो देवाः असद्योनयः पश्वादयः उभययोनयो मनुष्याः तेषु सु
खदुःखमोहान् प्राप्नोतीत्यर्थः ननु प्रकृतेः कर्तृत्वेनोक्तत्वाद्गुणसंगस्यैव कारणत्वे परमार्थतो जीवस्य किंरूपमित्य
त उक्तं तत्रैव उपद्रष्टानुमंता च भर्ता भोक्ता महेश्वरः परमात्मेति चाप्युक्तो देहेऽस्मिन्पुरुषः परः अस्मिन्देहे प्रकृ
तिपरिणामरूपे वर्तमानोऽपि पुरुषो जीवो वस्तुतः परः प्रकृतिगुणसंसृष्टोऽसंसारीति यावत् उपद्रष्टा कार्यका
रणव्यापारेषु स्वयमव्यापृतोऽपि द्रष्टा यद्वा उपद्रष्टुस्तथैव ऋत्विक्त्वात् स यत्तत्र किंचिन्न वेत्ति अनन्वागतस्तेन भव
ति असंगो ह्ययं पुरुष इति श्रुतेः अनुमंता कार्यकारणप्रवृत्तिषु स्वयमप्रवृत्तोऽपि संनिधिमात्रेण प्रवृत्त इव तदनुकू ।१२७।
लत्वादनुमंता भर्ता देहेंद्रियबुद्धीनां संहतानां चैतन्याभासविशिष्टानां स्वसत्तया स्फुरणेन च धारयिता भोक्ता बु
द्धेः सुखदुःखमोहात्मकान्प्रत्ययान् स्वरूपचैतन्येन प्रकाशयतीति निर्विकार एवोपलब्धा महेश्वरः नियंता प

रमात्मा देहादिबुद्ध्यंतानामविद्ययात्मत्वेन कल्पितानां परमः प्रकृष्ट आत्मा न तु परमात्मेति परः पुरुषेति निर्देशा
ज्जीवातिरिक्तोंऽतर्याम्येवात्र प्रतिपाद्यत इति वाच्यं जीवस्य प्रकृतत्वेन प्रकरणबाधेन गतौ संभवंत्यां तद्बाधस्य
न्याय्यत्वात् जीववास्तवरूपप्रतिपादनतात्पर्यकत्वाच्च श्रुतावपि नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोता नान्योऽतो-
ऽस्ति मंता नान्योऽतोऽस्ति विज्ञातेति परमात्मनः परस्य द्रष्टादेर्निषेधाच्च तस्मात्परब्रह्माभिन्नस्यैव जीवस्य कर्तृत्वादि
कमौपाधिकं न तु वास्तवं तदुक्तं ब्रह्मपुराणे एक एव परात्मा सौ द्विधा भिन्नस्तु दृश्यते द्रष्टृत्वेनाथ कर्तृत्वे भोक्तृत्वे
कर्मणामपि उत्तमाधममध्यानां ममाहमिति मूढवत् नानाविधानां वर्णानां वर्णैर्धत्ते स्फ निर्मलः स्फटिको न च तेन तस्मा
दुत्पन्नास्तेऽपि नाप्यसौ रजस्तमोभ्यां सत्त्वस्य यथोपाधिश्च निर्मितः तत्स्वभावं विमुंचत्तेन तेन तस्य न तस्य सः चलेऽचल
स्थिरे तिष्ठन्तोये चंद्रार्कबिंबवत् आत्मानुकरणग्रामे दृश्यते न च तत्तथा अदृश्यो दृश्यतामेति राहुश्चंद्रार्का
मंडले आत्मा सर्वगतो बुद्धौ दृश्यते चापि संस्थितः दर्पणे निर्मले लोको निश्चैतन्ये स्वमाननं प्रपश्यत्यात्मनात्मा
यं निर्मलायां धियि चैत्यपि वर्णाश्रमास्तथावासः स्वर्गे नरक एव च पुरुषस्य न संत्येते परमात्मस्य कुत्रचित् दृश्यते
च जगद्रूपमसत्यं सत्यवन्मृषा तोयवन्मृगतृष्णास्तु यथा मरुमरीचिषु एक एव हि सूर्यो बहुधा जलाधारेषु दृ
श्यते आत्मापि परमात्मैव सर्वाधारेषु संस्थितः ब्रह्म सर्वशरीरेषु बाह्ये चाभ्यंतरे स्थितं आकाशमिव कुंभेषु

Indira Gandhi National Centre for the Arts

बुद्धिगम्यं न चान्यथा एवं सति यया बुध्या देहोऽहमिति मन्यते अनात्मन्यात्मनो भ्रांत्या सा स्यात्संसारबंधनास
वैविकल्पैर्हीनस्तु शुद्धो बुद्धो जरामरः प्रशांतो व्योमवद्व्यापी चैतन्यात्मा सकृत्प्रभुः शार्करा गुडखंडाद्यायथै
वेक्षुरसोद्भवाः तथावस्था शरीरे दाश्वबद्धरूपाइहात्मनः नानाविधेति यथा जपाकुसुमादिलौहित्यं स्फटिके भा
भासते न तु तस्य तत्स तत्स्वाभाविकं तथा शाकृत सत्वरजस्तमो रूपोपाधिना विशुद्धोपि सन् भावं नोत्कृत्वा
दिकं भजते न तु त॰ तस्य तात्विकं रूपमित्यर्थः तदेव विहतं वलेचलइत्यादिना दर्शनिआदर्शे धियि बुद्धौ पर
मात्मस्येत्यार्थपरमात्मन इत्यर्थः बुद्धिगम्यं मखंडाकारवृत्तिगम्यं तस्य परमार्थिकं रूपमुक्तं सर्वैरित्यादिना अत
एव ब्रह्माभिन्नोपि जीवश्शरीरैक्याध्यासात जातो मृत इत्युच्यते तदुक्तं याज्ञवल्क्येन निमित्तमक्षरं कर्त्ता बोद्धा
ब्रह्मगुणीवशी अजः शरीरग्रहणात्स जात इति कीर्त्यते निमित्तं जगदुत्पत्ताविति शेषः प्रपंचस्याभिन्ननिमि
त्तोपादानत्वात् अक्षरमविनाशि गुणी कार्यवशात्सत्वादिगुणयोगी वशी स्वतंत्रः अजः जन्मरहितः तादृशोपि स
न् शरीरे स्वाध्यासेन जन्मवानिव भवति तस्य शरीरग्रहणप्रकारउक्तस्तेनैव सर्गादौ च यथाकाशं वायुर्ज्योतिर्जलं
मही सृजत्येकोत्तरगुणांस्तथा दत्ते भवन्नपि आहुत्याप्याय्यते सूर्यः सूर्याद्वृष्टिरथौषधीः तदन्नं रसरूपेण शु
क्रत्वमुपगच्छति स्त्रीपुंसयोस्तु संयोगे विशुद्धे शुक्रशोणिते पंचधातून्स्वयं षष्ठ आदत्ते युगपत्प्रभुः इंद्रियाणि

मनः प्राणो ज्ञानमायुः सुखं धृतिः धारणा प्रेरणा दुःखमिच्छाहंकार एव च प्रयत्न आकृतिर्वर्णस्सुरद्वेषौ भवा
भवौ तस्यैतदात्मजं सर्वमनादेरादिमिच्छतः यथा हि भरतो वर्णैर्वर्णयन्नात्मनस्तनूः नानारूपाणि कुरुते तथा
त्मा कर्मजास्तनूः भवन्नपि जीवभावमापन्नः शरीरग्रहणं कुर्वन्नपि आदत्ते सृजतीति क्रिययोः समानकर्तृ
कत्वप्रतीतेर्भूतसृष्टेरेव भोगार्थशरीरग्रहणमिति जीवेश्वरयोरभेद इति भावः पंचधातून् पंचभूतानि स्वयं षष्ठ इ
ति चिद्रूप आत्मा शरीरकारणतया पंचभूतान्यादत्त इत्यर्थः धृतिश्चित्तस्थैर्यं भवः पुत्रादिसंपत्तिः तद्विपर्ययोऽ
भवः वस्तुतो नादेः रादिं शरीरजन्म आत्मजं आत्मनो ब्रह्मण उत्पन्नं देहादि तदेव स्वोपाधितया गृह्णातीत्यर्थः भरतो
नटः एवं ब्रह्मण एव सतो जीवस्य शरीरग्रहणात्कर्मकर्तृत्वमपि तदुक्तं तेनैव तत्रात्मा हि स्वयं किंचित्कर्म किंचि
त्स्वभावतः करोति किंचिदभ्यासात धर्माधर्मोभयात्मकं स्वयं किंचित्तत्तिस्तत्प्रपानयोरन्वयव्यतिरेकानुसंधा
ननिरपेक्षः स नूष्मागर्भवीयानुभवजन्यसंस्कारोद्भूतस्मरणादेव प्रवर्त्ततो स्वभावतोयदृच्छयोपयोजनाभिसंधिनि
रपेक्षं पिपीलिकादिमर्दनं करोतीति विज्ञानेश्वरः स्वभावतो जातिवशात यथोष्ट्रस्य कंटकाशनशीलतेति कल्पत
रुः अभ्यासात् दानाध्ययनादिविषयक पूर्वाभ्यासात् तदुक्तं स्मृत्यंतरे प्रतिजन्म यदभ्यस्तं दानमध्ययनं तपः तेनै
वाभ्यासयोगेन तदेवाभ्यसते पुनः ब्रह्मणो वस्तुतो वचनागोचरत्वेपि जीवरूपेण सकलव्यवहारभाक्त्वं तदुक्तं गी

Indira Gandhi National
Centre for the Arts

॥गीक्ष१०॥ तायां अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखं सर्वतः श्रुतिमल्लोके सर्वमा
वृत्य ति[ष्ठ]ति अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः शरीरस्थोऽपि कौंतेय न करोति न लिप्यते यथा सर्वग

१२८ तं सौक्ष्म्यादाकाशं नोपलिप्यते सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं
रविः क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत आदिमन्न भवतीत्यनादिमत् अनादीत्येतावतैव बहुव्रीहिणार्थला
भेऽप्यतिशायने नित्ययोगे वा मतुपः प्रयोगः परं निरतिशयं अनादीति मत्परमिति पदद्वयमिति कश्चित् सत्तवि
धिमुखेन प्रमाणविषयः असत् निषेधमुखेन प्रमाणविषय तदुभयविलक्षणत्वात् ब्रह्मणो वचनागोचरत्वं य
तो वाचो निवर्तंते अप्राप्य मनसा सहेति श्रुतेः तस्यैव ब्रह्मणः क्षेत्रज्ञरूपेण व्यवहारवत्तोक्ता पाणयः पादाश्च स्व
स्वव्यापारेषु प्रवर्तनीया यस्य एवमग्रेऽपि अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति श्रुतेः अयम
हमिति व्यवह्रीयमाणः परमात्मा परमेश्वराभिन्नः अव्ययः सर्वविकारशून्यः विकारो ह्युत्पत्त्या वा स्वधर्मोत्पत्त्या वा
भवति अनादित्वान्नोत्पत्तिः निर्गुणत्वान्न धर्मोत्पत्तिरपि अविनाशी वा अरेयमात्मानुच्छित्तिधर्मेति श्रुतेः अयमाध्या ॥१२८॥
सिकेन संबंधेन शरीरस्थोऽपि तस्मिन् कुर्वत्यपि न करोति अत एव न लिप्यते कर्मजन्यफलभोक्ता न भवतीत्यर्थः शा
स्त्रफलं प्रयोक्तरीति न्यायात् तत्र दृष्टांतो यथेति सौक्ष्म्यादसंगस्वभावत्वात् यथा प्रकाशयत्येक इति प्रकाशक

स्वभावस्य प्रकाश्यधर्मैरलेपे दृष्टांतः सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः एकस्तथा सर्वभू
तांतरात्मा न लिप्यते लोकदुःखेन बाह्य इति श्रुतेः अत एव जीवस्य ब्रह्माभेदेन दुर्ज्ञेयतोक्ता गीतायां आश्चर्य
वत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद न चैव कश्चित्
एनं प्रकृतं देहिनं आश्चर्यदद्भुततुल्यतया आविद्यक नानाविधविरुद्धधर्मवत्तया भासमानं अविद्यकस
र्वद्वैतनिषेधेन महावाक्यजन्यापापमखंडाकारवृत्तौ प्रतिफलितं ब्रह्मरूपं कश्चिदेव पश्यति तथैव गुरुः वदति
तथैव चान्यः शृणोति एवमपि कश्चिदसंभावनाविपरीतभावनाभ्यां ज्ञानप्रतिबंधकदुरितेन च न साक्षात्करोति
ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मण इति स्मृतेः ऐहिकमप्रस्तुतप्रतिबंधे तद्दर्शनादिति न्यायाच्च तादृशदुरि
तक्षये चाखंडाकारावृत्तिर्निवर्तिते तदुक्तं श्रुतौ एष सर्वेषु भूतेषु गूढात्मा न प्रकाशते दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया
तत्वदर्शिभिः अग्र्यया महावाक्यजन्यया सूक्ष्मया निवर्तितसपरब्रह्मस्वरूपमात्राकारया ब्रह्मस्वरूपस्य च जीवस्य
नावस्थात्रयसंस्पर्शः तदुक्तं ब्रह्मपुराणे ह्येया जाग्रदवस्था च प्रजागरणकर्मतत् स्वप्नावस्था वहन्त्यो नित्यसूक्ष्म
नाड्यां स्थितस्य तु देहेंद्रियगुणानां च परित्यागः सुषुप्तता सबोधः सर्वभावानां तुर्यं चिन्मात्रमुच्यते धूमाभ्र
लिभिर्व्योम यथा न मलिनायते प्राकृतैरपमध्येन विकारैः पुरुषस्तथा यथैकस्मिन् घटाकाशे मले धूमादिभि

Indira Gandhi National Centre for the Arts

॥मोक्षप्र०॥ श्चिते नान्येयं तिमलिनतां इतरस्याः कुत्रचित् तथा हं द्वैरनेकैश्च जीवैश्च मलिनीकृते एकस्मिन् अपरे जी-
वा मलिनाः संति कुत्रचित् परित्यागः व्यापाररहितत्वं इतरस्याः अन्ये घटाकाशाः तथाहंकैरिति ब्रह्मा
१३० भिन्नानामपि जीवानां तत्तदुपाध्यवच्छेदेन सुखदुःखादिधर्माणां तत्तद्घटाकाशवदुपपत्तेरित्यर्थः तत्तदु
पाधिभिर्जीवा अपि भिन्ना इव घटाकाशवन्न तु वस्तुत इति तात्पर्यं अत एव देहेन्द्रियसंयोगजन्यत्वं प्रपं
चस्याभिधाय ब्रह्माभिन्नत्वमुक्तं भगवद्गीतायां भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च अहंकार इतीयं मे
भिन्ना प्रकृतिरष्टधा अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे परां जीवभूतां महाबाहो ययेदं धार्यते जगत् ए
तद्योनीनि भूतानि सर्वाणीत्युपधारय अहं सर्वस्य जगतः प्रभवः प्रलयस्तथा मत्तः परतरं नास्ति किंचिदा-
न्यद्धनंजय मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव अष्टधेत्युपलक्षणं सांख्यमते चतुर्विंशतितत्त्वान्यपि द्रष्ट-
व्यानि उपनिषन्मते तु जडवर्गः इतः अपरायाः प्रकृतेः जीवभूतामिति मदभिन्नामपि अनाद्यविद्यया कर्तृ
त्वभोक्तृत्वादिं जीवरूपावं प्राप्तामित्यर्थः देहवदेवहारैव मममापि जगत्कर्तृत्वमित्यर्थः परापरेत्यभिधाना १३०
द्वैतापत्तिरिति भ्रमवारणं व्यवहारदशायां भेदेऽपि पारमार्थिकभेदाभावस्य मत्तः परतरं नान्यदित्यनेनोक्तत्वा
त् वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति तदनन्यत्वमारंभणशब्दादिभ्य इति न्यायेन ब्रह्मा

तिरिक्तस्य मिथ्यात्वप्रतिपादनाच्च न च तदतिरिक्तप्रपंचस्येव जीवस्यापि मिथ्यात्वमस्त्विति वाच्यं जीवस्या-
विद्रूपत्वेन विकारित्वाभावात् तन्निष्ठस्य जीवत्वोपाधेरेव मिथ्यात्वात् विष्णुपुराणेऽपि विस्तारः सर्वभूतस्य विष्णो
र्विश्वमिदं जगत् द्रष्टव्यमात्मवत्तस्मादभेदेन विचक्षणैः तथा ज्ञानस्वरूपमखिलं जगदेतदबुद्धयः अर्थस्व॰ प
पं पश्यंतो भ्रमंतो मोहसंप्लवे ज्योतींषि विष्णुर्भुवनानि विष्णुर्वनानि विष्णुर्गिरयो दिशश्च नद्यः समुद्राश्च स एव सर्वं
यदस्ति यन्नास्ति च विप्रवर्य ज्ञानं वित्स्वरूपं ब्रह्म तदात्मकं जगत् यथा रज्जुस्वरूपः सर्पः अबुद्धयोऽतत्त्वज्ञाः
अर्थस्वरूपं प्रत्याद्यर्थकार्यकारित्वेन सद्रूपं मन्यमानाः मोहसंप्लवेऽज्ञानसागरे मिथ्याज्ञानसागर इति कल्प
तरुः यदस्ति यन्नास्ति चेति यद्भावस्वरूपं यदभावस्वरूपं तत्सर्वं स एवेत्यर्थः ननु सर्वात्मकत्वे ब्रह्मणो विकारित्व
विनाशित्वादिकं स्यादिति चेत् न सर्वं खल्विदं ब्रह्मेति बाधायां सामानाधिकरण्येन ब्रह्मातिरिक्तस्य मिथ्यात्वेतात्प
र्यात् अत एव ब्रह्मणो संगत्वं प्रपंचस्याविद्याकल्पितत्वमुक्तं गीतायां मया ततमिदं सर्वं जगदव्यक्तमूर्तिना म
त्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः न च मत्स्थानि भूतानि पश्य मे योगमैश्वरं मया ततमिदं सर्वं जगदव्य-
क्तमूर्तिना भूतभृन्न च भूतस्थो ममात्मा भूतभावनः यथाकाशस्थितो नित्यं वायुः सर्वत्रगो महान् तथा सर्वाणि
भूतानि मत्स्थानीत्युपधारय सर्वभूतानि कौंतेय प्रकृतिं यांति मामिकां कल्पक्षये पुनस्तानि कल्पादौ वि

Indira Gandhi National Centre for the Arts

॥गीदी०॥

१३१

सृजाम्यहं प्रकृतिंस्वामवष्टभ्यविसृजामिपुनःपुनः भूतग्राममिमंकृत्स्नमवशंप्रकृतेर्वशात् नचमांतानिक
र्माणिनिबध्नंतिधनंजय उदासीनवदासीनमसक्तंतेषुकर्मसु मयाध्यक्षेणप्रकृतिः सूयतेसचराचरं हे
तुनानेनकौंतेयजगद्विपरिवर्त्तते अवजानंतिमांमूढामानुषींतनुमाश्रितं परंभावमजानंतोममभूतमा
हेश्वरं मोघाशामोघकर्माणोमोघज्ञानाविचेतसः राक्षसीमासुरींचैवमोहप्रकृतिमाहनींश्रिताः मया
धिष्ठानस्वरूपेणस्वाज्ञानकल्पितंजगत् सद्रूपेणस्फुरणरूपेणचरज्जुखंडेनतदज्ञानकल्पितसर्पा
दिवत् व्याप्तं नचाहमितिकल्पितकार्येषु अधिष्ठानस्यवस्तुत्वेनास्तीत्यर्थः नचेतितानिचभूतानिमयिप
रमार्थतोनसंतीत्यर्थः योगमैश्वरमिति अघटनघटनाचातुर्यंममामायायाः पश्येत्यर्थः ममात्मेतिराहोः
शिरइतिवत्कल्पनयाषष्ठी यथाकाशस्थितोवायुरिति असंगत्वेधाराधेयभावेदृष्टांतः प्रकृतिंस्वा
मितिप्रपंचस्याविद्याकल्पितत्वमुक्तं मयाध्यक्षेणेतिसांख्योक्तंप्रकृतिस्वातंत्र्यंपरास्तं विपरिवर्त्ततेमयिब्र
ह्मणिविवर्त्तते तथाचपरिणाम्युपादानत्वेविकारित्वंस्यात्विवर्त्तोपादानत्वेचनतदितिभावः तदुक्तंअस्य १३१
द्वैतेंद्रजालस्ययदुपादानकारणं अज्ञानंतदुपाश्रित्यब्रह्मकारणमुच्यते तस्माद्द्वैतस्यमिथ्यात्वात्जीवब्र
ह्माभेदोनबाधितः ननुब्रह्मणःप्रपंचविवर्त्ताधिष्ठानत्वेननिर्विकारत्वेपिमहात्मानस्तुमांपार्थदैवींप्रकृतिमा

श्रिताः भजंत्यनन्यमनसोज्ञात्वाभूतादिमव्ययमितिभगवद्गीतासुमांकृष्णविग्रहवंतमित्यभिधानात्कथं
जीवस्यतदभेदबोधइतिचेत् लीलाविग्रहस्यापिमायाकल्पितत्वेनभक्तानुग्रहायचाविर्भूतत्वात् तदुक्तं
तत्रैव अजोपिसन्नव्ययात्माभूतानामीश्वरोपिसन् प्रकृतिंस्वामवष्टभ्यसंभवाम्यात्ममायया यदायदाहिध
र्मस्यग्लानिर्भवतिभारत अभ्युत्थानमधर्मस्यतदात्मानंसृजाम्यहं परित्राणायसाधूनांविनाशायचदुष्कृतां
धर्मसंस्थापनार्थायसंभवामियुगेयुगे अजोपीत्यादिविशेषणत्रयेणपूर्वदेहत्यागेनपूर्वदेहविच्छेदकध
र्माधर्मवशात्त्वंनिराकृतं प्रकृतिंस्वामिति ईश्वरत्वोपाधिभूतांमायांचिदाभासेनवशीकृत्यतत्परिणामरूपली
लाविग्रहवत्त्वमित्यर्थः तदुक्तंमहाभारते मायाह्येषामयासृष्टायन्मांपश्यसिनारदसर्वभूतगुणै
र्युक्तंनचमांद्रष्टुमर्हसि नित्योयःकारणोपाधिर्मायाख्योनेकशक्तिमान् सएवभगवद्देहइतिभाष्यकृतांमत
मितिवार्त्तिकोक्तेश्च अन्येतुयद्धितुसच्चिदानंदघनंनिर्गुणंपरमात्मरूपंतदेवप्रकृतिशब्दवाच्यमवष्टभ्यदे
हिवद्व्यवहरामि तथाचदेहिदेहभाववत्त्वन्येवब्रह्मरूपेदेहवतीतिरूपासनार्थमारोप्यरूपामायाप्राकृशमित्य
र्थइत्याहुः केचित्तुकृष्णशरीरंवास्तवमेवेच्छंतितच्चमूलंचिंत्यं मायिकशरीरपरिग्रहेकारणमुक्तंयदायदाहीति
तिभक्तजीववत्स्वकर्मभागोयेत्यर्थः नचमांतानिकर्माणिनिबध्नंतिध[illegible]नंजयेत्यनेनेश्वरस्यजीववत्कर्मभा

Indira Gandhi National Centre for the Arts

॥मो॰ध॰४४॥ वस्योक्तत्वात् नच जीवकर्मभोगार्थमेवोत्पन्ने शरीरे भूतावेशवदीश्वरप्रवेश इति वाच्यं तर्हि सर्वस्मिन्नेव
शरीरे ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति भ्रामयन् सर्वभूतानि यंत्रारूढानि मायया इत्येतेन नांतर्यामितया
१३२ विद्यमानत्वस्योक्तत्वात् शरीरविशेषाभ्युपगमवैयर्थ्यात् जीवस्य तद्भोगाभावे च शरीरपरिग्रहानुपप
त्तेः तस्मादीश्वरशरीरं मायिकमेवेति नाभेदबोधविरोधः ननु यदि ब्रह्मणि भिन्नो जीवस्तर्हि कथं शूकरादियो-
निमापद्यत इति चेत् न अनाद्यासमावेशवशान्मोहरागादिभावैरभिभूयमानो नानाकर्माण्याचरन् तज्जनि
ततत्तच्छरीरे भोगान् भुंक्त इव भवति न तु वास्तवो भोगः तदुक्तं लिंगपुराणे तस्मादज्ञानमूलो हि संसारः सर्व
देहिनां एषणारागदोषेण रागी ज्ञानेन सुव्रताः तदज्ञानादेव सर्वेषां धर्माधर्मौ न संशयः एवमज्ञानदोषेण चात्रक
र्मवशेन च पाञ्चभौतिकं समुद्भूतं न जात्येकलेवरं याज्ञवल्क्येनाप्येतदुक्तं प्रश्नोत्तराभ्यां यद्येवं स कथं ब्रह्मन्
पापयोनिषु जायते करणैरन्वितस्यापि पूर्वज्ञानं कथं च न वेत्ति सर्वगतां कस्मात्सर्वगोपि न वेदनां अंत्यपक्षि-
स्थावरतां मनोवाक्कायकर्मजैः दोषैः प्रयाति जीवोयं भवयोनिशतेषु च राजसा तामसाश्चैवं समाविष्टो भ्रमन्नि १३२
हभावैरनिष्टैः संयुक्तः संसारं प्रतिपद्यते मलिनो हि यथादर्शो रूपालोकस्य न क्षमः तथाविपक्वकरण आत्मा
ज्ञानस्य न क्षमः कटुर्वाशे यथा पक्वे मधुरः सन् रसोपि न प्राप्यते ह्यात्मनि तथानापक्वकरणे ज्ञता सर्वाश्रयाः निजे

देहे देही विंदति वेदनां योगी मुक्तश्च सर्वासां योनचाप्नोति वेदनां एवं च सम्पूर्णजीवभावे सति पापयोनिषु
शूकरादियोनिषु करणैः मनःप्रभृतिभिर्ज्ञानोपायैः पूर्वज्ञानं जन्मांतरानुभूतविषयकं सर्वगतां सर्वशरीर
गतां सर्वगोपि सर्वशरीरगतोपि प्रथमप्रश्नोत्तरं अंत्यपक्षिरजसा तमसा चैवेति द्वाभ्यां स्त तमोरूपोपाधिना
समाविष्टत्वादात्म्याध्यासापन्नः द्वितीयप्रश्नोत्तरं मलिनो हि यथेति यद्यपि तत्करणादि ज्ञानकरणसंपन्न तथा
पि जन्मांतरानुभूतार्थविबोधेन समर्थः अविपक्वकरणत्वादित्यर्थः कटुर्वाशीति कर्कटिकायां तत्र विद्यमा-
नोपि मधुरो रसो यथा नोपलभ्यते तथा स्वप्रकाशरूपाज्ञता विद्यमानापि प्रागभवीयवस्तुविषया न भवतीत्यर्थः दे
हीत्यादि तृतीयप्रश्नोत्तरं सर्वाश्रयामिति स्वकर्मोपार्जितदेह एव सुखदुःखं भवति न तु परदेहे तस्यैतस्यैतद्भो
गायतनत्वाभावात् यस्तु योगी मुक्तो मुक्ताहंकारादिः स सर्वासां वेदनानां वेदिता भवति न च दुःखोपभोक्तेत्यर्थः
यत्तु जीवस्य तच्छरीरे भोक्तृत्वादि तदविद्याकृतभेदात् प्रतिबिंबे मलिनत्वादिकं दर्पणकृतमिवेति नाभेदबाधः
भेदस्यापारमार्थिकत्वात् मायैवाज्ञानशब्देन बोध्यते मुनिसत्तमाः मापि नो माययाभेदं प्रपश्यंति परमात्मनीति
नारदीयोक्तेः पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बंधविपर्ययाविति न्यायाच्च जीवत्वेश्वरत्वादिकमपि ब्रह्मणि
कल्पितमिति भेदव्यवहारः सतेन तु पारमार्थिको भेद इति स्पष्टमुक्तं पराशरपुराणे द्वयधर्मो न द्व ग्रधमस्तस्माद-

Indira Gandhi National
Centre for the Arts

॥मोक्ष१७०॥ तमाद्वयस्सदा औपाधिकेन धर्मेण भिन्नमेव परं पदं जीव ईश्वर इत्यादिविशेषव्यपदेशभाक् जीवः संसार

दोषेण दुष्टवत्प्रतिभासते व्यवहारदशायां तु न दुष्टः परमार्थतः व्यवहारदशायां तु न दुष्टः परमेश्वरः यथाका

१३३ शेस्थितः सूर्यश्चलनादिविवर्जितः सूर्य एकः शरावादिभाजनस्थोदके भुच भिन्नवद्भाति जीवानां तथा भेदः

प्रकल्पितः अर्कस्य प्रतिबिंबं हि चलतीव प्रकाशते संसारीव तथा भाति जीव एव न चेतरः लेपश्च पुण्यपापाभ्यां

जन्मनाशौ च दुःखिनः जीवस्यैव न देवस्य बिंबीभूतस्य सत्तम बिंबत्वं प्रतिबिंबत्वं यथा पूषणि कल्पितं ईश्व

रत्वं च जीवत्वं तथा कल्पितमात्मनि विनष्टे जलपात्रे तु यथादित्यस्य नश्यति बिंबत्वं प्रतिबिंबत्वं तन्नयत्वं तथै

व च अज्ञानोपाधिनाशे तु नश्यत्येव परात्मनः ईश्वरत्वं च जीवत्वं पुनर्यत्वं न संशयः बिंबत्वादिविनिर्मुक्तः

स्वस्वरूपेणैव भास्करः यथादिव्यस्थिरः शुद्धस्वयमेवावशिष्यते ईश्वरत्वादिनिर्मुक्त आत्मा स परमस्स्वयं स

त्यानंतचिदानंदस्वरूपेणावशिष्यते जीवः संसारेत्यत्र व्यवहारदशायामिति पूर्वत्र संबंधः तुर्भिन्नः क्रमः प १३३

रमार्थतस्तु न दुष्ट इत्यर्थः व्यवहारदशायां त्वित्यत्र तुरप्यर्थे नारदीयेपि योसौ शुद्धोपि परमोहंकारेण संयुतः

देहीति प्रोच्यते मूढैरज्ञानं हि वेदनं आविद्यकं भेदमादायैव निखिलोपि व्यवहारः तदुक्तं पराशरपुराणे

अज्ञानस्यैव कार्याणि कारणान्यखिलानि च कर्त्रादिकारकग्रामप्रसूतं स्वलु कर्मतत देहेंद्रियादिसंघा

तादृग्भिमानी हि कर्तृता भोक्तृता वा क्रियस्यास्य ब्रह्मभूतात्मनस्सदा कर्तृत्वं चैव भोक्तृत्वं यदि स्वाभाविकं भवेत्

आत्मनो न निवर्तेत केनचित्साधनेन च शरीराद्यभिमानेन जातोहमिति मन्यते यथाहं शूद्रोहं क्षत्रियोहमिति मं

त्याहि मन्यते ब्राह्मणोहं मनुष्योहं ब्रह्मचारी गृही वनी भिक्षुकोहमिति भ्रांत्या निर्विशेषोव गम्यते एकोपि सर्व

देहेषु भ्रमाद्भिन्नो व भासते घटाकाशमहाकाशविभागेन यथा नभः अक्रियोपि स्वतस्तस्माद्भ्रांत्या सर्वविकार

वान् व्यवहारस्य च व्यवहीयमानपदार्थमिथ्यात्वात् काल्पनिकत्वं तदुक्तं विष्णुपुराणे ज्ञानस्वरूपेण भगवा

न्यतो सावशेषमूर्तिर्न च वस्तुभूतः ततो हि शैलाब्धिधरादिभेदान् जानीहि विज्ञानविजृंभितानि यदा तु सर्वं

निजरूपशुद्धं कर्मक्षये ज्ञानमपास्तदोषं तदा हि संकल्पतरोः फलानि भवंति नो वस्तुषु वस्तुभेदाः वस्त्वस्ति

किं कुत्रचिदादिमध्यपर्यंतहीनं सततैकरूपं विज्ञानविजृंभितानि विज्ञाने वस्तूनि कल्पितानि एवं सति नवा

विधप्रपंचस्य मिथ्यात्वात् भेदस्यापि काल्पनिकत्वात् न तत्राभेदबोधविरोधः ननु जीवपरमात्मनोर्भेदोपि सुपर्णावि

तौ सदृशौ सखायौ पक्षिणौ वृक्षे तौ कृतनीडौ च वृद्धे एकस्तयोः खादति पिप्पलान्नमन्यो निरन्नोपि बलेन भूयान् तमा

त्मानमन्यं च स वेद विद्वान् पिप्पलादो न तु पिप्पलाद इति श्रीभागवते द्वा सुपर्णा सयुजा सखाया समानं वृक्षं

परिषस्वजाते तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीतीति श्रुतौ गुहां प्रविष्टावात्मानौ हि तद्दर्श

Indira Gandhi National Centre for the Arts

॥मो०द्व०प०॥ नादनुपपत्तेस्तन्नशारीर इति सूत्रे चावगम्यते तत्कथमभेद इति चेत् न क्षेत्रज्ञं चापि मां विद्धि ममैवांशो जीवलोके
इति भगवद्गीतासु देवोयं संस्थितस्तस्मिन्नबिंदुरिव पुष्करे क्षेत्रज्ञं तं विजानीहि नित्यं त्यागजितात्मकं जी
१३४ वमात्मगुणं विद्यादात्मानं परमात्मन इति महाभारते औपाधिकेन धर्मेण भिन्नमेव परं पदं जीवईश्वर इत्या
दिविशेषव्यपदेशान्नाक इति पराशरपुराणे चाभेदस्य पारमार्थिकत्वावसायात् भेदवाक्यानामौपाधिकभेद
मादायाप्युपपत्तेः नच वैपरीत्यमेवास्त्विति वाच्यं योविद्यया ह्युक्तः सतु नित्यबद्धो विद्यमयोपः सतु नित्यमुक्त इ
ति तथा बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुतः गुणस्य मायामूलत्वान्न मे मोक्षो न बंधनमिति श्रीभागव
तोक्तेः द्वैतं मायामयं प्राह श्रुतिः सत्यार्थवादिनी वास्तवं प्राह चाद्वैतं सर्वमानातिगामिनीति पराशरपुराणोक्ते
श्च श्रुतिस्मृतिपुराणानां पारमार्थिकाभेदतात्पर्यकत्वावसायात् भेदवाक्यानां लोकसिद्धाविद्याकल्पितभे
दानुवादकत्वमिति न तत्र तात्पर्यं अनेन भेदोयजीवकानिकर्मोपासनादिविधायकवाक्यान्यपि व्याख्याता
नि तदुक्तं श्रीभागवते एतावानात्मसंमोहो यद्विकल्पस्तु केवले आत्मन्नृते स्वमात्मानमवलंबो न यस्य हि १३४
यन्नामाकृतिभिर्ग्राह्यं पंचवर्णमबाधितं व्यर्थेनाप्यर्थवादोयं द्वयं पंडितमानिनां आत्मन् आत्मनि केवले निर्वि
कल्पे अभिन्न इति यावत् तत्र विकल्प इति यत्तत्संमोह इत्यन्वयः तत्र हेतुः ऋते स्वमात्मानमिति सदिति

प्रतीतेर्द्वैतस्य तां विनावलंबांतराभावादित्यर्थः यदिति नामाकृतिभिर्नामधेयरूपधेयरूपैः पंचवर्णं पंचभूता
त्मकं अबाधितं मत्वा अतत्त्वमोक्षत्वाभावप्रतिपादकानां वेदांतानामर्थवादत्वं ये वर्णयंति ते पंडितमानिनो
न तु पंडिताः तात्पर्यानभिज्ञत्वादित्यर्थः तथाहि न तावदर्थवादत्वं विध्येकवाक्यत्वाभावात् न च क्रत्वर्थकर्तृ
प्रतिपादनपरत्वं वेदांतैर्बोधितस्याकर्तुर्भोक्तात्मस्वरूपज्ञानस्य कर्मण्यनुपयोगात् न चाप्रामाण्यं अध्ययन
विधिना तदध्ययनस्य फलवत्ज्ञानजनकत्वावगमात् तस्मादद्वैततात्पर्यकत्वमेषामिति न किंचिदनुपपन्नं
ननु तत्त्वमसि क्षेत्रज्ञं चापि मां विद्धीति जीवब्रह्माभेदबोधके वाक्ये जीवत्वेश्वरत्वप्रकारेणोपस्थितयोर्जीवेश्वर
योरभेदबोधोनुपपन्नः शाक्यतावच्छेदकप्रकारेणोपस्थितयोः पदार्थयोः संसर्गस्य शाब्दबोधे भाननियमात् न च
जीवत्वेश्वरत्वविशिष्टयोरेव गौरः कुंडलीतिवदभेदबोधोस्त्विति वाच्यं परस्परविरुद्धधर्मवतोरभेदबोधानुपप
त्तेः किंच न सप्रकारकबोधेनाज्ञाननिवृत्तिः किंतु केवलनिःप्रकारकज्ञानेनैव ज्ञानाज्ञानयोः समानविषयक
त्वेनैव विरोधात् केवलब्रह्मविषयकाज्ञानस्य तन्मात्रविषयेनैव नाशात् न च सन्मात्रविषयकघटज्ञानादपि त
न्निवृत्तिस्यादिति वाच्यं विशिष्टज्ञानसमूहालंबनयोर्विशेषणताविशेष्यत्वभेदवदत्रापि विषयताविशेषेण
सन्मात्रविषयकज्ञानस्यैव तन्निवर्तकत्वात् तादृशं च न वाक्यादिति चेत् न वाक्येनापि तादृशार्थबोधस्य शक्यत्वा

Indira Gandhi National Centre for the Arts

जननाभावेपिलक्षणया चिन्मात्रविषयकबोधसंभवात् सोयंदेवदत्तइत्यत्र तत्कालावच्छिन्नतत्काला
वच्छिन्नत्वरूपेणोपस्थितयोर्विरुद्धांशमपहाय विशेष्ययोरभेदबोधवदत्रापि जीवत्वेश्वरत्वरूपविरुद्धधर्म
त्यागेनजहदजहल्लक्षणयाऽभेदबोधोपपत्तेः अतएव यतोवाचोनिवर्तंते तंत्वौपनिषदंपुरुषंपृच्छामीति
वाक्ययोरविरोधः साक्षाच्छब्दबोध्यत्वाभावेपिलक्षणयोपनिषद्गम्यत्वात् एतदुक्तंप्रश्नोत्तराभ्यांश्रीभाग
वते ब्रह्मन्ब्रह्मण्यनिर्देश्येनिर्गुणेगुणवृत्तयः कथंचरंतिश्रुतयः साक्षात्सदसतःपरे बुद्धींद्रियमनःप्रा
णान्जनानामसृजत्प्रभुः मात्रार्थंचभवार्थंचात्मनेकल्पनायच अनिर्देश्यइतिशक्यतावच्छेदकधर्माभा
वेनशक्यत्वाभावउक्तः निर्गुणइतिगुणाभावोक्त्यागौणीप्रकृता सदसतः परइतिसंबंधाभावाल्लक्ष
णायोगइत्थंनिराकृते तस्माद्वेदांतैर्निर्विशेषंब्रह्मप्रतिपाद्यतइतिप्रश्नार्थः उत्तरंबुद्धींद्रियेति जनानां
जीवानां मात्रार्थंभोगार्थं भवार्थंभवोजन्मतत्प्रभृतिकर्मकरणार्थंआत्मनेलोकांतरगामिने कल्प
नायमोक्षायेत्यर्थः अयंभावः यद्यपिनिर्विशेषस्यब्रह्मणोवृत्त्याशब्देनबोधयितुमशक्यत्वेपिबुद्धींद्रियादिप १३५
पंचकर्तृत्वरूपतटस्थलक्षणमुखेनलक्ष्यत्वं नचशक्यसंबंधाभावात्तदपिनेतिवाच्यं पारमार्थिकसंबं
धाभावेप्यनाद्यविद्याकल्पितप्रपंचाधिष्ठानत्वरूपसंबंधसंभवात् त्रिधाहिवेदांतवाक्यानांप्रवृत्तिः अध्या

रोपापवादेन अतन्निरसनरूपनिषेधावधित्वेन जीवब्रह्माभेदबोधनेनच यथाद्वेवावब्रह्मणोरूपेमूर्तंचा
थातआदेशोनेतिनेतियोयंसर्पः सनेतिवत् अस्थूलमनण्वह्रस्वमदीर्घंसत्यंज्ञानमनंतंब्रह्मेति स्थूला
दिभेदेन तदुक्तंसांप्रदायिकैः अपतौस्वपतौदृष्टेनेतिनेतीतिभाषते नवोढास्वपतौदृष्टेमौनमालंब्यवर्तते
नागवतेपिपरत्राजातोतन्निरसनमुखब्रह्मकमिताविति तथातत्त्वमसीत्यादौविरुद्धांशत्यागेनचैतन्याभे
दमुखेन एवंचलक्षणयाब्रह्मस्वरूपबोधनेनकिंचिदनुपपन्नमितिसांप्रदायिकाः प्रदंतिच यद्यपिब्रह्मवेदां
तैः शक्त्यानप्रतिपाद्यते तथापिलक्ष्यतेसम्यगभेदादिनिरूपणैः वस्तुतस्तुयथाऽविद्यकसंबंधमादायल
क्ष्यतातथाविद्याकल्पितशक्यतावच्छेदमादायशक्यत्वमपिसंभवति नचमहावाक्ये अभेदबोधानुपपत्तिः
लक्षणांविनैवनीलोघटइतिवद्विशेष्याभेदबोधसंभवादितितत्वं किंचलक्षणातावन्नसंभवति साहितत्प
देवात्वंपदेवास्यात् एकेनलक्षितेशुद्धेपरस्यविशेषणविशिष्टस्याभेदान्वयानुपपत्तेः नाप्युभयपदात्मकवा
क्ये पदद्वयेर्लक्षणयावाक्येंगीकारानौचित्यात् नापिपदद्वये गौरवात् यत्तुपूर्वोक्तवाक्येलक्ष्यतइतित
दपिकाकादेर्गृहाद्युपलक्षकत्ववत्वेदांतानामितितस्यवादेरुपलक्षकपरतयानेतव्यं तस्मात्पूर्वोक्तमेवन्या
यः इतिश्रीमत्सकलसामंतचक्रचूडामणिमरीचिमंजरीनीराजितचरणकमलश्रीमन्महाराजाधिराजप्रता-

Indira Gandhi National
Centre for the Arts

॥मो॰ द॰ १०॥ प्रचण्डतनूजश्रीमन्महाराजमधुकरसूनुचतुरुदधिवलयवसुंधराहृदयपुंडरीकविकासदिनकरश्रीमन्म
हाराजाधिराजश्रीवीरसिंहदेवोद्योजित श्रीहंसपंडितात्मजश्रीपरशुराममिश्रसूनुसकलविद्यापारावा
॥१३६॥ रपारीणधुरीणजगद्दारिद्र्यमत्तगजपारीन्द्रविद्वज्जनजीवातुश्री— मित्रमिश्रकृते वीरमित्रोदयाभिध
निबंधे मोक्षप्रकाशे [illegible] खंडार्थनिरूपणं सर्वमिदं द्वैतमिथ्यात्वे स्यादिति तन्निरूप्यते तत्र प्रपंचस्य त्रिका
लबाध्यत्वरूपं मिथ्यात्वमुक्तं विष्णुपुराणे तस्मान्न विज्ञानमृतेऽस्ति किंचित्क्वचित्कदाचिद्द्विज वस्तुजातं वि
ज्ञानमेकं निजकर्मभेदविभिन्नचित्तैर्बहुधाभ्युपेतं ज्ञानं विशुद्धं विमलं विशोकमशेषलोभादिनिरस्त
संगं एकं सदैकः परमः परेशः स वासुदेवोऽस्ति यतो न किंचित् सद्भाव एष भवतो मयोक्तो ज्ञानं यथा सत्यमस
त्यमन्यत् विज्ञानं ब्रह्म वस्तुजातं नास्तीत्यन्वयः क्वचित्कदाचिदित्यनेन यदवच्छेदेन यस्मिन्काले येन
रूपेण यत्र यस्य सत्त्वात् तदवच्छेदेन तस्मिन्काले तेन रूपेण तन्निष्ठात्यंताभावप्रतियोगित्वरूपं मिथ्यात्वमु
क्तं भवति निजकर्मेति एकमेव ब्रह्म तत्कर्मविशेषकृताचरणैर्विभिन्नमिव प्रतीयते न तु वस्तुतः तदुक्तं ज्ञा १३६
नं विशुद्धमिति असत्यमन्यदिति सद्भिन्नत्वरूपमपि मिथ्यात्वमुक्तं तथा त्वं राजा शिबिका चेयमिमे वा
हाः पुरः सराः अयं च भवतो लोको न सदेतन्नृपोच्यते न सदेतत् किंतु सद्विलक्षणं मिथ्येत्यर्थः मायाकल्पि

तत्वरूपं मिथ्यात्वमुक्तं गीतायां प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः भूतग्राममिमं कृत्स्नमवशं प्रकृ
तेर्वशात् प्रकृतिमायां मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति श्रुतेः तथा च मायाशबलितब्रह्मोपा
दानत्वेनाज्ञानोपहितरज्जूपादानकसर्पवत्प्रपंचस्य मिथ्यात्वं ननु प्रपंचः सज्जन्यत्वात् अर्थक्रियाका
रित्वादित्यादिहेतुभिः सत्यत्वं सेत्स्यतीति चेत् न प्रथमहेतौ सदुपकारणाभेदः साध्यते किं वाभिन्नत्वे विका
रणसमसत्ताकत्वं वा नाद्यः तव मते कार्यकारणयोरभेदाभ्युपगमेपत्तिर्ह्यतः मम तु कारणसत्तैव कार्ये
न त्वतिरिक्ता सत्तास्तीति सिद्धसाधनं न द्वितीयः रज्जुसर्पव्यभिचारात् द्वितीयहेतुरपि न कूटकार्षापण
दौ व्यभिचारात् इदं स्पष्टमुक्तं श्रीभागवते सत इदमुत्थितं सदिति चेन्ननु तर्कहतं व्यभिचरति क्व च कुतश्च
घान तथोभययुक् व्यवहृतये विकल्प इषितोऽन्धपरंपरया भ्रमयति भारती त उरुवृत्तिभिरुक्थजडान्
उत्थितं जनितं तर्कहतमिति यदि सदभेदः साध्यते तर्हि तदुपादानत्वानुपपत्तिः उपादानसमसत्ताकत्वसा
धने व्यभिचार इत्युक्तं व्यभिचरति क्व चेति क्व च मृषेति क्व च न मिथ्याभूतरज्जुसर्पादौ न तथोभययुगिति
यथा रज्जुतत्त्वाज्ञानसहितरज्जुजन्यत्वात् फणिनोऽनिर्वचनीयत्वं तथा ब्रह्माज्ञानसहितब्रह्मजन्यत्वा
त्प्रपंचस्य सदसद्विलक्षणत्वरूपमनिर्वचनीयत्वमित्यर्थः व्यवहृतये विकल्प इषित इति व्यवहारस्क

Indira Gandhi National Centre for the Arts

ध्याभूतादपि कूटकार्षापणादिष्टः ननु तथापि प्रपंचारोपो ब्रह्मणि न संभवति अन्यत्र ह्यप्रमितस्यान्य
त्रारोपो दृष्टः न हि प्रपंचोन्यत्र प्रमितोस्ति तथा च कथमारोप इति चेत् न पूर्वप्रतीतस्यारोपो लाघवान्न तु प्र
मितस्यान्यत्रेति गौरवात् तथा च पूर्वपूर्वभ्रमविषयस्यारोप इति नानुपपत्तिः तदिदमुक्तमंधपरंपरयेति
भ्रमयातीति वेदगौरती प्ररोचनार्थं कर्मजडान् मोहयतीत्यर्थः ननु स्वविधिविषयस्य सत्यत्वमाह एतेनाक्ष
य्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवतीत्यर्थवादस्य अपाम सोमममृता अभूमेति मंत्रस्य विश्वं सत्यं मघवा
ना युवोरिदिति च मंत्रस्य न जातु कामान्न भयान्न लोभाद्धर्मं त्यजेज्जीवितस्यापि हेतोः धर्मो नित्यः सुखदु
ःखे त्वनित्ये जीवो नित्यो हेतुरस्य त्वनित्य इति महाभारतीयवाक्यस्य च फलविश्वधर्मसत्यत्वप्रतिपादक
त्वेन विरोधात् न प्रपंचमिथ्यात्वसिद्धिरिति निरस्तं तेषां विधिनात्वेकवाक्यत्वात्तत्स्तुत्यर्थेन विधीनां स्युरिति पू
र्वमीमांसान्यायेनाक्षय्येत्यस्य विध्याकांक्षितफलसाधकत्वेनापामेत्यस्य सोमपानप्रकाशकत्वेन विश्वं सत्य
मित्यस्य ग्रहे विनियोगात् इंद्राब्रह्मणस्पत्योः स्तावकत्वेन धर्मो नित्येत्यस्य धर्मत्यागनिषेधशेषत्वेनोपयो १३१
गात् न तत्तत्सत्यत्वप्रतिपादनतात्पर्यकत्वं ज्ञानं यथा सत्यमसत्यमन्यदिति सत्यं ज्ञानमनंतं ब्रह्मेति नेह ना
नास्ति किंचनेति स्मृतिश्रुत्योः स्तु ब्रह्मभवनरूपफलसाधनाद्वैतब्रह्मज्ञानहेतुत्वेन विधिशेषत्वान्ना

वाद्ब्रह्मसत्यत्वप्रपंचमिथ्यात्वपरत्वमवसीयते अत एव छांदोग्ये वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव
सत्यमित्यत्र तदनन्यत्वमारंभणशब्दादिभ्य इति न्यायेनोपादानस्य सत्यत्वं विकारपदाभिधेयस्य कार्य
स्य मिथ्यात्वमुक्तं भाष्यकृता च व्याख्यातं यथा मृगतृष्णिकोदकादीनामूषरादिभ्योनन्यत्वमेवमस्य भो
क्तृभोग्यादिप्रपंचस्य ब्रह्मणोनन्यत्वं दृष्टनष्टस्वरूपत्वात् स्वरूपेणानुपाख्यात्वात् तैत्तिरीयेपि तत्सृष्ट्वा
तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभवत् निरुक्तं चानिरुक्तं च निलयनं चानिलयनं च विज्ञा
नं चाविज्ञानं च सत्यं चानृतं च सत्यमभवत् तत्सत्यमित्याचक्षत इति व्याख्यातं चेदं भाष्यकृद्भिः कः पुनरेतत्सर्व
मभवत् परमार्थसत्यं किं पुनस्तद्ब्रह्म सत्यं ज्ञानमनंतं ब्रह्मेति प्रकृतत्वात् यस्मात्सत्यदादिकं मूर्तामूर्तध
र्मजातं यत्किंचेदं सर्वं विकारजातं ब्रह्मैवाभवत् नामरूपप्रपंचस्य तद्व्यतिरेकेणाभावात् तस्मात्तद्ब्रह्म स
त्यमित्याचक्षते ब्रह्मविदः ननु सत्यमिति ब्रह्मणः सत्यतोक्ता न तु तदतिरिक्तस्य मिथ्यात्वमिति चेत् न कार्यका
रणभावस्य कल्पितो वेदवादिभिः वाचारंभणवाक्येन सत्यतैव परस्य हि कल्पितस्य ब्रह्मभूतस्वयंप्रभः
आत्माधिष्ठानमेव स्यात्केवलं नैव कारणमिति श्रुतितात्पर्यनिर्णायकमानवपुराणे प्रपंचस्य मिथ्यात्वा
भिधानात् अत एवानिर्वचनीयत्वरूपं मिथ्यात्वमुक्तं श्रीभागवते दृष्टं श्रुतं भूतं भवच्च विष्यत्स्थास्नुश्चरिष्णु

Indira Gandhi National Centre for the Arts

॥मो॰ द्व॰ १०॥ र्मदिदमल्पकं च विनाच्युताद्वास्तुतरं न वाच्यं स एव सत्यं परमार्थभूतः तथा इदं तत विश्वमिदं मनसो
विलासं दृष्टं विनष्टमतिलोलमलातचक्रं विज्ञानमेकमुरुधेव विभाति माया स्वप्नस्त्रिधा गुणविसर्गकृतो
॥१२७॥ विकल्पः मनस इति चित्तविलसितत्वात् दृश्यत्वात् विनाशित्वात् अतिचंचलत्वात् विभ्रमं मिथ्येति
निरीक्षेतेत्यन्वयः जन्यत्वविनाशित्वाभ्यामपि कल्पितत्वमुक्तं तत्रैव नयदिदमग्र आस न भविष्य
दतो निधनादनुमितमंतरा त्वयि विभाति मृषैकरसे अतत्प्रमीयते इक्षिणजातिविकल्पपथैर्वितथ
मनोविलासमृतमित्यवयंत्यबुधाः इदं दृश्यं अग्रे सृष्टेः पूर्वं न आस नासीदित्यर्थः नासदासीन्नो
सदासीदिति श्रुतेः निधनात् प्रलयात् अनु अनंतरं न भविष्यत न भविष्यतीत्यर्थः एकरसे आनंद
दमये त्वयि ब्रह्मणि अंतरा स्थितिसमये अतः कारणात् श्रुत्या इक्षिणजातिविकल्पपथैः इक्षिण
जातीनां मृत्तोहकार्याणां सरूपाणां विकल्पा भेदा घटकुंडलादयः तेषां पंथानः प्रकारा तैरुपमीयते स
दृष्टांतयोग्यते श्रुतिश्च यथा सौम्येकेन मृत्पिंडेन विज्ञातेन सर्वं मृन्मयं विज्ञातं भवति यथैकेन लोह १२८
मणिना सर्वं लोहमयं विज्ञातं स्यात् यथैकेन नखनिकृंतनेन सर्वं कार्ष्णायसं विज्ञातं स्यादिसादि वि
तथमनोविलासं मिथ्यारूपमनोविलासमात्रं प्रपंचं सत्यमवयंति अबुधाः अज्ञाः अतएव विष्णु

स्मृतौ तस्मात्सर्वमिवक्षरं त्यक्त्वाक्षरमेव ध्यायेत न च प्रभुरूपं विना किंचिदक्षरमस्ति तस्माच्च भुक्तो भ
वति तस्मादादावंते च यन्नास्ति वर्तमानेपि तत्तथेति न्यायेन यन्नासीन्न भविष्यति वर्तमध्येपि नास्ति
रज्जुसर्पवदिति तत्पर्यं भगवद्गीतायामपि अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत अव्यक्त
निधनान्येव तत्र का परिदेवना आदौ जन्मनः प्राक् अव्यक्तानि अनुपलब्धानि भूतानीत्युपलक्षणं
कार्यमात्रस्य व्यक्तमध्यानि मध्ये अंतरा उपलब्धानि अव्यक्तनिधनानि अंतेऽनुपलब्धानि तथा च
यथा स्वप्नेंद्रजालादौ प्रतिभासमानानामाद्यंतयोरनुपलब्धत्वान्मध्ये प्रतिभासमात्रत्वं असत्त्वाच्च
त्वं तथा प्रपंचस्यापीत्यर्थः नन्वाद्यंतयोरनुपलब्धत्वेन न मिथ्यात्वसिद्धिः सत्कार्यवादिभिर्नैयायि
कैः प्रतियोगिसमवायिदेशे प्रागभावप्रध्वंसयोरभ्युपगमादिति चेत् न असतः सत्त्वस्य सतश्चाभावा
स्यासंभवात् अन्यथा खपुष्पवृषणोरपि सत्वाभावयोः प्रसंगः तदुक्तं महाभारते अनित्यं सर्वमेवेदं
मर्त्यं च मम चास्ति यत् यत्किंचिन्मन्यसे स्तीति सर्वं नास्तीति विद्धि तत् यद्धि भूतं न भविष्यच्च सर्वं तन्न भ
विष्यति भूत्वा च न भवत्येतदभूत्वा च भवत्यपि तेन भूत्वाऽभावित्वरूपं विनाशित्वं अभूत्वा भावित्वरूपं
कार्यत्वं च निरस्तं अस्तीति प्रतीतिविषयस्य तदानीमेव नास्तित्वस्याकृतत्वात् गीतायामपि नासतो वि

...dhi National Centre for the Arts

॥मो॰वृ॰॥ यतेभावोनाभावोविद्यतेसतः उभयोरपिदृष्टोंतस्त्वनयोस्तत्वदर्शिभिः असतःपरिछिन्नस्यभावःसत्ता
नविद्यते परिछेदश्चकालतोदेशतस्वरूपतश्च पूर्वोत्तरकालेऽसत्वेसतिमध्येसत्वंकालतःपरिछिन्न
॥१३८ त्वंमूर्त्तत्वंदेशतःपरिछिन्नत्वंसजातीयविजातीयस्वगतभेदश्चवस्तुपरिछेदःइतित्रिविधपरिछेदव
तःप्रपंचस्यभावःसत्तापारमार्थिकत्वंनसंभवति दृश्यमात्रस्यकालेदेशेवस्तुनिचनिषेधात् सद्वस्तुनस्तु
कालेदेशेवस्तुनिवानिषेधःसंभवति सर्वत्रसत्तयानुगमात् तथाचानुगतेरज्जुखंडेऽननुगतसर्पमा
लादिकमिवानुगतेसद्वस्तुनिसर्वकार्यमननुगतत्वात्कल्पितमितिभावः ननुव्याहृत्तस्यकल्पितत्वेसद्व
स्तुनोपितुव्याहृत्तत्वेनकल्पिततत्वंस्यादित्यतउक्तंनाभावोविद्यतेसतइति सदधिकरणकभेदप्रतियो
गित्वंव्याहृत्तत्वंतच्चतुच्छस्यसत्तायोगात्सतिनसंभवतीतिनकल्पितत्वंयद्वासतोवर्त्तमानस्याभावोनाशोन
भवतीत्यर्थः तथाचप्रागभावध्वंसप्रतियोगिनोनसत्तास्तीतिभावः ननुसत्तानामसामान्यं तत्संबंधःप्रागभा
वप्रतियोगिनोघटादेःकारणव्यापाराद्भविष्यतिसतश्चाभावःकारणनाशाद्भविष्यतीत्यतउक्तंउभयोर ।१३८।
पीत्यादि उभयोः सदसतोः अंतःमर्यादा यत्सत्तत्सर्वदासदेव यदसत्तत्सर्वदासदेवेतिरूपादृष्टःनिश्चि
तःवस्तुनोद्वैरूप्यासंभवात इदमत्रावधेयं सत्वंद्रव्यगुणकर्ममात्रवृत्तिनसामान्यंपदार्थमात्रेसत्सदि

तिप्रतीतेः नचद्रव्यगुणकर्मसुसमवायेनसामान्यविशेषसमवायेष्वेकार्थसमवायेनसदितिप्रती-
तिरितिवाच्यं एकरूपप्रतीतेरेकरूपविषयनिर्वाह्यत्वेनसंबंधभेदेनतस्याःकल्पयितुमनुचितत्वात् अ
न्यथाकुसुमस्फटिकयोरक्तत्वप्रतीतेस्तौल्यप्रमाप्रमत्वयोरनुपपत्तिप्रसंगात विषयस्याननुगमेपिप्र
तीत्यनुगमेजातिमात्रोच्छेदप्रसंगात तस्मादेकमेवसद्वस्तुस्वतादात्म्याध्यासेनसर्वत्रसदाकारोपपादकमिति
नविषयभेदकल्पनं किंचसद्घटयोःसंबंधोध्यासरूपएवनतुसमवायः सन्घटइत्यभेदप्रतीतेः सम
वायेनप्रतीतौतुद्रव्येघटेरूपमितिवद्घटेसत्वमित्येवस्यात्नतुसन्घटइति चित्तद्योश्चाभेदासंभवादा
ध्यासिकसंबंधःतदुक्तंवार्त्तिककृद्भिःनिःसंगस्यससंगेनकूटस्थस्यविकारिणा आत्मनोनात्मनायो
गोवास्तवोनोपपद्यतेसत्तातोपिनभेदस्यात्द्रव्यत्वादेःकुतोन्यतःएकाकारात्हिसंविज्ञिसद्द्रव्यंसन्गुणस्तु
थातस्मात्यथाकस्मिश्चित्देशेकालेकपटस्यदेशांतरकालांतरेवानघटत्वंसुसंपादंपादार्थस्वभावभंग
प्रसंगात्तथासतोऽसत्वंअसतोवासत्वंनसंपादयितुंशक्यं नचरक्तश्यामत्वयोरिवसदसत्वयोरपिघटेवृत्ति
त्वंकालभेदेनेतिवाच्यं सत्वसंबंधात्पूर्वमपिधर्मिविद्यमानत्वाभ्युपगमेसत्कार्यवादप्रवेशेतवसिद्धांतहा
निःतथाचपूर्वोत्तरकालयोरसतःप्रपंचस्यमध्येसत्वानुपपत्तेर्मिथ्यात्वमेवपर्यवस्यतीतिरहस्यं वृत्तज्ञत्वा-

Indira Gandhi National
Centre for the Arts

॥मोक्षप्र०॥ प्रपंचस्य मिथ्यात्वं तदुक्तं मानवपुराणे दृश्यरूपं जगत्सर्वं कल्पितं शुक्तिरूप्यवत् कल्पितं सकलं
विप्रा अधिष्ठानादृतेन हि अधिष्ठानातिरेकेण केवलं व्यवहारतः द्विजाः कल्पितसद्भावं शुक्तिरूप्यं यथात
१४० था नेति नेतीति वेदांताः कल्पितं प्रतिषेधति सर्वाधिष्ठानमद्वैतं परं ब्रह्म सनातनं स एवात्मवतामात्मा सा
क्षी सर्वस्य सर्वदा साक्षाद्भावे जगत्साक्ष्यं कथं भाति स्वतो जडं व्यवहारे जगत्साक्ष्यं साक्षिभानेन भासते व
स्तुगत्या जगन्नास्ति ततो भानं च तस्य न अतः प्रतीतं ब्रह्मैव वस्तुगत्या न चेतरत् साक्ष्यं प्रकाश्यं व्यव
हार इति भास्यभासकभावस्य व्यावहारिकत्वात् वस्तुगत्या ब्रह्मैव सत्यं न प्रपंच इत्यर्थः श्रीभागवते
पि बुद्धींद्रियार्थरूपेण ज्ञानं भाति तदाश्रयं दृश्यत्वाव्यतिरेकाभ्यामाद्यंतवदवस्तु यत् दीपश्चक्षुश्च
रूपं च ज्योतिषो न पृथग्भवेत् एवं धीः खानि मात्राश्च न स्युरन्यतमादृतात् यथा जलधरा व्योम्नि भवंति
न भवंति च ब्रह्मणीदं तथा विश्वमवयव्युदपाश्रयात् सत्यं ह्यवयवः प्रोक्तः सर्वावयविनामिह विनार्थेन
प्रतीयेरन् पटस्येवांग तंतवः ज्ञानं प्रब्रह्म तदेव बुध्यादिरूपेण भाति न पृथक् तत्र हेतुर्दृश्यत्वाव्यति १४०
रेकाभ्यामिति अव्यतिरेकमुपपादितो दीपश्चेत्यादिना उपादानसत्यत्वमुक्तं सत्यमित्यनेन ननु कार्य
स्य मिथ्यात्वे ब्रह्मणः कारणत्वमेव दुर्लभमिति चेत् सत्यं कार्यत्वनिरूपितं कारणत्वमपि ब्रह्मणि कल्पि

तमेव तदुक्तं तत्रैव यत्सामान्यविशेषाभ्यामुपलभ्येत स भ्रमः अन्योन्यापाश्रयात्सर्वमाद्यंतवदवस्तु
यत् सामान्यं कारणं विशेषः कार्यं तत्र कार्यत्वकारणत्वादिभ्रमः अन्योन्यापाश्रयात् परस्परनिरूपणा
धीननिरूपणत्वात् तथा च कारणत्वमवधित्वं व्यापकत्वं च यदाद्यंतवत्तत्सर्वमवस्त्वित्यर्थः ननु प्रत्यक्षेण
प्रपंचस्य सत्यत्वावगमे मिथ्यात्वबोधकानां वचनानां यजमानः प्रस्तर इतिवदुपचरितार्थत्वं युक्तमिति चेत्
न न तावत् घट इति प्रत्यक्षं घटत्वप्रकारकघटविशेष्यकं विषयस्य सत्यत्वमवगमयति घटः सत्य इति प्र
त्यक्षं तु इदं रजतमित्यधिष्ठाननिष्ठेदंत्ववदधिष्ठानसत्यत्वमेव गृह्णाति न तु घटसत्यत्वं लाघवेन ब्रह्मरू
पसत्त्वस्यैव सर्वत्रानुगतत्वेन प्रतीयमानत्वात् अस्तु वा प्रत्यक्षादेः सत्यत्वविषयत्वं तथापि तद्व्यावहा
रिकमेव न तु पारमार्थिकं तदुक्तं मानवपुराणे प्रमेयं सत्यमेवेति वदंति नु विकिंचन अयुक्तमेव ते रुक्तं सत्यं
ब्रह्मैकमेव हि व्यावहारिकरूपस्य प्रमेयस्याखिलस्य तु व्यावहारिकमेवोक्तं सत्यत्वं केवलं बुधाः व्याव
हारिकसत्यत्वमौपचारिकमेव हि यथा योदहतीत्येतन्मुनींद्रा औपचारिकं ननु तथापि प्रपंचः सत्यो भा
समानत्वात् ब्रह्मवदित्यनुमानेन सत्यतास्त्विति चेत् अबाध्यत्वोपाधिना व्यभिचारोन्नयनात् तदुक्तं श्री
भागवते विकारः ख्यायमानोपि प्रत्यगात्मानमंतरा न निरूप्योस्त्यणुरपि स्याच्चेच्चित्सम आत्मवत् ख्या

Indira Gandhi National Centre for the Arts

यथानीलाससमानः ननिरूप्यः सदसत्वाभ्यामनिर्वचनीयः सत्वेनविर्वचनीयश्चेत्स्यात्तर्हिचित्समत्व
बाध्यः स्यात् विष्णुपुराणेपि वस्तुराजेतियल्लोकेयत्तुराजभटात्मकं तथान्यच्चनृपेत्थंतन्नसत्संक
ल्पनामयं बं ॥इति ------------ प्रपंचमिथ्यात्वनिरूपणं श्रीः हरिर्विजयतेअथ
मोक्षोपायः तत्रपरममुक्तौज्ञानस्यैवसाधनत्वं तमेवविदित्वातिमृत्युमेतिनान्यः पंथाविद्यतेअयना
येतिश्रुतेः भारते विद्ययायदवाप्नोतियत्रगत्वानशोचते यत्रगत्वानम्रियतेयत्रगत्वानजायतेन
जीर्यतियत्रगत्वायत्रगत्वानवर्द्धतइतिमार्कंडेयपुराणेपुत्रउवाच एवंसंसारचक्रेस्मिन्भ्रमतातात
संकटे ज्ञानमेतन्मयाप्राप्तंमोक्षसंप्राप्तिकारणं ज्ञायतेत्रसर्वोयंमृग्यजुःसामसंज्ञित अभ्यजुःसामवो
धितःपरात्मानतुकर्मणैवहिसंसिद्धिमास्थिताजनकादयःश्राद्धकृत्सत्यवादीचगृहस्थोपिविमुच्यते
अपामसोमअमृताअभूमेत्यादिवाक्यैःकर्मणोपिमोक्षजनकत्वश्रुतेः कथंज्ञानस्यैवतत्साधनतोच्यत
इतिचेत्तनपरीक्ष्यलोकान्कर्मचितान्कर्मजितोलोकःक्षीयतेइत्यादिवाक्यैःकर्मणःक्षयिफलजनक १४२
तायाएवावगतत्वात्मोक्षजनकतासिद्धेःमहाभारतेमोक्षधर्मेषुशुकउवाचवाक्यादिशंविद्ययायांतिका
चंगच्छंतिकर्मणा एतद्वैश्रोतुमिच्छामितद्भवान्प्रब्रवीतुमे तद्येतेन्योन्यवैरूप्येवर्तेतेप्रतिकलतःइत्यु

क्तःप्रत्युवाचेदंपराशरसुतःसुतं कर्मविद्यामयावेतौव्याख्यास्यामिसुदस्तरौ यांदिशंविद्ययायांतिय
यांचगच्छंतिकर्मणा शृणुष्वैकमनाःपुत्रसुंदरंह्येतदंतरं कर्मणाबध्यतेजंतुः विद्ययातुविमुच्यते तस्मात्
कर्मनकुर्वंतियतयःपारदर्शिनः कर्मणाजायतेप्रेत्यमूर्तिमान्षोडशात्मकः विद्ययाजायतेनित्येनिम
व्यक्तोव्ययात्मकः कर्मत्वेकेप्रशंसंतिस्वल्पबुद्धितरानराः तिनतेदेहजालानिसंसेवंतउपासते येनु
बुद्धिंपरांप्राप्ताधर्मनिपुणदर्शिनः नतेकर्मप्रशंसंतिकूपंनंद्यांपिबन्निवकर्मणःफलमाप्नोतिसुखदुः
खेनवानवौइति ननुविप्रतिषिद्धमेतत्कर्मणोमोचकत्वंबंधकत्वंचेत्पुनश्चसाधकप्रमाणानांवकागतिरि
तिचेत्शृणुकर्माणिखलुद्विविधानिप्रवृत्तानिनिवृत्तानिचतत्रनिवृत्तानांवेतःशोधकतयाज्ञानहेतु
त्वात्मोचकत्वंतदन्येषांचबंधकत्वमितिव्यवस्थयाविरोधाभावात्तथाचाहभगवान्यज्ञार्थात्कर्म
णोन्यत्रलोकोयंकर्मबंधनः तदर्थंकर्मकौंतेयमुक्तसंगःसमाचर यज्ञोविष्णुतदर्थात्तत्स्वीतयेकिंयमा
णात्अन्यकर्मतीबध्यतेनतुकर्ममात्रेणेत्यर्थःअतएवमनुः सुखाभ्युदयिकंचैववैःश्रेयसिकमेवच प्रवृ
त्तंचनिवृत्तंचद्विविधंकर्मवैदिकं इहचामुत्रकाम्यंप्रवृत्तंकर्मकीर्त्यते निःकामंज्ञानपूर्वंतुनिवृत्तमुपदि
श्यते प्रवृत्तंकर्मसंसेव्यदेवानामेतिसाम्यतांनिवृत्तंसेवमानस्तुभूतान्यत्येतिपंचवै सर्वभूतेषुचात्मानंस

Indira Gandhi National Centre for the Arts

॥मोक्षप्र०॥ र्वभूतानि चात्मनि समं पश्यन्नात्मयाजी स्वाराज्यमधिगच्छति यथोक्तान्यपि कर्माणि परिहाय द्विजो
त्तमः आत्मज्ञाने शमे च स्याद्वेदाभ्यासे च यत्नवान् एतद्धि जन्मसामग्र्यं ब्राह्मणस्य विशेषतः प्राप्यैतं
१४२ कृतकृत्यो हि द्विजो भवति नान्यथास्फ स्वाभ्युदयिकं स्फ स्वस्याभ्युदयः उत्पत्तिः तद्धाप्तुणं फलमस्या
स्तीति मत्वर्थीयष्ठन् नैश्रेयसिकं निःश्रेयसं मोक्षः प्रयोजनं यस्य कर्मणस्तत्तथा प्रवृत्तं निवृत्तं कर्मणीय
था क्रमं संसारप्रवृत्तिनिवृत्तिहेतुभूते उच्येते सात्मता समानशक्तित्वं भूतानि लिंगशरीरस्थूलशरीर
द्वयोपादानानि अत्येति अतिक्रामति भूतसंघातात्तचात्मानं वैलक्षण्येन जानातीत्यर्थः तं ज्ञानप्रकारमे
वाह सर्वभूतेष्विति निवृत्तकर्मणः चेतः शुद्धौ ज्ञानमुत्पद्यत इत्यर्थः स्वाराज्यमिति स्वयमेव राजते प्र
काशत इति स्वराट् ब्रह्म तस्य भावः स्वाराज्यं ब्रह्मभावं प्राप्नोतीत्यर्थः ज्ञानोत्पत्तिर्निवृत्तकर्मानुष्ठानमात्रेण न
भवति साधनांतरानुष्ठानमपि कर्त्तव्यमित्याह यथोक्तानीति प्रवृत्तानि कर्माणि विहाय आत्मने आत्मज्ञाने
उत्पादनीये अथवा आत्मज्ञानसाधना श्रवणमननादिविषये शमे च शमोपलक्षितशांतिदांत्यादौ वेदा १४२
भ्यासे उपनिषदभ्यासे च तत्परो भवेत् केचित्कृणतानि नित्यनैमित्तिकानि विहाय संन्यस्य शांतो दांत उपरत
स्तितिक्षुः समाहितो भूत्वा आत्मन्येवात्मानं पश्येत् इति तथा न कर्मणा न प्रजया धनेन — त्यागेनैकेनामृत

त्वमानशुः शमे शमोपरतितितिक्षासु वेदाभ्यासे उपक्रमादिनोपनिषदर्थनिर्णयश्रवणपर्यायविचारे
आत्मा वा रे द्रष्टव्यः श्रोतव्यो मंतव्य इति श्रुतेरिसाङ्क: ननु मुमुक्षूणां केवलज्ञानमात्रमेव संपादनीया
मित्यस्क ज्ञानार्थं तस्य नित्यनैमित्तिककर्मपरित्यागस्योचितत्वात् मुमुक्षायांस — वैधमवैधं वा कर्मप
रित्यागमालंव्य श्रवणादेरेव कर्त्तुमुचितत्वात् सति ज्ञाने नित्याकरणादिनिबंधनप्रत्यवायस्यापि ज्ञा
नेनैव नाशोपपत्तिः वैधपरित्यागे प्रत्यवायस्यैवाभावात् तथा च क्रुतनिवृत्तकर्मण उपदेश उपयु
ज्यते इति चेत् नैवं निवृत्तकर्माकरणे चेतःशुद्धेरवाभावेन ज्ञानस्वरूपलाभस्यैवाभावात् निवृत्तनित्य
कर्मादिकृतवत एव संन्यासानंतरमपि श्रवणादिना ज्ञानोत्पादात् अकृतनिवृत्तकर्मणः संन्यासमत्य
पि कर्मजन्यचेतःशुद्धेर — तज्ज्ञानोत्पत्तिरेव नास्ति तथा च निवृत्तं कर्म मुमुक्षोरावश्यकमेव अत एके चिज्ज्ञा
नकर्मसमुच्चय एव स्वीकार्यः केवलकर्मणो मोक्षाहेतुत्वेऽपि ज्ञानसहकृतस्य तस्य मोक्षहेतुत्वोपपत्तेः
अ — एव योगियोगियाज्ञवल्क्यः परिज्ञानाद्भवेन्मुक्तिरेतदालस्यलक्षणं कायक्लेशात्मयाच्चैवक
र्मनेच्छंत्यपंडिताः ज्ञानकर्मसमायोगात्परमाप्नोति पूरुषं इष्टप्रयगभावेन सिद्ध्येत उभे त स्मात्समाश्रयेत
उभे ज्ञानकर्मणी अत एव च मोक्षधर्मेषु मोक्षो हि त्रिविधा निष्ठा दृष्टा पूर्वैर्महर्षिभिः ज्ञाननिष्ठां वदंत्येके

National Centre for the Arts

मोक्षशास्त्रविदो जनाः कर्मनिष्ठावदंत्यन्येयतयः सूक्ष्मदर्शिनः प्रहायोन्नयमथैतज्ज्ञानं कर्म च केवलं
तृतीयेयं समाख्याता निष्ठा तेन महात्मनेति निर्ष्ठा स्थितिं तदेकप्रवणतार्थत्येवमितियावत यत यइ
त्यनेन कर्मत्यागिभिरपि कर्मनिष्ठा समीचीनेत्याद्यिघते तदाकिंमुसर्वैरादरणीयेति नूवयतितथायो
गियाज्ञवल्क्यः ज्ञानंप्रधानं न तु कर्म हीनं कर्मप्रधानेन तु बुद्धिहीनं तस्माद्द्वयोरेव जन्नेन्तु सिद्धिर्न ह्येक
पक्षो विहगः प्रयाति अयमत्राभिप्रायः कर्मणां चेतः शोधकता श्रवणादिभ्यः पूर्वं कृतानां तद्वत्तरा णत
ज्ञानपरिपाककरत्वं परिपाकावस्थायां कृतानां तु ज्ञानवत् मोक्षहेतुत्वं एवं च समुच्चयेन ज्ञानकर्मक
णो र्हेतुता बोधकवाक्यानां परंपरा साधनताबाधकवाक्यानां च सामंजस्यं एवं च ज्ञानकर्मसमुच्चय
एवोचित इति अत एव भगवद्गीतायामपि ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन तत्किं कर्मणि घो
रे मां नियोजयसि केशव व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे तदेकं वद निश्चित्य येन श्रेयोहमाप्नुयां श्री
भगवानुवाच लोकेस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयानघ ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनां ॥२४३॥
न कर्मणामनारंभान्नैष्कर्म्यं पुरुषोश्नुते न च संन्यसनादेव सिद्धिं समधिगच्छति न हि कश्चित्क्षणमपि जातु
तिष्ठत्यकर्मकृत् कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः कर्मेंद्रियाणि संयम्य य आस्ते मनसा स्मर

न्इंद्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते यस्त्विंद्रियाणि मनसा नियम्यारभतेर्जुन कर्मेंद्रियैः क
र्मयोगमसक्तः स विशिष्यते नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः शरीरयात्रापि च ते न प्रसिद्ध्येदक
र्मणः इति तथा च ज्ञानस्यैव स्वातंत्र्येण हेतुत्वेत्यसुमितिवदंति तन्न युक्तिसहं नास्याकृतः कृतेनेति श्रुति
विरोधात् न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुरित्यन्त्र कर्मणो मोक्षसाधनस्य स्पष्टमाम्नानात् ज्ञा
नादेव तु कैवल्यमित्यत्रैवकारेण ज्ञानेतराजन्यत्वे सति ज्ञानजन्यता या मोक्षे प्रतिपादना तन्न हेतुताया
वक्तुमशक्यत्वात् एवं च ज्ञानकर्मणोर्हेतुताबोधकयोगियाज्ञवल्क्यवाक्यस्याप्ययमर्थः चेतःशोधकक
र्मकरणे श्रवणादिसाध्यज्ञानात् न मुक्तिः न वा केवलकर्मणा किंतु पूर्ववतः शोधनायकृतेन शुद्धि
द्वारा कर्मणा साक्षाच्च ज्ञानेन चेत्तु न स्यादपक्वता न त्वेकेन मोक्षसिद्धिः एतेन मोक्षधर्मोपि व्याख्यातः ज्ञा
नं प्रधानमित्यस्याप्ययमर्थः ज्ञानं परोक्षं तत्कर्महीनं तज्जन्यं चेतःशुद्धिहीनं नापरोक्षज्ञानरूपफलाय
लं भवति कर्मापि स्वफलरूपचेतःशोधनकरणे बुद्धिः भगवत्प्रीतये कर्माणि करोमि स एव कारयि
ता स एव सकलकर्मफलात्मकज्ञातिपो धरस्त बुद्धीनि क्षेमं उभयं सह सिद्धिरूपाज्ञानवान्मोक्षे वा साक्षात्प
रंपरयाहेतुरितिष्ट हस्यातिरपि सात्पं यज्ञस्तपोदानमेतद्धर्मस्य लक्षणं धर्मात्सुखं च ज्ञानं च ज्ञानान्मोक्षो

Indira Gandhi National Centre for the Arts

॥गी॰टी॰प॰७०॥ धिगंम्पतइतिगीताधाश्लोकानामप्यत्रैवतात्पर्यंअतरावभगवानेवाहआरुरुक्षोर्मुनेर्योगंकर्मकार
णमुच्यतेयोगारूढ:स्यतस्यैवशम:कारणकारणमुच्यतइतितथाचोत्तरत्रस्थितिस्थ:पूर्वापरानुरोधा
॥१४४॥ त्तवगीताव्याख्येयातथाहिएकमेवाधिकारिणं श्रतिचित्तशुद्ध्यशुद्धिभेदेनावस्थाभेदमाश्रित्यज्ञानक
र्मोपदेशोननुतत्तुंमु— य:तथाचवक्ष्यतिएकंसांख्यंचयोगंचय:पश्यतिसपश्यतीतिनाभवानिष्टंहिविध्ये
नदर्शयितिसंख्यासम्यगात्मबुद्धिस्तांप्राप्तवतांजन्मांतरकृतवेत:शुद्धिमतांब्राह्मणयदिवकृतसंन्या
सानावेदान्तविज्ञानसुनिश्चितार्थानांज्ञाननूमिसमारूढानांज्ञानयोगेनांज्ञानमेवयुज्यतेब्राह्मण
अनेनतानिसर्वाणिसंन्यस्यमुमुक्षुआसीतमत्परइत्यादिनाज्ञानोपहितविषयातरविषयचित्तवृत्तिनि
रोधेनभावदेकप्रवणचित्तवृत्तिलक्षणयोगेनअशुद्धात:करणानंतुज्ञाननूमिमनारूढानांयोगि—
नांकर्माधिकारश्चयोगिनांकर्मयोगेनकर्मैवयुज्यतेत:करणशुद्ध्यानेनेतिव्युत्पत्त्यायोगंकर्मलक्षणस्ते
ननिष्ठाउक्ताअंत:करणशुद्धेहाराजै ज्ञानंनूमिकारोहणार्थंधर्म्यात्युद्धाद्धिश्रेयोन्यत्क्षत्रियस्यनवि ।१४४।
घतइत्यादिनाअतएवनज्ञानकर्मणो:समुच्चयोविकल्पोवाकिंतुनिष्कामकर्मणाशुद्धात:करणानां
सर्वकर्मसंन्यासेनैवज्ञानमितिचित्तशुद्ध्यशुद्धिरूपावस्थाभेदेनेकमेवाधिकारिणंप्रतिद्विविधानिष्ठो

क्ताएतदेवदेदर्शयितुंअशुद्धचित्तस्यचित्तशुद्धिपर्यंतंकर्मानुष्ठानंनकर्मणामनारंभादित्यादिभिर्मोघं
पार्थसजीवतीत्यंतैस्त्रयोदशभिर्दर्शयति कर्मणांतमेतंवेदानुवचनेनब्राह्मणाविविदिषंतियज्ञेनदा
नेनतपसानाशकेनेतिश्रुत्याआत्मज्ञानेविनियुक्तानामनारंभादननुष्ठानाच्चित्तशुद्ध्यभावेनज्ञाना‍यो
ग्योबहिर्मुख:पुरुषोनैष्कर्म्यंसर्वकर्मशून्यत्वंज्ञानयोगेननिष्ठामितियावतनाश्नुतेनप्राप्नोतीत्यर्थ:न
न्वेतमेवप्रव्राजिनोलोकमिच्छंत:प्रव्रजंतीतिश्रुतेसर्वकर्मसंन्यासादेवज्ञाननिष्ठोपपत्ते:कृतंकर्मभि
रित्यतोनचसंन्यसनादेवतिसंन्यसनादेवकमेजन्यचित्तशुद्धिंविनाक्रियमा—मयुक्तणतस्सिद्धिंज्ञाना—
निष्ठालक्षणांसम्यक्फलपर्यवसायित्वेनाधिगच्छतिनैवप्राप्नोतीत्यर्थ:कर्मजन्यवेत:शुद्ध्यभावेनचि
रस्याखिवैराग्याभावात्संन्यासएवनसंभवतिकदाचित् औत्सु—क्यमात्रेणस्वल्पवैराग्येसतिकृतो
पिसंन्यासोनफलपर्यवसायीतिभाव:कल्पतरुस्तु नकर्मणामनारंभान्नै:कर्म्यमिसादिनानैष्कर्म्यं
गुणपारहितंत्वंमोक्षमित्यर्थइतिव्याचख्यौतद्भाष्यविरोधादुपेक्ष्यंसर्व:प्राणीचित्तशुद्धिरहित:अस्वतं
त्रएवसनप्रकृतिजै:प्रकृतितोजातैरभिव्यक्तै:कार्याकारेणसत्वरजस्तमोभि:स्वभावप्रभवैर्वराग
द्वेषादिभिर्गुणै:कर्मलौकिकंवैदिकंवाकार्यते कर्मजनितवेत:शुद्धिविरहिणऔत्सुक्यमात्रेणय:

Indira Gandhi National
Centre for the Arts

॥गीद्व१०॥ संन्यसति सम्मिथ्याचार इत्यभिप्रेत्याह कर्मेंद्रियाणीति इंद्रियाणि मनसा संनियम्य पापहेतुशब्दा
दिविषयासक्तेर्निवर्त्य मनसा विवेकयुक्तेन नियम्येति वा कर्मेंद्रियैर्वाक्पाण्यादिभिः कर्मयोगं शुद्धिहे
१५५ तुतया विहितं कर्म आरभते करोत्यसक्तः फलाभिलाषशून्यः सन् यो विवेकी स विशिष्यत इत्यर्थः कर्म
णा बध्यते जंतुर्विद्यया तु विमुच्यत इति स्मृतेः सर्वमपि कर्म त्याज्यमिति मत्वा तं प्रत्युत्तरं यज्ञार्थादिति य
ज्ञो विष्णुः यज्ञो वै विष्णुरिति श्रुतेः तदाराधनार्थं यत् क्रियते कर्म तत् यज्ञार्थं तस्मात् कर्मणोन्यत्र कर्म
णि प्रवृत्तो यो लोकः कर्माधिकारी स कर्मणा बध्यत इत्यर्थः मुक्तसंगः फलाभिलाषरहितः एवं चो
दाहृतश्लोकानां चेतःशोधनार्थं कर्माणि कार्याणीत्यत्र तात्पर्यं न तु ज्ञानेन समुच्चयः अन्यान्यपि
गीतावचनानि कर्मयोगस्यावश्यकताबोधकानि तानि सर्वाणि चेतःशोधनार्थमेव तद्बोधयंति न
तु मोक्षार्थमिति ज्ञानहेतुप्रकरणे स्फुटीकरिष्यते किं च कर्मणो ज्ञानेन सह न समुच्चयस्तेजस्तिमिर
योरिव विरोधेन युगपदसंभवात् कर्माधिकारहेतुभेदबुध्यपनोदकत्वेन ज्ञानस्य तद्विरोधित्वात् ना १५५
पि विकल्पः एककार्यत्वाभावात् ज्ञानकार्यस्याज्ञाननाशस्य कर्मणा कर्तुमशक्यत्वात् तमेव विदि
त्वेति श्रुतेः बाधकं विना लक्षणकस्वीकारायोगात् सति च ज्ञाने कर्मनापेक्ष्य तएव तत्कार्यस्याज्ञा

नतएव सिद्धेः अतएवोक्तं यावानर्थ उदपाने सर्वतः संप्लुतोदके तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजा
नत इति तथा आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते योगारूढस्य तस्यैव शमः कारणमुच्यते यो
गमंत्र: करणशुद्धिरूपं वैराग्यमारुरुक्षोः नन्वारूढस्य कारणं उक्तं योगारोहणे योगारूढस्यां
तः करणशुद्ध्या प्राप्तवैराग्यस्य शमः सर्वकर्मसंन्यास एवोच्यते कारणमनुष्ठेयतया अतएव परमार्थद
र्शी यः स कर्माणि नित्यनैमित्तिकमकुर्वन्नपि न प्रत्यवयति अधिकाराभावात् उक्तं च भगवता यस्त्वात्मरतिरे
व स्यादात्मतृप्तश्च मानवः आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन
न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः रतितृप्तितुष्टयो मनोवृत्तिविशेषाः साक्षिसिद्धाः परमानंदमद्वयं
साक्षात्कुर्वन्नुपचारादेवमुच्यते आत्मरतिरात्मतृप्त आत्मसंतुष्ट इति तथा च श्रुतिः आत्मक्रीड आत्मरतिः क्रि
यावानेष ब्रह्मविदां वरिष्ठ इति तस्यात्मरतेः कर्मणोभ्युदयार्थिभिः श्रेयसार्थं प्रत्यवायपरिहारार्थं
वा अनुष्ठानासंभवमर्हतीनैवेति तस्यात्मरतेः कृतेन कर्मणाभ्युदयलक्षणोर्थः प्रयोजनं नैव निःश्रेयस
स्य च कर्मासाध्यत्वात् तथा च श्रुतिः परीक्ष्य लोकानित्यादि अकृतेन कर्माकरणेन इह लोके गर्हितत्वरू
पः प्रत्यवायप्राप्तिरूपो वा कश्चनार्थो नास्ति अर्थव्यपाश्रयः प्रयोजनसंबंधः नैनं कृताकृते तपत इति

Indira Gandhi National Centre for the Arts

॥मो॰ष॰१०॥ श्रुतेः तस्य ह न देवाश्च नाभूत्या ईशत आत्मा ह्येषां स भवतीति श्रुतेर्देवा अपि तस्य मोक्षाभावाय न समर्था इ
१४६ त्युक्ते न विद्यातावार्थमपि देवाराधनरूपकर्मानुष्ठानं तैः कार्यं अथ सत्वशुद्धौ सत्यामपि कर्मानुष्ठाने
ह्यप्रत एव श्रूयते च तथाविधाः पुण्यश्लोकाः मुमुक्षवो जाता तन्नामतीर्थत्वप्रमुखास्तथा च सत्वशुद्ध्युत्तरं कृत
कर्मणां मोक्षप्राप्तौ प्रयोगान्यथा च शुद्धात्मकरणानां मध्ये अर्जुनादीनां कर्मकरणविधायकस्य तस्माद सक्तः
सततं कार्यं कर्म करोति यः असक्तो ह्याचरन् कर्म परमाप्नोति तं पूर्ववद्युक्त्यादि भगवद्वाक्यस्य विरोध इति
चेत् न क्षत्रियादीनां संन्यासेऽधिकाराभावेन तैः कर्मण एवानुष्ठानात् संन्यासविधेश्च ब्राह्मणपरत्वेन विरो
धाभावात् तथा चोक्तं भगवता कर्मणैव हि संसिद्धिमास्थिता जनकादयः लोकसंग्रहमेवापि सम्पश्यन्
कर्तुमर्हसीति जनकाजातशत्रुप्रभृतयः क्षत्रिया विद्वांसोऽपि कर्मणैव न तु कर्मत्यागलक्षणसंन्यासे
न संसिद्धिं श्रवणादि साध्यां ज्ञाननिष्ठामास्थिताः ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणा
याश्च व्युत्थायाथ भिक्षाचर्यं चरन्तीति श्रुतौ संन्यासविधायां ब्राह्मणपदस्य विवक्षितार्थस्य सत्वात् यथेद १४६
मेव युक्तं तथोपपादितमधस्तादस्माभिः तस्माज्ज्ञानिनः कर्मानधिकारात् ज्ञानपर्यंतमेव कर्म कार्यं अन
न्तरं च कर्मकरणेऽपि न प्रत्यवायस्तत्करणेऽपि न तस्य ज्ञानसाध्यमोक्षहेतुता किन्तु लोकसंग्रहार्थमेव तदु

क्तं भगवता यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते न मे पार्थास्ति क
र्तव्यं त्रिषु लोकेषु किंचन नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि यदि ह्यहं न वर्तेयं जातु कर्मण्य
तंद्रितः मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहं संकरस्य च
कर्ता स्यामुपहन्यामिमाः प्रजाः सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत कुर्याद्विद्वांस्तथासक्तश्चि
कीर्षुर्लोकसंग्रहं न बुद्धिभेदं जनयेदज्ञानां कर्मसंगिनां जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन्
इति तथा मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः अध्यात्म
चेतसा अहं वेद सर्वकार्यकारणजातमित्यनेदहं प्यातथात्मा कर्मफलासंगं नित्यतृप्तो निराश्रयः कर्मण्य
भिप्रवृत्तोऽपि नैव किंचित्करोति सः निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः शारीरं केवलं कर्म कुर्वन्ना
प्नोति किल्बिषं यदृच्छालाभसंतुष्टो द्वंद्वातीतो विमत्सरः समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते गतसंग
स्य मुक्तस्य ज्ञानावस्थितचेतसः यज्ञायाचरतः कर्म समग्रं प्रविलीयते ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्र
ह्मणा हुतं ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना निराशीर्निर्गतफलासंगः यतचित्तात्मा संयतमानो
देहो यस्य तथोक्तः सक्तसर्वपरिग्रहः त्यक्तसर्वभोगोपकरणः एतादृशोऽपि प्रारब्धकर्मवशात् शा-
Indira Gandhi National Centre for the Arts

।मोक्ष१०॥ रीरं शारीरस्थितिमात्रप्रयोजनं कौपीनाच्छादनादिशास्त्राभ्यनुज्ञातं कर्म कायिकवाचिकमानसं च तदपि के
वलं कर्तृत्वाभिमानशून्यं पराध्यारोपितकर्तृत्वेन कुर्वन् परमार्थतोऽकर्त्रात्मदर्शी नाप्नोति किल्बिषं धर्माध
॥२४१॥ र्मफलभूतमनिष्टं संसारं पापवत् पुण्यस्याप्यनिष्टफलत्वेन किल्बिषत्वात् यत्तु शारीरं शरीरनिर्वर्त्यमिति क
ल्पितरूपं व्याख्यानं तस्मिन् केवलं कर्म कुर्वन्नित्यतोऽधिकार्थालाभात् व्यावर्त्यकल्पनेन शरीरपदस्य वैयर्थ्यं अ
थ वाचिकमानसिकव्यावर्त्तनार्थमिति ब्रूयात् तदा कर्मपदस्य विहितं कर्म कुर्वन् प्राप्नोति किल्बिषमित्यप्र
सक्तप्रतिषेधोऽनर्थकः वाचिकं मानसं च विहितं कर्म कुर्वन्नाप्नोति किल्बिषमिति शास्त्रविरुद्धमुक्तं स्यात् वि
हितं प्रतिषिद्धसाधारणपरत्वेऽप्येवमेव व्याघात इति भाष्य एव विस्तरः त्यक्तसर्वपरिग्रहस्य शारीरस्थितिमा
त्रप्रयोजनं कर्माभ्यनुज्ञातं तत्राल्ला— दनादिसंपादने प्रकारमाह यदृच्छेति द्वंद्वानि क्षुत्पिपासाशीतोष्ण
वर्षादीनि अतीतोऽतिक्रान्तः समाधिदशायां तेषामस्फुरणात् व्युत्थानदशायां स्फुरणेऽपि परमानन्दाद्वितीया
कर्त्रात्मप्रत्ययेन बाधात् तैर्द्वंद्वैरुपहन्यमानोऽप्यक्षुभितचित्तः अत एव परस्य लाभे स्वस्यालाभे च १४१
विमत्सरः परोत्कर्षासहनपूर्विका स्वोत्कर्षवाञ्छा मत्सरस्तद्रहितः शारीरस्थितिमात्रप्रयोजनं पिण्डाटना
दिकर्म कृत्वापि न नि— बध्यते बंधहेतोः सहेतुकस्य कर्मणो ज्ञानाग्निना दग्धत्वात् इत्यनुवादः गतसंगस्ये

त्यादि गतसंगस्य फलासंगशून्यस्य मुक्तस्य कर्तृत्वभोक्तृत्वाद्यध्यासशून्यस्य ज्ञानावस्थितचेतसः निर्विक
ल्पकब्रह्मात्मैक्यबोध एव स्थितं चित्तं यस्य स्थितप्रज्ञस्येत्यर्थः उत्तरोत्तरविशेषणस्य पूर्वपूर्वहेतुत्वेना
न्वयो द्रष्टव्यः गतसंगत्वं कुतः यतोऽध्यासहीनत्वं तत्कुतो यतः स्थितप्रज्ञत्वं ईदृशस्यापि प्रारब्धकर्मवशा
त् यज्ञाय विष्णवे तत्प्रीत्यर्थं यज्ञदानादिकं कर्म समग्रं सह अग्रेण फलेन विद्यत इति समग्रं प्रविलीयते प्रकर्षे
ण कारणोच्छेदेन तत्त्वदर्शनात् विलीयते विनश्यतीत्यर्थः अर्प्यतेऽनेनेति व्युत्पत्त्या अर्पणं जुह्वादि मंत्रादि
च एव अर्प्यतेऽस्मा इति व्युत्पत्त्या अर्पणं देवतारूपं संप्रदानं अर्प्यतेऽस्मिन्निति व्युत्पत्त्या अर्पणमधिक
रणं देशकालादि चेत्येतत्सर्वं ब्रह्मणि कल्पितत्वात् ब्रह्मैव रज्जुकल्पितभुजंगवत् अधिष्ठानव्यतिरेकेण
सदित्यर्थः एवं हविस्त्यागप्रक्षेपक्रिययोः साक्षात्कर्मकारकं तदपि ब्रह्मैव एवं यत्र प्रक्षिप्यते ग्नौ सोऽपि ब्र
ह्माग्नाविति एकं पदं तथा येन क— — —त्रा यजमानेनाध्वर्युणा हूयते प्रक्षिप्यते तत्त्रयमपि कारकं तेन हुतं
ब्रह्मणैव कृतं एव हुतमिति हवनं त्यागक्रिया प्रक्षेपक्रिया वा तद्ब्रह्मैव तथा तेन हवनेन यद्गंतव्यं स्वर्गादिफ
लं ब्रह्मविहितं कर्म तदपि ब्रह्मैव अत्र त एवकारः सर्वत्र संबध्यते व्यवधानाभावात् साकांक्षत्वाच्चेत्यपि स्तावप्र
नात्तु इत्यादावच्छिद्रेणेत्यादिपरवाक्यशेषवत् अनेन रूपेण कर्मणि समाधिर्ब्रह्मज्ञानं यस्य स कर्मसमा

Indira Gandhi National Centre for the Arts

॥गीता०५०॥ धिस्तेन ब्रह्मविदा कर्मानुष्ठानापि ब्रह्मपरमानंदाद्वयं गंतव्यमित्यनुपपद्यते तथा च सर्वं ब्रह्म ह स्यापद्यपन ब्र
ह्मातिरिक्तं कर्मजातं तत्त्वान्ध्यस्तमिति यः पश्यति तस्य गतसंबंधत्वैवेति भावः अर्पणादिकारकं स्वरूपानु
॥१४८॥ पमर्द्दैनैव तत्र नानाभावादि वब्रह्मदृष्टिः क्रियते संप्रतिमाशेणफलादिज्ञोपायेतिकेषांचिदाख्यानं तदुपक्रमा
दि विरोधात उपेक्ष्यं एवं चोत्पन्नज्ञानस्य कर्मकरणं मात्रा यनोपपद्यते किंतु लोकसंग्रहायैव तदर्थं च क्रि
माणं कर्मनिबंधकमिति स्थितं अद्वहुविन्त्तेन ज्ञानेन तु निखिलं कर्मपरित्याज्यमेव संन्यासवेणैत स्याधिका
रात तथा चोक्तं भगवता सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी नवद्वारे पुरे देही नैव कुर्वन्न कारयन्
रिति आस्ते ज्ञानं संपादयन्नित्यर्थः तथा च ज्ञानैकपरायणः संन्यासनमेव संपादयेत तेनैव सर्वपुरुषार्थ
प्राप्तेरावश्यकत्वात तथा चोक्तं भगवता तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः गच्छंत्यपुनरावृत्तिं ज्ञान
निर्धूतकल्मषाः तथा श्रेयान्द्रव्यमयाद्यज्ञात् ज्ञानयज्ञः परंतप सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यत इति
न च एतावता ज्ञानेनैव साक्षान्मुक्तिः ज्ञानं तु कर्मजनितदेतः अहो सत्यामिमुक्तं तत्र युज्यते कर्तृत्वतोऽकृताखि ।१२४८।
लप्रपंचनिवृत्तिर्हि मुक्तिरित्यथोक्तं मुक्तिर्हित्वान्यथा रूपं स्वरूपेण व्यवस्थितिरिति एवं च तादृशाप्रपंचनिवृत्तेर्ज्ञा
नेन कर्तुमशक्यत्वात तद्वुः खहेतुकर्मनाशकतायास्तस्य कुत्राप्यदर्शनाच्च तथात्वासंभवः कर्मणस्तु दुःख

हेतुकर्मनाशकतायास्तस्य कुत्राप्यदर्शनाच्च तथात्वासंभवत्कर्मणस्तु दुःखहेतुपापनाशकतायाः प्राय
श्चित्तेषु दर्शनात तद्दृष्टानुसारित्वाच्च कल्पनाया इति ज्ञानसहकृतकर्मणा एव मोक्षहेतुतास्त्विति चेत न कर्तृ
त्वभोक्तृत्वादिप्रपंचस्य स्वरूपावरकभावरूपाज्ञानपरिकल्पितस्याधिष्ठानयाथात्म्यज्ञानस्याधिष्ठानावर
काज्ञाननिवर्त्तकतायाः शुक्तिज्ञानादौ दृष्टत्वात स्वरूपज्ञानेनैव भावरूपाज्ञाननिवृत्तिद्वारानात्मप्रपंचोपप-
त्तेः कर्मण एव वस्तुततत्त्वनाशकता संभवस्य स्फुटत्वात पापस्य प्रायश्चित्तादिना विपापस्य नात्यंतकी निवृत्तिः किंतु
लयमात्रं निवृत्तिस्तु ब्रह्मज्ञानेनैवेति स्पष्टं महत्तरा स्वावल्लोकितां उक्तं च भगवता न कर्तृत्वं न कर्माणि लोक
स्य सृजति प्रभुः न कर्मफलसंयोगं स्वभावस्तु प्रवर्त्तते नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः अज्ञाने
नावृतं ज्ञानं तेन मुह्यंति जंतवः ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः तेषामादित्यवज्ज्ञानं प्रकाशयति
तत्परमिति लोकस्य देहेंद्रियादेः कर्तृत्वं प्रभुरात्मा स्वामी न सृजति त्वं कुर्विति नियोगेन तस्य कारयिता न भवती-
त्यर्थः नापि लोकस्य कर्माणीप्सिततमानि घटादीनि स्वयं सृजति कर्तापि न भवतीत्यर्थः नापि तत्फलसंबंधं सृ
जति भोजयता भोक्तापि न भवतीत्यर्थः स जामातः स तु भौ लोकावत्तुसंचरति ध्यायतीव लेलायतीवेत्यादि-
श्रुतेः शरीरस्थोपि कौंतेय न करोति न लिप्यत इति स्पष्टमुक्तेश्च तर्हि किं त्वकारयति करोति चेति तत्राह स्वभा

Indira Gandhi National
Centre for the Arts

॥गीटी०प०॥ ॥१५०॥

वइति स्वभावो अज्ञानात्मिका दैवी माया प्रकृतिः प्रवर्त्तते तदुपाधिककर्तृत्वमित्यर्थः विभुरात्मा कस्यचि
त्पापं सुकृतं वा नादत्ते परमार्थतो जीवस्य कर्तृत्वाभावात् परमेश्वरस्य च परमार्थतः कारयितृत्वाभावात्क
थं तर्हि श्रुतिस्मृतीलोकव्यवहारश्च तत्राह अज्ञानेनावृतं ज्ञानमिति अज्ञानेनावरणविक्षेपशक्तिमता मा
यारव्येनावृते न तमसावृतमाच्छादितं ज्ञानं जीवेश्वरजगद्भेदभ्रमाधिष्ठानभूतं नित्यं स्वप्रकाशं सच्चिदानंद
रूपमद्वितीयं परमार्थसत्यं तेन स्वरूपावरणेन मुह्यंति प्रमातृप्रमाणप्रमेयकर्तृकर्मकरणभोक्तृभोग्यभो
गारव्यं नैवंविधसंसाररूपं विक्षेपं गच्छंति जंतवो जननशीलाः संसारिणो वस्तुस्वरूपादर्शिनः अकर्तृभोक्तृप
रमानंदाद्वितीयात्मस्वरूपादर्शननिबंधनोयं जीवेश्वरजगद्भेदभ्रमः प्रतीयमानो वर्त्तते मूढानामिति भा
वः तर्हि कथं संसारनिवृत्तिरित्यत आह ज्ञानेनेति तत् अज्ञानं आत्मनो ज्ञानेन गुरूपदिष्टवेदांतमहावाक्य
जन्येन श्रवणमनननिदिध्यासनपरिपाकनिर्मलांतःकरणवृत्तिरूपेण निर्विकल्पकसाक्षात्कारेण शोधि
तत्त्वंपदार्थाभेदरूपशुद्धसच्चिदानंदाखंडैकरसवस्तुमात्रविषयेण नाशितं बाधितं कालत्रयेप्यसदेवस ।१५०।
त्तयाज्ञातमधिष्ठानचैतन्यमात्रतां प्रापितं शुक्त्याविरजतं शुक्तिज्ञानेन येषां मुमुक्षूणां तेषां तज्ज्ञानं कर्तृ
आदित्यवदैतद्यथादित्यः स्वोदयमात्रेण तमो निरवशेषं निवर्त्तयति न तु किंचित्सहायमपेक्षते तथा ब्रह्म-

ज्ञानमपि शुद्धसत्त्वपरिणामत्वात् प्रकाशरूपस्योत्पत्तिमात्रेणैवाज्ञानं निवर्त्तयति स्वरूपं प्रकाशय
ति अत्राज्ञानेनावृतं ज्ञानमिति ज्ञानेन तु नाशितं इयता नावरणत्वज्ञाननाशपत्वाभ्यां ज्ञानाभाववा-
ज्ञानमिति तार्किकमतमपहस्तितं वेदितव्यं ज्ञानाभावस्यावरणत्वायोगात् ज्ञाननाशपत्वासंभवाच्च,
तस्मादहमज्ञो मामन्यं च न जानामीत्यादि साक्षिप्रत्यक्षसिद्धं भावरूपमज्ञानं तन्निवर्त्तकं ज्ञानमेव त
द्वाराखिलसंसारं निवर्त्तयतीति तदेव मोक्षहेतुर्न कर्मेति तथाह भगवान् तद्विद्धि प्रणिपातेन परिप्र
श्नेन सेवया उपदेक्ष्यंति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः यत् ज्ञात्वा न पुनर्मोहमेवं यास्यसि पांडव अपि चेदसि
पापेभ्यः सर्वेभ्यः पापकृत्तमः सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि यथैधांसि समिद्धोग्निर्भस्मसात्कुरुतेर्जु
न ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा न हि ज्ञानेन सदृशं पवित्रमिह विद्यते तत्स्वयं योगसं
सिद्धः कालेनात्मनि विंदति श्रद्धावान् लभते ज्ञानं तत्परः संयतेंद्रियः ज्ञानं लब्ध्वा परां शांतिमचिरेणाधि
गच्छति अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति नायं लोकोस्ति न परो न सुखं संशयात्मनः योगसंन्य
स्तकर्माणं ज्ञानसंछिन्नसंशयं आत्मवंतं न कर्माणि निबध्नंति धनंजय बीजान्यग्न्युपदग्धानि न रोहंति
यथा पुनः ज्ञानदग्धैस्तथा क्लेशैर्नात्मा संयुज्यते पुनः तथा भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरं सुहृदं

Indira Gandhi National Centre for the Arts

॥मोक्ष१०॥ सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति सर्वकर्माणि पुण्यापुण्यानि अपारम्भफलानि ज्ञानानि तस्मात्कु
॥१५०॥ र्वीत तन्मूलाज्ञानविनाशेन विनाशयतीत्यर्थः तथा च श्रुतिः भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः क्षी
यन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे तितदधिगमे उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् इत
रस्याप्येवमसंश्लेषः पाते तु अनारब्धकार्ये एव तु पूर्वे तदवधेरिति पारमर्षसूत्रेण्य अनारब्धानामेव ज्ञा
नेन नाशप्रतीतेः प्रारब्धानां च स्वारब्धदेहान्तरवद्विनाशः तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य
इति श्रुतेः भोगेन त्वितरे क्षपयित्वा संपद्यत इति सूत्राच्चेति यस्मादेवं तस्मात्प्रशस्ततरं ज्ञानमित्याह नहि
ज्ञानेन सदृशमिति — — — तत्ज्ञानं कालेन महता पोगसंसिद्धः योगेन कर्मयोगेन ध्यानयोगेन च श्रद्धा
नः करणः आत्मनिष्ठतः करणे विंदति लब्धे तेज्ञानलाभे उपायविशेषमाह श्रद्धवानिति गुरूक्ते शास्त्रोक्त
बुद्धिः श्रद्धा एवमुक्तार्थसंज्ञायोन कार्यः संदिहानस्यानिष्टमाह अज्ञश्चेति तथा वीजान्यग्न्युपदग्धानि न
रोहंति यथा पुनः ज्ञानदग्धैस्तथा क्लेशैर्नात्मा संयुज्यते पुनः श्रीहरिर्जयति अथ ज्ञानहेतवः तत्र ज्ञानसा ।२५०।
तः करणोपादानकस्यान्तः करणशुद्धेः सत्यामेव साधनैरुत्पादयितुं शक्यत्वात् प्रथमं ज्ञाननिदानभू
ताचेतः शुद्धिः संपादनीया तथा चनारते ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः यथादर्शतलप्र

स्थ्ये पश्यंत्यात्मानमात्मनि चेतः शोधकान्याह याज्ञवल्क्यः विद्यार्थवदनयज्ञो ब्रह्मचर्यं तथादमः श्रद्धोप
वासः स्वातन्त्र्यमात्मनो ज्ञानहेतवः विद्यार्थवचने त्यनेन ब्रह्मचार्याश्रमी यज्ञशब्देन गृहस्थीयं ब्रह्म
चर्यं तपइत्यनेन वनितंदम श्रद्धोपवासादि भिः संन्यासिन श्चआश्रमोचितानि कर्माण्युपलक्ष्यते तथा चे
तैः कर्मभिरतः करणद्वारा ज्ञानमुत्पाद्यत इति शोधकान्यनुष्ठेयानि वेदानुवचनं मीमांसापूर्वं गाध्ययनेना
र्थज्ञानपुरःसरं वेदाध्ययत्वं तथा च ब्रह्मपुराणे अधीत्य वेदांश्च तदीयमर्थं बुद्ध्या गृहीत्वा च सद्वि
घं श्रुत्वा च मीमांसकधर्मशास्त्रं नात्मानमत्पोऽर्लभो यं त्रिलोके अहिंसयेंद्रियासंगैर्वैदिकैश्चैव कर्मभिः
तपश्चरणैश्चोग्रतरैः साधयंतीह तत्पदं तत्पदसाधनं वज्ञानप्रतिबंधकदुरितक्षयद्वारा ज्ञानसंपादकत्वे
वन संसाराद्धातत्तथो वतश्चैव तपोविद्या च विप्रस्य निःश्रेयसकरं परं तपसा कल्मषं हंति विद्ययामृतमश्नुते
मत्स्यपुराणे अथ मेवक्रिया योगो ज्ञानयोगस्य साधकः कर्मयोगं विना ज्ञानं कस्यचिन्नेह दृश्यते याज्ञव
ल्क्यः आचार्योपासनं वेदशास्त्रार्थेषु विवेकिता तत्कर्मणामनुष्ठानं संगः सद्भिः गिरः श्रुताः स्त्र्यालोकाल
म्भविगमः सर्वभूतात्मदर्शनत्यागः परिग्रहाणां च जीर्णकाषायधारणं विषयेंद्रियसंरोधस्तंद्रालस्यवि
वर्जनं शरीरपरिसंख्यानं प्रवृत्तिष्वघदर्शनं नीरजस्तमता सत्त्वशुद्धिर्निस्पृहता दयः एतैरुपायैः संशु

...dhi National
Centre for the Arts

द्ः सतु धीयम्प्रतीन्नवेत् विद्यार्थमाचार्यसेवा वेदान्तार्थेषु विवेचकत्वं तत्प्रतिपादितध्यानादिकर्मणाम
नुष्ठानं सत्पुरुषसंगः प्रियहितवचनत्वं ललनालोकनालंनयोः परित्यागः सर्वभूतेष्वात्मदर्शनं समत्वद
र्शनं परिग्रहणं वपुरन्धो वल्कलाजिनादीनां त्यागो जीर्णकाषायधारणं अनेन सन्यासमुपलक्षयति तथाश्रोत्रादि
स्पर्शादि विषयेषु श्रोत्रादीन्द्रियाणां प्रवृत्तिनिरोधस्तंद्रानिद्रानुसारिणी आलस्यमनुत्साहस्तयोर्विशेषेण त्यागः
शरीरस्य परिसंस्थानं अस्थिरास्थिवित्वादिदोषानुसंधानं तथा सकलगमनादिषु प्रवृत्तिषु भूतक्षयापरिव
धादिदोषपरामर्शः तथा रजस्तमोविधुरता प्राणायामादिभिर्चित्तविशुद्धिः निस्पृहता विषयानभिलाषः शमो
वाह्यांतःकरणसंयमः एतैराचार्योपासनादिभिरुपायैः सम्यक् शुद्धः केवलसत्वयुक्तो ब्रह्मोपासनेनामृती
भवेत् मुक्तो भवति एतेषां चेतः शोधकता च निःकामतयानंगवद्गीतोक्तिर्यमाणेनामेवेतिपूर्वोदाहृत
भगवद्वाक्यैः सिद्धमेव हारीतः काम्यैः केचित यज्ञदानैस्तपोभिः लोकाः लोकान् पुनरायांति जन्मकर्मैर्मुक्तास
त्वथ ज्ञाः सुदानास्तपोभिः श्रद्धया न यांति लोकान् गीतायां स्वेस्वे कर्मण्यभिरतः संसिद्धिं लभते नरः स्वक १५१
र्मनिरतः सिद्धिं यथा विंदति तच्छृणु तथा कंचन गुणं विधातु अशुद्धचित्तं प्रतिकर्मविनाशकतामाह भगवा
न कर्मण्येवाधिकारस्ते मा फलेषु कदाचन मा कर्मफलहेतुर्भूर्मा ते संगोस्त्वकर्मणि योगस्थः कुरु कर्मा

णि संगं त्यक्त्वा धनंजय सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते दूरेण ह्यवरं कर्म बुद्धियोगाद्धनंजय बुद्धौ
शरणमन्विच्छ कृपणाः फलहेतवः बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते तस्मात् योगाय युज्यस्व योगः
कर्मसु कौशलं कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः जन्मबंधविनिर्मुक्ताः पदं गच्छंत्यनामयं तेतवा
शुद्धचित्तस्य तावदात्मज्ञानोत्पत्त्ययोग्यस्य कर्मण्येवांतःकरणशोधके भगवदर्पितमयेदं कर्तव्यमितितेवो
धोस्तु फलेषु कदाचनोस्तु व्यमितिवोधोमास्तु ते कर्मण्येव आश्रमादिते तवाधिकारो अवश्यकर्तव्यत्वात्
न कर्मफलेष्विति कल्प्यरुः तदवश्यकर्तव्ये फलप्रसंगाभावेन निराकरणानुपपत्तेरुपेक्षणमो फलेष्वपि त्वं
तद्धितृ्ष्णेतिमा कर्मफलहेतुर्भूरिति कर्मफलं कामयमानः कर्महेतुः कर्मणोनुष्ठाता फलेच्छात्वया न कर्त
व्येत्यर्थः न चैवं सति कर्माकरणसक्तिस्त्वया न कर्तव्या किंतु कर्तव्या न्येवकर्माणीत्यर्थः कथं तर्हि कर्म
णि कर्तव्यानीत्याकांक्षायामित्थं नावमाह योगस्थ इति योगनिकर्माणि कुरु एतानि फलसंगं त्यक्त्वा यतक
रोषि यदश्नासि यज्जुहोषि ददासि यत् तयत्तपस्यसि कौंते य तत्कुरु मदर्पणं शुभाशुभफलैरेवं मोक्ष्यसे क
र्मबंधनैः संन्यासयोगयुक्तात्मा विमुक्तो मामुपेष्यसि कर्मफलं मिथ्यासिद्धौ हर्षविषादरहितत्वेन समोभूत्वा
कुरु ईश्वरप्रीतये च कर्माणि क्रियमाणे नास्ति वैषम्यं सर्वकर्ता तदात्मकं च कर्म क्रियमाणं तज्ज्ञा

Indira Gandhi National
Centre for the Arts

॥गीता७०॥

१२५२

हेतुत्वंनततनूत्पर्थः तदिदंफललाभदर्पस्वदत्लानेविषादत्रतीपेवंवैषम्याभावलक्षणंसाम्यमेवयोगः बुद्धि
योगात्‌आत्मबुद्धिसाधनंभूतनिष्कामकर्मयोगानदूरेणातिविप्रकर्षेणावरंकर्मफलसंधिनाक्रियमाणंज
न्ममरणहेतुभूते यद्वापरमात्मबुद्धियोगात्तद्दूरेणावरंसर्वमपिकर्मतस्मात्बुद्धौपरमात्मबुद्धौसर्वानर्थनि
वर्तिकायांप्रतिबंधकदुरितक्षयेणरक्षकंनिष्कामकर्मयोगंअन्विषकर्तुमिच्छयेतुफलेहेतवः अवरंकर्मकुर्वं
तितेकृपणाः सर्वदाजन्ममरणादिघटीयंत्रभ्रमणेनपरवशाः अत्यंतंदीनाइत्यर्थः योवाएतदक्षरंगार्ग्य
विदित्वाअस्माल्लोकात्प्रैतिसकृपणइतिश्रुतेजथाचत्वमपिकृपणोमाभूः किंतुसर्वानर्थनिवर्तकात्मतत्व
ज्ञानोत्पादकंनिष्कामकर्मयोगमेवाश्रुतिष्ठेदित्यभिप्रायः यथाहिकृपणाजनाअतिदुःखेनधनमर्जयंतोय
त्किंचितद्दृष्टसुखलोभेनदानादिजनितंमहत्सुखमनुभवितुंनशक्नुवंतीत्यात्मानमेववंचयंतितथामहता
दुःखेनकर्माणिकुर्वाणाः क्षुद्रफलमात्रलोभेनपरमानंदानुभवनेवंचिताइतितेषांमोढंयंदर्शितं बुद्धियो
गात्‌ बुद्धिः समत्वबुद्धिःतस्याः योगोयस्मिन्कर्मणितद्बुद्धियोगंतस्मात्कर्मणोदूरेणज्ञानरहितंकर्मजप १२५२
त्पंबुद्धौशरणमन्विच्छबुद्धिमाश्रयेत्यर्थः बुद्धियुक्तः ईश्वराराधनार्थंकर्मेत्यतयाबुद्ध्याभिन्नः कर्मकुर्वन्अ
नारब्धफलेअशुभाशुभे पुण्यपापेऽवेतः शुद्धिद्वारासंपन्नज्ञानोजहातीत्यर्थः योगायसमत्वयोगायप्रयुज्यस्व

ईदृशाः समत्वबुद्धियोगईश्वरार्पितचेतसः कर्मसुप्रवर्तमानस्यकौशलंकुशलभावः बंधहेतूनामपिकर्म
णांतदभावोमोक्षायस्वभावापित्वंव्रतमहत्कौशलंब्रह्मणिसमर्पणंकर्मणः फलसंकल्परहिततावः समा
त्वबुद्धियुक्ताहियस्मात्कर्मजंफलंत्यक्त्वाकेवलमीश्वराराधनार्थंकर्माणिकुर्वाणाः सत्वशुद्धिद्वारेणनि
ष्पन्नतत्वज्ञानाःजन्मात्मकेनबंधेनविनिर्मुक्ताः विशेषेणत्यक्तिकत्वलक्षणेननिरवशेषंमुक्ताः पदंपदनीयमा
त्मतत्वमानंदरूपब्रह्मअनामयंअविद्यातमोत्कार्यरूपरोगरहितंमोक्षाख्यंपुरुषार्थंगच्छंत्यभेदेनप्राप्नुव
तीत्यर्थः सर्वोपद्रवशून्यंविष्णोःस्थानंगच्छंतीत्यर्थइतिकल्पतरुः बुद्धियुक्तोजहातीहेत्यत्रबुद्धियोगोहनंज
येत्यत्रचोक्तबुद्धिविशेषमुक्तोभगवता नमांकर्माणिलिंपंतिनमकर्मफलेस्पृहाइतिमांयोभिजानातिकर्म
भिर्नसबध्यते एवंज्ञात्वाकृतंकर्मपूर्वैरपिमुमुक्षुभिःकुरुकर्मैवतस्मात्त्वंपूर्वैः पूर्वतरंकृतं मांकर्माणिनलिं
पंतियतोममकर्मफलेस्पृहानास्ति एवमन्योपियःस्वव्यापारेवीतफलतृष्णःपरमेश्वरायेदमितिकर्मणि
प्रवर्तते सोपिकर्मभिर्नबध्यतेयतोनाहंकर्तानमेकर्मफलेस्पृहेतिज्ञात्वापूर्वैर्जनकादिभिः पूर्वतरंपुरात
नंनतुतमेवत्तमितिपूर्वेदाहृतश्रुतेः संन्यासेनायतत्वेनः परंब्रह्माधिगच्छतिमुमुक्षुःपरमेंहंसेसाक्षाद्विज्ञा
नसाधनइत्यादिवाक्यैः सन्यासस्यैवचेतः शोकतोक्तेः शुद्धिद्वाराचतस्यैवज्ञानोत्पादकताचाविधीयती

Indira Gandhi National
Centre for the Arts

॥मो०१०॥ तिकृतं पुनरपि कर्माणीति चेत् न कर्मकृतचेतःशुद्धौ सत्यां सति तीव्रवैराग्ये कृते संन्यासे कर्मानपेक्षैव ज्ञान
प्रतिबंधकदुरितक्षयवता ज्ञानश्रवणादौ च सति ज्ञानोत्पत्तौ कर्मानपेक्षणेऽपि पूर्वं तदपेक्षणात् अत एव भगव-
।१५३। द्गीतायां चेतःशुद्धेः प्राक् कर्मत्याग एव नास्ति किं नु तदेव अशुद्धचित्तेन कार्यमित्युक्तं भगवता अर्जुन उ-
वाच संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितं श्रीभगवानुवाच
संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते ज्ञेयः स नित्यसंन्या
सी यो न द्वेष्टि न कांक्षति निर्द्वंद्वो हि महाबाहो सुखं बंधात्प्रमुच्यते सांख्ययोगौ पृथग्बालाः प्रवदंति न पं
डिताः एकमप्यास्थितः सम्यगुभयोर्विंदते फलं यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते एकं सांख्यं च
योगं च यः पश्यति स पश्यति संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः योगयुक्तो मुनिर्ब्रह्म नचिरेणाधि
गच्छति युगयुक्तो विशुद्धात्मा विजितात्मा जितेंद्रियः सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते नैव किंचित्क
रोमीति युक्तो मन्येत तत्त्ववित् पश्यन् शृण्वन् स्पृशन् जिघ्रन् अश्नन् गच्छन् श्वसन् स्वपन् प्रलपन् विसृ १५३
जन् गृह्णन् उन्मिषन्निमिषन्नपि इंद्रियाणींद्रियार्थेषु वर्तंत इति धारयन् ब्रह्मण्याधाय कर्माणि संगं त्य
क्त्वा करोति यः लिप्यते न स पापेन पद्मपत्रमिवांभसा कायेन मनसा बुद्ध्या केवलैरिंद्रियैरपि योगिनः

कर्म कुर्वंति संगं त्यक्त्वात्मशुद्धये युक्तः कर्मफलं त्यक्त्वा शांतिमाप्नोति नैष्ठिकीं अयुक्तः कामकारे
ण फले सक्तो निबध्यत इति निश्चयसकरौ ज्ञानोत्पत्तिहेतुत्वेन मोक्षोपयोगिनौ तयोस्तु कर्मसंन्यासात्
अनधिकारिकृतात् कर्मयोगो विशिष्यते श्रेयानधिकारसंपादकत्वेन कल्पतरुस्तु कर्मसंन्यासा
त्कृतानां कर्मणामीश्वरसंन्यासो यत्र कु[illegible]स्तस्मात्तस्यैव कर्तृकारकांतरं च कर्मेति प्रकर्मत्यागः स
विशिष्यते कथं द्वैतविषयो हि संन्यासः कर्मयोगः परमद्वैतविषयः साक्षात्सम्यग्दर्शनाश्रयज्ञत्पर्थ
इत्याह स एव संन्यासात् कर्मयोगो स्तोति त्रिभिः कर्मणि प्रवृत्तोऽपि नित्यसंन्यासीति ज्ञेयः को सौ यो न द्वे
ष्टि भगवदर्पणबुद्ध्या क्रियमाणकर्मनिष्फलत्वज्ञो न कयानत्यजति ना कांक्षति स्वर्गादिकं निर्द्वंद्वो रा
गद्वेषरहितः सुखं बंधं अनायासेन अतः करणशुद्धिरूपात् ज्ञानप्रतिबंधकात् प्रमुच्यते न तु कर्मत्यागयोः
स्वरूपविरोधात् संन्यासिनो न कर्मयोग इत्यत आह सांख्ययोगाविति संख्या सम्यगात्मबुद्धिस्तां वह
तीति सांख्यः संन्यासः योगः कर्मयोगः तौ पृथक् विरुद्धफलौ बालाः प्रवदंति न पंडितमतमाह एकमपी
ति संन्यासकर्मणोर्मध्ये सम्यगास्थितः स्वाधिकारानुरूपेण सम्यक् यथाशास्त्रं कृतवान् उभयोर्विंदे
ते फलं ज्ञानोत्पत्तिद्वारेण निःश्रेयसमेव सांख्यैः ज्ञाननिष्ठैः संन्यासिभिः वैदिककर्मानुष्ठानस्यत्यागेपि

Indira Gandhi National Centre for the Arts

॥मो०भ०पु०॥ पु॰ भगवदीयकर्मभिरेव संस्कृतांतःकरणैः श्रवणादिपूर्विकया ज्ञाननिष्ठया यत्सिद्धं स्थानं तिष्ठत्येव
स्मिन्न कदाचिच्यवत इति व्युत्पत्त्या मोक्षाख्यं प्राप्यते आवरणाभावमात्रेण लभ्यात इव नित्यप्राप्त
१५४। त्वात् योगैरपि भगवदर्पणबुद्ध्या फलाभिसंधिराहित्येन कृतानि कर्माणि शास्त्रीयाणि योगास्ते येषां सं
तीति अर्शआदिभ्योऽच् तैर्योगिभिरपि सत्वशुद्ध्या संन्यासश्रवणादिपुरःसरया ज्ञाननिष्ठ
या वर्तमाने भविष्यति वा जन्मनि संपत्स्यमानया तत्स्थानं गम्यते अत एकफलत्वात् एकं सांख्यं च यो
गं च यः पश्यति स एव सम्यक् पश्यति येषां संन्यासपूर्विका ज्ञाननिष्ठा दृश्यते तेषां तयैव लिंगेन प्राग्ज-
न्मसु भगवदर्पितकर्मनिष्ठानुमीयते कारणमंतरेण कार्योत्पत्त्ययोगात् अत एवोक्तं यन्यतोन्यानिज-
न्मानि तेषु नूनं कृतं न वेत यत्कृतं तद्गुरुषेणेह नान्यथा ब्रह्मणि स्थितिरिति एवं येषां भगवदर्पितकर्म
निष्ठा दृश्यते तेषां तयैव लिंगेन भाविनी संन्यासपूर्वकज्ञाननिष्ठा अनुमीयते सामग्र्याः कार्याविना
भावात् तस्माद्‌द्वैविध्ये मुमुक्षूणां तत्करणशुद्धये प्रथमं कर्मयोगोऽनुष्ठेयः एवं न नु संन्यासः स नु वैराग्यतीव्रता ।१५४।
यां स्वयमेव भविष्यतीति भावः योगश्चान्तःकरणशोधकशास्त्रीयं कर्म तदंतरेण हणादेव यः कृतः सं
न्यासः स तु दुःखमाप्तुमेव भवति अशुद्धांतःकरणत्वेन तत्फलस्य ज्ञाननिष्ठाया अभावात् शोधकेव

कर्मत्यागानधिकारात् कर्म च शुद्धोनव्यपदृष्टत्वेन परमसंकटापत्तेः कर्मयोगयुक्तस्तु शुद्धांतःकरणत्वात्
मुनिर्मननशीलः संन्यासी भूत्वा ब्रह्म सत्यज्ञानादिलक्षणमात्मानं अचिरेण शीघ्रमेवाधिगच्छति साक्षा
त्करोति अतः एकफलत्वेपि कर्मसंन्यासात् कर्मयोगो विशिष्यत इति यत्प्रागुक्तं तदुपपन्नं भवति योगे
न भगवदर्पितकर्मयोगयुक्तो न पुरुषः प्रथमः विशुद्धात्मा विशुद्धरजस्तमोभ्यामकलुषित आत्मांतःकरण
रूपं सत्वं यस्य स तथा निर्मलांतःकरणः निर्जितात्मा स्ववशीकृतमनोवृत्तिः जितेंद्रियः स्ववशीकृतस
र्वबाह्येंद्रियः एतादृशस्य तत्वज्ञानमवश्यं भवतीत्याह सर्वभूतात्मभूतात्मा सर्वभूतः जडात्मकः प्रपंचः
आत्मभूतश्चेतनसमुदायः एतद्द्वयात्मकः आत्मा स्वरूपं यस्य सः जडाजडात्मकप्रपंचमात्मना पश्यन्नित्यर्थः
सर्वेषां भूतानामात्मभूत आत्मा यस्य व्याख्याने तु सर्वभूतात्मेत्येतावतैवार्थलाभादात्मभूतेत्यधिकं स्यात् स
र्वात्मपदयोर्जडाजडपरत्वे तु सामंजस्यं एतादृशः परमार्थदर्शी कुर्वन्नपि कर्माणि परदृष्ट्या न लिप्यते एत
स्यैव विवरणं नैव किंचित्करोमीति श्लोकद्वयं इंद्रियाणींद्रियार्थेष्विति एतेष्विंद्रियार्थेषु इंद्रियाणि वर्तंते
मम नात्र कर्तृत्वमिति चित्ते धारयन् योगयुक्तो मन्येतेत्यर्थः शांतिमाप्नोति नैष्ठिकी सुखमाप्नोति किं प्राप्नो-
तीत्यर्थः ननु शुद्धचेतसः संन्यास एव अशुद्धचित्तेनैव कर्मकार्यमिति निर्गलितं व्याख्यातं तत्र युज्यते भग

Indira Gandhi National
Centre for the Arts

॥मो०ध०॥ शक्यविरोधात् तथाहि अर्जुन उवाच संन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुं त्यागस्य च हृषीकेश पृथक्के-
शिनिषूदन श्रीभगवानुवाच काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः सर्वकर्मफलत्यागं प्राहुस्त्यागं
।१५५। विचक्षणाः त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः यज्ञदानतपःकर्म न त्याज्यमिति चापरे निश्चयं शृणु
मे तत्र त्यागे भरतसत्तम त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तितः यज्ञदानतपःकर्म न त्याज्यं कार्यमेव त-
त् यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् एतान्यपि तु कर्माणि संगं त्यक्त्वा फलानि च कर्तव्यानीति मे पा-
र्थ निश्चितं मतमुत्तमं नियतस्य तु संन्यासः कर्मणो नोपपद्यते मोहात्तस्य परित्यागस्तामसः परिकीर्तितः
दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत् स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् कार्यमित्येव यत्क-
र्म नियतं क्रियतेऽर्जुन संगं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः न द्वेष्ट्यकुशलं कर्म कुशले नानुष-
ज्जते त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः यस्तु कर्मफल-
त्यागी स त्यागीत्यभिधीयते अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलं भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्व- १५५
चित् तथा अनाश्रितः कर्मफलं कार्यं कर्म करोति यः स संन्यासी च योगी च न निरग्निर्न चाक्रियः इत्यादि
वचनैः संन्यासस्याकरणीयता याएव स्पष्टं प्रतीयमानत्वात् किं चैतेषां व्याख्यानावसरे कोयमेवार्थः

प्रतीयते यत्कर्मणा साक्षादेव मुक्तिहेतौतितथा च कथं मिदमितिचेतन संन्यासरूपवतुर्थाश्रमवोधकप्रमाण
सहस्रानुरोधेन भाष्यकारादिसांप्रदायिककृतव्याख्यानरीत्या अस्मदभिमतार्थस्यैवसिद्धेः तथाहितेषां
व्याख्यानं अविदुषामनुपसंजाते विविदिषाणां चक्रमाधिकृतानामेव किंचित्कर्मपरिग्रहेण किंचित्क
र्मत्यागो यः स त्यागं श्रायुणयोगात् संन्यासशब्देनोच्यते एतादृशस्यांतःकरणशुद्ध्यर्थमविद्वत्कर्मावि
करिकर्तृकस्य संन्यासस्य केनचिद्रूपेण कर्मत्यागस्य तत्त्वं स्वरूपं पृथक् सात्त्विकराजसतामसभेदेन वे
दितुमिच्छामि त्यागस्य च तत्त्वं वेदितुमि किं संन्यासत्यागशब्दौ घटपटशब्दाविव भिन्नजातीयार्थौ किं वा
ब्राह्मणपरिव्राजकशब्दाविवैकजातीयोर्थौ यद्याद्यस्तर्हि त्यागस्य तत्त्वं संन्यासात्पृथक् वेदितुमिच्छामि
यदि द्वितीयस्तर्हि अवांतरोपाधिमात्रं वक्तव्यं तत्रोत्तरं काम्यानामित्यादि तमेतं वेदानुवचनेन ब्राह्मणा विवि-
दिषंति यज्ञेन दानेन तपसानाशकेनेति वाक्येन वेदानुवचनशब्दोपलक्षितस्य ब्रह्मचारिधर्मस्य यज्ञदा
नशब्दाभ्यामुपलक्षितस्य गृहस्थधर्मस्य तपोनाशकशब्दाभ्यामुपलक्षितस्य वानप्रस्थधर्मस्य नित्यस्य
पापक्षयद्वारेणात्मज्ञानार्थत्वं बोध्यते न च विनियोगवैयर्थ्यं ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः इ-
त्यनेनैव लब्धत्वात् इति वाच्यं विनियोगाभावे हि सत्यपि नित्यकर्मानुष्ठाने ज्ञानं स्याद्वा न वा स्यात् सतितु

National Centre for the Arts

मोक्षप०। विनियोगेज्ञानमवश्यंफलवेदेवेति नियमार्थत्वात् तस्मान्नित्यकर्मणामेव वेदने विविदिषायां विनियोगात्
सत्वशुद्धिविविदिषोत्पत्तिपूर्वकं वेदनार्थिना नित्यान्येव कर्माणि भगवदर्पणबुद्ध्यानुष्ठेयानि काम्यानि
।१५६। तु सर्वाणि सफलानि परित्याज्यानीत्येकं मतं अपरं मतं सर्वकर्मपरित्यागं प्राक् त्यागं विवक्षाय सर्वेषां का
म्यानां नित्यानां च प्रतिपदोक्तफलत्यागं सत्वशुद्ध्यर्थतया विविदिषासंयोगे दानुष्ठानं विवक्षाय विचारकु
शलास्त्यागं प्राहुः खादिरो यूपो भवति खादिरं वीर्यकामस्य यूपं कुर्यादित्यत्र यथैकस्य खादिरत्वस्य क्रतु
प्रकरणपाठात्फलसंयोगाच्च क्रत्वर्थत्वं पुरुषार्थत्वं च प्रमाणभेदात् तथाग्निहोत्रेष्टिपशुसोमानां सर्वेषाम
पि तत्तत्प्रकरणपठितानां स्वोत्पत्तिविधिसिद्धानां तत्तत्फलसंयोगः प्रत्येकं वाक्येन विविदिषासंयोगश्च यज्ञादिवा
क्येनेति युक्तमित्युपपन्नं उक्तं च संक्षेपशारीरके यज्ञेनेत्यादि वाक्यं तत्तत्प्रविहितं कर्मेह दं गृहीत्वा स्वो
त्पत्त्याम्नानसिद्धं पुरुषविविदिषामात्रसाध्ये युनक्तीति तस्मात्काम्यान्यपि फलाभिसंधिमकृत्वात्करणशु
द्ध्येकर्तव्यानि नत्वग्निहोत्रादिकर्मणां स्वतः काम्यत्वनित्यत्वरूपो विशेषोस्ति पुरुषाभिप्रायभेदकृतस्तु १५६
विशेषः फलाभिसंधित्यागीकृतस्य: उक्तं च वार्त्तिककारैः वेदानुवचनादीनामैकात्म्यज्ञानजन्मने तमेतमि
तिवाक्येन नित्यानां वक्ष्यते विधिः यद्वा विविदिषार्थत्वं सर्वेषामपि कर्मणां तमेतमिति वाक्येन संयोगस्य

पृथक्त्वतः तदेवं सफलकर्मत्यागः संन्यासशब्दार्थः सर्वेषामपि कर्मणां फलाभिसंधित्यागशब्दार्थ इति घ
टपटशब्दयोरिव संन्यासत्यागशब्दयोर्भिन्नजातीयार्थत्वं किंतु अंतःकरणशुद्ध्यर्थकर्मानुष्ठाने फलाभिसं
धित्याग इत्येक एवार्थ उभयोरिति निर्णीते एकः प्रश्नोर्जुनस्य द्वितीयप्रश्नप्रतिवचनाय संन्यासत्यागशब्दा
र्थस्य त्रैविध्यं निरूपयितुं तत्र विप्रतिपत्तिमाह त्याज्यं दोषवदित्यादि सर्वं कर्म बंधहेतुत्वात्कर्माधिकारिभिरपि क
र्मत्याज्यमित्येकः पक्षः द्वितीयस्तु कर्माधिकारिभिरंतःकरणशुद्धिद्वारा विविदिषोत्पत्त्यर्थं यज्ञदानतपःकर्म न
त्याज्यमिति चापर इत्यपरे मनीषिणः प्राहुः तत्र सिद्धांतपक्षः निश्चयमिति त्यागः कर्माधिकारिकर्तृकः फलाभि
संधिपूर्वककर्मत्यागस्त्रिविधस्तामसादिभेदेन संप्रकीर्तितः अथवा विशिष्टाभावरूपस्त्यागो विशेषणाभाव
तद्विशेष्याभावाद्भयाभावाच्च त्रिविधः संप्रकीर्तितः फलत्यागः फलविशिष्टकर्मत्यागः त्यागमात्रं वा तत्र
प्रथमः सात्त्विकः द्वितीयस्तु कर्माधिकारिकर्तृको नास्त्येवेति निष्ठः तृतीयः तुः रवबुद्ध्याकृतो राजसः वि
पर्यासेन कृतस्तामसः तत्र सात्त्विकेन फलाभिसंधिपूर्वककर्मानुष्ठानरूपेण त्यागेन शुद्धांतःकरणस्योत्पन्न
विविदिषस्यात्मज्ञानसाधनश्रवणरूपवेदांतविचाराय फलाभिसंधिरहितस्यांतः--करणशुद्धौ सत्यां त
त्साधनस्य कर्मणा द्वैनुष्ठेजाते वहनत्वस्येव परित्यागः स एकः संन्यासः साधनकृतो विविदिषासंन्यासव

Indira Gandhi National Centre for the Arts

॥मो॰द॰१०॥ च्यते निष्कर्म्यसिद्धिमित्यत्र व्याख्यातः यस्तु जन्मांतरकृतसाधनाभ्यासपरिपाकात् अस्मिन्जन्मन्यादावेव
संपन्नात्मबोधस्य कृतकृत्यस्य स्वतएव फलाभिसंधेः कर्मणश्च परित्यागः फलभूतः स विद्वत्संन्यास इत्यु
॥१५३॥ च्यते यज्ञदानादिकार्यमेवांतःकरणशुद्धय इत्येवमतं ग्राह्यमिति सिद्धांतः ननु यदि यज्ञदानतपसामंतःक
रणशोधने सामर्थ्यमस्तीति तर्हि फलाभिसंधिना कृतान्यपि तानि तच्छोधकानि भविष्यंति कृतं फलाभिसंधित्या
गेनेत्याशंक्याह मुक्तं एतान्यपीति तु कर्माणीत्यादि यद्यपि काम्यकर्माण्यपि विशुद्धिमादधति तथापि सा फलभो
गोपयोगिन्येव न ज्ञानोपयोगिनी उक्तं च वार्त्तिके काम्येपि विशुद्धिरस्त्येव भोगसिद्ध्यर्थमेव सेति ज्ञानोपयोगि
नीं शुद्धिमादधति यज्ञादीनि कर्माणि फलसंगराहित्येन कृतानीति एवं च कर्माधिकारिभिः कर्माणि त्याज्या
ज्यानि न चेति द्वयोर्मतयोर्न त्याज्यानीति मम निश्चितं मतं तदेव मम परमतं स्वमतत्वेन परिगृह्य अशुद्धचित्तेन क
र्म न कार्यमित्येकेषां पक्षमुपन्यस्य दूषयति नियतस्येत्यादिना नियतस्य तु नित्यस्य कर्मणः अंतःकरणशो
धकस्य तत्त्वबुभुत्सुना नोपपद्यते त्यागस्तु शक्तिर्यान्तस्यावश्यानुष्ठेयत्वादवगमात ननु नित्यानामपि कर्मणां ज्यो १५३
तिष्टोमव्रीहिपश्वादिहिंसामिश्रितत्वेन सदोषत्वात् दोषाधायकतयोचेतसोऽशोधकतया एवापत्तेः नानु
ष्ठेयान्येवतानि तथैव सांख्यैरभिहितत्वात् तन च विहीनं च हंति अग्नीषोमीयं पशुमालभेतेत्यादिविधिविषयवि

धिगोचरत्वात् क्रत्वंगहिंसायाः न हिंस्यात्सर्वाभूतानीति निषेधस्य च तदितरपरत्वात् कथं सदोषता तेषां निषेध
विषयतादिति साध्वतं भिन्नविषयत्वेन विधिनिषेधयोरबाधेनैव समावेशसंभवात् निषेधेन हि पुरुषस्यानर्थहेतुर्हिं
सेत्यभिहितं न क्रत्वर्थहिंसति हिं विधिना च क्रत्वर्था हिंसेत्यभिहितं न त्वनर्थहेतुर्नेतितर्थो च क्रतूपकारत्वपुरुषान
र्थहेतुत्वयोरेकत्र संभवात् क्रत्वर्थहिंसानिषिद्धैवेति हिंसायुक्तं दर्शपूर्णमासज्योतिष्टोमादि संदृष्टमेव किं च विहि
तस्यापि निषिद्धत्वं निषिद्धस्यापि विहितत्वं श्येनादिवदुपपन्नमेव यथा हि श्येनेनाभिचरन् यजेतेत्याद्यभिचारवि
धिना विहितोपि श्येनादिर्न हिंस्यात्सर्वाभूतानीति निषेधविषयत्वात् अनर्थहेतुरेव तद्दोषसहितोरेव रागद्वेष
वशीकृतस्यतत्राधिकारं एवं ज्योतिष्टोमादावपि तथा चोक्तं महाभारते जपस्तु सर्वधर्मेभ्यः परमो धर्म उच्यते
अहिंसया हि भूतानां जपयज्ञः प्रवर्तते मनुनापि जप्येनैव तु संसिद्ध्येद्ब्राह्मणो नात्र संशयः कुर्यादन्यन्नवा
कुर्यान्मैत्रो ब्राह्मण उच्यते एवं च मैत्री महिंसां प्रशंसता हिंसायाः दुष्टत्वमेव प्रतिपादितं अंतःकरणशुद्धिश्च दृष्टेन
गायत्रीजपादिना सुतरामुपफल्यस्य तद्रुतिज्योतिष्टोमादि हिंसादिदोषदुष्टं सत्त्वशुद्धिपेक्षुणा न कार्यमिती
प्राप्तमिति चेत् अत्र ब्रूमः न क्रत्वर्थहिंसानर्थहेतुः विधिस्पृष्टे निषेधानवकाशात् तथा हि विधिना समीहित
साधनतारूपमन्यां शब्दधर्मभूतां वा शाब्दीं भावनां बोधयता स्वविषयस्य प्रवर्तनागोचरस्यानर्थसा

Indira Gandhi National Centre for the Arts

॥मो०प्र०॥ धनताज्ञानबोधस्यार्थादाक्षिप्यते तेन विधिविषयस्य नानर्थहेतुत्वं प्रज्ञप्यते रूपेन फलहिंसा तु विधिविषयतारहिते
॥१५८॥ नानर्थहेतुरिति युज्यते यत्तु विधिबोधजन्यप्रवृत्तिविषयः रूपेनादितत्रानर्थहेतुः हिंसारूपेष्टसाधनत्वात तेन
नस्येनाग्निषोमीययोर्वैषम्यादुपपन्नमदुष्टत्वं ज्योतिष्टोमादेरिति तिन्नाहैरेत्तदर्थस्याभिहितत्वात व्यवहारेऽव्यव
नयइति ज्ञाह्यमेवमतमौपनिषदैरप्यालंबितं तथा च भगवता बादरायणेन प्रणीतं सूत्रं अशुद्धमिति चेन्न श
ब्दात् ज्योतिष्टोमादिकर्म अग्निषोमीयहिंसामिश्रत्वात दुष्टमिति चेत न अग्नीषोमीयं पशुमालभेतेत्यादि
विधिशब्दादित्यक्षरार्थः जपयज्ञासापरं तु नारतवाक्यं न क्रत्वर्थहिंसाया अधर्मसाधनातावबोधकं तस्मात
ज्ञातात्पर्यति तस्मात्संख्यानां विहितनिषिद्धत्वज्ञानं अर्थहेतावनर्थहेतुत्वज्ञानं धर्मे चाधर्मत्वज्ञानं मनुष्टे
ये चाननुष्ठेयत्वज्ञानविपर्यासरूपं मोहः तस्मान्मोहान्नित्यस्य कर्मणोप! परित्यागः सतामसः परिकीर्ति
तः मोहो हि तमः दुःखमित्येवेति सः अनुपसंजातांतःकरणशुद्धितया कर्माधिकृतः कर्मत्यागो राजसस्ता
मसश्च दर्शितो हेयस्तर्हि कीदृगुपादेयः सात्त्विकस्त्याग इत्युच्यते कार्यमित्येवेति क्रियतेऽन्तःकरण १५८
शुद्धिपर्यंतं सत्यागः सात्त्विकः आदेयत्वेन सम्मतः ननु नित्यानां फलमेव नास्ति कथं फलं त्यक्
त्वेत्युक्तं उच्यते अस्मादेव भगवद्वचनान्नित्यानां फलमस्तीति गम्यते निष्फलस्यानुष्ठानासंभवात् तथा

---

चापस्तंबः तद्यथाम्रे फलार्थे निर्मिते छाया गंध इत्यनूत्पद्येते एवं धर्मं चर्यमाणमर्था अनूत्पद्यंत इत्यानुषंगि
कं फलं नित्यानां दर्शयति अकरणे प्रत्यवायस्मृतिश्च नित्यानां प्रत्यवायपरिहारं फलं दर्शयति धर्मेण पापम
नुदति तस्माद्धर्मं परमं वदंतीत्यादिश्रुतयश्च ज्ञानप्रतिबंधकपापक्षयलक्षणं ज्ञानयोग्यतारूपपुण्योत्पत्ति
लक्षणं वात्मसंस्कारं नित्यानां कर्मणां फलं दर्शयंति तदभिसंधित्यक्त्वा तान्यनुष्ठेयानीत्यर्थः यदुक्तं त्याग
सन्यासशब्दावेकार्थौ न पृथक्जातीयार्थौ किंतु फलाभिसंधिपूर्वककर्मत्याग एव तयोरर्थ इति पूर्वो
क्तं न प्रस्मर्तव्यं सात्त्विकत्यागफलमाह न द्वेष्टीति त्यागी सात्त्विकत्यागयुक्तः स यदा सत्त्वसमाविष्टः सत्त्वेनात्मा
नात्मज्ञानहेतुना चित्तगतेनातिशयेन सम्यक् ज्ञानप्रतिबंधकरजस्तमोमलराहित्येन सम्यंतात प्रयत्नाव्यभि
चारेण विशेषेण व्याप्तो भवति भगवदर्पितनित्यकर्मानुष्ठानात पापमलापकर्षणलक्षणेन ज्ञानोत्पत्तियोग्यता
रूपपुण्योपचयलक्षणेन च संस्कारेण संस्कृतमंतःकरणं यदा भवतीत्यर्थः तदा मेधावी शमदमसर्वकर्मोपरम
गुरूपसदनादिसमवायिकांगयुक्तेन मननिदिध्यासनाख्यफलोपकार्यंगयुक्तेन श्रवणेन ख्यवेदांत
वाक्यविचारेण परिनिष्पन्नं वेदांतमहावाक्यकरणकं निरस्तसमस्ताप्रामाण्याशंकं चिदन्याविषयकमहं
ब्रह्मास्मीति द्वन्द्वात्मैव यज्ञानमेव मेधा तया नित्ययुक्तो मेधावी स्थितप्रज्ञो भवति तदा छिन्नसंशयः अ

Indira Gandhi National
Centre for the Arts

॥गीटी०१५७॥ हवस्मास्मीति विधारूपया मेधया तदविधो ह्येदेतत्कार्यसत्ताद्यविपर्ययश्चन्यो भवति तदावक्षीणकर्मत्वात न
॥१५५॥ द्विष्टिकाम्यंनिषिद्धंवाकर्मनप्रतिकूलतयामन्यतेकुशलेनो भनेनित्येकर्मणि नानुषज्यते नप्रीतिं करोतिक
र्तत्वाद्यभिमानरहितत्वेनकृतमकृतत्वात तथा च श्रुतिः भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः क्षीयन्तेचास्य
कर्माणि तस्मिन्दृष्टे परावरे एवंप्रकारेण ज्ञातात्मतत्वस्य कर्मत्यागो युक्त इत्युक्तं संप्रत्यज्ञस्य तु कर्माकरणं
संभवेदेतत्कमादहनहिदेहभृतामिति देहभृता देहाभिमानवता कर्माणित्यक्तुं नशक्यं नशक्यानि तस्मात यस्त्व
ज्ञोधिकारी सत्वशुद्ध्यर्थं कर्माणि कुर्वन्नपि भगवदनुकंपया तत्फलत्यागी त्यभिधीयत इत्यनेन अत्यागप
पित्यागी चबोद्धव्य इति स्फुटत्यर्थं गौणसंन्यासी न्यायमुक्तः शुद्धसत्वस्तु मुख्यसंन्यासीतिचोक्तं तथा चानयोः
कः फलभेदः सउच्यते अनिष्टमिष्टं मिश्रं चेति अत्यागिनां कर्मफलत्यागित्वेपिकर्मानुष्ठायिनामज्ञानां गौण
संन्यासिनां प्रेत्यविविदिषापर्यंतं सत्वशुद्धेः पूर्वमेवमृतानां पूर्वकृतस्य कर्मणः फलं शरीरग्रहणं भवति कर्म
णइतिजात्यभिप्रायमेकवचनं कर्मणस्त्रिविधत्वात त्रिविधं फलं पापस्यानिष्टं पुण्यस्येष्टं मिश्रस्य पुण्यापु १५८
ण्ययुगलस्येष्टानिष्टसंयुक्तं मानुष्यलक्षणं इत्येवं त्रिविधं दत्यनुवादो हेयत्वार्थः मुख्यसंन्यासिनां तु विदेह
कैवल्यमेव भवतीत्याह नतु संन्यासिनां क्वचित परमज्ञानवतां मुख्यसंन्यासिनां परमहंसपरिव्राजकानां

---

प्रेत्यकर्मणः फलं त्रिविधं न भवति भिद्यते इति श्रुतेः पारमर्षस्तत्र चतत्त्वपृथिगमदर्थयोरस्थाप्यविनाशे
तत्प्रदेशात्प्रशात्मज्ञानादशेषकर्मक्षयं दर्शयतितेन गौणसंन्यासिनां पुनः संसारः मुख्यसंन्यासिनां तु मो
क्ष इति फलेविशेष इत्युक्तं भवतीत्येवं भाष्यकारीयः पंथा अन्ये तु अनाश्रितः कर्मफलं कार्यं कर्म करोति यः स
संन्यासी च योगी च न निरग्निर्न चाक्रिय इत्यत्र फलत्यागिषु संन्यासिशब्दप्रयोगात संन्यासिशब्देन फलत्या
गिनः कर्मिण एव गृह्यंते फलत्यागस्यो भयत्र समानत्वाच्च तेषां च सात्विकानां नित्यकर्मानुष्ठानेन पापसंभवा
तनानिष्टं फलं संभवति नापीष्टं काम्याननुष्ठानेश्वरसमर्पणात्तयोः फलस्य त्यक्तत्वात अत एव मिश्रमपिनेति त्रि
विधधर्मफलासंभवः अत एवोक्तं मोक्षार्थानिवर्तते तत्र काम्यनिषिद्धयोः नित्यनैमित्तिके कुर्यात प्रत्यवायजिहा
सयेत्याहुः यदपि अनाश्रितः कर्मफलमिति वाक्यं तदप्यश्रद्धचेतसो भगवदर्पणपुरःसरं नित्यं कामिकर्माणि
कुर्वतो स्तुतये स एव संन्यासीत्याद्युक्तं संन्यासो हि त्यागः चित्तगतविक्षेपाभावश्च योगः तौ चास्य विद्येते फलत्या
गात फल—तृष्णरूपचित्तविक्षेपाभावाच्च कर्मफलतृष्णात्यागएवात्र गौण्या हत्यासंन्यासयोगशब्दाभ्यामभि
धीयते सकामजनमपेक्ष्य प्राशस्त्यकथनाय तस्मादयमपिननिरग्निः अग्निसाध्यश्रौतकर्मत्यागी नभवति
न चाक्रियः अग्निनिरपेक्षस्मार्तक्रियात्यागी च भवतितथापि संन्यासी योगी चेतिमंतव्यः अथ चानिरग्निर

॥गीव्या०॥ रक्रियश्च न संन्यासी नापि योगी किंतु कर्मफलत्यागी संन्यासी योगी चेति न हि निंदेति न्यासेन फलत्यागस्तुरःस्म

रंकर्मणस्तुतिः अत्र चाक्रिय इत्यनेनैव सनेनैव सर्वसामंजस्ये निरग्निरिति व्यर्थं स्यादित्यग्निशब्देन सर्वाणि कर्मा

॥१६०॥ ण्युपलक्ष्य निरग्निरिति संन्यासी क्रियाशब्देन चित्तवृत्तीरुपलक्ष्याक्रिय इति निरुद्धचित्तवृत्तिर्योगी च कथ्यते तेन

न निरग्निः संन्यासी मंतव्यः न चाक्रियो योगी मंतव्य इति यथासंख्यमुभयव्यतिरेको दर्शनीयः एवं सति न श्रद्धेयम

प्युपपन्नं इदं वा तेनैवं स्वस्वाश्रमोचितकर्मानुष्ठानादिसत्त्वशुद्धिः परमवैराग्यं श्रवणादि ज्ञानं जीवन्मुक्तिर्वासना

क्षय इत्येतां तामोक्षपूर्वमादि सामग्री स्वः स्वाश्रमोचितकर्मानुष्ठानमारभ्य संपादनीया तात्संपादनं च सात्त्विकवा

सनानामिकदैवी संपत्संपन्नानामेव जायते न त्वतद्विपरीत राजसतामसवासनानामिकासुरसंपत्संपन्ना

नां तथा च सेवादेया तथा च भगवद्गीतायां अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः दानं दमश्च यज्ञश्च

स्वाध्यायस्तप आर्जवं अहिंसा सत्यमक्रोधस्त्यागः शांतिरपैशुनं दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलं ते

जः क्षमा धृतिः शौचमद्रोहो नातिमानिता भवंति संपदं दैवीमभिजातस्य भारत दंभो दर्पोऽभिमानश्च क्रोधः पारु ॥१६०॥

ष्यमेव च अज्ञानं चाभिजातस्य पार्थ संपदमासुरीं दैवी संपद्विमोक्षाय निबंधायासुरी मतेति अभयं सर्व

भूताभयदानसंकल्पपालनं एतच्चान्यदपि परमहंसधर्माणामुपलक्षणं सत्त्वसंशुद्धिः श्रवणादिपरिपाके

णस्यासंभावनाविपरीतभावनादिमलराहित्यं ज्ञानमात्मसाक्षात्कारः योगो मनोनाशो वासनाक्षयानुकू

लः पुरुषप्रयत्नः स्तास्यां विशिष्टा संसारितिलक्षणावस्थितिः जीवन्मुक्तिः एवं परमहंसानां फलभूतां दै

वीं संपदमुक्त्वा तातोन्येषां गृहस्थानां साधनभूतामाह दानमिति दमः ऋतुकालायतिरिक्तकाले मैथुनाघना

वः यज्ञः श्रौतो दर्शादिः स्मार्तः पंचयज्ञादिः स्वाध्यायज्ञस्येतत ब्रह्मचारिधर्मकथनार्थं अन्यस्यापि वयज्ञेनैवोप

पत्तेः तपः वानप्रस्थस्यासाधरणो धर्मः चतुर्णामाश्रमाणां धर्मानुक्त्वा चतुर्णां वर्णानामाह आर्जवमित्यादिन

आर्जवादयो अचापल्यांताः ब्राह्मणस्यासाधारणधर्माः तेजः क्षमा धृतिरिति त्रयं क्षत्रियस्य शौचं आत

रंधनार्जनादौ अवंचकत्वादिराहित्यं न तु मृज्जलादिजनितं वा समग्रग्राह्यं तस्य शरीरशुद्धिरूपतया बाह्यत्वेनां

तःकरणवासनात्वाभावात तद्वासनानामेवांतःकरणगतानां सात्त्विकादिभेदेन भिन्नानां दैव्यासुर्यादिसं

पत्वेनाभ्युपतिपिपादयिषितत्वात अद्रोहो अनतिमानितेत्यनेनासाधारणो धर्मो गृहीतौ तमेतमिति श्रुत्या

विविदिषोपयिकतया विनियुक्ताः असाधारणाः साधारणाश्च वर्णाश्रमधर्मा इहोपलक्ष्यंते एते धर्मा भवंति

संपदं ते शुद्धसत्त्वमयीं सपदं वासनासंततिं शारीरारंभकाले पुण्यकर्माभिव्यक्तामभिलक्ष्य जातस्य पुरु

षस्य एता वासनाश्च जन्मांतरार्जितपुण्येनेति पाप संप्रज्ञो मनीदेघमितिनावः पापाभिरतस्या करीतपद

Indira Gandhi National Centre for the Arts

माह दंभइत्यादि आसुरीमसुरगणहेतुभूतां रजस्तमोमयीं संपदमशुभवासनासंततिं शारीरारंभकाले पापकर्मभिरभिव्यक्तामभिलक्ष्य जातस्य कुपुरुषस्य दंभादयोऽनंता दोषा एवं भवंति न त्वभयादयो गुणा इत्यर्थः दैवी संपदा युक्तस्यैव भगवद्भक्तिरपि जायते नान्यस्य तथा चोक्तं भगवता महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः भजंत्यनन्यमनसो ज्ञात्वा भूतादिमव्ययमिति संपदोः फलविभागमाह दैवी संपदिति यस्या आश्रमादेर्यविहिता सात्त्विकी फलाभिसंधिरहिता क्रिया सा तस्य दैवी संपत् सा सत्वशुद्धिभगवद्भक्तिज्ञानयोगस्थितिपर्यंता संसारबंधनात् मोक्षाय भवति अतः सैवोपादेया या यस्य भास्वनिषिद्धा फलाभिसंधिपूर्वा साहंकारा च राजसी तामसी क्रिया तस्य सा सर्वा आसुरी संपत् राक्षस्यपि तत्रैवांतर्भूता सा च बंधाय अतः सा हेयैवेति भावः चेतः शुद्धिकालीनानि ज्ञानसाधनान्याह भगवान् अमानित्वमदंभित्वमहिंसा क्षांतिरार्जवं आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः इंद्रियार्थेषु वैराग्यमनहंकार एव च जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनं असक्तिरनभिष्वंगः पुत्रदारगृहादिषु नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु मयि चानन्ययोगेन भक्तिरव्यभिचारिणी विविक्तदेशसेवित्वमरतिर्जनसंसदि अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनं एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा आचार्य उपदेष्टा गुरुः स्थैर्यं मोक्षसाधने प्रवृत्तस्य मोक्षे विघ्नेपि सत्य स्थिरत्वं आत्मनो मनो देहादिसंघातस्य निग्रहः भगवति नवविधभक्तिलक्षणे परमं ज्ञानसाधनमित्याह मयि चानन्ययोगेनेति मयि भगवति वासुदेवे भक्तिः सर्वोत्कृष्टत्वज्ञानपूर्विका प्रीतिविशेषः उत्कर्षज्ञानपूर्वो हि स्नेहो भक्तिरुदाहृतेति वचनात् अनन्ययोगेन नान्यो वासुदेवात् परो देवोऽस्त्यतः स एव नो गतिरित्येवं निश्चयेन प्रीतिर्न यावन्मयि वासुदेवे न युज्यते देहयोगेन तावत् इत्युक्तेः जनसंसदि विषयलंपटजनसमवाये अरतिः साधूनां संसदि तु स्थैर्यमेव तथा च मार्कंडेयपुराणे संगः सर्वात्मना त्याज्यः स चेत्यक्तुं न शक्यते स सद्भिः सह सकर्त्तव्यः संतः संगस्य हि भेषजमिति अध्यात्म आत्मानमधिकृत्य प्रवृत्तमात्मानात्मविवेकज्ञानं अध्यात्मज्ञानं तस्मिन्नित्यत्वं तत्रैव निष्ठावत्त्वं तत्त्वज्ञानस्य साक्षात्कारस्य वेदांतवाक्यकरणकस्यार्थः प्रयोजनं दुःखनिवृत्त्यनुस्यूतपरमानंदावाप्तिरूपमोक्षः प्रयोजनं मौलिभूतस्तस्य दर्शनमालोचनं तत्त्वज्ञानफलालोचने हि तत्साधने प्रवृत्तिः स्यात् एवं ज्ञानमिमानि त्वादितत्त्वज्ञानार्थदर्शनांतं विंशतिसंख्याकं ज्ञानमिति प्रोक्तं ज्ञानार्थत्वात् इति अनन्यभावेन भगवच्छरणप्रपत्तेः प्रजातभगवत्प्रसादोऽपि ज्ञानहेतुः तथा चोक्तं भगवता ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति भ्रामयन् सर्वभूतानि यंत्रारूढानि मायया तमेव शरणं गच्छ सर्वभावेन भारत तत्प्रसादात् परां शांतिं स्थानं प्राप्स्यसि शाश्वतं इति तेज्ञानमाख्यातं गुह्याद्गुह्यतरं मया वि १६१

Indira Gandhi National
Centre for the Arts

॥मोक्षप०॥ मत्त्वैतदशेषेण यथेच्छसि तथा कुरु शरणगतोऽहं त्वां नावमाहस एव सर्वगुह्यतमं भूयः शृणु मे परमं वचः
इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितं मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु मामेवैष्यसि सत्यं ते प्रति
॥१६२॥ जाने प्रियोऽसि मे तथा सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः
सर्वधर्मान् परित्यज्य ममाराधनं कुर्विति भगवदाराधनप्राधान्यप्रतिपादनपरमिदमिति कल्पतरुप्रभृतयः
तथा अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते इति मत्वा भजंते मां बुधा भावसमन्विताः मच्चित्ता मद्गतप्राणा बोध
यंतः परस्परं कथयंतश्च मां नित्यं तुष्यंति च रमंति च तेषां सततयुक्तानां भजतां प्रीतिपूर्वकं ददामि बुद्धियोगं
तं येन मामुपयांति ते तेषामेवानुकंपार्थमहमज्ञानजं तमः नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वतेति
नरसिंहपुराणे नारद उवाच यः संसारे सदा द्वंद्वैः कामक्रोधशुभाशुभैः शब्दादिविषयैर्बद्धः पीड्यमानः षड
र्मिभिः कथं विमुच्यते क्षिप्रं मर्त्यः संसारसागरात् भगवन् ब्रूहि मे श्रोतुमिच्छामि त्रिपुरांतक ईश्वर उवाच ज्ञा
नामृतं परं गुह्यं रहस्यं ऋषिसत्तम वक्ष्यामि शृणु वा घतं सर्वजंतुभयापहं तृणादि चतुरास्यांतं भूतग्रामं १६२
चतुर्विधं चराचरं जगत्सर्वं प्रसुप्तं यस्य मायया तस्य वि— :प्रसादेन यदि कश्चित्प्रबुध्यते स निस्तरति संसा
रं देवानामपि दुस्तरमिति अथ ज्ञानसंपादकश्रवणस्य विक्षेपराहित्यं विना संभवात्तदर्थं ज्ञानहेतुः

संन्यासोऽनुष्ठेयस्ततः श्रवणं तथा च नारदः नैतादृशं ब्राह्मणस्यास्ति वित्तं यथैकता सत्यता समता च शीलं स्थि
तिर्दंडनिधानमार्जवं ततः ततश्चोपरमः क्रियाभ्यः इति ज्ञानहेतुप्रकरणे विधानात् क्रियोपरम एव संन्यासः
अथ श्रवणं तत्र प्रथमं गुरूपसत्तिः कर्तव्या तथा च श्रुतिः परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमाया
न्नास्त्यकृतः कृतेन तद्विज्ञानार्थं गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमिति वसिष्ठे गुरुमुपगम्य
दक्षिणं जान्वाच्य पादावुपसंगृह्याह अधीहि भगवो ब्रह्मेति तत्र मंत्रः ओं ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च
प्रहिणोति तस्मै तं देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्य इति अत एव मुमुक्षायामप्यधिकारविशेष
णत्वमायाति पराशरपुराणे श्रोतव्यः श्रुतिवाक्येभ्यो मंतव्यश्चोपपत्तिभिः मत्वा च सततं ध्येय एते दर्शनहेतवः
श्रवणलक्षणमपि तत्रैव तत्र तावन्मुनिश्रेष्ठाः श्रवणं नाम केवलं उपक्रमादिभिर्लिंगैः शक्तितात्पर्यनिर्णय इति
याज्ञवल्क्यः सर्वाश्रमैर्विजिज्ञास्यः समस्तैरेवमेव तु द्रष्टव्यस्त्वथ मंतव्यः श्रोतव्यश्च द्विजातिभिः अत्रैवं व्याख्या
नं खल्वपरमात्मा समस्तैराश्रमैर्विजिज्ञास्यो विशेषतो ज्ञातुमिष्टव्यः अत्र च परमात्मविषयविज्ञान
स्याश्रमानप्रति साध्यता प्रत्येतव्या इष्यमाणत्वात् न पुनस्तद्विषयेच्छाया इष्यमाणं प्रतिगुणत्वात् न च प्रत्ययार्थत्वे
नेच्छाया एव प्राधान्यं वाच्यं सा हि सन्प्रत्ययेन प्राधान्येनाभीप्सिततमं प्रति गुणत्वेन— अतोऽतेन प्रत्ययार्थत्वेऽपि तस्या

Indira Gandhi National Centre for the Arts

॥मी०न्या०॥

१६३

गुणभावएवएवंवचनंचपुनरावर्त्तते ब्रह्मवेद ब्रह्मैवभवतीत्यादिवचनान्तर्गतापुनरावृत्तिप्रयोजनकज्ञानमात्रमा
णांसाध्यमित्युक्तंभवति ब्रह्मज्ञानस्यप्रयोजनत्वात्एतद्विषयेच्छासिद्धेर्नेच्छायाविधेयताविधेरप्राप्तविषय
त्वात् कीदृशंपुनस्तज्ज्ञानमेषितव्यमित्यपेक्षायामाह द्रष्टव्यइति साक्षात्कर्तव्यइत्यर्थः तदुपायत्वमाह मंत
व्यःश्रोतव्यइति श्रुतिवाक्येभ्यो आत्मविचारःश्रवणंयुक्तिभिस्तच्चिंतनंमननंध्यानमपिशास्त्रांतर्थैवैतन्मूला
श्रुतिरपिआत्मावारेद्रष्टव्यःश्रोतव्योमंतव्योनिदिध्यासितव्यइति अत्रद्रष्टव्यइत्यनेनदर्शनमुद्दिश्यश्रवणादी
निविधीयंतेतत्रश्रवणस्यदर्शनोद्देशेनविधानात्पूर्वमेवश्रमसाक्षात्कारंप्रतिश्रवणस्यहेतुतायाअन्यत्राप्रा
प्तत्वात्सहकार्यंतरविधिःपक्षेणतृतीयंतद्वतोविद्यादिवदित्यधिकरणेविधासहकारिमौनस्यबाल्यपांडि
त्यवत्विधिरेवाश्रयितव्यःअपूर्वत्वादितिपांडित्यशब्दितेश्रवणेपूर्वविधिरेवाश्रयितव्यइत्यंगीकृतमिति
केचित्विवरणानुसारिणस्तुअपरोक्षवस्तुविषयप्रमाणत्वावच्छेदेनसाक्षात्कारंप्रतिहेतुतायाअवगमात
विचारस्यविचार्यनिर्णयहेतुतायाश्चान्यत्रसिद्धत्वात्ततएवचब्रह्मविचारसहकृतप्रमाणस्यब्रह्मसाक्षात्का १६३
रहेतुतायाअपिप्राप्तत्वेनापूर्वविधितातावन्नयुज्यतेअतएवावृत्तिसकृदुपदेशादित्यधिकरणभाष्येदर्शनपर्य
वसानानिहिश्रवणादीन्यावर्त्यमानानिदृष्टार्थानिभवंतियथावघातादीनितंडुलनिष्पत्तिपर्यवसायीनीति

श्रवणस्यब्रह्मदर्शनार्थस्यदृष्टार्थतयादर्शपौर्णमासिकावघातन्यायप्राप्तत्वमुपदर्शयत्याद्युक्तंअतोनियम
विधिरेवायुक्तःजुष्टंयदापश्यत्यन्यमीशमस्यमहिमानमितिवीतशोकइत्यादिश्रवणाद्विनाप्यज्ञानान्मुक्तिरितित्र
प्रसंभवेनमुक्तिसाधनज्ञानायभिन्नात्मविचाररूपशास्त्रांतरश्रवणेपिप्रवृत्तिःपक्षेपिस्यादित्यद्वितीयात्मपर
वेदांतश्रवणनियमविधिरस्तुइहवात्मशब्दस्यइदंसर्वंयदयमात्माइत्यादिप्रकरणपर्यालोचनयाद्वितीया
त्मपरत्वात् नहिवस्तुसत्साधनांतरप्राप्तावेवनियमविधिरिति कुलधर्मःयेनब्रह्मसाक्षात्कारस्यवेदांतश्रवणै
कसाध्यत्वस्याभ्युपगंतव्यत्वेनतत्रसाधनांतरस्यप्राप्त्यभावात्ननियमविधिर्युज्यतइत्याशंक्यैतत्किंतुयत्रसा
धनांतरतयासंभाव्यमानस्यपक्षेप्राप्त्याविधित्सितसाधनस्यपाक्षिकप्राप्त्यभावोनिवारयितुंनशक्यतेतत्रनिय
मविधिःतावतैवाप्राप्तांशपरिपूरणस्यतत्फलस्यसिद्धेःएवंलिखितपाठादिनापिस्वाध्यायग्रहणप्रसक्तौगु
रुमुखाधीनाध्ययननियमविधिवत्स्वप्रयत्नमात्रपूर्वकस्यापिवेदांतविचारस्यसत्तानिश्चयरूपसाक्षात्कारा
र्थत्वेनपक्षेप्राप्तौगुरुमुखाधीनश्रवणविधिरप्यस्तुभवतद्विज्ञानार्थंगुरुमेवाभिगच्छेदितिगुरूपसदनवि
धिनैवगुरुरहितविचारव्यावृत्तिसिद्धेर्निष्फलोनियमविधिरितिशंक्यंगुरूपसदनस्यश्रवणांगतयाश्रवणविध्य
भावेतद्विधिरेवनास्तीतितेनतस्यवैफल्यासिद्धेःअन्यथाध्ययनांगभूतोपगमविधिनैवलिखितपाठादिव्यावृ

National
Centre for the Arts

॥मी॰द्व॰व॰॥ त्तिरित्यध्यः यन्नियमोपि विफलः स्यात् अथवाद्वैतात्मज्ञाप्रतिबंधश्रवणस्यपदेशात्स्याद्वेदांतश्रवणवन्नियमा
विधिरस्तु न च मनश्चित्तवाद्वित्यादिनिषेधादेव तत्प्राप्तिः ज्ञाअव्युत्पत्तिमांद्यात वेदांतश्रवणमज्ञाक्षामितिपुरुषा
१६४ र्थनिषेधमुद्रयाप्तिज्ञाप्रतिबंधेनाद्वैतंजिज्ञासमानस्य तत्रापिप्रवृत्तिसंभवेन नियमविधेरर्थवत्वोपपत्तेःकर्त्रः
र्थिकरणेपुरुषार्थेश्वतवदननिषेधेस्यात्पिदर्शपूर्णमासमध्येकृतश्चिद्देतोरंगीकृततन्निषेधोहंधनस्यक्र
तुसिद्धिमात्रंकामयमानस्याद्वतवदनेप्रवृत्तिंत्यादिति पुनःक्रत्वर्थतयादर्शपूर्णमासप्रकरणेनाद्वतंवदेदि
तिनिषेधइतिक्रत्वर्थतयानिषेधस्यार्थत्वंव्युत्पादितंसहकार्यंतरविधिरित्यधिकरणन्यायेअपूर्वविधित्वो
क्तिःक्तनियमविधित्वेपिपाक्षिकाप्राप्तिसद्भावात्तदनिषायेतिकेचित्तुवेदांतश्रवणेननब्रह्मसाक्षात्कारःकिं
तुमनसैवमनसैवानुद्रष्टव्यमितिश्रुतेः शास्त्राचार्योपदेशशमदमादिसंस्कृतंमनआत्मदर्शनेकारणमितिगी
ताभाष्याच्च श्रवणंतु निर्विचिकित्सपरोक्षज्ञानार्थमितितादर्थ्येनैव नियमविधिरिति आत्माश्रोतव्यइतिमन
नादिवदात्मविषयकत्वेन विधीयमानं श्रवणमागमाचार्योपदेशजमात्मज्ञानमेव न तु तात्पर्यविचाररूपमि १६४
तिनतत्रकोपिविधिःअतएव समन्वयसूत्रे आत्मज्ञानविधिनिराकरणानंतरंनाप्येकिमर्थानितर्हिआत्मावा
रेद्रष्टव्यइत्यादीनिवचनानिविधिच्छायानिस्वाभाविकप्रवृत्तिविषयविमुखीकरणार्थानीतिब्रूमइत्यादि

यदिचवेदांततात्पर्यविचारःश्रवणंतदातस्यतात्पर्यनिर्णयद्वारावेदांततात्पर्यभ्रमसंशयरूपप्रतिबंधकनि
रासएवफलंनप्रतिबंधकांतरनिरासोब्रह्मावगमोवातत्फलकत्वंचतस्यलोकव्यवहारसाधनांतरंचकिंचिद्वि
कल्प्यसमुच्चित्यवानप्राप्तमितिनतत्रनियमस्याप्यवकाशः विचारविधानाभावेपिविज्ञानार्थंविधीयमानंगुरूपस
दनंदृष्टद्वारसंभवोदृष्टकल्पनायोगात्गुरुमुखाधीनवेदांतविचारद्वारैवविज्ञानार्थपर्यवस्यतीतिअतष्ट
वस्वप्रयत्नसाध्यविचारव्यावृत्तिः अध्ययनेयविध्यभावेतूपगमनंअक्षरग्रहणार्थत्वाभावेनापर्यवसितंस्या
त्नचतात्पर्यादिभ्रमनिरासायवेदांतविचारार्थिनःकदाचिद्द्वैतशास्त्रेपिप्रवृत्तिःस्याततत्रापितदभिमतयो
जनायांवेदांतविचारसत्वात्इत्यद्वैतात्मवेदांतविचारनियमविधिरर्थवानितिवाच्यंस्वयमेवतात्पर्यभ्रमहेतो
स्तस्यतन्निरासकत्वाभावेनसाधनांतरप्राप्त्यभावात् तन्निरासकत्वभ्रमेणतत्रापिप्रवृत्तिःस्यादित्येतावताशो
तव्यनियमविधेरभ्युपगमइत्यपिनईश्वरानुग्रहफलाद्वैतश्रद्धारहितस्यश्रोतव्यवाक्येपिपरानभिमतयोज
नयासहितीयात्मविचारविधिपरत्वभ्रमसंभवेनभ्रमजनिततायाअन्यत्रप्रवृत्तेर्विधिशतेनाप्यपरिहार्यत्वा
तनवव्यापारांतरनिवृत्त्यर्थापरिसंख्येतिवाच्यंअसंन्यासिनोव्यापारांतरनिवृत्तेरशक्यत्वातसंन्यासिनश्च
निवृत्तेर्ब्रह्मसंस्थतयासहसंन्यासविधायकेनब्रह्मसंस्थोमृतत्वमेतीतिश्रुत्यंतरेणसिद्धतयासंन्यासवि

Indira Gandhi National Centre for the Arts

मोक्षध०॥ ध्यायकत्वं तु पंतरमयेद्य श्रोतव्यो वाक्येन तस्य व्यापारांतरनिवृत्त्युपदेशस्य व्यर्थत्वात् न च विचारविधिसंभवे
पि विचारांतरविषयवेदांतनियमविधिः संभवति पापक्षयादिद्वारा वर्तसंभवात् इति शांकरस्याध्यायोध्ये
॥२६५॥ तव्य इत्यर्थविधो ध्यार्थनियमविधिबलादेवाध्ययनगृहीतवेदोत्पादितं वेदार्थज्ञानं फलोपहितं न प्रकारांत
रेणोत्पादितं इत्यस्यार्थस्य लब्धत्वेन वेदार्थब्रह्मणि ज्ञातव्ये पापक्षयादीनामप्राप्तेः न च सहकार्यंतरविधिरि
त्यधिकरणे वाल्यपांडित्यमौनशब्दितेषु श्रवणमनननिदिध्यासनेषु विधिरभ्युपगम्यत इति वाच्यं विचारवि
चार्यतात्पर्यनिर्णयहेतुत्वस्य वस्तुसिद्धानुकूलयुक्त्यनुसंधानरूपे मनने तत्प्रत्ययाभ्यासरूपे निदिध्यास
ने च वस्तुवैगमदैवताबाह्यहेतुत्वस्य लोकसिद्धत्वेन तेषु विध्यनपेक्षणात् विधिच्छायार्थवादस्यैव प्रशंसाद्वारा
प्रवृत्त्युत्पत्तिजनकत्वमात्रेण तत्र विधित्वव्यवहारात् एवं च श्रवणविध्यभावात् कर्मकांडविचारवत् ब्रह्मकां
डविचारोऽप्यध्ययनविधिमूल इत्याचार्यवाचस्पतिपक्षावलंबिनः मनननिदिध्यासने अपि ज्ञानहेतुतत्त्वरू
पयुक्तं कांडे सर्ववेदांतवाक्यानां आचार्यमुखतः पियात् वाक्यानुग्राहकन्याययोजनं भवेत निदिध्या २६५
सनमैकाग्र्य श्रवणमनने पिद्वेति एतेषु श्रवणमेव प्रधानं अथ योगः तत्र देवलः द्विविधं निःश्रेयसमिति सां
ख्ययोगादिति पंचविंशतितत्त्वज्ञानं सांख्यं विषयेभ्यो निवृत्याभिप्रेते र्थे मनसो वस्थानं योगः उभयत्रा

पवर्गः फलं विमुक्तये तदेतत्कथितं राजन् विधायां मया तव श्लोके ज्ञानात्स्वरूथकरं योगादन्यन्न विद्यते यो
गि याज्ञवल्क्यः सर्वधर्मान् परित्यज्य योगधर्मं समाश्रयेत् सर्वधर्माः सदोषास्तु पुनरुत्पत्तिकारकाः नेहाभि
क्रमनाशोस्ति प्रत्यवायो न विद्यते स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् अभिक्रमआरंभः नाशो नैष्फल्यं
माहात्म्यं रते यथा वानिमिषा स्थूला जालं भित्वा पुनर्जलं प्राप्नुवंति तथा योगात्तत्पदं वीतकल्मषाः अनिमि
षा मत्स्याः तथैव वागुरीं छित्वा बलवंतो यथा मृगाः प्राप्नुयुर्विमलं मार्गं विमुक्ताः सर्वबंधनैः लोभजानि तथा
राजन् बंधनानि बलान्विताः छित्वा योगात्परं मार्गं गच्छंति विमलाः शिवं यथा चात्राकुनाः सूक्ष्माः प्राप्य जा
लमरिंदम तत्राशक्ता निबध्यंते विमुच्यंते बलान्विताः कर्मजैर्बंधनैर्बद्धाः सत्वंगगाः परंतप अबला श्चैव नश्यंति
मुच्यंते च बलान्विताः अल्पमस्तो यथा धर्मीलघुं हंति समाहितः युक्तः सम्यक् तथा योगी मोक्षं प्राप्नोत्यसंशयं य
था कश्चिद्घनं घोरं चक्र सर्पसरीसृपं श्वव्याघ्रोऽतो यथा नंदगर्भं बहुकंटकं अनुक्रमाटवीप्राप्यं दावदग्धम
हीरुहं पंथानं तस्कराकीर्णं क्षेमेणाभिपतेन्नरः योगमार्गं समाश्रित्य यः कश्चित् भजते द्विजः क्षेमेणोपरमे
न्मार्गं विघ्नदोषविनाकृतं तथा अपि वर्णावकृष्टस्तु नारी वा धर्मकांक्षिणी तावप्येतेन मार्गेण गच्छेतां परमां
गतिं तथा नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना न चाभावयतः शांतिरशांतस्य कुतः सुखं तपस्विभ्योधि

Indira Gandhi National Centre for the Arts

॥मो॰ल॰१०॥ को योगी ज्ञानिभ्योऽप्यधिको मतः कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन योगिनामपि सर्वेषां मद्गतेनान्त
रात्मना श्रद्धावान्भजते यो मां स मे युक्ततमो मतः विष्णुधर्मेषु यत्तद्ब्रह्म परं प्रोक्तं विशाख्यमजमव्ययं चेत
।१६६। सः प्रलयस्तत्र योग इत्यभिधीयत इति एवंच ब्रह्मणि चेतसो लयः निरुद्धवृत्तिकत्वमिति योगसामा[न्य]लक्ष
णमुक्तं भवति स च योगो द्विविधः संप्रज्ञातोऽसंप्रज्ञातश्चेति तथाच विष्णुधर्मेषु द्वे विभूतिरूप योगस्य परश्चापरमेव
चेति तत्र संप्रज्ञातो नाम राजसतामसवृत्तिवैधुर्ये सति विषयविशेषमात्रावलंबि सत्ववृत्तिविशेषः विष्णुपुरा
णे आत्मप्रयत्नसापेक्षा विशिष्टा या मनोगतिः तस्या ब्रह्मणि संयोगो योग इत्यभिधीयत इति तथाहृष्टा
नुज्ञानार्गमितुं ध्यानरयालंबनत्रिधा नहि निर्विषये ध्यानीभूतवृत्तिरिष्यते ध्यानसप्रणतयोगः अंगम्य
तध्यानस्य प्रागेवोक्तत्वात्प्रधानयोगप्रकरणे — स यद्वसः प्रत योगो ब्रह्मविलयश्च निदिध्यासनरूप
तथा साक्षात्कारहेतुत्वात् श्रेयोक्तितः ननु पातंजली यानामिव यत्किंचिद्विषयकः तथाच विष्णुधर्मेषु श्री
ब्रह्मस्तंबपर्यंतं जगदंतर्व्यवस्थिताः प्राणिनः कर्मजनितसंस्कारवशवर्तिनः यतस्ततो नते ध्यानध्या १६६
निनामुपकारकाः अविद्यागतताः सर्वे ते हि संसारगोचराः पश्चादुद्भूतबोधाश्च ध्याने नैवोपकारकाः
नैसर्गिको वदेवोधस्तेषामन्यतो यतः तस्मात्तदमलं ब्रह्म निसर्गादेव बोधवत् ध्येयध्यानविकासस्था

क्ष्यद्विष्णोः परमं पदं न तद्यज्ञैर्न दानेन न तपोभिर्न तद्व्रतैः प्राप्यते काग्रमनसो ध्यानेनैव सनातनात् न चावि
ष्णोः परं रूपं मानिर्देश्यमजं स्थिरं यतः प्रवर्त्तते सर्वं लयमभ्येति यत्र च अनिर्देश्यमजं स्वप्रभं सूक्ष्मानामक्षा
श्चतीयोगिनस्तं प्रपश्यतीति भगवत सनातन ब्रह्मण्येवस्थितविन्नी सर्वतः संनिवर्त्तितं नोन्यालंबनतसापेक्षी
योगिनीसिद्धिकारकमिति सामान्यलक्षणपूर्वकं द्विविधो योगो निरूपितः पातंजले सूत्रं च योगश्चित्तवृत्ति
निरोध इति चित्तं हि त्रिगुणनिर्मितं प्रकाशप्रवृत्तिस्थितिस्वभावं क्षिप्तादिभूमियुक्तं भवति तद्यथा क्षिप्तं मूढं विक्षि
प्तमेकाग्रं निरुद्धमिति तत्र क्षिप्तं रजोगुणोद्रिक्तेन विषयेषु स्थिरं रागिव मूढं निद्रावृत्तिमत् विक्षिप्तं क्षिप्ताद्वि
शिष्टं सत्वाश्रयतया केषुचिद्विषयेषु स्थिरमपि रजसा तेषु तेषु विषयेषु लोलुपं धर्मादिमात्रप्रियं एकाग्रं
विशुद्धसत्वाश्रयतया एकस्मिन्नेव विषये स्थितं निरुद्धं निरुद्धसकलवृत्तिकं संस्कारमात्रावशेषं तत्र भूमि
त्रये जातोऽपि निरोधो न योगः किंतु एकाग्रनिरुद्धयोरेव जायते योगः तत्रैकाग्रभूमावपि भूमिचतुष्टयं त
द्यथा अन्या सवितर्का मधुमती प्रज्ञाज्योतिः अतिक्रांतभावनाच ननु यत्किंचि[त्] चित्तवृत्तिनिरोधो यावच्चित्तनि वृत्ति
रोधाभावान्नाद्यः यत्किंचिन्निरोधस्य क्षिप्तादावपि भावान्न द्वितीयः संप्रज्ञाताव्याप्तेः तत्रवृत्तेः स्वीकारात् उच्य
ते क्लेशसाधनवृत्तिनिरोधस्यैव विवक्षितत्वात् क्लेशहेतुभूता वृत्तयस्तत्रैव प्रमाणविपर्ययविकल्पनिद्रास्मृतय

Indira Gandhi National Centre for the Arts

॥मोक्ष१०॥ इति पंचविधाः तत्र प्रत्यक्षानुमानागमोपमानार्थापत्त्यभावाख्यानि प्रमाणानि षडिति भाट्टवेदांतिनौ प्रत्यक्षा
नुमानागमाः त्रीणि प्रमाणानीति योगाः अंतर्भावबहिर्भावाभ्यां संकोचविकासौ द्रष्टव्यौ विपर्ययो मि
।१६९। थ्याज्ञानं तस्य पंचभेदाः अविद्यास्मितारागद्वेषाभिनिवेशाः तएव च क्लेशाः शब्दज्ञानानुपाती वस्तुशून्यो
विकल्पः शशविषाणमसदित्येवरूप अभावप्रत्ययालंबना वृत्तिर्निद्रा चतसृणां वृत्तीनामभावस्य यः कार
णं तमो गुणः तदालंबना वृत्तिरेव निद्रा नतु ज्ञानाद्यभावमात्रमित्यर्थः अनुभूतविषयासंप्रमोषः प्रत्ययस्मृ
तिः पूर्वानुभवजं ज्ञानं स्मृतिरित्यर्थः लज्जादिवृत्तीनामपि पंचस्वेवांतर्भावो द्रष्टव्यः एतासां वृत्तीनां निरो
धो योग इति समाधिरिति च कथ्यते इदमुपलक्षणं संकल्पलक्षणवृत्तेरपि [illegible] निरोधो द्रष्टव्यः उक्तं च भगवता
न ह्यसंन्यस्तसंकल्पो योगी भवति कश्चनेति योगी युंजीत सततमात्मानं रहसि स्थितः एकाकी यतचि
त्तात्मा निराशीरपरिग्रह इति चेति संप्रज्ञातयोगोपि पातंजले वितर्कविचारानंदास्मितानुगमात्संप्रज्ञातः
सम्यक् संशयविपर्ययानध्यवसायरहितत्वेन प्रज्ञायते प्रकर्षेण विशेषरूपेण ज्ञायते ध्येयस्वरूपं ये १६९
न स संप्रज्ञातः समाधिर्भावनाविशेषः स च वितर्कादिभेदैश्चतुष्प्रकारकः यद्वा वितर्कादिभेदभिन्नत्वं संप्र
ज्ञातत्वमित्यर्थः भावनारूपः समाधिः संप्रज्ञातः अयमेव ब्रह्माकारमनोवृत्तिप्रवाहो निदिध्यासनशब्दे

नोच्यते औपनिषदैस्तदुक्तं ब्रह्माकारमनोवृत्तिप्रवाहोहंकृतिं विना संप्रज्ञातसमाधिः स्यात् ध्यानाभ्यासप्र
कर्षतः इति एतदेवाभिप्रेत्योक्तं भगवता योगी युंजीत सततमिति एवं च भावनारूपो योगो भाव्यानेकत्वादने
कविधः भाव्यं चात्र त्रिविधं ग्राह्यग्रहणगृहीतृभेदात् ग्राह्यमपि द्विविधं स्थूलसूक्ष्मभेदात् उक्तं च पातंजले
क्षीणवृत्तेरभिजातस्येव मणेर्गृहीतृग्रहणग्राह्येषु तत्स्थतदंजनता समापत्तिः ध्यानादिव्यावृत्त संप्रज्ञा
तनिरूपणाय इदं सूत्रं क्षीणा राजसतामसवृत्तयो यस्य तच्चित्तस्य गृहीतृग्रहणग्राह्येष्वात्मेंद्रियविषयेषु
तत्स्थता तत्रैवैकाग्रता तदंजनता तन्मयता न्यग्भूते चित्ते भाव्यमानस्यैवोत्कर्ष इति यावत् तथाविध समाप
त्तिस्तद्रूपः परिणामो भवति यथाभिजातस्य निर्मलस्य स्फटिकमणेस्तत्तदुपाश्रयवशात्तत्तद्रूपापत्तिरेवं नि
र्मलस्य चित्तस्य तत्तद्भावनीयवस्तूपरागात्तत्तद्रूपापत्तिर्भवति सा समापत्तिः समाधिरित्यर्थः अत्र च भू
मिकाक्रमवशात् ग्राह्यग्रहणगृहीतृ इति क्रमो बोद्धव्यः प्रथमं ग्राह्यनिष्ठ एव समाधिर्भवति ततो ग्रहणनि
ष्ठस्ततो गृहीतृनिष्ठ इति क्रमस्य स्पष्टीकरणात् तत्र यदा स्थूलं महाभूतेंद्रियात्मकं षोडश विकाररूपं वि
षयमादाय पूर्वापरानुसंधानेन शब्दार्थोल्लेखेन च भावना क्रियते तदा सवितर्कसमाधिः अस्मिन्नेवालं
बने पूर्वापरानुसंधानशब्दार्थोल्लेखशून्यत्वेन भावना क्रियते तदा निर्वितर्कः समाधिः एताभ्यां भाव्यस्य च वित

Indira Gandhi National Centre for the Arts

॥मोक्षप्र०॥ कशब्देनोक्तौ तथान्तःकरणलक्षणं सूक्ष्मं विषयमालंब्य तस्य देशकालधर्मविशेषेण भावनाप्रवर्त्तित
दा सविचारः समाधिः तत्रैव तदवच्छेदं विना धर्मिमात्रावभासित्वेन यदा भावनाप्रवर्त्तते तदा निर्विचारः एता
।२६८। वुभावप्यत्र विचारशब्देनोक्तौ तथा भाष्यं वितर्कश्चित्तस्य स्थूल आलंबने आभोगः सूक्ष्मो विचार इति इयं यथा
स्वसमाप्तिरिति व्यापादितपते सूत्रं च शब्दार्थज्ञानविकल्पैः संकीर्णा सवितर्का समापत्तिः स्मृतिपरिशुद्धौ स्वरू
पशून्येवार्थमात्रनिर्भासा निर्वितर्का स्मृतिपरिशोधः शब्दादिभिरसंकरः इयमेव समापत्तिर्मधुमती—च्यते
एतयैव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्याता एतयैव सवितर्कनिर्वितर्करूपया समापत्त्या सू
क्ष्मविषये सविचारनिर्विचारा च सूक्ष्मविषया व्याख्याता इयमेव समापत्तिः प्रज्ञाज्योतिरुच्यते एवं स्थूलसू
क्ष्मभेदेन सवितर्कादिभेदभिन्नाश्चत्वारः समाधयः यदानुरजस्तमोलेशानुविद्धमंतःकरणसत्त्वं भाव्यते
तदा गुणभावाच्चिच्छक्तेः सुखप्रकाशमयस्य सत्त्वस्य भाव्यमानस्योद्रेकात् सानंदः समाधिर्भवति अस्मिन्ने
व समाधौ ये बद्धधृतयस्तत्त्वांतरं प्रधानपुरुषरूपं न पश्यंति ते विगतदेहाहंकारत्वात् विदेहशब्देनोच्यते इयं २६९
ग्रहणसमापत्तिः ततो रजस्तमोलेशानभिभूतं शुद्धं सत्त्वं आलंबनीकृत्य या भावनाप्रवर्त्तते तस्यां ग्राह्यस
त्त्वस्य न्यग्भावात् चितिशक्तेरुद्रेकात् सत्तामात्रावशेषत्वेन यः समाधिः सास्मिता इत्युच्यते इयमेव गृहीतृ

समापत्तिरित्यु(च्य)ते एवं संप्रज्ञातः असंप्रज्ञातो नाम संस्कारमात्रावशेषं मनः कृत्वात्मन्येव स्थानं तथा च
दक्षः स्वसिद्धीनं मनः कृत्वा क्षेत्रज्ञं परमात्मनि एकीकृत्य विमुच्येत योगोऽयं मुख्य उच्यत इति शिष्टं पातंजल
गतव्यं इति योगनिरूपणं अथ योगांगानि तत्र पातंजलसूत्रे यमनियमासनप्राणायामप्रत्याहारधार
णाध्यानसमाधयोऽष्टावंगानीति माहानारतेपि यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टा
वंगानि योगस्य एतेषां च चित्तविक्षेपकारिणां योगप्रतिबंधकदोषाणां विनाशकतयोपकारकत्वादंगत्वा
वसायः तथा च पातंजले सूत्र योगांगानुष्ठानात् अशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः तथा च देवलः रा
गद्वेषमोहाः कषाया अत्यं ते तेषां यमनियमलक्षणेन तपसा पंचविधेनैव तत्त्वज्ञानेन चापकर्षणं कषायपाच
नं मार्कंडेयपुराणेपि प्राणो वात्मा त्मना जेयो योगिना सद्भिरुर्जयः कुर्वीत तज्जये यत्नं तस्योपायशृणुष्व
मे प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्बिषं प्रत्याहारेण संसर्गान् ध्यानेनानीश्वरान् गुणान् दोषान्
स्वेदवेपथुजनतीन संसर्गान् विषयसंबंधान् अनैश्वरान् प्राकृतान् ननु योगांगानि वैराग्यश्रद्धावीर्य
मैत्र्यादीन्यपि पातंजले निहितानि पुराणे त्वेतानि नोक्तानि तथा च न्यूनत्वे तेतिवेतन्मैवं एतेषामवैराग्यवि
निवृत्तः पुराण इत्युक्तेर्व्याख्यातत्वात् तत्र वैराग्यस्य संतोषे श्रद्धावीर्यादिस्तपःप्रभृतिषु मैत्र्यादीनां धा

Indira Gandhi National Centre for the Arts

॥मोक्षप०॥ रणादित्रिके पवेत्राद्इति बोध्यं यमस्वरूपं पातंजलसूत्रे अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः अ
हिंसा सर्वभूताद्रोहः सर्वकालीनः सर्वभूतहितवचनं सत्यं अस्तेयं अस्पृहारूपं गुप्तेंद्रियस्योपस्थस्य
॥१६८॥ संयम एव ब्रह्मचर्यं विषयाणामर्जनरक्षणक्षयादिदोषदर्शनात्तेषामस्वीकरणमपरिग्रहः एते त्वेते यमाः न
न्वेवं सत्यं नाम असत्यवदनविरहः तत्र किं सत्यं वदितव्यमेवेति नियमः सत्यमेव वदितव्यमिति वा नाद्यः मौ
नविरोधात् न द्वितीयः एवं हि वदने प्राप्ते सत्यनियमेन यदि वदेत तदा सत्यमेवेति रूपेण सत्यवदनस्य का
दाचित्कतया नित्यत्वेन योगांगत्वविरोधादिति चेत् अत्र सत्यपदेन असत्यनिवृत्तिमात्रं विवक्षितमतो न दो
षः अहिंसाया विशेषो दर्शितः पतंजलिना जातिकालसमयानवच्छिन्ना सार्वभौमा महाव्रतं जात्यवच्छिन्ना
ज्ञाकादिपंचकं हनिष्यामि नान्यादिति तानपि न हनिष्यामीत्येवंरूपा तरनवच्छिन्ना देशावच्छिन्ना तीर्थावच्छे
देन न करिष्यामीति संकल्पिता कालावच्छिन्ना पुण्यकाले न करोमीत्युक्ता तत्र तत्रापि न करिष्यामीति स
कल्प — सदनवच्छिन्नो महाव्रतमित्युच्यते इदं च यमांतरेष्वपि बोध्यमिति पातंजलीयव्याख्यानात् निय १६८
मा अपि निरूपितास्तत्रैव शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः शौचं द्विविधं बाह्यमाभ्यंतरं च
बाह्यं मृदादिना आभ्यंतरमीश्वरप्रणिधानरूपं आह्निकप्रकरणोक्तं संतोषो लब्धेस्तुष्टिः तपो द्वंद्वसहिष्णुत्वं

कृच्छ्रचांद्रायणादिव्रतचर्या च स्वाध्यायः प्रणवादिजपः ईश्वरप्रणिधानं तत्रीतयोः कर्मानुष्ठानतत्परम
गुरौ समर्पणं न तु तद्विषयकवृत्तिविशेषः तस्य धारणाध्यानांतर्गतत्वेनोक्तेः पौनरुक्त्यापत्तिः तस्य च योगां
तरंगत्वात् ननु सर्वकर्मार्पणेऽपि तद्ध्यानस्यावश्यकत्वात् अत्रैव तदंतर्भूतमिति चेत् न प्राधान्येन चिंतनस्या
विवक्षितत्वात् कर्मण एव प्राधान्यात् नियमः प्रणिधानमात्रं ध्यानमुच्यत इति न दोषः विष्णुपुराणेऽपि ब्रह्मच
र्यमहिंसा च सत्यास्तेयापरिग्रहान् सेवेत योगी निःकामो योग्यतां स्वमनो नयन् स्वाध्यायशौचसंतोषत
पांसि नियतात्मवान् कुर्वीत ब्रह्मणि तथा परस्मिन्प्रवणं मनः एते यमाः सनियमाः पंच पंच प्रकीर्तिताः विशि
ष्टफलदाः काम्या निःकामानां विमुक्तिदाः आनुषंगिकफलं का[illegible]मयमानस्य तद्भवतीत्यभिप्रेत्य उक्तं का
म्या इति पेषा तन्नापेक्षितं तेषामपि योगादात्मसाक्षात्कारादिद्वारा मुक्तिर्जायत एवेति आनुषंगिकफलमु
क्तं पतंजलिना क्रमेण तत्सिद्धौ वैरत्यागः सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वं अस्तेयप्रतिष्ठायां सर्वरत्नो
पस्थानं ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः अपरिग्रहस्थैर्ये जन्मकथंतासंबोधः तत्सिद्धौ अहिंसासिद्धौ योगि
नः संनिहितानां मार्जारमूषकादीनामविरोधी न वर्तते एतत्सन्निधाने न मार्जारोऽपि मूषकं नमद्यपति क्रिया
फलाश्रयत्वमित्यत्र योगिसंनिहितप्राणिनामिति शेषः क्रियाधर्मः तत्फलं स्वर्गः सर्वेऽप्येतत्संनिहिता धार्मिका

Indira Gandhi National Centre for the Arts

।।मोद्वा१०।।
१७०

भवतीत्यर्थः अस्तेयमभ्यस्यतः सर्वाभ्यो दिग्भ्यो रत्नानामुपस्थानं भवति वीर्यमणिमाद्युत्पादनानुकूल
शक्तिविशेषः अपरिग्रहस्थैर्ये जन्मनः भूतभविष्यद्वर्तमानदेहप्राप्तिकथंतातत्प्रकारस्तस्य बोधो भवती
ति यमफलाभिधायकसूत्रार्थः नियमानुषंगिकफलं पातंजले शौचात्स्वांगजुगुप्सा परैरसंसर्गः सत्वशु
द्धिसौमनस्यैकाग्र्येंद्रियजयात्मदर्शनयोग्यत्वानि संतोषादनुत्तमः सुखलाभः कायेंद्रियसिद्धिरशुद्धि
क्षयात्तपसः स्वाध्यायादिष्टदेवतासंप्रयोगः समाधिसिद्धिरीश्वरप्रणिधानात अल्पजुगुप्सायां शौचं कुर्वाण
स्य अशुचिकाये महती जुगुप्सा भवति मृज्जलादिना शौचं कुर्वन्नपि कायशुद्धिमपश्यतकायेहेयतीबुद्ध्यातिप
रस्मादिभिर्न संसृज्यतइत्यर्थः शौचस्य फलांतरमाह सत्वशुद्धीति शौचेन द्विविधेनअंतःकरणशुद्धिः सौमन-
स्यं प्रीतिविशेषः ततएकाग्र्यं अविक्षेपः ततइंद्रियजयः ततआत्मदर्शनयोग्यत्वं भवति कायेति अशुद्धिरधर्मः
तस्य क्षयात् कायसिद्धिः अणिमादिसिद्धिः इंद्रियसिद्धिर्दूरग्रहणयोग्यता तत्तपसो भवति इष्टदेवतासंप्रयो
गः साक्षात्कारपूर्वकसन्निधिर्भवति समाधिर्वक्ष्यमाणलक्षणः तस्येश्वरप्रणिधानात्सिद्धिर्भवति इदं च संप्रज्ञा १७०
तस्याप्युपलक्षणं सोपि ईश्वरार्पितकर्मकलापेन भवतीत्यर्थः भवेवमितरांगवैयर्थ्यमितएव योगसिद्धेरिति
चेत् अत्रेश्वरप्रणिधानमेव योगीगं अन्यत्तुतदंगमेवेति केचित् अन्ये तु ईश्वरप्रणिधानं मोक्षनिवर्त्तकं अन्य

त्वधर्मनिवर्तकमिति विशेष इत्याहुः आद्यासनं तत्र विष्णुपुराणे एकं तत्रासनादीनां समास्थाय गुणैः पुनः यमा
ख्यैर्नियमाख्यैः युंजीत नियतो यतिः वायुपुराणे पद्ममर्द्धासनं वापि तथा स्वस्तिकमासनं आस्थाय योगी
युंजीत कृत्वा तत्प्रणवं मनः शौनकोपि आसनं पद्मकं बध्वा जान्वोरपि रोदने नासिकाग्रे दृशं कुर्यात् हस्तौ था
दौ च संयतौ पद्मकादीलक्षणं हेमाद्रौ कूर्मपुराणे आसनं स्वस्तिकं प्रोक्तं पद्ममर्द्धासनं तथा साधनानां च सर्वेषा
मेतत्साधनमुत्तमं ऊर्वोरुपरि विप्रेंद्र कृत्वा पादतले उभे समासीनात्मनः पद्ममेतदासनमुत्तमं एकं पादमथैक
स्मिन्नविन्यस्योरुणि सत्तम आसीनोर्द्धासनमिदं योगसाधनमुत्तमं उभे कृत्वा पादतले जानूर्वोरंतरे हि समा
सीनात्मनः प्रोक्तमासनं स्वस्तिकं परमिति पातंजलभाष्ये तु पद्मासनं वीरासनं भद्रासनं स्वस्तिकं दण्डासनं सोपा
श्रयं पर्यंकं क्रौंचनिषदनं हस्तिनिषदनं उष्ट्रनिषदनं समसंस्थानं यथासुखमासनं स्थिरसुखमासन
मिति एतल्लक्षणान्यान्युक्तानि पातंजलभाष्यव्याख्याने वाचस्पतिमिश्रैः पद्मकलक्षणमुक्तमेव पादतले
षणसमीपे संपुटीकृत्य तस्योपरि पाणिक-पिकां कुर्यात् तद्भद्रासनं पादद्वयमूर्वोरुपरिन्यस्यो-यत्स्थीयते त
द्वीरासनमिति केचित् जानुद्वयस्याधाराधेयभावेन व्यवस्थापनमित्यन्ये तदेव प्रकारभेदेनार्द्धासनमित्युच्य
ते स्थितस्य एकतरः पादो भूमिस्थः एकतरश्चाकुंचितजानोरूर्द्ध्वे तत्तभद्रासनं सव्यमाकुंचितं च रणं दक्षिणज

Indira Gandhi National Centre for the Arts

घोर्वंतरे निक्षिपेत दक्षिणं वा कुंचितं वामजंघोर्वंतरे एवं तदेतत स्वस्तिकं उपविश्य श्लिष्टांगुलिकौ श्लिष्टगुल्फौ भू-
मिश्लिष्टजंघोरू पादौ प्रसार्य दंडासनमभ्यसेत योगप्रदेनोपवेशनं सोपाश्रयं जानुप्रसारितबाहोः शयनं प-
र्यंकं क्रौंचनिषदनादीनि क्रौंचप्रदेश्यादीनां निषदनादिसंस्थानदर्शनादिना प्रत्येतव्यानि याः पार्ष्णिपादाभ्यां
द्वयोराकुंचितयोरन्योन्यसंपीडनं समसंस्थानं येन संस्थानेनावस्थितस्य स्थैर्यसुखं भवति तदासनं स्थिर
सुखमास्थेयं यस्मिन् सति प्रकृतासनं सिद्ध्यति तत्साधनमुक्तं तत्रैव प्रयत्नशैथिल्यानंतसमापत्तिभ्यां यत्नाति
शयाभावात अनंते नागनायके समापन्नं चित्तं तदग्रहं सपाद्यासनं निर्वर्तयति आसनस्यानुषंगिकं फलमा-
ह पतंजलिः ततो द्वंद्वानभिघातः यस्मिन् चैलाजिनादौ प्रकृतासनमाबध्यते तदप्यासनशब्दवाच्यमास्थय भगव-
द्गीतायां शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरमिति आसीनः संभवा-
दित्यादिना भगवता बादरायणेनास्यासीनस्यैव नतु तिष्ठतः शयानस्य वा योग इत्यभिप्रेते प्राणायामो मार्कंड-
यपुराणे प्राणापाननिरोधः स्यात् प्राणायाम उदाहृतः विष्णुपुराणे प्राणाख्यमनिलं वश्यमभ्यासात् कुरुते तु यत् प्रा-
णायामः स विज्ञेयः सबीजोऽबीज एव च सबीजः समंत्रः तद्रहितो निर्बीजः अयं च प्राणायामः आसनपूर्वकः
कार्यः तदाह दक्षस्मृतिः बद्धासनं नियम्यासुं स्मृत्वाचार्यादिकं तथा संनिमीलितदृङ्मौनी प्राणायामं समभ्य-

न्यसेत सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह त्रिः पठेदायतप्राणः प्राणायामः स उच्यते आदानं वधमुत्स-
र्गं वायोस्त्रिः समभ्यसेत रेचकादिकमित्यर्थः तत्र क्रमेण ध्येयदेहे द्वौ विष्णुं नीलोत्पलप्रभं श्वेतं चन्द्रं हरं चैव समाएर्ण
वक्तारणं प्राणायामे द्वे देवता आह स एव ब्रह्माणं केशवं शंभुं ध्यायन्मुच्येत बंधनात रक्तं पितामहं ध्यायेषंम
नो वाक्देहमनसां प्रत्याहारेण ससर्गध्यानेनानैश्वरान् गुणान् ध्मायमानं यथानलेप्याहात् नां संसृतं मलं तथे-
न्द्रियगतो दोषः प्राणायामेन दह्यते प्राणायामभेदमाह देवलः त्रिविधः प्राणायामः कुंभको रेचनं पूरणमिति
निश्वासनिरोधः कुंभकः अजस्रनिश्वासो रेचनं निश्वासाध्मानं पूरणमिति स पुनरेकद्वित्रिरुद्घातैर्मृदु-
मंदस्तीव्रो वा भवति प्राणापानव्यानोदानसमानानां सकृदुद्गमनमामूर्धानं निहत्य निवृत्तिरुद्घातः तत्रोर्ध्वा-
नाभेर्गतीरेचनो — सहरणोहारकर्मा प्राणः अधोनाभेरुत्सर्गानंदकर्मापानः आस्यासबंधिस्कंधाविष्टः प्र-
सारणाक्षेपणाकुंचनभ्रमणरेचनवमनगमनकर्मा व्यानः बाहूरूग्रीवाचक्षुःपार्श्वगतश्चेष्टाविक्रमनबला-
धानकर्मोदानः श्रोत्रहृदयनाभिगतं सर्वकर्मा स्पंदनावबोधनानां समायन इति समानः अत्र प्राणायामत्वं
रेचकादिषु प्रत्येकमेव पर्याप्तं न तु त्रित्वयत्र व्यासज्यवृत्ति प्रत्येकमपि प्रयोगदर्शनात अत एव रेचकपूरकमित्यु-
क्त्वा सुखं यद्वा वायुधारणं प्राणायामोऽयमित्युक्तः सर्वः केवलकुंभक इत्युक्त मार्कंडेयपुराणे लघुमध्योत्त-



National
Centre for the Arts

रीयारम्भः प्राणायामस्त्रिधोदितः तस्य प्रमाणं वक्ष्यामि तथालर्क शृणुष्व मे लघुर्द्वादशमात्रस्तु द्विगुणः स तु म
ध्यमः त्रिगुणाभिस्तु मात्राभिरुत्तरीय उदाहृतः निमिषोन्मेषणं मात्रा तालो लघ्वक्षरं तथा योगियाज्ञवल्क्यः
अंगुलिमोक्षत्रितयं जान्वोः परिमार्जनं वा पितालत्रयमपि तत्तन्मात्रासंज्ञा प्रणवं संति प्रकारांतरमप्युक्तम्
न्यक्षरोच्चारणं वा प्रणवोच्चारणकाले पूरयेत् चतुःषष्टिवारं तावतिकाले समाहृत्य स्थापयेत् ततो द्वात्रिंशन्मात्रा
काले विरेचयेदिति प्राणायामस्य योगांगत्वं योगोपकारकता तत्र द्वारमाह पतंजलिः ततः क्षीयते प्रकाशावरणं
ततः प्राणायामात् प्रकाशस्य सत्वस्यावरणं तमः तस्य क्षयो भवतीत्यर्थः आनुषंगिकं फलमाह स एव धारणासु
च योग्यता मनसः मार्कंडेयपुराणेपि प्रथमेन जयेत्स्वेदं मध्यमेन तु वेपथुं विषादं हि तृतीयेन जयेद्दोषाननुक्रमात्
मृदुत्वं सेव्यमानस्तु सिंहशार्दूलकुंजराः यथा यांति तथा प्राणो वश्यो भवति योगिनः वश्यं मत्तं यथेच्छातो ना
गं नयति हस्तिपः तथैव योगी छंदेन प्राणं नयति साधितः यथा हि साधितः सिंहो मृगान्हंति न मानवान् तद्व
न्निरुद्धपवनः किल्बिषं न नृणां तनुं तस्माद्युक्तः सदा योगी प्राणायामपरो भवेत् श्रूयतां मुक्तिफलदं तस्याव १७२
स्थाचतुष्टयं ध्वस्तिः प्राप्तिस्तथा संवित् प्रसादश्च महीपते स्वरूपं शृणु चैतेषां कथ्यमानमनुक्रमात् कर्मणामिष्ट
दुष्टानां जायते फलसंक्षयः चेतसः प्रकृष्य यत्तिर्यच सा ध्वस्तिरुच्यते ऐहिकामुष्मिकान्कामान्लोभमोहात्म

कंचयत् निरूप्यास्ते यदा योगी प्राप्तिः सा सर्वकामिनी अतीतानागतानर्थान्विप्रकृष्टतिरोहितान् विजाना
तींदुसूर्यर्क्षग्रहाणां ज्ञानसंपद् तुल्यप्रज्ञावस्तु यदा योगी प्राप्नोति संविदं तदा संविदिता ख्याता प्राणायाम
स्य संस्थितिः याति प्रसादं येनास्य मनः पंचवधातवः इंद्रियाणींद्रियार्थश्च स प्रसाद इति स्मृतः पंच धातवः पृ
थिव्यादि पंचभूतानि तथा तथा वै योगयुक्तस्य योगिनो नियतात्मनः सर्वे दोषाः प्रणश्यंति सुस्थश्चैवोपजायते
वीक्षते त्वपरं योगं प्राकृतांस्तु गुणान् दृष्ट्वा कूर्मादिपरमाणूश्च तथात्मानमकल्मषं इत्थं योगी यताहारः प्राणाया
मपरायणः जिताजितां शनैर्भूमिमारोहेत यथा गृही दोषान्मोहं तथा व्याधिमाक्रांताभूरनिर्जिता उपायश्चात्र क
थितो योगिभिः परमर्षिभिः येन व्याध्यादयो दोषा न जायंते हि योगिनः यथा तोयार्थिनस्तोयं यंत्रनालादिभिः श
नैः आपिबेयुस्तथा योगी पिबेद्वायुं जितक्रमः प्राङ्नाड्यामुदरे वाथ तृतीयां च तथोपरि कंठे मुखे नासिकाग्रे नेत्रभ्रू
मध्यमूर्ध्नि सु किंचित्परः स्यात्तस्मिन्स धारणा परमा स्मृता अथ प्रत्याहारः शब्दादिभ्यो निहृत्तानि घदत्तानि यतात्मभिः
प्रत्याक्रियंते योगेन प्रत्याहारस्ततः स्मृतः अनिष्टानि स्वविषये सक्तानि योगेन प्रयुज्यते ज्ञानार्थमिंद्रियैः सह
ततमनो योगः तेन सहेत्यर्थः यद्वा योगेनोपायेन मनसोपि विषयेभ्यः संकोचेनेति तथा च पातंजलं सूत्रं स्ववि
षयासंप्रयोगे चित्तस्य स्वरूपानुकार इवेंद्रियाणां प्रत्याहारः इंद्रियाणां विषयासंप्रयोगे चित्तस्य स्वरूपा

Indira Gandhi National Centre for the Arts

॥मोक्षप्र०॥ नुकारितेव याभवति स प्रत्याहार इत्यर्थः तथा च वि— पुराणे शब्दादिष्वनुरक्तानि निगृह्याक्षाणि योगवित् कुर्या
च्चित्तानुकारीणि प्रत्याहारपरायण इति यत्तु कल्पतरुः योगेन चित्तवृत्तिनिरोधेन योगश्चित्तवृत्तिनिरोध इति
१७४ पातंजलसन्निधानादिति तन्न चित्तवृत्तिनिरोधस्य पातंजलोक्तस्य योगरूपत्वेन प्राधान्यात् अंगभूतप्रत्याहारां
तर्गतता योगात् देवलस्तु अणुत्वाच्चपलत्वात् चापल्यात् लाघवात् बलवत्वात् योगभ्रष्टस्य मनसः पुनः प्र
त्यानीयार्थे योजनं प्रत्याहारः अथोत्र परमात्मादिः प्रत्याहारस्य योगांगत्वे द्वारमुक्तं पातंजलसूत्रे ततः परम
वश्यता इंद्रियाणां प्रत्याहरणे परमवश्यता जितेंद्रियता भवति तद्वृत्तिनिरोधो भवतीत्यर्थः अनिषिद्धेष्वप्रवृत्तिः
परमवश्यतेत्येके अभिमानराहित्येन शब्दादिविषयासंग इत्यन्ये अप्रवृत्तिरेवेंद्रियाणामितीतरे इति प्रत्याहा
रः अथ धारणा योगांगेषु धारणाध्यानसमाधीनां मतरंगतया सर्वैरादरेणानुष्टेयाः तत्र धारणा नामान्यव्यावृ
त्या मनसो विषयविशेषे व्यवस्थापनं तथा च पारमर्षसूत्रं देशबंधश्चित्तस्य धारणेति नाभिचक्रे हृदयपुंडरी
के मूर्ध्नि ज्योतिषि नासिकाग्रे जिह्वाग्रे इत्येवमादिषु देशेषु बाह्ये वा विषये चित्तस्य वृत्तिमात्रेण बंध इति बंधो धारणे १७३
तिभाष्यं तत्र मनसः स्वरूपेण संबंधस्य सुषुप्तावपि सत्वेन वाह्येषु संबंधेन वाव्याप्त्यतिव्याप्त्योरुक्तं वृत्तिमात्रेणे
ति ज्ञानमात्रेणेत्यर्थः अत्रापि विषयविशेषमात्रविषयकज्ञानव्यक्तिमत्वं धारणेति यावत् देवलः शारीरेंद्रिय

मनोबुद्ध्यात्मनां धारणा हारणा ध्येयातिरिक्तव्यापारशून्यतया शारीरादीनां ध्येयमात्रगोचरज्ञानानुकूलव्याप
रकत्वमित्यर्थः यद्यपि मनोमात्रधारणयां सर्वधारणा भवति तथापि मनोमात्रेत्येवालं तथापि शारीरादीनामनन्य
व्यापारतया मनसो धारणा सिद्ध्यतीति तदुपादानं शंखः मनः संयमनं तज्ज्ञैर्धारणेति निगद्यत इति संयमनं अन्य
तो व्यावृत्य आत्मावस्थानं हारीतोपि मनसो धारणं मनः शरीरे हृदि ललाटे परब्रह्मात्मज्योतिरादित्यमहीनमा
सुख जलभाजनवन्मनसस्तत्रैव धारणा धारणा अंतर्दहहृदयादौ बहिर्वा अपहतपाप्मादिगुणकपरब्रह्मा
दौ यन्मनसो धारणं सा धारणेत्यर्थः जलभाजनवदिति यथा भाजनगतं जलं तस्य भाजन एव स्थितिरेवमेतेषु मन
सोवस्थितिरेकत्रदेशविशेषे ताहशाधारणया वृत्तिविशेषरूपा धारणा भवति अस्यां धारणायां प्राणायामप्रत्या
हारयोरंगत्वात् तौ कृत्वा क [illegible] र्तव्या तथा च विष्णुपुराणे प्राणायामेन प
वनं प्रत्याहारेण चेंद्रियं वशीकृत्य ततः कुर्यात चित्तस्थानं शुभाश्रये शुभाश्रया बाह्या श्रीविष्णुप्रभृतयो धार
णाविषयाः उक्तं च विष्णुपुराणे आश्रयश्चेतसो ब्रह्म द्विधा तच्च स्वरूपतः भूप मूर्तममूर्तं च परं चापरमेव च अ
क्षीणेषु समस्तेषु विशेषज्ञानकर्मसु विश्वमेतत्परं चान्यत् भेदभिन्नदृशां नृप प्रत्यस्तमितभेदं यत् सत्तामात्र
मगोचरं वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितं तच्च विष्णोः परं रूपमरूपस्याजमक्षयं विश्वस्वरूपवैरूप्यल

...hi National
Centre for the Arts

॥मोद्व॰१७०॥ ज्ञानं परमात्मनः न तत्‌ योगयुजा शक्यं नृप चिंतयितुं यतः ततः स्थूलं हरे रूपं चिंतयेद्वि श्वगोचरं हिरण्यगर्भो भ-
गवान् वासवोथ प्रजापतिः मरुतो वसवो रुद्रा भास्करास्तारका ग्रहाः गंधर्वयक्षदैत्याद्याः सकला देवयोनयः
।१७४। मनुष्याः पशवः शैलाः समुद्राः सरितो द्रुमाः भूप भूतान्यशेषाणि भूतानां पंच हेतवः प्रधानादिविशेषांतं चेतनात्म
कं एकपाद्द्विपादं च बहुपादमपादकं मूर्तमेतद्धरे रूपं भावनात्रितयात्मकं एतत्सर्वमिदं विश्वं जगदेतच्चराच
रं परब्रह्मस्वरूपस्य विष्णोः शक्तिसमन्वितं एतान्यशेषरूपाणि कथितान्यपार्थिव यतस्तच्छक्तियोगेन युक्तानि
नभसा यथा द्वितीयं विष्णुरूपं तु योगिध्येयं महामते अमूर्तं ब्रह्मणो रूपं यत्सदि—च्यते बुधैः समस्ता विषयाश्चैते
नृप यत्र प्रतिष्ठिताः तद्विश्वरूप[illegible]रूपं वै रूपमन्यद्धरेर्महत् समस्तशक्तिरूपाणि तत्करोति जनेश्वर देवतिर्यङ्
मनुष्याद्येश्चेष्टावंति स्वलीलया जगतामुपकाराय न सा कर्मनिमित्तजा चेष्टा तस्याप्रमेयस्य व्यापिन्याविहिता
त्मिका तद्रूपं विश्वरूपस्य तस्य योगयुजा नृप चिंत्यमात्मविशुद्ध्यर्थं सर्वकल्मषनाशनं यथाग्निरुद्धतशिख
कक्षं दहति सानिलः तथा चित्तस्थितो विष्णुर्योगिनां सर्वकिल्बिषं तस्मात्समस्तशक्तीनामाधारे तत्र चेतसः कु १७४
र्वीत संस्थितिं साधु विज्ञेया शुद्धधारणा शुभाश्रयः स चित्तस्य सर्वगस्य तथात्मनः त्रिभावभावनातीतो मुक्त
ये योगिनां नृप अन्ये तु पुरुषव्याघ्र चेतसो ये व्यपाश्रयाः अशुद्धास्ते समस्तास्तु देवाद्याः कर्मयोनयः मूर्तं

भगवतो रूपं सर्वापाश्रयनिस्पृहं एषा वै धारणा ज्ञेया यच्चित्तं तत्र धार्यते तच्च मूर्तं हरे रूपं यद्विचिंत्यं नराधिप त—
च्छ्रूयतामनाधारा धारणा नोपपद्यते प्रसन्नचारुवदनं पद्मपत्रोपमेक्षणं सुकपोलं सुविस्तीर्णललाटं कनकोज्ज्व
लं समकर्णांतविन्यस्तचारुकुंडलभूषणं कंबुग्रीवं सुविस्तीर्णश्रीवत्सांकितवक्षसं वलीत्रिभंगिना— सिद्धांम
न्येततां तदात्मेतः शंखगदाधनुःशार्ङ्गादिरहितं बुधः चिंतयेद्भगवद्रूपं प्रशांतं साक्षसूत्रकं सा यदा धारणा तद्वदव
स्थानवती तदा किरीटकेयूरमुखैर्भूषणैरहितं स्मरेत् तदेकावयवं देवं चेतसो हि पुनर्बुधः कुर्यात्ततोवयविनि
प्रणिधानपरो भवेत् इति तथा भारतेपि सुस्थेयं कुरु धासु निश्चिता सुमहामते धारणासु च योगस्य दुःस्थैर्यम
कृतात्मभिः विपन्ना धारणा यस्मान्नयंति नष्टां गतिं निरहीना यथा नावं पुरुषाणां तु वैनृप यस्तु तिष्ठति कौंते-
य धारणासु यथाविधि मरणं जन्म दुःखं च सुखं च परिमुंचति योगकृत्येषु योगानां धारणैव परं बलमिति इति धा
रणा अथ ध्यानं तत्र ध्यानं नाम धारणालक्षणद्वित्रिविशेषप्रवाह एव विमर्शविशेषनिष्ठः तथा च पारमर्षं सूत्रं तत्र प्र
त्ययैकतानता ध्यानं तस्मिन्देशे ध्येयालंबनस्य प्रत्ययस्यैकतानता सदृशः प्रवाहः प्रत्ययांतरेणापरामृष्टो ध्या
नमिति भाष्यं च एकतानता एकाग्रता भारतेपि तथा च द्विविधं ध्यानमाहुर्वेदविदो जनाः एकाग्रता च मनसः प्राणाया
मात्तथैव च तद्रूपप्रत्ययैकाग्र्यसंततिश्चान्यनिस्पृहा तद्ध्यानं प्रथमैरंगैः षड्भिर्निष्पाद्यते नृप तिअस्य ध्यानस्य पूर्वो

Indira Gandhi National Centre for the Arts

॥मोक्षप्र०॥ क्तं गत्वेपि प्राणायामादित्रयमंतरंगं तथा च नृसिंहपुराणे योगाभ्यासरतस्येह नश्यंते पातकानि च तस्माद्योगप
रो भूत्वा ध्यायेन्नित्यं क्रियांतरे प्राणायामेन पवनं प्रत्याहारेण चेंद्रियं धारणाभिर्वशीकृत्य पूर्वं दुर्धर्षणं मनः एकं
॥१९५॥ कारणमानंदबोधरूपमनामयं सूक्ष्मात्सूक्ष्मतरं ध्यायात जगदाधारमच्युतमिति एतच्च ध्यानं ध्येयस्यानेकप्रका
रतयानेकविधं एतदेवोपनिषदैरूपासनेत्यभिधीयते व्युत्पादिश्चासामेव विद्यापरनामधेयानां यथासंभवं भेदाभे
द गुणोपसंहारानुपसंहाराः तृतीये भगवता बादरायणेन सर्ववेदांतप्रत्ययं चोदनाद्यविशेषादित्यादिना एता
सामंगत्वेपि फलश्रवणं तत्संयोगरूपकृत्वन्यायेन तत्तत्फलार्थत्वमपि स्पष्टमेव तथा च तत्तत्फले पुनाय
ये ध्यं तत्र ध्यानमास्थेयं ध्यानस्य योगांगत्वमुक्तं विष्णुपुराणे ध्याननिरतस्य संवत्सरेण योगाविर्भावो भवती
ति फलमप्युक्तं तत्रैव यद्यध्यायेत्तत्तदाप्नोतीति ध्यानमुख्यं नरसिंहपुराणे उत्पन्नवैराग्यबलेन योगी ध्यायन्प
रं ब्रह्म सदाक्रियावान् सत्यात्मकं चित्सुखस्वरूपमाद्यं विहाय देहं पदमाप्नोतीति विष्णोः शोधपञ्चमिदो नामग्रना
भिना चोदरेण च प्रलंबाष्टभुजं विष्णुमथवापि चतुर्भुजं समस्थितोरुजंघं च सुस्थिरांघ्रिकराम्बुजं चिंतयेत ब्रह्म १९५
रूपेणाहं निर्मलवाससं किरीटवारूकयूरकटकादिविभूषितं शार्ङ्गशंखगदाचक्रखड्गाक्षवलयान्वितं चिंतये
त्तन्मयो योगी समाधायात्ममानसं तावद्यावद्दृढीभूता तत्रैव त्यक्ता धारणा वदतस्तिष्ठतो वापि स्वेच्छया कर्म कुर्वतः

नापयाति यदा चित्तं तत्र शोधयञ्चं ध्येयविशेषालंबनं सफलं ध्यानमाह नृसिंहपुराणे ईश्वर उवाच ध्यानामृतं परं गु
ह्यं रहस्यमृषिसत्तम वक्ष्यामि त्वद्धितं तत्त्वं सर्वबंधभयापहं तृणादिचतुरास्यांतं भूतग्रामं चतुर्विधं चराचर
जगत्सर्वं सुप्तं यस्य मायया तस्य विष्णोः प्रसादेन यदि कश्चित्प्रबुध्यते स निस्तरति संसारं देवानामपि दुस्तरं
भोगैश्वर्यमदोन्मत्तस्तत्त्वज्ञानपराङ्मुखः संसारे च महापंके जीर्णगोरिव मज्जति यस्त्वात्मानं निबध्नाति कर्म
भिः कोषकारवत् तस्य मुक्तिं न पश्यामि जन्मकोटिशतैरपि तस्मान्नारद सर्वेशं देवानां देवमव्ययं आराधय स
दा सम्यग्ध्यायन्विष्णुं समाहितः यस्तं विश्वमनाद्यंतमजं स्वात्मनि संस्थितं निर्विकल्पं निराभासं निःप्रपंचं निरा
मयं सर्वज्ञमचलं विष्णुं सदा ध्यायन्विमुच्यते स्वग्रास्यमक्षरं नित्यं निर्गुणं तमसः परं सर्वहृक्कं शाश्वतं विष्णुं स-
दा ध्यायन्विमुच्यते स्वते स्वग्रास्यमक्षरं नित्यं निगुणं तमसः परं सर्वहृक्कं शाश्वतं विष्णुं सदा ध्यायन विमुच्यते नि
रंजनं परं शांतं अच्युतं भूतभाविनं वेदगर्भं विभुं विष्णुं सदाध्यायन विमुच्यते सर्वभावविनिर्मुक्तमप्रमेयमलक्षणं
निर्वाणमनघं विष्णुं सदा ध्यायन मुच्यते अमृतं परमानंदं सर्वपापविवर्जितं ब्रह्मण्यं शिवं विष्णुं सदाध्या
यन विमुच्यते योगीश्वरं पुराणाख्यं खचारी गुहाशयं स्वमात्ममचायं विष्णुं सदाध्यायन विमुच्यते भ्राम्श्रनवि
निर्मुक्त भूर्मिधक्षपरं प्रभुं तं देवममलं विष्णुं सदा ध्यायन विमुच्यते सर्वद्वंद्वविनिर्मुक्तं सर्वदुःखविवर्जितं अ

Indira Gandhi National Centre for the Arts

॥मो॰ध॰१०॥ एतत्कृत्वा सदा विष्णुं सदा ध्यायन्विमुच्यते अनादिमात्रमद्वैतं च तुर्यं परमं पदं तं सर्वहृद्गतं विष्णुं सदा ध्यायन्विमुच्य
ते स्वरूपं सत्यसंकल्पं शुद्धमाकाशवत्परं एकाग्रमनसा विष्णुं सदा ध्यायन्विमुच्यते सर्वात्मगं स्वभावस्थमात्म
॥१७६॥ चैतन्यरूपकं शुद्धमेकाक्षरं विष्णुं सदा ध्यायन्विमुच्यते कालातीतं त्रिकालज्ञं विश्वेशं लोकसाक्षिणं सर्वस्मादुत्त
रं विष्णुं सदा ध्यायन्विमुच्यते विष्णौ प्रतिष्ठितं विश्वं विष्णुर्विश्वे प्रतिष्ठितः विश्वेश्वरमजं विष्णुं सदा ध्यायन्विमुच्य
त इति एतच्च परमात्मनो ध्यानं निर्गुणरूपस्यैवावगन्तव्यं तस्यैव श्रवणमननसमानविषयनिदिध्यासनोपकार
कतयापेक्षणीयत्वात् तस्य च प्रथमं कर्तुमशक्यतया क्रमारोहणयोग्यरूपमालंब्य तत्र मनसः पाटवं संपाद्य क्र
मेणैतद्ध्यानमासादयेत् तथा प्रकारश्चोक्तो विष्णुपुराणे ऊरुस्थोत्तानचरणः सव्ये करे इतरं न्यस्य तालुस्था
चलज्जिह्वो दंतैर्दंतान्संस्पृशन् नासिकाग्रं प्रपश्यन् दिशश्चानवलोकयन् विगतभीः प्रसन्नात्मा चतुर्विंशतित
त्त्वैर्व्यतीतं चिंतयेत् नित्यमतींद्रियमगुणं शब्दस्पर्शरूपरसगंधातीतं सर्वस्थमतिस्थूलं सर्वगमप्यतिसूक्ष्मं सर्व १७६
तः पाणिपादं सर्वतोऽक्षिशिरोमुखं सर्वतः सर्वेंद्रियशक्तिमेवं ध्यायेत ध्याननिरतस्य संवत्सरेण योगाविर्भावो भ
वति अथ निराकारे लक्ष्यत्वं धर्तुं न शक्नोतीति तदा पृथिव्यप्तेजोवाय्वाकाशमनोबुद्ध्यात्माव्यक्तपुरुषाणां पूर्वं
पूर्वं ध्यात्वा तत्र लक्ष्यं परित्यजेत् अपरमपरं ध्यायेत् एवं पुरुषध्यानमारोहेत् तत्राप्यसमर्थो हृदयपद्मस्या



धोमुखस्य मध्ये दीपवत्पुरुषं ध्यायेत तत्राप्यसमर्थो भगवंतं वासुदेवं किरीटिनं गदिनं वनमालाविभूषितो
रस्कं सौम्यरूपं चतुर्भुजं शंखचक्रगदापद्मधरं ध्यायेत यद्यद्ध्यायेत तत्तदाप्नोतीति ध्यानगुह्यं तस्मात्सर्वमिदमक्षरं त्य
क्त्वाऽक्षरमेव ध्यायेत न च पुरुषं विना किंचिदक्षरमस्तीति तं प्राप्य मुक्तो भवतीति पुरस्तात्कं प्रसकलं शोते च यस्मा
त्पुरुषः तस्मात्पुरुष इत्येवं प्रोच्यते तत्वचिंतकैः प्रातश्चापरात्रे योगी नित्यमतंद्रितः ध्यायेत पुरुषं विष्णुं निर्गुणं
पंचविंशकं तत्वात्मानं ज्ञानगम्यं सर्वतत्वविवर्जितं सर्वेंद्रियगुणाभासमिति हार्दोपासनायाः सर्वोपासनातो
वैशिष्ट्यं तत्र तत्राधिकरणसिद्धं शंखोपि हृदयस्य ध्यानयोगेन देवस्य दर्शनं ध्यानं प्रोक्तं प्रवक्ष्यामि ध्यानयोगम
तः श्रुत्वं हृदि स्था देवताः सर्वा हृदि प्राणाः प्रतिष्ठिताः हृदि ज्योतींषि सूर्यश्च हृदि सर्वं प्रतिष्ठितं ध्यानयोगं ध्या
नोपायं एवं भूतस्य हृदयस्य प्रशस्ततरत्वात्तत्र तस्यैव ध्याने नत्वरितं ध्येयसाक्षात्कारो भवतीत्यर्थः ध्यानोपायं व
दन्नितिकर्तव्यतामाह स एव स्वदेहमरणिं कृत्वा प्रणवं चोत्तरारणिं ध्याननिर्मथनाभ्यासात् विष्णुं पश्येत् हृदि स्थि
तं रविमध्ये स्थितः सोमः सोममध्ये हुताशनः तेजोमध्ये स्थितं सत्वं सत्वमध्ये स्थितोच्युतः अणोरणीयान्महतो म
हीयानात्मा गुहायां निहितोस्य जंतोः तोजामयं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशो एष दवस्तम
र्पनीं पदैरि चपिधीयते अज्ञानपदं सर्वातीतैरिंद्रियैर्विषयैः स्फनिः एष वै पुरुषो विष्णुर्व्यक्ताव्यक्तः सनातनः एषा

Indira Gandhi National
Centre for the Arts

॥मोक्ष१०॥ धाताविधाता च प्रधानं निष्कलः शिवः वेदाहमेतं पुरुषमादित्यवर्णं तमसः परस्तात् तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय हृदये यत्कमले सूर्यमंडलादिध्यानात्तत्त्वात् तत्त्वसत्त्वगुणोऽस्य तं पश्यति तैत्तिरीयमंत्रवर्णं पठ-
॥२११॥ तिऽणोरणीयानिति आत्मा परात्मा गुहायां हृदयगुहायां निहितः अंतर्यामित्वेन प्रविष्टः धातुः सकलजगद्विधा-
तुरस्यैव भगवतो ध्यानजनितप्रसादात् पश्यति तमेव ध्येयं साक्षात्करोति ननु स परमात्मा जीवात्मनो हृदयगेव हृदि
यदि वर्त्तते तदा जीव एव देवतस्य इष्टुं शक्यत याकुतो ध्यानादिप्रयास इदर्शनाय विशेष इत्यत आह एष इति तथा
वाज्ञानतत्कार्या हततया इंद्रियाणि मनि गुहेण चेतसो पि कलुषिततया तेन रूपेण इष्टमशक्यत्वात् ध्यानेन कृते
तदीयाज्ञानस्य चेतसोऽशुद्धेश्च विनाशे सति तत्साक्षात्कारो भवति अत एव तस्य जीवरूपेण व्यक्तत्वं स्वरूपेण व्य-
क्तत्वं स्फुटयति एष वै पुरुषो विष्णुर्व्यक्ताव्यक्त इत्यादिना ननु तत्साक्षात्कारस्य नोपयोगः निर्गुणस्य साक्षात्कारस्यै-
व मोक्षहेतुत्वस्योपनिषद्भिरवगमात् इत्यत्र सगुणसाक्षात्कारहेतुना ध्यानेनेति चेत् सगुणसाक्षात्कारस्यापि
गौणमुक्तिद्वारा परममुक्तौ हेतुत्वात् तत्र नुष्ठेयमेव सत्साधनं ध्यानमित्यभिप्रेत्य तैत्तिरीयमंत्रवर्णमुदाहरति वेदाह- ।२११।
मेतं पुरुषमिति अत एव ब्रह्मांडपुराणेपि गदहनपरब्रह्मसाक्षात्काराय सगुणसाक्षात्कार आवश्यक इत्यभिप्रे-
तं यस्माद्वाचो निवर्त्तंते अप्राप्य मनसा सह अव्य[illegible]क्तं तस्मिन् ज्ञात्वा तगहनं बुद्ध्वा सदं भिद्यते हृदयग्रंथिश्छिद्यंते

सर्वसंशयाः क्षीयंते चास्य कर्माणि दृष्टे तस्मिन् परावरे इति हार्दोपासनासमर्थं प्रति नरसिंहपुराणे ध्येयः सदास-
वितृमंडलमध्यवर्त्ती नारायणः सरसिजासनसंनिविष्टः केयूरवान् मकरकुंडलवान् किरीटी हारी हिरण्मयवपु-
र्धृतशंखचक्रः तथा यः सर्वप्राणिचित्तज्ञो यः सर्वेषां हृदि स्थितः यश्च सर्वविज्ञेयः सोहमस्मीति चिंतयेत् इतीद-
मेवाहंग्रहोपासनमित्याङ्गिरोपनिषदा आत्मभावोपासनमाह याज्ञवल्क्यः ततो ध्येयस्थितो योसौ हृदये दीपवत्प्र-
भुः धारयेत्तत्र चात्मानं धारणां धारयन् बुधः तथा द्वासप्ततिसहस्राणि हृदयादभिनिःसृताः हिताहिता नाम नाड्यस्ता-
सां मध्ये शशिप्रभं मंडलं तस्य मध्यस्थ आत्मा दीप इवाचलः स ज्ञेयस्तं विदित्वेह पुनराजायते न तु ध्यानेन परमात्म-
निज्ञानविषयीकृते सति अपुनरावृत्तिलक्षणो मोक्षो भवतीत्यर्थः चरमसाक्षात्कारात्पूर्वमपि ध्याननिरतस्य नित्य-
कर्मानुष्ठानेपि न दोष इति केचित् तन्न चरमसाक्षात्कारकालिककर्माननुष्ठानस्यानावश्यकतावोधस्य तस्य का-
र्यं न विषत इति वाक्यस्यैव ध्यानकालेपि तथा वोधकस्याभावात् प्रत्युत तदावश्यकतैव स्फुटं प्रतीयते तथा च नृ-
सीहपुराणे आत्मज्ञानसुखं यावत्तावद्ध्यानमुदाहृतं श्रुतिस्मृत्युदितं कर्म तदूर्ध्वं नु समाचरेत् यथाश्वा रथहीना
नास्त रथश्चाश्वैर्विना यथा एवं तपो ह्यविद्यस्य विद्या वाप्यतपस्विन यथान्नं मधुसंयुक्तं मधु चान्नेन संयुतं एवं त-
पोविद्यया पि संयुक्तं भेषजं भवेत् उभाभ्यामेव पक्षाभ्यां यथा खे पक्षिणां गति तथैव ज्ञानकर्मभ्यां प्राप्यते ब्रह्म शा-

Indira Gandhi National
Centre for the Arts

॥मोक्षध०॥

१२७८

ध्यतं विद्याज्ञाने ध्यानजन्यसगुणसाक्षात्काररूपेण देहद्वयविनाशसाध्यत्वात् मोक्षस्य देहापगमस्य चो
पासनासाध्यार्चिरादिमार्गगमनहेतुकत्वात् सगुणध्यानमधिकारिविशेषैरनुष्ठेयं तथा च तत्रैव विद्यातपोभ्यां
संपन्नो ब्राह्मणो योगतत्परः देहद्वयं विहायाशु मुक्तो भवति बंधनात् न देवयानमार्गेण यावत्प्राप्तं परं पदं न ताव
ल्लिंगदेहस्य विनाशो विद्यते क्वचित् इति विद्या ध्यानरूपोपासना ध्यानप्रकारविशेषं विष्णुपुराणे मैत्रेयं प्रत्युवाच
भूषणास्त्रस्वरूपस्थं यथेदमखिलं जगत् बिभर्त्ति भगवान्विष्णुस्तन्ममाख्यातुमर्हसि पराशर उवाच नम
स्कृत्वाप्रमेयाय विष्णवे प्रभविष्णवे कथयामि यथाख्यातं वशिष्ठेन ममाभवत् आत्मानमस्य जगतो निर्लेपम
गुणमलं बिभर्त्ति कौस्तुभमणिस्वरूपं भगवान् हरिः श्रीवत्ससंस्थानधरमनंते चेतः समाश्रितं प्रधानं बुद्धिर
प्यास्ते गदारूपेण माधवे भूतादिमिंद्रियादिं च द्विधाहंकारमीश्वरः बिभर्त्ति शंखरूपेण शार्ङ्गरूपेण च स्थि
ते चलस्वरूपमत्यंतं जवेनांतरितानिलं चक्रस्वरूपं च मनो धत्ते विष्णोः करे स्थितं पंचरूपा तु वै माला वैजयं
ती गदाभृतः सा भूतहेतुसंघाता भूतमाला च वै द्विज यानींद्रियाण्यशेषाणि बुद्धिकर्मात्मकानि वै शररूपाण्यशेषा १२७८
णि तानि धत्ते जनार्दनः बिभर्त्ति यच्चासिरत्नमच्युतोत्यंतनिर्मलं विद्यामयं तु तज्ज्ञानमविद्याकोशसंस्थितं इत्थं
पुमान्प्रधानं च बुद्ध्यहंकारमेव च भूतादीनि हृषीकेशे मनः सर्वेंद्रियाणि च विद्याविद्ये च मैत्रेय सर्वमेतत्समाश्रि

तं अस्त्रभूषणसंस्थानस्वरूपं रूपवर्जितं बिभर्त्ति मायारूपोसौ श्रेयसे प्राणिनां हरिः सविकारं प्रधानं च यत्पुमं
वाखिलं जगत् बिभर्त्ति पुंडरीकाक्षस्तदेवं परमेश्वरः या विद्या याप्यविद्या यत्सत्यं यासत्यमेव च तत् सर्वं सर्वभृ
तेशे मैत्रेय मधुसूदने आत्मोपासनामाह मनुः एवं स भगवान्देवो लोकानां हितकाम्यया धर्मस्य परमं गुह्यं ममेदं
सर्वमुक्तवान् सर्वमात्मनि संपश्येत्सच्चासच्च समाहितः सर्वमात्मनि संपश्यन्नाधर्मे कुरुते मनः आत्मैव देवताः
सर्वाः सर्वमात्मन्यवस्थितं आत्मा हि जनयत्येषां कर्मयोगं शरीरिणां खं संनिवेशयेत् खेषु चेष्टनस्पर्शनेऽनिलं
पक्तिदृष्ट्योः परं तेजः स्नेहेपो गां च मूर्त्तिषु मनसींदुं दिशः श्रोत्रे क्रांते विष्णुं बले हरं वाच्यग्निं मित्रमुत्सर्गे प्रजने
च प्रजापतिं प्रशासितारं सर्वेषां अणीयांसमणोरपि रुक्माभं स्वप्नधीगम्यं विद्यात्तं पुरुषं परं एतमेके वदंत्य
ग्निं मनुमन्ये प्रजापतिं इंद्रमन्ये परे प्राणमपरे ब्रह्म शाश्वतं एष सर्वाणि भूतानि पंचभिर्व्याप्य मूर्त्तिभिः जन्मवृद्धि
क्षयैर्नित्यं संसारयति चक्रवत् एवं यः सर्वभूतेषु पश्यत्यात्मानमात्मना स सर्वसमतामेत्य ब्रह्माभ्येति सनात
नं सर्वं सात्विकं जगत् सत् स्थूलं पृथिव्यादि असत् आकाशादि द्वे वाव ब्रह्मणो रूपे मूर्त्तं चैवामूर्त्तं चेति श्रुतेः
आत्मन्यध्यस्तानिति संम्यक् पश्येत् नतु यो पितृ अग्निमिव देवताशब्दो जगद्विवर्त्तपरः अत एवाह सर्वमिति अवा
स्थितमध्यस्तं चिदचितोर्वास्तवसंबंधानिरूपणात् जनयति अयस्कांतमणिरिव स्वसंनिधानेन प्रवर्त्तय

Indira Gandhi National Centre for the Arts

॥मोक्षप्र॥ त्ति ध्यायतीव लेलायतीवेति श्रुतेः शारीरिणं स्थूलं शारीरावच्छिन्नलिंगशारीरिणं विज्ञानं यज्ञं तनुते कर्माणि
तनुतेपि चेति श्रुतेः अनन्वागतं पुण्येनानन्वागतं पापेन असंगो ह्ययं पुरुषः इति च एवं पंचीकृतमाकाशं निवेशये
।२७५। तत्र हरेत खेषु अपंचीकृताकाशतत्कार्येषु श्रोत्रेंद्रियादिषु एवमाकाशं संहृत्यानिलं वायुं वायुं वेष्टने प्राणेस्प
र्शने त्वगिंद्रिये परं तेजः वास्तोग्निः पक्तिहस्तयोः पंचनप्रकाशहृदयसुजिजाठराग्नौ चक्षुषि च निवेशयेत् स्नेहे श
रीरस्थे अपो बाह्याः मूर्तिं शरीरे पृथिव्यां गां वा ह्यपृथिवीं एवं स्थूलपृथिव्यादिपंचकस्य वाह्यस्य देहादिषु ल
यमुक्त्वा इंद्रियेषु तदधिष्ठातदेवतालयमाह मनसीत्यादि इंद्रियानुग्राहकतया देवता सृष्टास्तत्रैव लयत्वं इमा
मनसो जातश्चन्द्रोः सूर्यो अजायतेति लिप्यते: क्रांते पादे वलेपाणौ अहरं हरनुल्पतयात्हरिरिंद्रः उत्सर्गे पायौ मि
त्रं मित्ररवं सूर्यं प्रजनने लिंगे प्रजापतिं दक्षं तत्सर्वमात्मनि चितयेत प्रेत्तियो वेद्रिया ग्राह्यः सूक्ष्माव्यक्तः सनातनः
सर्वभूतमयो चिंत्यः सएष स्वयमुद्वभौ इत्युपक्रांतात्मानं निरूप्य ज्ञेयत्वेनाह प्रशासितारमिति तस्यैतस्य प्रशासन
नेगाग्निसूर्यचंद्रमसौ विहृतौ तिष्ठतः इति श्रुते रुक्मामं स्वप्रकाशं स्वप्नधीगम्यं तत्वमस्यादिनिर्विकल्पकधीग ।२७५।
म्यं पुरुषं पूर्णं विद्यात् जानीयादित्यर्थः अद्वैतवादिनां विप्रतिपत्ति माह एतमेक इति शब्दमात्रविप्रतिपत्तेरर्थ
त्स्वेक एवेति भावः एष एवांतर्यामित्वमनुभवतीत्याह एष इति मोक्षस्य परमपुरुषार्थत्वं दर्शयन् तत्रैवा।

स्पर्शस्वस्य तात्पर्यमाह एवं य इति इति केचित् व्याचक्षते कल्पतरुकाराणां कार्येषु लयासंभवात् ध्यान
मात्र एव तात्पर्यं तथा च सर्वमात्मनि संप्रश्येत ध्यायेत तत्र अवशेषमाहरवमिति वा ह्यमाकाशं स्वशरीरगतनभ
श्छिद्राकाशेन सहैकत्वेन भावयेत् एवमग्रेपि एवमाध्यात्मिकरूपादिभिस्सहाधिभौतिकानाधिदैविकानामैक्यं
भावयित्वा तेप्रशासितारं ब्रह्मादिस्तंब पर्यंतानां व्यवस्थाकारिणं परमात्मानं जानीयात् यादृक् सुषुप्तावस्था
यां प्रत्यस्तमितद्वैतः सविकल्पद्वेष ज्ञ स्वरूपं एवं विधं परमोरेत्मनः एवंभूतं परमात्मानं अग्नित्वेनोपासते याज्ञिकाः
अन्ये पुनः सर्वत एवात्मानो व्युच्चरंतीति सृष्टत्वश्रुतेः प्रजापतिरूपतयापरे पुनरैश्वर्ययोगादिंद्रतया केचित्प्रा
णतया प्राणमधुज्जीय पुपासीतेति श्रुतेः अन्ये पुनः परमात्मतयेति एष परमात्मा सर्वान् प्राणिनः पंचभिः पृथि
व्यादिभिर्भूतैः शरीरारंभकैः परिगृह्य स्वार्जितकर्मविपाकयोत्पत्तिस्थितिविनाशैः संसरणे नियोजयतीत्यर्थः इ
ति व्याचख्यौ युक्तं चैतत्तदुपासनायाः प्रकरणात् इति माह भारते इंद्रियग्राममखिलं मनस्यभिनिवेश्य च मनस्त
थैवाहंकारे प्रतिष्ठाप्य नराधिप अहंकारं तथा बुद्धौ बुद्धिं च प्रकृतावपि एवं च परिसंख्याय ततो ध्यायेच्च केवलं
विरजस्कमलं नित्यमनंतं शुद्धमव्रणं तस्थुषं परमं तत्वमनघमजरामरं शाश्वतं चाव्ययं चैव ईशानं ब्रह्म तत्प
रं दक्षः वहिर्मुखानि सर्वाणि कृत्वा चांतर्मुखानि वै मनसैवेंद्रियग्रामं स्वात्मना विनियोजयेत सर्वनावविनिमु

Indira Gandhi National Centre for the Arts

॥मोक्ष१०॥ कंठे चक्रं ब्रह्मणि न्यसेत् एतज्ज्ञानं च योगश्च शेषोऽन्यो ग्रंथविस्तरः चतुर्णां संनिकर्षेण फलं यत्तदशाश्वतं द्वयोस्तु
संनिकर्षेण शाश्वतं ध्रुवमव्ययं यन्नास्ति सर्वलोकस्य तदस्तीति विरुध्यते कथ्यमानं तथान्यस्य हृदयेनावतिष्ठते
१८णी सुसंवेद्यं हि तत्त्वज्ञ कुमारी स्त्रीसुखं यथा अयोगी नैव जानाति जात्यंधो हि यथा घटं नित्याभ्यसनशीलस्य सुसं
वेद्यं हि तद्भवेत् सूक्ष्मत्वात्तदनिर्देश्यं परं ब्रह्म सनातनं चतुर्णामिति आत्ममनोविषयेंद्रियाणां द्वयोरात्ममनसोः
ब्रह्मप्राणे गुणेंद्रियशरीरैश्च भूततन्मात्रजातिभिः सुखदुःखैरहं नित्यमपरामृष्ट एव हि चिद्रूपो विमलो व्या
पी द्रष्टा श्रोता च सर्वज्ञः घ्राता स्पर्शयिता देही तथा रसयिता प्रिय नित्यं कर्त्ता न कर्ता च गृहीता देहवर्जितः ऐश्वर्य
योगमेतन्मे स्थितो ह्येकस्त्वनेकधा आकाशं यदिदं सर्वं विश्वं स्थावरजंगमं आत्मैवाहं जगत्सर्वं निष्फलं स
कलं हि यत् इति भावनया योगी यदा स्यात्सुदृढीकृतः विमुक्तो देहगहनात्तदा स्यात्परमेश्वरः अथ प्रणवो
पासना सर्वोपासनानिदानतया मुमुक्षुभिः प्रणवोपासनैवानुष्ठेया अथ प्रणवप्रशंसा तत्र योगियाज्ञवल्क्यः प्र
णवाद्याः स्मृता मंत्राश्चतुर्वर्गफलप्रदाः तस्माद्विनिःसृताः सर्वे प्रलीयंते तु तत्र वै मंत्रेभ्यः प्रणवो धन्यः सर्वकामप्र १८णी
साधनः ओंकारः परं ब्रह्म सर्वमंत्रेषु नायकः प्रजायते मुखोत्पन्नस्तपः सिद्धस्य वै पुरा तेनोपास्तस्ततस्तस्य ब्रा
ह्मर्षित्वं स्वयं भुवः तथा त्र्यक्षरमेतच्च ब्रह्मविद्ब्रह्मचारिणः तथा सिद्धांतविह सर्वेषां वेदवेदांतयोस्तथा अ

न्येषामपि शास्त्राणां निर्णय ओंकार उच्यते प्रणवाद्याः स्मृता वेदाः प्रणवे पर्यवस्थिताः वाङ्मयं प्रणवः सर्वं तस्मात्प्रण
वमभ्यसेत् तथा आद्यं यत्त्र्यक्षरं ब्रह्म त्रयी यस्मिन् प्रतिष्ठिता स गुह्योऽन्यस्त्रिवृद्वेदो यो वेदैनं स वेदवित् शौनकोपि ओ
मिति ब्रह्म ओमितीदं सर्वमित्युद्गीथमक्षरं प्रणवो हि परं ब्रह्म प्रणवश्चापरं स्मृतं एतेनैकतरं विद्वान् उदासीनः प्र
पद्यते योगी याज्ञवल्क्योपि तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा त
स्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः प्रवर्त्तंते विधानोक्ताः सततं ब्रह्मवादिनां यथैव शंकुना पर्णान्संतृणा
सर्वशः एवं सर्वा स्फुटे वाचः संतृणाः प्रणवेन तु क्लेशाकर्मविपाकैस्तु वासनाभिस्तथैव च अपरामृष्टमेवाहु पु
रुषं हीश्वरं श्रुतिः वाच्यस्तस्येश्वरः प्रोक्तो वाचकः प्रणवः स्मृतः वाचके न तु विज्ञाते नाच्य एव प्रसीदति तदर्थं
प्रणवो जप्यो ध्यातव्यस्तत्तत्त्वबुधैः ईश्वरः पुरुषस्तेनोपासितः संप्रसीदति यथा हि गौर्वत्सरुतं निशाम्य दूरं कृत्
वत्साभिमुखं प्रयाति ब्रह्मापि तद्वत्प्रणवोपहूतं वक्त्रारभ्यमागच्छति द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च
यत् शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति तैत्तिरीयश्रुतिरपि ओमिति ब्रह्म ओमितीदं सर्वमिति मांडूक्योपनि
षदि ओमित्येतदक्षरं तस्योपव्याख्यानं भूतं भवद्भविष्यदिति सर्वमोंकार एव यच्चान्यत् त्रिकालातीतं तदप्योंकार एवे
ति छांदोग्ये ओमित्येतदक्षरमुद्गीथमुपासीतेति आथर्वणेपि सत्यो हैवैतद्भगवन्मनुष्येषु प्रायणांतमोंकारमभि

Indira Gandhi National
Centre for the Arts

ध्यायीतकतमंवावसेततेनलोकंजयतीतिसत्यकामस्तङ्गपकम्पाधीयतेतस्मैसहोवाचतद्वैसत्यकामःपरचापरंच
ब्रह्मयदोंकारस्तस्माद्विद्वानेतेनैवायतनेनैकतरमन्वेतिसयद्येकमात्रमभिध्यायीतसतेनैवसंवेदितस्तूर्णमेवजग
त्यामभिसंपद्यतेतमृचोमनुष्यलोकमुपनयन्तेसतत्रतपसाश्रद्धयासपन्नोमहिमानमनुभवतिअथयदिद्विमात्रे
णमनसिसंपद्यतेसोन्तरिक्षंयजुर्भिरुन्नीयतेसोमलोकंयःपुनरेतेनत्रिमात्रेणत्रीमित्येतेनैवाक्षरेणपरंपुरुषमभि
ध्यायीतसतेजसिसूर्येसंपन्नोयथापादोदरस्त्वचाविमुच्यतेएवंहवैसपाप्मनाविमुक्तःससामभिरुन्नीयतेब्र॰
ह्मलोकंसएतस्माज्जीवघनात्परात्परंपुरिशयंपुरुषमीक्षतेवेदोयंब्राह्मणविदःवेदतेनयद्वैतंनयद्वेदितव्य
मितिअयंपक्षतत्वात्प्रणवःएवमेत्राणयादिश्रुतिभ्योपिप्रणवस्योत्कृष्टत्वात्तदुपासनाआदरेणकार्येतिसि
द्धमथोपासनांगभूतंत्रिप्रकारेणप्रणवज्ञानमस्मुदयहेतुरितितस्यत्रिप्रकारात्मताज्ञेयातथाचशौनकःअतः
परंप्रवक्ष्यामिप्रणवस्यत्रयात्मतांत्रैविध्यंयद्विदित्वैवयोगीनोमोहमृच्छतियाज्ञवल्क्यःअकारसंज्ञंत्रिगुणंब्रह्म
रंचत्रिदैवतंत्रिब्रह्मत्रिस्वरस्थानंत्रिकालंत्रिप्रतिष्ठितंत्रिःपदंचत्रिधामंचत्रिरवस्थंत्रिलिंगकत्रिधातुकंसमुद्दिष्टं १८१
सर्वज्ञैःशौनकःस्याप्रिईयतिअक्षरस्त्रिस्वरश्चैवत्रिमात्रश्चत्रिवर्णकःत्रिस्थानश्चत्र्यवस्थश्चत्रिब्रह्मात्रिमुख
स्तथात्रिसंज्ञस्त्रिपदश्चैवत्रिप्रज्ञामात्रश्चत्रिवर्णकःत्रिस्थानश्चत्र्यवस्थश्चत्रिब्रह्मात्रिमुखस्तथात्रिसंज्ञस्त्रिपदश्चै

---

वत्रिप्रज्ञस्त्रिदैवतःअग्निश्चैवास्त्रिसामाचत्रिकालस्त्रिप्रतिष्ठितःत्रिहस्तिकस्त्रिसवनःत्रिलोकश्चत्रिप्राणकःत्रि
मोत्कर्षस्त्रिगोप्यश्चत्रिधातुश्चत्रिलिंगकःआत्मास्त्रिस्वनावश्चत्रिव्यूहमपरेजगुःत्रिगुणःत्रिविज्ञेयःत्रिविकारम
यापरेत्रिव्याहृतिश्चत्रिछंदाःप्रोच्यतेवेदवादिभिःअकारश्चतथोकारोमकारश्चाक्षरत्रयंयदाकारउकारश्चम
कारश्चैकतांत्रयन्वर्णाःप्रयांत्युदेत्येकोज्योतिज्ञाव्दस्तदोमितितैलवर्त्यग्निसंयोगात्यथादीपःप्रजीयतेतथाअक्ष
रसंयोगात्प्रदीपःप्रणवात्मकःउदात्तश्चानुदात्तश्चस्वरितश्चस्वरास्मृताःअउमइतितिस्त्रोस्यमात्राःसम्यक्प्र
कीर्तिताःह्रस्वोदीर्घःप्लुतश्चेतिमात्रास्तिस्रस्तथापराःश्वेतरूपामलरक्तारव्यास्त्रिवर्णाःपरिकीर्तिताःहृदयंकंठआ
स्यश्चस्थानत्रयमुदाहृतंप्रज्ञातघोरमूढास्त्यास्तिस्रोवस्थाःप्रकीर्तिताःऋग्यजुःसामभिःप्रोक्तस्त्रिब्रह्मब्रह्मवादिभि
ःगार्हपत्यादिभिस्त्रिभिरोंकारंत्रिमुखंविदुःअतंर्मध्यबहिःसंज्ञैःत्रिसंज्ञइतिकथ्यतेब्राह्मंवैष्णवमैशानंपदत्रयमुदा
हृतंबहिरंतर्घनप्रज्ञैःत्रिप्रज्ञंविदुरुत्तमाःब्रह्मविष्णुशिवाख्याभिर्देवताभिस्त्रिदैवतःअग्निस्मृतोग्निभिस्थ्रायंसोर
वैद्युतजादरैःमोक्षार्थकामैर्मुनिभिस्त्रिवर्गःपरिपठ्यतेरथंतरंवामदेव्यंतृतीयंसामवैहवत्भूतनभक्तविष्णुक्रिस्त्रि
कालःसमुदाहृतःतुरीयप्राणसूर्येषुत्रिष्वेवप्रतितिष्ठतिजाग्रत्स्वप्नसुषुप्त्याख्यातिस्त्रोवृत्तयईरिताःप्रातर्मध्यंदिनी
येश्चसवनत्रयउच्यतेभूरंतरिक्षस्वर्गाख्यैस्त्रिलोकःपरिकीर्तितःप्राणोपानस्तथाव्यानःप्राणश्चत्रयईरिताःप्रा

Indira Gandhi National Centre for the Arts

॥मोक्षध०॥

१८७

णागन्धादिरूपेण त्रिगुणोऽष्टकं उदीर्यते शरीरोदकलेमाख्येस्त्रिणो ज्ञं पुनर्योविदुः वातपित्तकफाख्येश्च त्रिधातुराभि-
धीयते स्त्रीपुंनपुंसकैः सद्भिस्त्रिलिंग इति कथ्यते वीर्यतेजोबलैः प्राज्ञस्यात्मानं मुनयस्तथा त्रिस्वभावस्मृतो धीरैरैश्वर्य
ज्ञानशक्तिभिः संकर्षणश्च प्रद्युम्नस्त्वनिरुद्धस्तथैव च प्रणिभिस्त्रिव्यूह इत्युक्तः प्रणवो विभुरव्ययः सत्त्वं रजस्तम इति त्रि-
गुणः प्रोच्यते बुधैः व्यक्तप्रधानपुरुषैस्त्रिविज्ञेयं परं विदुः मनोहंकारबुद्ध्याख्यैस्त्रिविकारं प्रचक्षते भूर्भुवस्वः समाख्यै-
स्तु त्रिव्याहृतिरुदाहृतः त्रीणि छंदांसि गायत्री त्रिष्टुप् चैव हि तथा जगत् अकारं पुरुषं प्राहुरोकारं प्रकृतिं बुधाः अका-
रं त्रिगुणं सर्वमोकारं निर्गुणं विदुः त्रिप्रकारं विदित्वैवं मुच्यते संसृतेर्द्विजः अकारमात्रज्ञाने फलमुक्तं वायुपुराणे
अर्द्धमात्रविद्योगी शृणु यत्फलमाप्नुयात् मासे मासेऽश्वमेधेन यो यजेत शतं समाः न स तत्प्राप्नुयात्पुण्यं मात्रया-
यदवाप्नुयात् न तथा तपसोग्रेण न यज्ञैर्भूरिदक्षिणैः यत्फलं प्राप्नुयात्सम्यक् मात्रया यदवाप्नुयात् अप्रविद्धः कु-
शाग्रेण मासे मासे पिबेन्नरः संवत्सरशतं पूर्णं मात्रया तदवाप्नुयात् इष्टापूर्तस्य यद्दस्य सत्यवाक्यं च यत्पुनः अपक्षा-
णेदमासस्य मात्रया तदवाप्नुयात् स्वाम्यर्थे युध्यमानानां शूराणामनिवर्तिनां यद्भवेत्तत्फलं पूर्णं मात्रया तदवाप्नु- १८७
यात् मात्राप्रकारा उक्ताः शौनकेनाप्योंकार आख्यातो मात्राणां तत्त्वबोधने वाष्कलेनैकमात्रोऽयमोंकारः समु-
दाहृतः शालंकायन आचार्यो द्विमात्रमभिवांछति सार्द्धद्विमात्रमोंकारं नारदो मुनिरब्रवीत् त्रिमात्रं मुद्गलः प्राह प्रण-

वं मुनिपुंगवः सार्द्धत्रिमात्रमोंकारं वशिष्ठो मुनिरब्रवीत् पराशरश्चतुर्मात्रं प्राह तत्त्वध्यात्मतत्त्ववित् मात्राश्चार्द्धच-
तस्रोऽस्य विज्ञेयाः परमार्थतः अर्द्धचतस्रो परिपूर्णाश्चतस्रः सार्द्धास्तिस्रो मात्रा इत्यर्थ इति हेमाद्रिः अत्र मात्राश-
ब्देनोच्चारणकालो गृह्यते तदेवस्पष्टीकृतं हेमाद्रौ दीर्घप्लुतशांत प्रणवस्त्रिविधस्य तद् इति स्वयमेवाभिधानात् प्रणवस्व-
रव्यवस्थाविवेकमाह स एव अनुदात्तोदात्तश्चाग्वेदे प्रणमात्रस्वर उच्यते सर्वोदात्तो यजुः साम्नोः प्लुतातीतः प्लुतस्त-
था तत्र तावदोंकार ऋग्वेदे अनुदात्तश्चोदात्तश्च प्रयोक्तव्यः सत्वप्रह्वमात्रायस्य स्वरस्य असौ स्वरो यस्य प्रणव-
स्य स प्रणमात्रः प्रणवः पूर्ववर्ण त्रिघस्य मात्रा त्रयमनुदात्तं नादस्य त्रिमात्रमुदात्तं अकार उकार मकार नादानां समु-
दाय द्वयं त्र्यात्मक एकः नादात्मक एकः द्वयमपि कुसतयैवोच्चार्यं यदा तदा ऋग्वेदे पूर्वसमुदायस्यानुदात्तः
उत्तरस्य तूदात्तः उच्चारणकालभेदात् स्वनेद उच्यते एवमग्रेऽपि एवं यजुः सामवेदयोरपि क्रमेण प्लुतातीत सार्द्ध-
त्रिमात्रः प्लुतस्त्रिमात्रः समुदाय द्वयेपि सर्वोदात्त एव तथा च तत्तद्वेदिभिरूपासनायां तथा तथोपासनीय उच्चारण?
यइतिभावः प्लुतकारस्य स्वरमुक्त्वा द्विमात्रोंकारस्य स्वरविवेकमाह स एव ऋग्वेदे स्वरितोदात्त एकाक्षर उदाहृ-
तः त्रैस्वर्येण वर्तते यो दात्तो यजुर्वेदे तु कथ्यते दीर्घप्लुतः सामवेदे उदात्तैकाक्षरस्तथा संहितोदात्त एवं तु एकाक्षर उ-
दाहृतः अथर्ववेदे संहृष्ट उदात्तो नात्र संशयः द्विमात्रः एकाक्षरः पूर्वसमुदायः स्वरित उत्तरः उदात्तः यजुर्वेदे

Indira Gandhi National Centre for the Arts

॥मो०द्वा१०॥ पूर्वसमुदाये स्वरत्रयं उत्तरे च उदात्त— मेव सामवेदे तु द्विमात्रोपि दीर्घोपि प्लुत एव सार्द्धद्विमात्रः पठ्यते प्लुतातीत
स्य सार्द्धत्रिमात्रस्य त्रिमात्रत्वेन गणनवत् दीर्घप्लुतस्यापि सार्द्धद्विमात्रस्य द्विमात्रत्वेन गणनं तत्र पूर्वोक्तः काद्धारो
।२८३। द्विमात्रप्रणवः द्वितीयः संक्षिप्तोदात्तः अथर्ववेदे तु पूर्वोत्तरस्योदात्ततरावेत्यभिप्रायः अकारस्वरूपमाह स एव
पादौ रजस्तमो वा हरं शरीरं सत्वमुच्यते अकारो दक्षिणः पार्श्वे उकारस्तूत्तरः स्मृतः मकारश्च वपुर्मध्यमर्द्धमात्रश्चि
रस्तथा प्रत्येक मात्रायाश्च अपि वाङ्कल्पं दर्शयति योगियाज्ञवल्क्यः एकैकात्र भवेन्मात्रा वहुधा सा तु वैष्णवः तासां
सर्वचाश्रयं तु श्रोतं प्रो [illegible] तं व्यवस्थितं प्रथमा तस्य अकारो वा क्तत्वं भू— ताद्रा नो विस्तुः स्थूलाजाग्रद्वृ
त्तिर्विज्ञेया योगतत्वज्ञैः अन्तरिक्षसंज्ञो मनोरजः सोमसज्ञित उकारः मात्रा स्वप्नप्रविकल्पा सृष्टिसंज्ञा द्विती
या स्यात् रौद्री मकारसंज्ञा प्राण रव्याता भसीत् तृतीया स्यात संहरति जगत् कृत्स्नं सुषुप्त्या रव्या माहा निद्रा श्रा
न्त्यः परतरा सूक्ष्मा शांता गांधर्वी निरवयवा न निलक्ष्या सौम्या मकारसंज्ञानु विज्ञाना कारा सर्वदेति मात्राश्च त
स्रो स्य विज्ञेयाः परमार्थः तत्र ह्रस्वो दीर्घः प्लुतः शांत प्रणवस्तु चतुर्विध इति प्रागुक्तं चातुर्विध्यं मात्राणां तत्र— स्वादी ।२८३।
नां रूपं प्रसिद्धं शांत प्रणवस्वरूपं प्रपंचितं शौनकेन मात्रालिंगपदं त्यक्त्वा शब्दव्यंजनवर्जितं अस्वरेण मकारेण
पदं सूक्ष्मं निगच्छति निर्गुण यो— गम्या सायात्ममात्रा च संस्थिता गांधारीति च विज्ञेया गांधारस्वरसंभवापि

पीलिका गति स्पर्शा यो पि नां मूर्द्धिन लक्ष्यते यदा प्रयुक्त अकारः प्रतिनिर्वाति मूर्द्धनि तदोंकारमयो योगी त्वक्षरे भ्
तरी भवेत् मात्राः ह्रस्व दीर्घ प्लुताख्याः लिंगं पुंस्त्रीनपुंसकाख्यं पदं सुबंतं तिङंतं शब्दः संसर्गबोधक पदसमुदाय
रूपः व्यंजनवर्णतद्वर्जितं एतदात्मता शून्यं शांतातिधं प्रणवं अस्वरेण नादरहितेन मकारेण जातेन नादसहितम
कारान्नादसमये नोपल— तेपः वर्णाः योगिभिः सशांतशत्पर्थः तमेव विद्वणोति निर्गुणेत्यादि अत्र प्रणवे यास्थिता
आत्ममात्रा आत्मैव मात्रा शीशः प्रणवस्य सा निर्गुणा सत्वादिगुणरहिता योगगम्या चित्तैकतान वेद्या गांधारी
ति च नाम्ना विज्ञेया यतो गांधारस्वरसंभवा सा प्रयुक्ता आविर्भूता पिपी— का गति स्पर्शा प्रयुक्ता मूर्द्धिन लक्ष्यते
यदा आत्ममात्रां शांताख्यां योगी प्रविशति तं कालं दर्शयन् व्याचष्टयति यदा प्रयुक्तेति यस्मिन्काले प्रयुक्त— ८
कारः प्रतिनिर्वाति ह्रदयाद्— त्य मूर्द्धन्युपशाम्यति तदोंकारमय— कारशरीरो भूत्वा अक्षरे परमात्मन्य संत
री— भवेत् अंतःप्रविष्टस्यात् तथा आत्मा ङ्क वचात्म लयं विदित्वा प्रणवं मुनिः संयोज्यात्मनि चात्मानमात्म
न्येव प्रलीयते योगियाज्ञवल्क्यः अंतःशरीरपवनमुदानप्रेरितं च यत् वागुच्चार्यश्रोत्र हृत्त्रिशब्द द्वितिस
ज्ञाप्यते शब्दाब्रह्म परं ब्रह्म तस्मिन् क्षीणे पदाक्षरं तदक्षरं सदा ध्यायेत् यदीच्छेद्योगमात्मनि अकारस्यापुका
रस्य मकारो बिंदुरेव च मात्रार्द्धत्रय यो गाश्च प्रणवः पंचलक्षणः वेदादौ यः स्वरः प्रोक्तो वेदांते च प्रतिष्ठितः तस्य

Indira Gandhi National
Centre for the Arts

॥मोक्ष१० ॥ प्रकृतिलीनस्य यः परः स महेश्वरः यतो वाचो निवर्त्तंते अप्राप्य मनसा सह आनंदं ब्रह्मणो विद्वान् न बिभेति कु
तश्चन प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत् स्वदेहमरणिं कृत्वा प्र
१८४। णवं चोत्तरारणिं ध्याननिर्मथनाभ्यासात् देवं पश्येत् निगूढवत् तथा यस्तु शब्दमये कारश्चार्यः स्थूल एव सः अ
मात्रश्चाप्युच्चार्यम र— कारश्च्यवतेति स्वः सार्द्धास्तथा मात्राः स गृह्णाति यथाक्रमं परं ब्रह्म तदेवाङ्गः स्वात्मा
नं ब्रह्मचिंतकाः यत्पूर्वं तु समुद्दिष्टमोकाराग्रे व्यवस्थितं अक्षरैश्चापदैश्चैव तदतीतपरं पदं यत्प्राप्य न निवर्त्तंते
— कारपदमाश्रिताः मनस्तत्र समाधाय शरीरलिंगमात्रकं अप्राणो विमलः शुद्धो निःशब्दो ब्रह्मसंज्ञितः तस्मा
दुत्पद्यते प्राणः पुनस्तत्रैव लीयते प्रणवे नित्ययुक्तस्य न भयं विद्यते क्वचित् प्रणवो धनुरिव धनुर्जीवस्य ब्रह्मणि
निक्षेपनिदानत्वात् आत्मा अहं गृह गृहीतः क्षेत्रज्ञः स निक्षेपणीयत्वाच्छरः प्रणवधनुर्नादनेलयस्य निपूर्व
न्यावस्थितं परब्रह्मशांतानिधं तलक्ष्यशरवदेतत्प्रमुच्यते अप्रमत्तेनैकाग्रचित्तेन तमानं शरं प्रणवधनुषि संयोज्य वे
द्धव्यं ब्रह्मनालेन सह मूर्द्धाकाशमामतः पश्चान्नेस्थित्वा चिंतयेत् एवं लक्ष्ये ब्रह्मणि जीवशरोंतः प्रविष्टस्तन्मयो ब्रह्म १८४
मयो भवेत् नष्टपकृलक्ष्ये तन्शरः इव लक्ष्ये अथवा लोपनिषध— न्नातोमं चोचोदाहृतः शान्तात्मनो ब्रह्मरूपत्वेज
डोंकारात्मताविरुद्धात् स तत्र कुर्वीत नाधि— ष्ठितमिति ध्यानसिद्ध ये ब्राह्मणि प्रणवलयप्रकारे दर्शयति स्म शौन

कः अकारः पीड्यमानः सन्नुकारं प्रतिपद्यते उकारः पीड्यमानोपि मकारं प्रतिपद्यते अर्द्धमात्रां मकारोपि पीड्यमा
नः प्रपद्यते पीड्यमाना इति कर्मकर्त्तरि प्रयोगाद्धिनश्यन्नित्यर्थः योगियाज्ञवल्क्यः तिस्रो मात्रा लयं यांति अर्द्धमा
त्रेन संशयः अर्द्धमात्रात्वमात्रेण लयं याति निरामये शौनकः अधरोष्ठो यदालंबो मकारस्तु तदा भवेत् यदा तालु
गता जिह्वा तदा नादः प्रपद्यते प्रपद्यते यदा जिह्वा निरालंबं तदा भवेत् उपरि तेनोद्यानश्च दन्तोष्ठस्तस्माधस्तनोधरः
निरालंबमालंबनश्च त्वं शान्तं ब्रह्म उपसंहरति स एव अर्द्धमात्रेन लयं यातीति तिस्रो मात्रा न संशयः अर्द्धमात्रापि विलि
यं यात्यमात्रे निरालये एवं शांते लयं यांति सर्वमात्रा न संशयः अकारादिचतुर्मात्राशब्दो नोच्चारणकालपरि
माणमात्रवचनः प्रणवोच्चारणप्रकारं दर्शयति स एव निनदः कांस्यघंटाया लीयते शांत येऽयथा तथा प्रयुक्त— का
रः सर्वदुःखोपशांतये तथैवाभिहितं भगवता वितैलधारावदच्छिन्नदीर्घघंटानिनादवत् अवाच्यं प्र— वस्याग्रं य
स्तं वेद स वेदवित् यस्मिन् प्रलीयते शब्दस्तत्परं ब्रह्म गीयते यः शब्दमय— कारश्चार्यः स्थूल एव सा अमात्रो यो
नश्चार्यः स अकारः परो मतः अमि तिशब्दो यस्मिन् प्रलीयते तदशब्दं शीतं परं ब्रह्म गीयते शब्दमय अकाका
रो यः स इंद्रियग्राह्यत्वात् स्थूल एव यस्तु नोच्चार्यो मात्रावर्जितः परब्रह्मरूप अकारः स उच्चार्या छब्दमयात् प्रश
स्तः श्रेष्ठो मतो मुनीनां अतो शास्त्र्यविशेषेण कार्या न शब्दमात्र एव संतोष्टव्यमिति भावः तर्हि शब्दमयो कारेण किमि

Indira Gandhi National Centre for the Arts

॥गीता०प्र०॥ त्वा कांक्षायां ज्ञांत ब्रह्मप्राप्तये न वतीत्याह स एव अमित्युच्चयित्वा व स्या वच्छित्तं प्रसीदति उत्तस्तप श्चादोंकारं ध्ये
यं ब्रह्माणुचिंतयेत चित्तप्रसाद नार्थोयं अकारज प स्तावत्याव च्छित्त शुद्धिः योगियाज्ञवल्क्यः एकमात्रद्विमात्रं
॥१८५॥ वा त्रिमात्रं क्रमेव वा ह्रस्वं दीर्घं प्लुतं ज्ञांतं ज्ञांतेन मनसा जवेत मनसैवं विधमुपास्पन वेदित्यर्थ शौनकोमात्राना मा
न्याह आग्नेयी वाप वीचैव ना स्करी मारुती च ता इति तथैवा थर्वशिरवायी श्रयते चतुष्पादिदमक्षरं परं ब्रह्म
पूर्वास्य मात्रया पृथिव्यकारः स अग्निः ऋग्वेदो ब्रह्मा वसवो गायत्री गार्हपत्यः द्वितीयांतरिक्षं स उकारः स यजु
भिर्यजुर्वेदो विष्णुर्वसुस्त्रिष्टुप् दक्षिणाग्निः तृतीया द्यौः स मकारः स सामभिः सामवेदो रुद्र आदित्यो जगती आह
वनीयः चतुर्थ्यर्थमात्रा स सोमलोकः सोंकारः स आथर्वणैर्मंत्रैरथर्ववेदः संवर्त्तकोग्निर्मरुतो विराडेक ऋषिः
स्मृत इति ओंकारस्योत्पत्तिरपि ध्यातव्या वेदादौ तदाम्नानस्य तदर्थत्वात उक्तं च उत्पत्ति लयश्चापि ज्ञेयं प्रणव यो
गिनेति उत्पत्तिश्च श्रूयते छांदोग्ये प्रजापतिर्लोकानभ्यतपत् इत्युपक्रम्य त्रय्याः विद्यायाः क्षराणि प्रास्रवत भूर्भुवः स्वरिति ते
भ्योभितप्तेभ्यो अकारः संप्रास्रवत बृहदारण्यकश्रुतिरपि प्रजापतिरकामयतेत्युपक्रम्य भूरित्येव ऋग्वेदादजायत भु ।१८५।
व इति यजुर्वेदात स्वरिति सामवेदात तानि शुक्राण्यभ्यतपत् तेभ्योभितप्तेभ्यस्त्रयो वर्णा अजायंताकार उका
र मकार इति तानेकधा समभरत्तदेतदोमिति अत्र प्रणवोपासना प्रकारा भवंति तत्र पाक्षपार्थे जपमात्रमि

त्येकः अथन ध्यायते जंतुरालस्याच्च प्रमादतः यस्त्रिकालं समावर्त्य स गच्छेत परमं पदमिति वचनात शब्दाद
द्वारूपाच्च अपरः प्रकारः शब्दस्वरूपेणोपासनं मानसजपरूपमन्यतो निष्पन्नचेतसः पाक्षपार्थे ब्रह्मणी वेदि
तव्य इति श्रुतेः कारमुद्गीथमुपासितेति च सर्वकामावाप्तये च एतदेवाक्षरं ब्रह्म एतदेवाक्षरं परं एतदेवाक्षरं
ज्ञात्वा यो यदिच्छति तस्य तदिति मैत्रायणीयश्रुतेः ज्ञात्वोपास्येत्यर्थः तृतीयः प्रकारः कारो ब्रह्मरूपेणोपासितव्य
इति यथा मुख्यैः प्रतिमा विष्णुरूपेणोपास्यते योगियाज्ञवल्क्योपि कश्चिदाराधनाकामो विष्णोर्भक्तिं करोति वेत
दाराधनसिद्ध्यर्थं प्रतिमां वंजिकां तदा धातुदार्वादि पाषाणैः कृत्वा भावं निवज्ञायेत न तस्याः स्थादरान्यं वस्य
विष्णुः प्रसीदति ओंकारेण तथा ह्यात्मोपासितः संप्रसीदति एतदालंबनं श्रेष्ठं एतदालंबनं परं एतदालंबनं ज्ञा
त्वा ब्रह्मलोके महीयते ब्रह्मभूयाय कल्पते अहं श्च विग्रहो देवो भावग्राह्यो मनोमयः तस्योंकारः परं नाम तेनाहूतः प्रसीदति तस्मा
दोमिति पूर्वं तु कृत्वा युंजीत तत्परः जाग्रत्स्वप्नसुषुप्तानि पदान्येतानि तस्य तु वहिःप्रज्ञस्त्वयांतश्च घनप्रज्ञश्च
धाजवेत दक्षिणाक्षिमुखे विश्वो मनस्यंतस्तु तैजसः आकाशे तु हृदि प्राज्ञस्त्रिधा देहे व्यवस्थितः स्थूलं वैश्वान
रो नित्यं तैजसोंतः प्रवृत्तिभुक् आनंदभुक्तथा प्राज्ञस्त्रिधा भोगं विजानत स्थूलं तु सर्पं तेविश्वं प्रविविक्तं तु तैजसं
आनंदं वतथा प्राज्ञं त्रिधा तृप्तिं विजानत त्रिषु धामसु यद्भोज्यं भोक्ता यश्च प्रकीर्त्तितः उभयं विदते यस्तु स भुं

...dhi National
Centre for the Arts

॥मो॰प्र०॥ जीनोन लिप्यते इत्यै – वमुपासनं तृतीयं प्रणवेन साकारे निराकारं वा ब्रह्म ध्येयमिति चतुर्थः प्रकारः तत्राद्यो यथा
१८६ ह भगवान् सनत्कुमारः एवमभ्यर्च्य देवेशं नारायणमनामयं तद्रूपं चिंतयेद्योगी प्रणवेन समाहितः साकारं वं यथा
योगं नित्यं मनसि धारयेत् आदित्यवर्णं पुरुषं पुंडरीकदलेक्षणं शंखचक्रगदापाणिं पीतनिर्मलवाससं किरीटहा
रकेयूरकटकादिविभूषितं श्रीवत्सवक्षसं श्रीशं कौस्तुभेनोद्भासिवक्षसं चतुर्बाहुं हृषीकेशं पुंडरीकाक्षमच्युतं हृ
त्पद्मकर्णिकामध्ये स्थितमासीनमेव वेति द्वितीयमाह स एव प्रणवेन स्मरेन्नित्यं निर्गुणं पंचविंशकमिति अत्र
च प्रणवेन निर्गुणोपासनायां ब्रह्मवित्तम एवाधिकारी सगुणध्याने ब्रह्मवित् पूर्वोक्ततृतीयप्रकारे विद्वान् विशुद्ध
चित्तः अतथाभूतस्तु जपमात्रे तथाहि शौनकः संध्ययोश्च वदिर्यमात् आसीनो वाग्यतः शुचिः प्रणवेन परं ब्रह्म
ध्यायीत ब्रह्मविद्धृदि ब्रह्मविन्मात्रकस्यापि नास्यैवात्राधिकारिता ब्रह्मवित्तम एवात्र प्रणवे धिक्रियेत वैन केवल
म ब्रह्मविदो प्रणवेन निर्गुणध्यानेनधिकारः किंतु योसंभावनाविपरीतभावनयोरनिहत्यामंदश्रवणमननाभ्यासे
न शिथिलब्रह्मप्रत्ययस्तस्य शिथिलब्रह्मविन्मात्रकस्यापि नास्त्येव तादृग्ध्याने धिकारः अपितु ब्रह्मवित्तमस्यैवा १८६
विगलितसकलासंभावनाविपरीतभावनाभ्यां सुनिश्चितब्रह्मतात्त्वस्यैवात एव निदिध्यासनमुच्यते यश्चैवं
भूतो न भवति पूर्वोक्तप्रकारचतुष्टयेन प्रणवमभ्यसेन् सो पि यथायोग्यं शुद्धिं संपाद्य तत्र सगुणप्रणवो – सका॰

स्य चतुर्थविद्याधिकृतस्य प्रणवेन ध्यानेधिकारसंपादकमाह स एव वेदांतोपनिषत्तत्वब्रह्म जपेद्याधिदैवि॰
कं अन्यानि च पवित्राणि मुनिदृष्टानि शक्तितः अभ्यस्याब्दत्रयं जप्यं शुद्धिकामो जितेंद्रियः संयम्येंद्रियग्रामं ततः
प्रणवमभ्यसेत अधिदैविकं शतरुद्रीयादि अभ्यासं न वे अन्यानि पावित्राणि शुद्धिरत्र प्रणवजययोग्यता निहिता त
थानेन महंति शुद्धात्मा प्रणवं केवलं द्विजः नातः परतरं ब्रह्म नाशुद्धैरिह लभ्यते अप्यष्टजपमभ्यस्य ततः प्रणवम
भ्यसेत् अशुद्धात्माभ्यसेन्नैनं प्रत्यवैति न संशयः कर्मानर्हश्चिविर्यद्वन्नवेदं समुदाहरेत नाभ्यसेत्प्रणवं तद्वत
अपि शुद्धतरो द्विजः स्वतो वेदाभ्यासादि संपादितशुद्धिं द्विजं प्रत्याह अयमर्थः इति विपक्षे बाधकमाह अशुद्धात्मेति ए
तमेवार्थं दृष्टांतेन द्रढयति कर्मानर्हेति कर्मानर्हः आशौचादिना शुद्धतरोपि अकृतमहापातकः कृतस्नानोपि
प्रणवं नाभ्यसेत गायत्र्यादिजपाजितशुद्धिविशेषाभावेन प्रणवं प्रत्यशुद्धस्थानीयत्वात् तथा अशुद्धात्मनुरशुद्ध
स्वयात्यधोगतिमभ्यसन् ब्रह्मचर्यं तपः शुद्धा नित्यमेकांतशीलता विषयेषु स्पृहास्तेयं सर्वभूतदयालुता क्षमा
धृतिः शुचित्वं च निरोधो मनसः स्वयं एतैरूपायैः संयुक्तः स्वतः प्रणवमभ्यसेत ब्रह्मचर्यं ब्रह्मचर्यादि एतेषां योगा
त्वस्योक्तत्वेपि फलार्थतयेह प्रणवांगत्वेन पुनर्विधानं तदेवं त्रिविधोपि कारी दर्शितः यस्तावदुत्तमः तस्य तु गाय
त्र्यादिजपनिरपेक्षस्यैवाधिकारः मध्यमो ब्रह्मविन्मात्रकः सगुणप्रणवोपासकः स प्रणवादिजपात् पूर्वं गायत्र्या

Indira Gandhi National Centre for the Arts

॥मो०१७०॥ आदित्यादिसंख्याजपपूतोभिक्षियते प्राणैः अस्मादपियोह्यीनोजपमात्रपरःशब्दमात्रध्वनिपरश्चतौ अवंगाय
आधश्चाधन्यासाद्यकाररोगो स्यातामितिविवेकः एवमक्षिकारेणाधिकारसंपत्तिंकृत्वाअकारः चिंतनीयः तदा
१२८१ हशौनकः मनः सर्वत्रसंगृह्य अकारं तत्रचिंतयेत् ध्यायेच्चसततंप्राज्ञ ओंकारंपरमेष्ठिनंचिंतनंविषयावज्ञासंकी
र्णं तदसंकीर्णप्रत्ययप्रवाहो ध्यानं तेनचिंतयेत् ध्यायेच्चेति नपुनरुक्तता उक्तं चेश्वरगीतासु देशावस्थितिमालं
ब्य बुद्धेर्यावृत्तिसंततिः हत्पंतरैरसंसृष्टा तद्ध्यानं सूरयो विदुरिति ध्यानप्रकारमाह शौनकः आदित्यमंडलं दिव्यं
रश्मिजालसमाकुलं तस्यमध्यगतोवह्निः प्रज्वलद्दीपवर्त्तिवत् एवंहृदयकमलमध्यवर्तिनीयं पद्मंचेदं ध्येयं
धर्मकंदसमुद्भूतंज्ञाननालंसुशोभनं ऐश्वर्याष्टदलंश्वेतंपरवैराग्यकर्णिकं तथाचिंतयित्वानुपूर्वोक्तं हृदयेपद्म
मुत्तमं आत्मानमथकर्त्तारंतत्रसूर्यसमप्रभं मध्येवह्निशिखाकारंपुरुषंपंचविंशकं चिंतयेत्परमात्मानंतन्मध्ये
गगनंपरं ओंकारबोधितंतत्त्वंशाश्वतंशिवमच्युतं अनंतेप्रकृतौलीनंपरंज्योतिरनुत्तमं तदंतः परमंतत्त्वमात्माधारं
निरंजनं ध्यायीत तन्मयोनित्यमेकरूपंमहेश्वरमितीश्वरगीतायां शौनकस्त्वाह अकारेणोन्मुखंपद्ममुकारेण तु १२८१
निबध्यते मकाराल्लिप्यते नालं मोक्षस्तस्यतु कर्णिका ज्ञानं तु केसरं तस्यनालं वैराग्यमुत्तमं वर्त्तुलं तु रवेर्बिंबं चतुष्को
णं कलावतः त्रिकोणमग्निर्बिंबं तु अधरं चितयेदितत उपरिस्थार्द्धमात्रा तु पद्मस्य सूक्ष्मनिमात्रिरवासुषुम्नादि
रजानाडी सूर्यात्रिनिर्यमूर्द्धनि वरदा सर्वभूतानां सर्वंव्याप्यावतिष्ठते अकारेणोच्चारितेन हृदयपद्मं स्वभावा
दधोमुखं तदूर्ध्वमुखं विचिंत्य उकारेणाभिधते विकास्यते मनसा ततो मकारान्नानेरधोरजतकुशलेकूर्माकार
कंद इति तं नालं पद्मस्य श्लिष्यते भावनयैव संबध्यते तस्यकर्णिकामोक्षस्तत्केसराणि ज्ञानं नालंवैराग्यमिति
भावयेत् एतच्चिंतनानंतरं चिंतनीयांतरमाह वर्त्तुलमिति विकसितकमलस्योपरिरवेर्बिंबं विचिंत्य तस्याप्यु
परिष्टात् कलावतश्चतुष्कोणं तस्याप्युपरित्रिकोणमग्निबिंबमवस्थितं एतद्बिंबत्रयंप्रणवस्याक्षरत्रयमि
ति भावयेत् ततः सुषुम्नानाडी मृणालतंतुधवला रजोरहिता सूर्यमंडलान्मयूखवत् निर्गत्य मूर्द्धानं निर्भि
द्यातं रागतस्य बिंबत्रयस्योपरि आस्था यद्भूतानां विंतितावरदा देवी सर्वप्राणिजातं व्याप्यावतिष्ठते सा प्रणव
स्य नादास्यार्द्धमात्रेति चिंतयेत् एवं मात्रारूपं ध्यात्वा प्राणायामः कर्त्तव्य इत्याह स एव स्मात्राद्वादशायोगेन प
णवेन शनैः शनैः पूरयेत्सर्वमात्मानं मंतर्हरिं निरुध्य वै मात्राः प्राणायामाव — लकालपरिमाणविशेषाः योगो
प्रणादिध्यानं शनैर्बाह्यवायुमाकृष्य वामनाड्या सर्वच्छिद्राणि निरुध्य सर्वमात्मानं देहं पूरयेत्स्वधमोधा
रितेन यावद्द्वादशमात्रा भवंति एष पूरकसंज्ञितः प्राणायामः अनेन रेचककुंभकावप्युपलक्षितौ योग याज्ञव
ल्क्ये नैतत्पुपंचितं सव्यं गुलिमोक्षावितं यञ्जान्वोर्वपरिमार्जनमथापितलेच्च यमवितद्वामात्रा संज्ञा प्रश्न संति

Indira Gandhi National Centre for the Arts

॥मोक्षप्र०॥ वाह्यस्थितं वा मयुटेन वायुमाकृष्य तेनैव शनैः समस्तं नाड्यस्य सर्वाः प्रतिपूरयीत स पूरको नाम महानिरोधः
॥१८८॥ न रेचको नैव च पूरको यं नासाग्रमध्ये स्थित एव वायुः स निश्चलं धास्यति क्रमेण कुंभं तं स्वंमेनं प्रवदंति तज्ज्ञाः नि
ष्क्राम्य नासाविवरादशेषं प्राणं बहिः शून्यमिवानलेन निरुध्य संतिष्ठति चोर्ध्ववायुः स रेचको नाम महानिरोधः
नीलोत्पलदलश्यामं नाभिमध्ये प्रतिष्ठितं चतुर्भुजं महात्मानं पूरकेण निचिंतयेत् कुंभकेन हृदि स्थाने ध्या
येत् कमलासनं ब्रह्माणं रक्तगौरांगं चतुर्वक्त्रं पितामहं रेचकेनेश्वरं विद्याल्ललाटस्थं महेश्वरं शुद्धस्फटि
कसंकाशं निर्मलं पापनाशनमिति तथेश्वरगीतासु प्राणः स्वदेहजो वायुरायामस्तन्निरोधनं उत्तमाधममा
ध्यत्वात् त्रिधायं प्रतिपादितः मात्राद्वादशको मंदश्चतुर्विंशतिमात्रकः मध्यमः प्राणसंरोधः षट्त्रिंशन्मात्र उत्तम
इति यथाशक्ति प्राणायामत्रयं प्रणवेन कुर्यात् तदाह नागदत्तः मत्कुमारः प्राणायामत्रयं कुर्यात् प्रणवेन स
माहितः षट्त्रिंशदस्य सेत्संत्रं वामेनापूरितोदरः प्राणायामः स विज्ञेयो यावत्प्राणस्य वा वृत्तिः रेचकं दक्षिणे
नोक्तं पूरकं वामतश्चरेत् जपारं नेतु विज्ञेयो विपरीत स्तु संस्थिताविति संस्थितो समाप्तौ जपस्य विपरीतो ।१८८।
दक्षिणेन पूरको वामेन रेचक इत्यर्थः मात्रानामन्याह प्राणायामस्य शौनकः नामानि घोषिणी पूर्वा विद्युन्
माला वतंसिनी वीयुवेगा च सौमीषि वैष्णवी चैव शंकरी नवमी महती नाम ध्रुवा मौलीत थैव च वाली च द्वा

दशी मात्रा मात्रानामानि निर्दिशेत् अथ प्रणवोपासकोपस्यां मात्रायामुदितेन चिह्नेन यत्पदमाप्नोति तदाह स
एव प्रथमायां तु मात्रायामृषि संजायते यदि राजैव ज्ञारते वर्षे सार्वभौमः प्रजायते द्वितीयादिषु विज्ञेयं गंधर्वा
दियदंतथा तथैवाते परं यायाद्वारयाब्रह्मशाश्वतं प्रथमायां घोषिण्यां मात्रायामुत्क्रांति स ऋषिर्भवेत् प्रणवो यदि पि
पीलिकागतिस्पर्शानुभवेन चिह्नेन संजायते तदानंतरजन्मनि भारते वर्षे सार्वभौमः प्रजायेत एवं सर्वत्र प्राणा
यामं मात्रानामान्युक्त्वा प्रणवमात्रानामान्याह स एव एकमात्रं द्विमात्रं वा त्रिमात्रं क्रमभेव वदस्त्वं दीर्घं प्लुतं शांतं शां
तं तन मनसा भवेत् मनसैवं विधमुपास्यं भवेदित्यर्थः आग्नेयी चाथ वायवी चैव नवानीमारु तिश्च ताः प्राणायामानंतरम
नुष्ठेयं न्यासं प्रशंसापूर्वकं विधत्ते एवं विदित्वैवोंकारं न्यासादीनि समाचरेत् येनैवं न्यास मात्रेण ब्रह्मभूयो भवेन्मु
नि ब्रह्मभूयो भवेद्ब्रह्मरूपो भवेत् न्यासाकरणे दोषमाह एवं कर्मणि न्यासहीनस्य हं त्यर्थं हि राक्षसाः प्रणवे
न स्वकं देहमेकीकृत्य ततो न्यसेत् प्रणवेन सहात्मानं देहं प्रणव मुच्चार्य देहं हस्ताभ्यां परामृश्य प्रणवीयमिति भा
वनयैकीकृत्येत्यर्थः न्यासप्रकारं कथयते प्रेणवामृष्यपातिः सम्यगुलिषु च पर्वसु अंगुष्ठादिकनिष्ठांतं मूलमध्या
तयोर्न्यसेत् आदौ प्रणवेन परिमृदितपाणिकमलः सम्यक् पश्चात् पर्वसु मात्रा न्यसेत् अंगुलीषु क्रमोंकारं त
त्वन्यासकर्म अंगुष्ठादिकनिष्ठांतं करद्वये अकारं प्रथमे पर्वण्युकारं मध्यमे तथा मकारं तथैवांते सर्वसर्वसु वि

i National
Centre for the Arts

मो॰क्ष॰७०॥ न्यसेत् करांगुलिन्यासानंतरं कर्तव्यं न्यासमाह प्रथमं करयोर्न्यस्य न्यसेद्देहं शनैः शनैः अकारं विन्यसेन्नाभौ स
त्वरूपं निरंजनं उकारं हृदये तद्वज्जीवरूपं चलं कुलं मकारं विन्यसेन्मूर्ध्नि स्तिमितं तु तमोगुणं ब्रह्मविग्रहमोंकारं दे
॥२८७॥ हे कं न्यासवत्स्मरेत् निरंजनं निर्लेपावलं द्वुलं च इति स्कन्दावं देहे कं न्यासवदिति प्रागुक्त प्रणवदेहे कन्यासवत्स
वर्गेषु विन्यस्य स्मरेत् तदुक्तं सनत्कुमारेण मकारं मूर्ध्नि विन्यस्य सर्वसर्वत्र विन्यसेदिति अस्यानंतरं कर्तव्यमाह ।
स्वदेहं प्रणवं ध्यायेद्विद्युत्सौदामिनीप्रभं देहं नारायणं साक्षात् ज्ञात्वा सत्कृत्य पूजयेत् हृत्पद्मे च स्वमात्मानं प्रणवं न्य
स्य पूजयेत् प्रणवेन स्वकं देहमेकीकृत्य अत्र स्वके देहे प्रणवदृष्टिर्विहिता सप्रतिप्रणवे पूजनीयनारायणविग्र
हरूपे स्वविग्रहत्वबुद्धिर्विधीयते प्रणवः स्तंवि विद्युत्सौदामिनीप्रभं नारायणविग्रहस्वरूपेण स्थितं स्वदेहं चिंतयेत्
एवं नारायणदेहं ध्यात्वा सत्कारपूर्वकं पञ्चदैर्नाविनामपैर्वा गंधकुसुमादिभिः पूजयित्वा तस्मिन् प्रणवे हृत्पद्म
ध्ये स्वमात्मानं विन्यस्य निक्षिप्य मनसा परमात्मरूपेण पूजयेद्भावयेदित्यर्थः अत ऊर्ध्वं कर्तव्यमाह पश्चाद्देहे तथा दे
वे करन्यासं तु विन्यसेत् प्रणवेन हृदंभोजमर्घ्यं कृत्य विकास्य च पूजयेत्परमात्मानं आत्मानं तदभेदतः सर्वं वि ॥२८८॥
श्वं जगत्सर्वं यल्लेशं यन्मयं प्रजः पश्यतीदं तदात्मानं पूजयेद्धि मुमुक्षुघं यथा मानुषे देहे प्रोक्तो न्यासस्तथा देवे
नावतावितैर्देवदेहे कृतकरन्यासं विनाप्येषं न्यसेत् हृदयं च शिरश्चैव शिखा कवचमस्त्रकं ततः प्रणवेन हृदंभोज

गृहीते नैव विकास्य तत्र स्थितं परमात्मानमात्मना सह तदभेदतस्तस्याभेदेन पूजयेत् इदं जगत्सर्वं सर्वास्ववस्थासु
वर्तमानं यल्लेशं प्रोवा नेतापरपितातंर्पाम्य स्येतिः यन्मयं यद्विकारं यतश्चेनिश्चपदात्मकं च तज्जगत्सोऽहमित्यन्योन्या
वादात्मानं विष्णुं पूजयेदिति एवंविधध्यानानंतरं तारं देहे तथा देवे न्यस्यांगानि च विन्यसेत् हृदयं च शिरश्चैव शिखा
कवचमस्त्रकं एवं तारं मानुषदेहे न्यसेत् अग्निवायुसूर्यब्रह्मसत्यज्ञाद्वै रुच्चारितैर्नरदीनि युक्तानि कृत्वा अग्न्यादि
ज्ञाब्दे न्यः परमात्मने ज्ञाहमुच्चारयेत् ते च हृदयादिक्रमेणास्त्रं --- पीतीसुवर्णवर्णं विद्युत्निभं वर्णं तीवेदितव्यं अंते
नास्त्रमंत्रेण दिक्षु विदिक्षु विन्यसेत् आत्मने कृष्टाद्धृदयादिज्ञाद्यः स्वतुर्ष्यंताः प्रपो कृत्वा स्तोन्यो विपरंतम आदिज्ञाब्दा
: पश्चाद्भगवान् सनत्कुमारः भूरग्न्यात्मन इत्युक्ता हृदयाय नमः परं भुवः प्रजापतेरात्मन शिरसे स्वाहा इत्यपि स्वः सू
र्यात्मन इत्युक्ता शिखायै वौषडित्यपि सोमात्मने तथा सो- विज्ञेयो त्रिविध्यायते भूर्भुवः स्वर्ब्रह्मात्मने कवचाय हुमित्यपि
पि सत्यात्मने तथास्त्राय फडित्यपि योजयेत् एवं न्यस्य स्वके देहे दिग्बंधं परिविन्यसेत् व्याहृतिचितयेणैव सर्वदिक्षु
विज्ञेयतः संस्फोटं परितः कृत्वा जपं कुर्यात् ततः शनैः न्यासे करांगुलिनियममाह स एव त्र- णं हृदयादीनां न्यासो दक्षि
णपाणिनाह्न पोरु कृकपोर्ह्निया कवास्त्रकं योस्तथा अंगुष्ठवर्जमंगुल्यश्च तत्सोत्व दिमूर्ध्नि च शिखायामंगुष्ठेरेव स्यादं
गुष्ठकृतनालिक सर्वांगुलयश्च नानेः पाल्पोः कवचं बध्ने अंगुष्ठतर्जन्यग्रान्यां तत्स्तपोश्च संज्ञाद्वयोः हृदयादि च प

Indira Gandhi National
Centre for the Arts

॥ मो० द्व० प०॥ न्यासोदक्षिणपाणिनाकर्तव्यः कवचास्त्रयोर्न्यासोहान्योंकरस्याप्युच्यते — दिमूर्ध्निविन्यासेक्षिप्रमालेत्र्यंगुष्ठवर्त्तिताश्च
तस्त्रोंगुलयोनिपीड्याः शिखायामंगुष्ठेनहृतानामिकाश्च स्येत्पंगुष्ठहृतनामिकोमुष्टरेवस्यात्तद्द्वयोपायोसर्वागु
।१९७। लयः कवचबंधनेस्कंधपुलादारत्पनाभिपर्यंतमभिमर्शनायस्युर्द्वयोरपिहस्तयोरंगुष्ठतर्जन्यग्रात्पांशांबंदंकुर्यात्
पाणिशोधदस्त्रन्यासइतिशेषः इत्यंगुलिव्यवस्था न्यासप्रभावमाह ननेघः सर्वभूतेभ्योन्यसेद्यः कवचंत्विदं हक्षांवि
म्पतिसत्वानिशांतिमाप्नोतितं प्रतिश्रमयंसर्वर्वस्ततेभ्यः सदान्यस्तवतेजवेत श्रंतकालेपिचानेनन्यस्तोमुक्तोभवि
ष्यति तथासनत्कुमारकल्पेप्यभिहितं अनेपंब्रह्मदंडेष्वकालदंडेनापिब्रैवस्मणोस्वेस्मदान्येबावज्राधैरायुधैरपि
नस्पंतिसर्वरक्षांसिभूतपैशाचिकादयः ब्राह्मणकवचेनैववक्ष्ये ष्टपरवतेराजानः क्रोधभूताश्चतंदृष्ट्वा पुरतः स्थि
तंसहसाशांतिमायांतितंवैवप्रणमंति — वौरव्याघ्रातथासर्पाएवान्येभूतहिंसकाः ते सर्वेशांतिमाप्नोतिदृष्ट्वाविष्णुनि
वारवतदेति एवंकृतेन्यासेकर्तव्यंतदाह एवंन्यासजपंकुर्यात्सागंपंचंशतत्ववित तथोवा — तहोमादौध्यानेप्यचा
विशोधतः कुशहस्तकुशासीनः कुशावंधैर्युपेतवुधः व्रतपतोजपंकोटिं पूर्वसेवांवसंस्ततः पूर्वसेवापुरश्चरणंमंत्र ।१९८।
सिद्धिद्वारेलौकिकामुष्मिकफलप्राप्तियोग्यतापैचपूर्ववत्प्रमाणव्रतपरोभूत्वाकोटिंजपेत् यतः सनत्कुमारेणैवा
भिहितं कुशावंधैर्जपंकुर्यात्पंचविंशतिभिर्बुधः कुशावंधैः पंचविंशतिकुशाग्रैः ग्रथिभिः चिरायांपौर्णमास्यांमतिसो

राजीरुपोषितः आरभेतजपंचक्षुनन्मुखंसंवत्सरस्यतु लक्षाणांतुशतंपूर्णंनैपतामिवतेंद्रियः पद्मपलाशसमिधै
र्लक्षं — त्वाघृतप्लुतैः पौरः श्चरणकंसर्वंकृतंभवतिनारद व्रतपुक्तोजपेदिस्ठक्तंतानिवृतानिकथयति वतिर्यामाकु
टीवत्वापलाशकुशासंनवी कुशयज्ञोपवीतीस्यात्कुशचैलः कुशासनः कुशहस्तः कुशशायी कुशावंधाद्यसूत्रवान्
शाकमूलफलक्षीरभिक्षान्नकोटिमभ्यसेत् पुरश्चरणप्रभावमाह गतातिसर्वतीर्थानितेनलोकेक्षणेनवैअधीताः
सकलावेदाः सर्वमंत्राः फलंतितिच यथोक्तकरणंसर्वाकामानाप्नोतिवैद्विजः चीर्णपुरश्चरणस्यब्रह्मचारिणोस्ख
लितब्रह्मचर्यनिर्वाहार्थंविशोधविधत्ते पापसेनाथचरुणाकृत्वाचाष्टसहस्रकं अल्पदोषैः प्रमुच्येतसहस्रेणाभिमंत्रि
तेब्रह्मचर्यमविच्छिन्नंभवेत्स्वप्नसंज्ञपः वनितानांसहस्रैरत्यर्थमभिमंत्रितेपिब्रह्मचर्यमविच्छिन्नंभवेदेवेदित्यर्थः
इदंतुपुरश्चरणंफलकामस्यैवननिष्कामस्य यतः सनत्कुमारेणैवमभिहितंतनिष्कामानांनचेष्यतइति अथेदानीमों
कारविशेषाधेतिकर्तव्यतांभूतस्योंकारनामसमाराणस्यसिद्धयेनामान्यनुकीर्त्तयतिशौनक श्रंकारः प्रणवोनंतस्ता
रः शुक्लश्चवैष्णतः उदीथः प्रलयीविंदुः सर्वव्यापीप्रकाशकः ब्रह्मादित्योध्दयः स्तन्मोहंसः सर्ववेदुः परः तुरीयमद्दो
रंसत्यमेकः प्राणोरसस्वरादः नामान्येतानिमुख्यानिगौणानिप्रणवस्यतु नास्त्रेषुपरिगीतानिध्यानादावस्यवित
येत अर्थतानार्थनिर्वचनंक्रमेणहसएवयदवत्यखिलंलोकंप्राणदीत्यच्युतात्मना पद्याप्नोतिजगद्विश्वंतेनोमि

...ndhi National
Centre for the Arts

॥मोक्षप्र०॥ त्कपदिश्यते प्रणमंति ह्यमुं वेदाः स्तस्मात्प्रणव उच्यते वेदास्त्रिदेवताः सर्वाः प्राणो देहं ववयं प्रणामयति तेनैव प्र
णवः परिगद्यते प्रलीतियत्परात्मानं वो धं वाप्रापयेन्नरं प्रणयेद्धा परंधामप्रणवस्तेन कीर्त्यते अनंतं न पतः स्थानं
।१८७। येनास्यांतो न लक्ष्यते पितृदेवमनुष्याद्यैरनंतः स्तेन संज्ञितः सर्वदुःखसमुत्थानात घोरात्संसारसागरात् चिंतितः
स्तारयत्येव तारस्तेन प्रकीर्तितः वर्णितवनदेखुक्लः श्रुक्लं च नयते पदं त्रिविधं त्रिणोधमे सापं तेन शुक्ल इति स्मृतः कवीनां
ध्येप्रदीपं प्रज्योतिराविः करोत्ययं विद्योतात्तेत मो नित्वा वैद्युतस्तेन कीर्त्यते ऊर्ध्वं गायति प्राणान्कुर्ध्वं वा कुरुते गतिं
ओमित्कृयते येन तेनोद्गीथः प्रगीयते प्रविलापयति प्राणान्सरुद्र इत्यारितो यतः किल्बिषं वाखिलं पुंसप्रलयशो
ष्यते ततः वैवेष्टि वाऽप्यंद्ध त्मेये न कर्माणि देवताः तेन विष्णुरिति ख्यातो विज्ञातीत्य प्रवाजगत वेवेष्टि व्याप्नोति त्रि
रीरं च तथा विश्वं विधास्थानानि सर्वशः व्याप्य संतिष्ठते यस्मात्सर्वव्यापी ततः स्मृतः यस्मादयं सुमानो यं योगितां
ब्रह्मणा श्वतं प्रकाशयति तत्वेन तस्मात्प्रोक्तः प्रकाशकः बृहत्वात बृंहणाच्चैव ब्रह्मणः प्रतिपादनात् बृहती प्रकृति
त्वाद्ब्रह्मेति परिगद्यते बृहती अनवच्छिन्न ब्रह्मरूपा प्रकृतिरुपादानकारणमस्येति बृहती प्रकृतिः अन्यादि ।१८७।
त्यात्मनादानाद् सादेरादिना वतः आप्तत्वाच्चैव सर्वस्मिन्नादित्य इति कथ्यते व्याप्तं गतेतु स सर्वस्मिन्यतो नश्यते
स्वयं उच्चार्यमाणो वा द्याणिनिप्रस्य त्वहृदयस्ततः निर्विघ्नागं प्रत्यांतं प्रह्लुस्तेजो निरंतरं तदेवास्य परं रूपमिति

मृत्स्नः प्रनाप्यते प्राणादित्यात्मनात्मानात्ममोहंन्निप्रतोऽथ वहित्वात्मोन्नासप्रति ब्रह्मर्हंस इति स्मृतः विद्धि स्वर्पं विरिंचा
यत्सनकाद्याश्च योगिनः योगैश्वर्यमनेनाप्तुस्तेन सर्वर्द्धिवुस्मृतः प्रणत्क चारितः प्राणत्प्रतीको वा परात्मनः प्रापयेत
मसः पारं यत्तेन पर उच्यते ह्यणति प्रतिपालयति आयं जपारितं स्वप्नं सुषुप्तं च तुरीयकं यतः सुषुप्तिं व्याप्नोति ततुरीयक
थ्यते ततः क्षरतीति क्षरं प्रोक्तमक्षरो न्यदतोऽन्यथा अश्नोतीति जगत्कृत्स्नमथ वाक्षर उच्यते क्षरति वलतिक्षरं तदन्यथा रूप
मचलं प्रत्तदक्षरं सर्वगतत्वेनोंकाररूपं महदादिविशेषेषु घटादिष्विव मृत्तिका सु सम्यक् तायते तेन सत्यमित्यभिधाप
ते तापं ते अनुवर्त्तते सच्चत्यच्चेति वा सत्यं कार्यकारणमप्यतः प्रत्यक्षं च परोक्षं वपद्धा सत्यमिती रितं कार्यकारणमपो
तिसत्यदोरर्थकथनं सच्छब्देन कारणं त्यच्छब्देन कार्यं एतदेव तैत्तिरीय श्रुतिराह तत्सृष्ट्वा तदेवानुप्राविशत्तदनुप्र
विश्य सच्च त्यच्चाभवन्निरुक्तं चानिरुक्तं च निलयनं चानिलयनं च विज्ञानं चाविज्ञानं च सत्यं चानृतं च सत्यमभवद्यदि
दं किंच तत्सत्यमित्याचक्षत इति संमद्य सकलान्लोकान्प्रलये ब्रह्मविग्रहः सृजते सर्गकाले च यदेकः स्तेन गद्यते अ
ध्यात्मप्राणरूपोयं आदित्यात्माधिदैवतः प्राणयत्यखिलं लोकं प्राणस्तेनाभिधीयते प्राणयति जीवयति लोकवेदयपी
विद्याव्याहृतिभिः स्वयं चुवा प्राद्वत्पीडितात्स्योपपन्नो नोंकारो रसः स्मृतः यथा लाजादिमधुना संयुक्तं सरसं भवेत
तथोंकाररसोपेत सरसं स्यात्तगत्रयं पश्चामधुसमासाद्य भृंगो भवति निर्वृतः तथोंकाररससंयोगी स्याद्दास्वाद्यमिर्वि

Indira Gandhi National Centre for the Arts

॥मोक्ष१०॥

१९७२

र्हृतिः स्वयंपद्धीयर्ति तेमं स्वैर्सर्वास्वर्यतितथा उपस्थातुः स्वरूपंचतारस्तेनस्वरः स्मतः स्वरंपापंतदनेनदीर्यतिय स्मातेन
तारओंकारस्वरः एताम्येवओंकारनामानिकश्चितकतिपयनामहीतानिकतिपयनामाधिकानिसनिर्वचनान्पर्घर्वशिर
स्पधीयंतोयओंकारः सप्रणवस्ससर्वव्यापीयः सर्वव्यापीसोनंतोयोनंतस्तत्तारंयत्तारंतत्सूक्ष्मंयत्सूक्ष्मंतत्शुक्लंयच्छुक्लं
ततवैद्युतं तत्परंब्रह्मेतिसएकोरुद्रः सईशानः सएकोभगवान्विष्णुः सविष्णुःअथकस्माडुच्यतओंकारोयस्माडुचार्य
माणएवसर्वशरीरमूर्ध्वमु— मपसत—कारअथकस्माड्च्यतेप्रणवोपस्माडुचार्यमाणएवऋचोयजूंषिसामान्य
थर्वांगिरसश्चयज्ञोब्रह्मब्रह्मणेभ्यःप्रीणयतितस्माडुव्यतेप्रणवःअथकस्माडुव्यतेसर्वव्यापीयःसर्वांलोकान्व्या
प्नोतिस्नेहोपयथापललपिंडंसांतमूलमोतप्रोतमनुप्राप्यमतिरिक्तस्तस्माडुव्यतेसर्वव्यापीअथकस्माडुच्यतेनंतोयः
स्माडुचार्यमाणएवआद्यंतंनोपलभ्यतेतिर्यगूर्ध्वमधस्तात्तस्माडुच्यतेनंतःअथकस्माडुव्यतेतारंयस्माडुचार्यमाण
एवगर्भजन्मजरामरणसंसारमहद्भयात्तारयतितस्माडुव्यतेतारंअथकस्माडुच्यतेसूक्ष्मंयस्माडुचार्यमाणएवसू १९७२
क्ष्मोभूत्वापरशरीराण्यधितिष्ठतितस्माडुच्यतेसूक्ष्मंअथकस्माडुच्यतेशुक्लंयस्माडुचार्यमाणएवक्लंदतेतस्माडुच्य
तेशुक्लंअथकस्माडुच्यतेवैद्युतंयस्माडुचार्यमाणएवातिमहतितमसिसर्वशरीरेविद्युदिवद्योतयतितस्माडुच्यते
वैद्युतंअथकस्माडुच्यतेपरंब्रह्मयस्माडुचार्यमाणएवबृहद्बृंहयतितस्माडुच्यतेपरंब्रह्मअथकस्माडुच्यतेएकोवि

श्वएकएवनद्वितीयःपतस्थुःतुरीयमिमलोकइशानीयुर्जनतीयुःप्रसंजनास्तिष्ठतिसंवुकोवात कालेसत्जप्सोयान्युवना
निगोप्तातस्माडुच्यतएकोविष्णुः अथकस्माडुच्यतईशानोयः सर्वांल्लोकानीशतेइयनीभिर्जननीभिःपरमशक्तिभि
ःअनित्वाशूरनोनुमोडगमहाइवधेनवःइशानमस्यजगतःस्वर्दृशमीशानमिंद्रतस्थुष त स्माडुच्यतईशानःअथक
स्माडुव्यतेभार्गवःयःसर्वान्भावानीक्षत्यात्मज्ञानयोगैश्वर्यनारीक्षमियतस्माडुच्यतेभार्गवःअथकस्माडुच्यतेमहेश्व
रोयःसंर्वाल्लोकानगृह्णातिविसृजतिवासपतितस्माडुच्यतेमहेश्वरःअथकस्माडुच्यतेमाहादेवोयःसर्वान्भावाप
रित्यज्यात्मज्ञानयोगैश्वर्येमहतिमहीयतेतस्माडुच्यतेमाहादेवःतथाथर्वशिखायांसउच्चारितमात्रऊर्ध्वंनामयतीत्यों
कारःएषहेप्राणान्सर्वानूर्ध्वमुत्क्रामयतिसोंकारःप्राणान्सर्वान्प्रलीयतइतिप्रणवःप्राणान्सर्वान्परमात्मनि
प्रणामयतीतिप्रणवःसर्वेभ्योदुःखभयेभ्यःसंतारयतीतितारएतस्तारःसर्वेदेवाःअस्मिन्विशंतीतिविष्णुःसर्वाणिबृंहयती
तिब्रह्मअध्यापितयःप्रदीपवत्प्रकाशतीतिप्रकाशःप्रकाशोस्यइति नामनिर्वचनस्मरणमंतरंबिंतनीयांतरंबाह्रस्त
तिंतत्वमृषिछंदोदेवताविनियोजनं गोत्रंक्षेत्रंस्वरंवर्णंव्याप्तंजन्मतथालयंशक्तिन्यांसंजपंहोममाशोगंपववलंफलंशा
त्वासर्वमनुक्तंचततःप्रणवमभ्यसेत् स्तुतिर्महिमानुकीर्तनं तत्वमंत्रयाप्यार्थ्यऋषिछंदोदेवताविनियोजनानियोग
याज्ञवल्क्येनव्याख्यातानि येनपदविणहृष्टंसिद्धिमाप्नोतियेनवैमंत्रेणतस्यतत्पोक्तमृषेर्भवेत्सदार्षकं छादनाछंद

Indira Gandhi National
Centre for the Arts

॥मोक्ष०॥ उद्दिष्टं वाससी इव चाकृतेः आत्मानं छादितं देवैः कश्चिन्निलीनैस्तैः पुरा आदित्यैर्वसुभी रुद्रैर्मरुद्भिरंगिरसः स्तथा मृत्योः प्र
तिविधातार्थं तेन छंदस्त्वं ततस्ततां यस्य यस्य तु मंत्रस्य उद्दिष्टा देवता तु या तदाकारेण भवेत्तद्देवत्वं देवतोच्यते पुराक
॥१९८॥ ल्पे समुत्पन्ना मंत्राः कर्मार्थमेव च अनेनैव तु कर्तव्यं विनियोगः स उच्यते इति रुक्मं प्रत्यु मंत्रस्य संमुत्पन्नि प्रयोजनं प्रति
ष्ठाच विधाने न ब्राह्मणं तदिहोच्यते एवं पंचविधं योगं जपकाले ह्यनुस्मरन् आर्षं छंदो दैवतं च विनियोगस्तथैव च ब्राह्म
णं च प्रयत्नेन वेदितव्यं विपश्चिता अविदित्वा तु यः कुर्यात् याजनाध्यापनं जपं होमं मंत्रजलादीनि तस्य चाल्पं फलं भवे
त् आपद्यते स्थाणुगर्ते स्वयं वा पिप्रमीयते ऋष्यादिकथयति स एव ऋषिर्ब्रह्मास्य गायत्री दैवी छंदः स्वकीर्त्यते पारंभे
कर्मवेदानां विश्वेदेवास्त्रिमात्रकः जपादौ विशेषां देवानां देवतात्वमथवदति जपस्वाध्यायहोमेषु त्रिमात्रो र्वह्निदैव
तः ब्रह्मज्ञानार्थत्वे तु त्रिमात्रत्वं देवतां वा एव दति अर्धमात्राधिकाज्ञाने परं ब्रह्मवदेवताः अवसने र्धमात्रस्याल्पदा
नित्यक्तियोगतः ज्ञानेब्रह्मध्यानेति स्मृ त्रो मात्रा ज्योधिका अर्धमात्रा यस्य सोर्धमात्रिकः प्रणवस्य तत् ध्येयं ब्रह्मैव दे १९८
वता प्रणवमात्राणामकारादीनां ऋष्यादीन्याह ऋषयो देवता चैव ब्रह्मविष्णुशिवा स्मृताः छंदांसि वास्य वर्णानां गा
यत्र्येष्टु भं जगत अस्योकारस्य वर्णानामकारोकारमकाराणां क्रमेण ब्रह्मविष्णुशिवा ऋषयः स्मृतास्त एव देवाश्च
छंदांसि गायत्र्यैष्टुभं जगदिति अथ विनियोगं ब्रूते प्राणसंयमने मांद्ये पारंभे वेदकर्मणां जपस्वाध्यायहोमेषु ध्याने

च विनियोजनं गोत्रे त्रेरेकथ्यपति लातव्यस्य सगोत्रोयं प्रणवो ब्रह्मपुत्रकः भूर्भुवः स्वस्तथा ब्रह्मक्षेत्रं तस्य विष्णुर्बुधाः
अयं प्रणवो लातव्यस्य ऋषिः सगोत्रः ब्रह्मणो विरिंचेः पुत्रः आदिकल्पादौ पुरुषविग्रहापत्ते ओंकारः संवभूव भूर्भुवः
स्वीरति लोकत्रयं च ब्रह्मक्षेत्रमस्य विष्णुर्बुधा इति अथ समाधिलक्षणमाह भगवान्पतंजलिः तदेवार्थमात्रनिर्भास
स्वरूपशून्यमिव समाधिः ध्यानमेव ध्येयाकारनिर्भासं प्रत्ययात्मकेन स्वरूपेण शून्यमिव यदा भवति ध्येयस्वभावावे
शात्तदा समाधि त्युच्यते ध्येयमात्रगोचरो ध्यानजन्योहृत्ति विशेषः समाधिरित्यर्थः तथा च विष्णुपुराणे तस्यैव कल्प
नाहीनं स्वरूपग्रहणं हि यत् मनसा ध्याननिष्पाद्यः समाधिः सोभिधीयत इति अथ योगिनो आहारादिनियमाः त
त्र मार्कंडेयपुराणे भैक्षं यवागूतक्रं वा पयो यावकमेव वा फलं मूलं विपक्वं वा कणपिण्याकसक्तवः इत्येते च शुभाहा
रा योगिनां सिद्धिकारकाः महाभारते कणानां भक्षणे युक्तः पिण्याकस्य च भक्षणे स्नेहानां वर्जने युक्तो योगी बलमवा
प्नुयात् भुंजानो यावकं भक्ष्यं दीर्घकालमरिंदम एकदा सो विशुद्धात्मा योगी बलमवाप्नुयात् पक्षान्मासानृतून्स्थि
त्वा संचरं श्च गुहांस्तथा अपः पीत्वा पयोमिश्रा योगी बलमवाप्नुयात् वायुपुराणे योगिनां चैव सर्वेषां श्रेष्ठं चांद्रायणं
स्मृतं एकद्वित्रीणि वा त्वा त्रिरात्रिकैर्वा समाचरेत् महाभारते मोक्षधर्मेषु नियतो विगतस्नेहो लघ्वाहारो जितेंद्रियः प्रा
प्नोति ब्रह्मणः स्थानं यत्परं प्रकृतेर्ध्रुवं तथा स्कंद स्कंदे दिव्य ब्रह्मचर्यमुपायं तत्र मे शृणु संप्रहृष्ट मुदीर्णं च निगृह्णीया

Indira Gandhi National Centre for the Arts

॥मोक्षप०॥ याद्द्विजो रजः योषितां न कथाश्चाप्याननिरीक्ष्यानिरतं कथंचिद्दर्शनादासां दुर्बलानामिन्द्रियः रागोत्पत्तौ वरेत
॥१९४॥ कृच्छ्रमकस्मिः प्रविशेद पः मग्नः स्वप्नेच मनसा त्रिर्जपेद घमर्षणं पापमानेनिर्दहत्येवमंतर्गतरजो मयं दुर्बलानजिते
न्द्रियान स्वप्नेव स्त्रीविषयानुरागोत्पत्तौ इत्यर्थ इति कल्पतरौ मार्कंडेयपुराणे शून्येष्वेवावकाशेषु वनेषु च गुहासु
च नित्ययुक्तः सदा योगी ध्यानं सम्यगुपक्रमेत् सत्राव्देग्निजलाभ्यासे जीर्णे गोष्ठे चतुष्पथे शुष्कपर्णचयेनघां शमशाने
ससरीसृपे समये कूपतीरे वा चैत्यवल्मीकसंचये देशेष्वेतेषु तत्त्वज्ञो योगाभ्यासं विवर्जयेत् महाभारते विमुक्तः स
र्वसंगेभ्यो लघ्वाहारो जितेन्द्रियः पूर्वापररात्रेषु धारयेन्मन आत्मनि मार्कंडेयपुराणे नाध्मातः क्षुधितः श्रांतो न च
व्याकुलचेतनः युंजीत योगं राजेन्द्र योगी सिद्ध्यर्थमाहतः नातिशीते न चोष्णे वा द्वंद्वे नाप्यनिलात्मके कालेष्वेतेषु युंजीत
न योगं ध्यानतत्परः दोषानेतानना दृत्य मूढत्वाद्यो युनक्ति वै विघ्नाय तस्य ये दोषा जायंते तान्निबोध म-- यंजतालो
पः स्मृतेर्मूकत्वमंधता ज्वरश्च जायते सद्यः तत्तदज्ञानियोगिनः अथ दोषचिकित्सा तत्र वायुपुराणे तेषां चिकित्सां व
क्ष्यामि दोषाणां च यथाक्रमं यथा ह्यं प्रयांति ते दोषाः पूर्णाया सेमयुष्यिताः स्निग्धां यवागूमत्युष्णां भुक्त्वा तत्रैव धारयेत १९४
अनेन क्रमयोगेन वातगुल्मं प्रणश्यति तदावर्तप्रतीकारमिदं कुर्याच्चिकित्सितं सर्वगात्रप्रकं येन समारब्धस्य यो॰
गिनः इमां चिकित्सां कुर्वीत तथा संपद्यते सुखं मनसा पर्वतं ध्यायो विष्टंभी कृत्य धारयेत उरो वातेरसस्या नेकं ददेशे

वधारयेत वर्यो वाते तथा वाचि बाधिर्ये श्रोत्रयोस्तथा समारब्धस्याक्रांतस्य विष्टंभीकृत्य धारयेत विष्टंभितं कृत्वा प
र्वतं धारयेत मनसा ध्यायेदित्यर्थः मार्कंडेयपुराणे अमानुषं सत्वमंतर्योगिनं प्रविशेद्यदि वाय्वग्निधारणादेनं देह
संस्थं विनिर्दहेत अमानुषं सत्त्वं रक्षः पिशाचादि वायुपुराणे कृष्णसर्पापवाधे नुधारयेद् हृदयोदरे महर्जनस्तपः सत्यं
हृदि कृत्वा नुधारयेत विषस्यनुपलंपीत्वा विशल्यां धारयेत्ततः सर्वतः सनगां पृथ्वीं कृत्वा मनसि धारयेत हृदि कृ
त्वा समुद्रांश्च तथा सर्वांश्च देवताः सहस्रेण घटानां तु युक्तः स्नायीत योगवित् उदकेकुंभमात्रेनुधारणां मूर्ध्नि धार॰
येत प्रतिश्रोणितो प्रविष्टस्कधारयेत्सर्वगात्रिकीं शीर्णकर्पणपुटकैः पिबेद्वल्मीकमृत्तिकां चिकित्सितविधिर्दोषः क्रम
शो योगिनां हितः व्याख्यातस्तु समासेन योगदृष्टेन हेतुना अथ योगविधिः तत्र महाभारते श्रीभगवद्गीताया योगी युं
जीत सततमात्मानं रहसि स्थितः एकाकी यतचित्तात्मा निराशीरपरिग्रहः शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः
नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरं तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः उपविश्यासने युंज्याद्योगमात्मा
विशुद्धये समं कायशिरोग्रीवं धारयन्नचलं स्थिरः संप्रेक्ष्य--सिकाग्रं स्वं दिशश्चानवलोकयन् प्रशांतात्मा विगता
-र्ब्रह्मचारिव्रते स्थितः मनः संयम्य मच्चित्तो युक्त आसीत मत्परः वायुपुराणे ॐकारं प्रथमं कृत्वा वंद्य सूर्यं नगा
स्य च आसनं स्वस्तिकं कृत्वा पद्ममर्द्धासनं तथा समजानुरेकजानुर्वा उत्तानं स्वस्तिको पि वा समो दृढासनो भूत्वा सं

Indira Gandhi National
Centre for the Arts

॥मोक्ष१०॥ हृत्पद्मरक्ता वृषौपाणिभ्यां वृषणौ त्वाघटतथा प्रजननं ततः इन्द्रियाणीन्द्रियार्थेभ्यो मनः पंचैव मारुतान् निगृह्य समवाये
नप्रत्याहारमुपक्रमेत् यस्तु प्रत्याहरेत्कामान् कूर्मोंगानीव सर्वशः तथात्मरतिरेकस्थः पश्यत्यात्मानमात्मना पूरयि
१०५ त्वा समीरं तु स बाह्याभ्यंतरं शुचिः आकंठनाभिपीगेन प्रत्याहारमुपक्रमेत् याज्ञवल्क्यः ऊरुस्थोत्तानचरणः सव्येन्यसेत
रं करं उत्तानं किंचिदुन्नम्य मुखं विष्टभ्य रोचसा निमीलिताक्षः सत्वस्थो दंतैर्दंतानसंस्पृशन् तालुस्थाचलजिह्वश्च
संवृतास्यः सुनिश्चलः संनिरुध्येंद्रियग्रामो नातिनीचोच्छ्रितासनः द्विगुणं त्रिगुणं वापि प्राणायामसमुपक्रमेत् सत्वस्थ
त्काम क्रोधादिरहितः देवलः देवतायतनशून्यागारगिरिकंदरनदीपुलिनगुहारण्यानामन्यतमेशुचौ निर्बाधे विज
के समुपस्तीर्णं नंस माकृत्वा तस्मिन्लब्धाहारो निरामयः शुचिः शिरो ग्रीवापाणिपादौ च समं स्थाप्य शरीरमृजुसमाधा
य शिश्न वृषणौ व पीडयन्नूयत् किंचिदपाश्रित्य स्वस्तिकं भद्रकं मंडलं वाधिष्ठाय नद्यमुखः प्राङ्मुखो वा दंतैर्दंतान् संस्पृ
शन् नासाग्रस्थितदृष्टिः सर्वेंद्रियाणि संहृत्योर्ध्वं प्राणमनुदीर्य मनसा तद्विविंतं ध्यानं माहाभारते भगवान् नात्यश्नतस्तु
योगोस्ति न चैकांतमनश्नतः न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु युक्तस्व १०५
प्नावबोधस्य योगो भवति दुःखहा तथा तदेव मुपशांते न दांतेनैकांतशीलिना आत्मारामेण बुद्धेन योत्या त्मा न सं
शयः दक्षः कषायमोहविक्षेपलय ― कादिवेतसः व्यायाराक्तसमाख्याता स्तेर्हानं वशमानयेत देवासुरमनुष्यै

र्वसिंजेनुनैवशाक्यते चलेन परराशीणि गृह्णन् स्थूरस्तु नोच्यते जितो येनेंद्रियग्रामः सस्थूरः कथ्यते बुधैः महाभारते
श्रीभगवानुवाच संकल्पप्रभवान्कामान् त्यक्त्वा सर्वानशेषतः मनसैवेंद्रियग्रामं विनियम्य समंततः शनैः शनैरुपरमेद्बु
द्ध्या धृतिगृहीतया आत्मसंस्थं मनः कृत्वा न किंचिदपि चिंतयेत् यतो यतो निश्चरति मनश्चंचलमस्थिरं ततस्ततो निय
म्यैतदात्मन्येव वशं नयेत् युंजन्नेवं सदात्मानं योगी विगतकल्मषः सुखेन ब्रह्मसंस्पर्शमत्यंतं सुखमश्नुते सर्वभूत
स्थमात्मानं सर्वभूतानि चात्मनि ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति त―
स्याहं न प्रणश्यामि स च मे न प्रणश्यति मिन प्रणश्यति सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः सर्वथा वर्तमानोपि स यो
गी मयि वर्तते आत्मौपम्येन सर्वत्र समं पश्यति योर्जुनः सुखं वा यदि वा दुःखं स योगी परमो मतः अर्जुन उवाच योयं योग
स्त्वया प्रोक्तः साम्येन मधुसूदन एतस्याहं न पश्यामि चंचलत्वात्स्थितिं ― रो चंचलं हि मनः कृष्ण प्रमाथि बलवद्दृढं त―
स्याहं निग्रहं मन्ये वायोरिव सुदुष्करं श्रीभगवानुवाच असंशयं महाबाहो मनो दुर्निग्रहं चलं अभ्यासेन तु कौंतेय वै
राग्ये ― च गृह्यते असंयतात्मना योगो दुःप्राप इति मे मतिः वश्यात्मना तु यतता शक्यो वाप्तुमुपायतः न प्रणश्यामि न
ति रोभवामि सर्वथा वर्तमानोपि मपि वा पद्धिकारे वा प्रपंचे वा ब्रह्म बुद्ध्या चेत् सार्व वर्तमानो मय्येवासौ वर्तत इत्यर्थः रतिक
ल्पतरुः तथा पिंडीकृत्येंद्रियग्राम ― सीनः काष्ठवन्मुनिः शब्दं न विंदेच्छ्रोत्रेण स्पर्शं चापि न वेदयेत रूपं च वेदेद्धुषा विघ्रा―

Indira Gandhi National Centre for the Arts

॥मोक्षप०॥ जिह्वयाचरसांस्तथा श्रेयांस्यपिचसर्वाणिजह्याद्योगेनयोगवित् पंचवर्गप्रमाथानिनेच्छेच्चैतानिवीर्यवान् ततोमन
सिसंसज्यमंवर्गंविचक्षणः समादध्यान्मनोभ्रांतमिंद्रियार्थैःसपंचभिः निःसंसारिनिरालंबंपंचद्वारंचलाचलं पूर्वे
॥१८६॥ ध्यानपथेधीरः सदादध्यान्मनोंतरं इंद्रियाणिमनश्चैवयदापिंडीकरोत्ययं एषध्यानपथः पूर्वोमयासमनुवर्णितः
तस्यतत्पूर्वसंरुद्धमात्मषष्ठमनोतरं स्फुरिष्यतिसमुद्भ्रांतंविद्युदंबुधरेयथा जलबिंदुर्यथालोलपर्णस्थःसर्वतश्च
लःएवमेवास्यतच्चित्तंभवतिध्यानवर्त्मनि समाहितंक्षणंकिंचिद्ध्यानवर्त्मनितिष्ठति पुनर्वायुपथभ्रांतंमनोभ
वतिवायुवत् अनिर्वेदीगतक्लेशोगततंद्रीरमत्सरः समादध्यात्पुनश्चेतोध्यानेनध्यानयोगवित् विचारश्चवितर्क
श्चविवेकश्चोपजायते मुनेःसमादधानस्यप्रथमंध्यानमात्मनः मनसाक्लिश्यमानस्तुसमाधानंकारयेन्ननिर्वेदंमु
निर्गच्छेत्कुर्यादेवात्मनोहितं स्वयमेवमनश्चैकंपंचवर्गश्च— भारत पूर्वध्यानपथंप्राप्यनित्ययोगेनशाम्यति नत
त्पुरुषकारेणनदैवेनकेनचित् सुखमेष्यतितत्तस्ययदेवंसंयतात्मनः सुखेनतेनसंयुक्तोरंस्यतेध्यान
कर्मणिपिंडीकृत्यप्रत्याहृत्यदक्षः लोकाःवशीकृतायेस्तुतीयमाश्चवशीकृताः इंद्रियार्थाश्चतस्तस्ययोगंवा १८६
द्यात्म्यशोषतः नारण्यसेवनाद्योगोनानेकग्रंथचिंतनात् व्रतैर्यज्ञैस्तपोभिर्वानयोगःकस्यचिद्भवेत् नचैवपद्मा
सनाद्योगोननासाग्रनिरीक्षणात् नचैवशास्त्रातिरिक्तेनशौचेनभवतिकचित् नमौनमंत्रकुहकैरनेकैःसंयु

तैस्तथालौकिकैर्याज्ञिकैर्युक्तस्यनयोगःकस्यचिद्भवेत् अभियोगात्तथाभ्यासात्तस्मिन्नेवविनिश्चयात् पुनःपुन
रनुद्वेगाद्योगःसिध्यतिनान्यथा आत्मचिंताविनोदेनशौचक्रीडनकेनच सर्वसत्वसमत्वेनयोगःसिध्यतिनान्यथा
यस्त्वात्ममिथुनोनित्यमात्मक्रीडस्तथैवच आत्मानंदःसततमात्मन्येवसमाहितः रतश्चैवस्वतुष्टश्चसंतुष्टोना
न्यमानसः आत्मन्येवचतृप्तस्ययोगःसिध्यतिनान्यथा स्वप्नेपियोभियुक्तश्चजाग्रदेवविशेषतः ईदृक्चेष्टःस्मृ
तःश्रेष्ठोवरिष्ठोब्रह्मवादिनां याज्ञवल्क्यः अनन्यविषयंकृत्वामनोबुद्धिस्मृतींद्रियं ध्येयआत्मास्थितोयोसौहृद
येदीपवत्प्रभुः यथाविधानेनपठन्सामगायन्नविच्युतं सावधानस्तथाभ्यासात्परमात्माधिगच्छति अपरांतकदो
यमद्रकंप्रकरीतथा औवेणकंसरोबिंदुमुत्तरंगीतकानिच ऋग्गाथापाणिकादक्षविहिताब्रह्मगीतिकाज्ञेयमेत
तदभ्यासकरणाद्योक्तसंज्ञकं वीणावादनतत्वज्ञःश्रुतिजातिविशारदः तालज्ञश्चाप्रयासेनमोक्षमार्गंनियच्छ
ति गीतज्ञोयदिगीतेननाप्नोतिपरमंपदं रुद्रस्यानुचरोभूत्वातेनैवसहमोदते अपरांतकादोयमद्रप्रकर्योरि
तेणकानिसरविंदुसहितमुत्तरंचेतिएतानिप्रकरणरव्यानिसप्तगीतकानिऋग्गाथाद्याश्चतस्रो— गीतिकाःएत
दपरांतकादिगीतजातंपरमात्मतयाचिंतितं मोक्षसाधनत्वान्मोक्षसंज्ञकंज्ञातव्यंतदभ्यासस्यैकाग्रताप्रतिपा
दनद्वारेणोन्मुक्त्यापत्तिहेतुत्वात् श्रूयतइतिश्रुतिर्द्वाविंशतिधा सप्तसुस्वरेषु तथाहि षड्जमध्यमपंचमाःप्रत्येकं

Indira Gandhi National
Centre for the Arts

॥मो॰ध॰प॰॥ वतुःश्चातयः ऋषजधैवतैः प्रत्येकं त्रिश्रुतीगांधारनिषादौ प्रत्येकं द्विश्रुतीतात यस्तु षड्जातयः शुद्धाः तत्करजा
॥१०७ स्त्विकादन्नौ वमष्टादशविधा गीतज्ञो यदीतिगीतिज्ञो यदि कथंचिद्विघ्नतो योगस्थः सन्मुच्यते तदा रुद्रसचिरं
त्वं लभ्यत इत्यर्थः युक्तलक्षणं तत्र महाभारते युक्तस्य तु महाराज लक्षणान्युपधारयेत् निर्वातस्थ यथा दीपो ज्वा
लास्नेह समन्वितः निश्चलोर्ध्वशिखस्तद्वद्युक्तमाहुर्मनीषिणः पाषाण इव मेघोत्थैर्यथा बिंदुभिराहतः नालं चालयि
तुं शक्यस्तथा युक्तस्य लक्षणं शंखदुंदुभिनिर्घोषविविधैर्गीतवादितैः क्रियमाणैर्नकंपेत युक्तस्यैतन्निदर्शनं
तैलपूर्णं यथापात्रं कराभ्यां धारयन्नरः सोपानमारुहेद्भीतस्तर्ज्यमानोसिपाणिभिः संयतात्मा भयात्तेषां न पात्रा
द्विंदुमुत्सृजेत तथैवोत्तरमाणस्य एकाग्रमनसस्तथा स्थिरत्वादिंद्रियाणां वनिश्चलत्वात्तथैव च एवं युक्तस्य
तु मुनेर्लक्षणान्युपधारयेत स युक्तः पश्यति ब्रह्म परं यत्परमव्ययं महतस्तमसो मध्ये स्थितं ज्वलनसन्निभं एतेन
केवलं याति त्यक्त्वा देहमसाक्षिकं कालेन महता राजन्श्रुतिरेषा सनातनी तथा स्थिरीकृत्येंद्रियग्रामं मनसाभि
प्रेतेश्वर मनो बुद्ध्या स्थिरं कृत्वा पाषाण इव निश्चलः स्थाणुवच्चाप्यकंपः स्यात् —दधिर्वापि निश्चलः —धाविधि १०७
विधानज्ञास्तदा युक्तं प्रचक्षते न शृणोति न चाघ्राति न रस्यति न पश्यति न च स्पर्शं विजानाति न संकल्पयते मनः न
चाभिमन्यते किंचिन्न बुध्यति च काष्ठवत तदा प्रकृतिमापन्नं युक्तमाहुर्मनीषि—ः तथा भगवान् यदा विनियतं चि

त्तमात्मन्येवावतिष्ठते निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा यथा दीपो निवातस्थो नेंगते सोपमा स्मृता योगिनो
यतचित्तस्य युंजतो योगमात्मनः यत्रोपरमते चित्तं निरुद्धं योगसेवया यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति सुख
मात्यंतिकं यत्तद्बुद्धिग्राह्यमतींद्रियं वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः
यस्मिन्स्थितो न दुःखेन गुरुणापि विचाल्यते तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितं स निश्चयेन योक्तव्यो यो
गोनिर्विण्णचेतसा तथा ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेंद्रियः युक्त इत्युच्यते योगी समलोष्टा—कांचनः कू
टस्थो निर्विकार इत्यर्थः अथ संजातब्रह्मसाक्षात्कारस्य ज्ञानिनो लक्षणादीन्युच्यंते तत्र यमेव स्थितप्रज्ञ विदे
हगुणातीत ब्राह्मणातिवर्णाश्रमि भगवद्भक्त शब्दैस्तत्र तत्राभिधीयते स्थितप्रज्ञत्वं चोक्तं प्रश्नोत्तराभ्यां भगवद्गीता
यां अर्जुन उवाच स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव स्थितधीः किं प्रभाषेत किमासीत व्रजेत किं श्रीभगवा
नुवाच प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान् आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते स्थितप्रज्ञस्य स्थि
ता निश्चला प्रज्ञा अहं ब्रह्मास्मीत्याकारा धीर्यस्य सः स्थितप्रज्ञो द्विविधः समाधिस्थो व्युत्थितचित्तश्च तत्र प्रथमस्य
का भाषा भाष्यते नेनेति भाषा लक्षणं किमित्यर्थः द्वितीयः स्थितधीः किं भाषेत किं विषयकं भाषणं कुर्यात तथा किं
मासीत व्युत्थितचित्ततानिग्रहाय कथं बहिरिंद्रियाणां निग्रहं कुर्यात तन्निग्रहाभावकाले च किं व्रजेत कान्विषया

National Centre for the Arts

॥मो०ध०॥ नप्राप्नोति तत्र लक्षणमाह श्रीकृष्णः प्रजहातीति कामसंकल्पादीन् मनोवृत्तिविशेषान् कामान् यदा जहाति मनोग
तान् मनोधर्मान् अनात्मधर्मानिति यावत् यद्यात्मधर्माः स्युस्तदा न निवर्त्तेरन् वन्हेरौष्ण्यवत् स्वाभाविकत्वात् तथा च
॥१९८॥ सर्वविकारशून्यमनोवृत्तिं लक्षणमुक्तं भवति ननु स्थितप्रज्ञस्यापि मुखप्रसादगम्यः संतोषः प्रतीयते तोऽव्यापक
मिदमिति चेत् न तस्य स्वप्रकाशानंदाविर्भावेन संतुष्टत्वात् तदुक्तमात्मन्येवेति आत्मना स्वप्रकाशचिद्रूपेणाभास
माने तथा चात्मानंदपरिपूर्णस्य सतः सर्वविकारशून्यत्वं लक्षणं भवति तदुक्तं तत्रैव या निशा सर्वभूतानां त
स्यां जागर्त्ति संयमी यस्यां जाग्रति भूतानि सा निशा पश्यतो मुने आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशं
ति यद्वत् तद्वत्कामा यं प्रविशंति सर्वे स शांतिमाप्नोति न कामकामी वेदांतवाक्यजन्यब्रह्मसाक्षात्काररूपायां ब्रह्म
विद्यायां सर्वेषां भूतानां निशेवं निशा तां प्रत्येवाप्रकाशरूपत्वात् तत्र ब्रह्मविद्यायां संयमी ज्ञानी जागर्त्ति सावधा
नो वर्त्तत इति भाष्यं ब्रह्मस्वरूपमनुभवतीति कल्पतरुः यस्यां द्वैतदर्शनलक्षणायामविद्यायां भूतानि जाग्रति
व्यवहरंति सा पश्यतः परमात्मतत्त्वं भावयतो मुनेः समाधिस्थस्य निशा बहिर्वृत्त्यभावरूपा तथा च बहिर्वृत्तिरूपम १९८
नो व्यापारशून्यः आत्मानंदानुभववान् ज्ञानीत्यर्थः तदुक्तं वार्त्तिककृद्भिः कारकव्यवहारे हि शुद्धं वस्तु न वीक्षते
शुद्धे वस्तुनि सिद्धे च कारकव्यापृतिस्तथा काकोलूकनिशेवायं संसारो ज्ञानिवेदिनोः या निशा सर्वभूतानामि

त्येवोचत्स्वयं हरिरिति श्रुतावपि यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं प
श्येत्केन कं विजानीयादिति तद्वत् कामेत्यादिना निर्विकारत्वेन स्थितमेव कामाः प्रविशंति ज्ञानाभाश्रयपारब्धक
र्मवशेन विषया उपस्थिता भावंति तथापि स स्थितप्रज्ञः शांतिं सर्वलौकिकविक्षेपनिवृत्तिं प्राप्नोतीत्युक्तं अचलप्रति
ष्ठमिति अचलावृत्तिष्ठा स्थितिर्यस्य तं समुद्रं आपः प्रविशंति विक्रियां न आपादयंति तथा विषयाः क्रमेऽपि ज्ञानिनश्चि
त्तविक्रियां न भावयंतीत्यर्थः इयमेव च सर्वविक्षेपनिवृत्तिरूपा दौर्वाधी न विषयोपभोगे सत्यपि निर्विकारतारूपा
जीवन्मुक्तिरुच्यते एतादृशस्य ज्ञानिनो जीवन्मुक्तस्य कार्यांतराभावश्चोक्तो गीतायां यस्त्वात्मरतिरेव स्यादात्मतृप्त
श्च मानवः आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन न चास्य सर्वभूतेषु क
श्चिदस्ति व्यपाश्रयः यस्त्विति अद्वितीयपरमानंदमनुभवन् रतितृप्तितुष्टीः आनंदावांतरभेदान् प्राप्नोति एत
स्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः परमानंदानुभववानपि आत्मरत्यादिपदैरभिधीयते श्रुतौ
आत्मक्रीड आत्मरतिः क्रियावानेष ब्रह्म ब्रह्मविदां वरिष्ठ इति तस्य च कार्यं किमपि न विद्यत इति तात्पर्यार्थः नैव त
स्येत्यनेन स्वर्गादिकामनया प्रत्यवायपरिहारकामनया वा कर्मकरणप्रवृत्तिः पराकृता तत्रोपपत्तिश्च न चास्ये
त्यनेनोक्ता अर्थव्यपाश्रयः प्रयोजनसंबंधो नास्तीत्यर्थः अतएव नैनं कृताकृते तपत इति श्रुत्यापुण्यपापस्पर्शाभाव

Indira Gandhi National Centre for the Arts

॥मो०द्वा०॥ योनिषेधः अयंच सप्तमीं भूमिकामारूढो जीवन्मुक्त उच्यते भूमिसप्तकमुक्तं वासिष्ठे ज्ञानभूमिः शुभेच्छाख्या प्रथ
मा परिकीर्तिता विचारणा द्वितीया स्यात् तृतीया तनुमानसा सत्त्वापत्तिश्चतुर्थी स्यात्ततो संसक्तिनामिका पदार्थ
॥१९९॥ भावना षष्ठी सप्तमी तुर्यगा स्मृतेति तत्र शुभेच्छा नित्यानित्यवस्तुविवेकादिपुरःसरा फलपर्यवसायिनी मोक्षेच्छा वि
चारणा गुरुमुपसृत्य वेदान्तवाक्यश्रवणमननात्मिका तनुमानसा निदिध्यासनाभ्यासेन मनस एकाग्रतया सूक्ष्म
ग्रहणयोग्यता एतद्भूमिकात्रयं साधनरूपं जाग्रदेवस्थारूपं तदुक्तं तत्रैव भूमिकात्रितयं त्वेतत् राम जाग्रदि
ति स्थितं यथावद्भेदबुद्ध्येदं जगज्जाग्रति दृश्यत इति सत्त्वापत्तिर्वेदान्तवाक्यजन्या निर्विकल्पकब्रह्मात्मैक्य
साक्षात्काररूपा सैव स्वप्नावस्थोच्यते सर्वस्यापि जगतो मिथ्यात्वेन स्फुरणात् तदुक्तं अद्वैते स्थैर्यमायाते द्वैते प्र
शममागते पश्यंति स्वप्नवल्लोकं चतुर्थी भूमिका मता एतां भूमिकां प्राप्तो ब्रह्मविदुच्यते असंसक्तिः सर्वतो निरु
द्धे मनसि निर्विकल्पकसमाध्यवस्था इयमेव सुषुप्तिरित्युच्यते पदार्थाभावना तदभ्यासपरिपाकेन चिरकालाव
स्थायिनी सैवावस्था इयमेव गाढसुषुप्तिरित्युच्यते तदुक्तं पंचमीं भूमिकामेत्य सुषुप्तिपदनामिकां षष्ठीं गाढ १९८
सुषुप्त्याख्यां क्रमात्पतति भूमिकामिति तुर्यगा स्वतः परतो वा व्युत्थानाभाववती समाध्यवस्था विदेहाख्या य
स्यां स्थितः स्वपरप्रयत्नमंतरेणैव परमेश्वरप्रेरितप्राणवायुवशादन्यैर्निर्वाह्यदैहिकव्यवहारः परिपूर्णपरमानंद ए

व भवति तदुक्तं षष्ठ्यां भूम्यामसौ स्थित्वा सप्तमीं भूमिमाप्नुयात् किंचिदेवैष संपन्नस्त्वथवैष न किंचन विदेहमुक्तता
तूक्ता सप्तमी योगभूमिका अगम्या वचसां शांता सा सीमा योगभूमिषु एताश्चतस्रोऽवस्था जीवन्मुक्तेरवांतरभेदाः तत्र
पंचम्यां सुषुप्त्याख्यायां समाधेः स्वत एव व्युत्थानं षष्ठ्यां गाढसुषुप्त्याख्यायां परतो व्युत्थानं सप्तम्यां विदेहाख्यायां व्यु
त्थानमभावात् एतावान् विशेषः अत एवावस्थात्रयस्थितं जीवन्मुक्तं क्रमेण ब्रह्मविद्वरः ब्रह्मविद्वरीयान् ब्रह्मविद्व
रिष्ठ इति व्यवहरंतीति एतामेव सप्तमीं भूमिकामारूढमधिकृत्योक्तं श्रीभागवते देहं विनश्वरमवस्थितमुत्थितं वा
सिद्धो न पश्यति यतोऽध्यगमत्स्वरूपं दैवादुपेतमथ दैववशादपेतं वासो यथा परिकृतं मदिरामदांधः देहोऽपि दैववश
गः खलु कर्म यावत्स्वारंभकं प्रतिसमीक्षत एव सासुः तं सप्रपंचमधिरूढसमाधियोगः स्वाप्नं पुनर्न भजते प्रतिबुद्ध
वस्तुरिति सिद्धो न पश्यति देहमिति संबंधः यतः स्वरूपमद्वितीयब्रह्मानंदरूपमध्यगमत् साक्षात्कृतवान् एतादृशा
स्य देहाभिमानाभावेऽपि देहस्वारंभकप्रारब्धकर्मयोगं यावद्भवतीत्युक्तं इति अयं चार्थस्तद्यथाहिनिर्ल्वयिनी वल्मी
के मृता प्रत्यस्ता शयीतैवमेवेदं शरीरं शेतेऽथायममृतः प्राणो ब्रह्मैव तेज एवेति तदधिगम उत्तरपूर्वाघयोरश्लेषविना
शौ अनारब्धकार्ये एव तु पूर्वे तदवधेरिति श्रुतिसूत्राभ्यामुत्तरमीमांसायां प्रतिपादितः अयमेव च सांख्यैः सर्वप्रपंचस्य
त्रिगुणात्मकत्वेन संसारबंधनान्मुक्तो ज्ञानी गुणातीत उच्यते अत एव गुणधर्मानतं व्याप्नुवंतीति तदुक्तं भगवद्गीतायां

Indira Gandhi National Centre for the Arts

॥मोक्षप०॥ प्रकाशं च प्रवृत्तिं च मोहमेव च पांडव न द्वेष्टि संप्रवृत्तानि न निवृत्तानि कांक्षति उदासीनवदासीनो गुणैर्यो न विचा-
ल्यते गुणा वर्तंत इत्येवं योवतिष्ठति नेंगते समदुःखसुखः स्वस्थः समलोष्टाश्मकांचनः तुल्यप्रियाप्रियो धीरस्तु-
।२००। ल्यनिंदात्मसंस्तुतिः मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः सर्वारंभपरित्यागी गुणातीतः स उच्यते
मां च योव्यभिचारेण भक्तियोगेन सेवते स गुणान्समतीत्यैतान्ब्रह्मभूयाय कल्पते प्रकाशं सत्वकार्यं ज्ञानं
प्रवृत्तिं रजःकार्यं मोहं च तमःकार्यं उपलक्षणमेतत् सर्वाण्यपि गुणकार्याणि दृष्टव्यानि संप्रवृत्तानि दुःख-
रूपाण्यपि सामग्रीवशाद्भूतानि न द्वेष्टि तथा निवृत्तानि सुखरूपाणि विनाशसामग्रीवशाद्भूतानि न कांक्ष-
ति न कामयते स्वप्नवन्मिथ्यात्वनिश्चयात् एतादृशद्वेषरागरहितो यः स गुणातीत उच्यत इत्यर्थः संप्रवृत्ता-
नि दुःखनिमित्तानीति शेषः निवृत्तानि सुखनिमित्तानीति शेष इति कल्पतरुः केचित्तु प्रकाशप्रवृत्तिमोहाः
सत्वरजस्तमोगुणाः ते च जाग्रत्स्वप्नयोः प्रवर्तंते सुषुप्तिसमाधिशून्यचित्तावस्थासु निवर्तंते प्रवृत्तिश्च द्विवि-
धा अनुकूला प्रतिकूला च तत्र मूढो जागरणे प्रतिकूलप्रवृत्तिं द्वेष्टि शून्यचित्तदशायां मनुकूलप्रवृत्तिं कांक्षति गु- २००
णातीतस्य तु अनुकूलप्रतिकूलाध्यासाभावात् द्वेषाकांक्षे न स्त इत्याहुः उदासीनः द्वयोर्विवदमानयोः कस्यचि-
त्पक्षमभजमानो न रज्यति न द्वेष्टि आसीनः स्वस्वरूप इति शेषः गुणैः सुखदुःखाद्याकारपरिणतैर्यो न विचाल्य-

ते गुणा वर्तंत इति गुणा एवैते देहेंद्रियविषयाकारपरिणताः परस्परस्मिन्वर्तंते सर्वभासकस्यात्मनो न केना-
पि तस्य धर्मेण संबंधः यो वतिष्ठति स्वप्नवन्मायामात्रश्चायं नास्यः प्रपंचो जडः अहं तु स्वयंज्योतिःस्वभावो निर्विका-
रोद्वैत शून्यश्चेत्येवं निश्चित्य स्वरूपेवतिष्ठते स्वस्थः स्वस्मिन्नात्मन्येवास्थितः द्वैतदर्शनशून्यत्वात् सर्वारंभपरि-
त्यागी आरभ्यंत इत्यारंभाः कर्माणि तान्सर्वान्परित्यक्तुं शीलं यस्य स तथा देहयात्रामात्रव्यतिरेकेण सर्वकर्मप-
रित्यागीत्यर्थः अयमेव च ब्रह्मवित्त्वेन ब्राह्मण उच्यते तदुक्तं महाभारते अनुत्तरीयवसनमनुपस्तीर्णशायिनं बा-
हूपधायिनं शांतं देवा ब्राह्मणं विदुः अत्र ब्राह्मणशब्दो ब्रह्मविद्वाची अथ ब्राह्मण इति श्रुत्या ब्रह्मविद एव ब्राह्म-
णशब्देनाभिधानात् तथा येन केनचिदाच्छिन्नो येन केनचिदाशितः यत्र क्वचनशायी स्यात्तं देवा ब्राह्मणं विदुः
निराशिषमनारंभं निर्नमस्कारमस्तुतिं अक्षीणं क्षीणकर्माणं तं देवा ब्राह्मणं विदुः यो हेरिव गणाद्भीतः सन्मानान्नर-
कादिव कुणपादिव यः स्त्रीभ्यस्तं देवा ब्राह्मणं विदुः येन पूर्णमिवाकाशं भवत्येकेन सर्वदा शून्यं यस्य जना–र्णं
तं देवा ब्राह्मणं विदुः येन केनचिदिति देहनिर्वाहयात्राभाच्छादनशायनस्थानापेक्षायामपि तत्कृतगुणदोषानभि-
ज्ञः यथाकथंचिदुदरपूरणादेः संभवात् निराशिषं प्रणमतामाशीर्वादप्रयोगरहितं निर्नमस्कारं नमस्काररहि-
तं अस्तुतिं स्तोत्रकरणरहितः अक्षीणमदीनं क्षीणकर्मत्वं विधिनिषेधातीतत्वं गणाद्भीत इति राजवार्ताहितेषा-

Indira Gandhi National
Centre for the Arts

॥मोक्षपर्व॥ स्यादित्यत्र गणस्य भयजनकत्वमुक्तं तथाच स्मर्यते तथाचरेत्वै योगी सतां धर्ममनुस्मरन् जना यथावमन्येरन्
गच्छेयुर्नैव संगतमिति कुणपं मांसं येनेति जीवन्मुक्तस्यैकाकित्वे सम्माध्यनुवृत्तौ परिपूर्णेन परमानंदात्मना
॥२०१॥ सर्वमाकाशं पूर्णमिवाव भासेते तस्य न बालस्य येन शोकमोहादायो न भवंति तत्र को मोहः कः शोक एकत्वमनुप
श्यत इति श्रुतेः जनाकीर्णं शून्यमिवाव भासते तत्र हि राजवार्त्तादिना समाध्यनुवृत्तिप्रतिबंधेन परमानंदानुभवा
भावात् अयमेव चातिवर्णाश्रमीत्युच्यते प्रत्यगभिन्नब्रह्मसाक्षात्कारेणाहं ब्राह्मण इत्याद्यभिमानाभावेन वर्णा-
श्रमधर्मातीतत्वात् तदुक्तं सूतसंहितायां यस्य वर्णाश्रमाचारो गलितः स्वात्मदर्शनात् सर्वेवर्णानाश्रमा
न सर्वानतीत्य स्वात्मनि स्थितः यस्त्यक्त्वा स्वाधमान् वर्णानात्मन्येव स्थितः पुमान् सोतिवर्णाश्रमी प्रोक्तः सर्ववे
दार्थवेदिभिः स्वात्मदर्शनात् ब्रह्मसाक्षात्कारात् तदुक्तं तत्रैव एवमात्मानमद्वंद्वं निर्विकारं निरंजनं नित्यशुद्धं निरा
भासं संविन्मात्रं परामृतं यो विजानाति वेदांतैः स्वानुभूत्या च निश्चितं सोतिवर्णाश्रमी प्रोक्तः स एव गुरुरुत्तमः वे
दांतैर्विजानाति वेदांतवाक्यश्रवणरूपपरोक्षज्ञानवान् स्वानुभूत्या तज्जन्यसाक्षात्कारेण इममेव स्थितप्राज्ञ २०२
मद्भक्त इत्युच्यते तदुक्तं भगवद्गीतायां अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च निर्ममो निरहंकारः समदुःखसु
खः क्षमी संतुष्टः सततं योगी यतात्मा दृढनिश्चयः मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः यस्मान्नोद्विजते लोको

लोकान्नोद्विजते च यः हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः सर्वारंभ
परित्यागी यो मद्भक्तः स मे प्रियः यो न हृष्यति न द्वेष्टि न शोचति न कांक्षति शुभाशुभपरित्यागी भक्तिमान् यः स मे प्रियः
समः शत्रौ च मित्रे च तथा मानापमानयोः शीतोष्णसुखदुःखेषु समः संगविवर्जितः तुल्यनिंदास्तुतिर्मौनी संतुष्टो ये
न केनचित् अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः मय्यर्पितमनोबुद्धिरिति ईश्वरे समाहितमनः सादेहाभिमानाभा
वात् न सुखदुःखाद्यनुभव इत्यर्थः व्युत्थितचित्तस्यापि औदासीन्येन न हर्षविषादौ अयमेव च ब्रह्मणि स्थित इत्यु-
च्यते तदुक्तं तत्रैव विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि शुनि चैव श्वपाके च पंडिताः समदर्शिनः इहैव तैर्जितः स
र्गो येषां साम्ये स्थितं मनः निर्दोषं हि समं ब्रह्म तस्मात् ब्रह्मणि ते स्थिताः न प्रहृष्येत् प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रि
यं स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः बाह्यस्पर्शेष्वसक्तात्मा विंदत्यात्मनि यत्सुखं स ब्रह्मयोगयुक्तात्मा
सुखमक्षयमश्नुते ये हि संस्पर्शजा भोगा दुःखयोनय एव ते आद्यंतवंतः कौंतेय न तेषु रमते बुधः शक्नोतीहैव यः
सोढुं प्राक् शरीरविमोक्षणात् कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः योंतःसुखोंतरारामस्तथांतर्ज्योतिरेव यः स यो
गी ब्रह्मनिर्वाणं ब्रह्मभूतोधिगच्छति लभंते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः छिन्नद्वैधा यतात्मानः सर्वभूतहिते
रताः कामक्रोधवियुक्तानां यतीनां यतचेतसां अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनां सुहृन्मित्रार्युदासीनमध्य-

Indira Gandhi National
Centre for the Arts

॥मो०घ०॥ स्थद्वेष्यबंधुषु साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति तस्याहं न प्रणश्यामि स
च मे न प्रणश्यति पंडिताः समदर्शिन इति ब्राह्मणश्चिदाभासरूपप्रतिबिंबितस्य नोपाधिगतगुणदोषसंबंधः
॥२०२ गंगातोयतडागमूत्रादिषु प्रतिबिंबितसूर्यस्येवेति दर्शिनः पंडिताः समं ब्रह्म सत्वादिगुणैस्तज्जैश्च संस्कारैरसं
स्पृष्टं पश्यंतीति ते समदर्शिनः सर्वत्र समदृष्टेश्च रागद्वेषराहित्येन परमानंदस्फूर्त्या जीवन्मुक्तिमनुभवतीत्यर्थः न
नु गौतमेन समासमाभ्यां विषमसमे पूजात इति अभोज्यान्नत्वकरणे समदृष्टेर्निषिद्धत्वात् कथं समदृष्टिरिति चेत्
न ब्रह्मणि स्थितत्वेनाभिमानाभावात् इत्यभिप्रेत्योक्तं इहैवैतैरिति सर्गः सृज्यत इति द्वैतप्रपंचः जित इति क्रांत ब्र
ह्मणि स्थितः ब्रह्मैव सर्वमिति स्थिरचित्तः न प्रहृष्येदिति हि योऽहि गरहितः स्थिरबुद्धिः सर्वसंशयशून्यत्वेन नि
र्विचिकित्सा बुद्धिर्यस्य बाह्यस्पर्शेष्विति बाह्यविषयेष्वासक्तस्य ब्रह्मानंदानुभवो न भवतीति तत्र नासक्तः आत्म
नि यत्सुखं परमात्मस्वरूपं सुखमनुभवतीत्यर्थः विषयेषु सुखस्याभावात् दुःखहेतुत्वाच्च तत्र नासक्तिरित्युक्तं
ये हीत्यादिना यन्नाधिक्यमाह शक्नोतीत्यादिना आशरीरविमोक्षणात् बहिरिंद्रियव्यापाररूपगर्त्तपातात् पू ।२०२।
र्वं कामक्रोधवेगं यः सहते स योगी ब्रह्मानंदानुभववांश्चेत्यर्थः यद्वा आशरीरविमोक्षणात् यथा शरीरविमोक्ष
णानंतरं पत्नीभिरालिंगने कृतेऽपि न कामादेरुद्भवः तथा मरणात्पूर्वमपि यः कामादिवेगं सहते स सुखीत्यर्थः

योऽन्तःसुख इति अंतर्बाह्यविषयसुखनिरपेक्षमेव स्वरूपभूतं सुखं यस्येत्यर्थः अंतरारामः अंतः आत्मन्येवा
रामो यस्य स तथा अंतर्ज्योतिः आत्मन्येव ज्योतिर्विज्ञानं यस्य न बाह्यविषयेष्विति ब्रह्मनिर्वाणं परमानंदरूपं अ
भितः अभयतः जीवतां मृतानां चाभितो जीवदवस्थायामपि मोक्षावस्था भवत्येवेत्युक्तं भवति एतादृशा एव जीवन्मु
क्ता इत्युच्यते लिंगपुराणे ज्ञानेनैकेन तृप्तस्य संगयोगस्य योगिनः कर्त्तव्यं नास्ति विप्रेंद्राः अस्ति चेन्न स तत्त्ववित्
इह लोके परे चापि कर्त्तव्यं नास्ति तस्य वै जीवन्मुक्तो यतस्तस्मात् ब्रह्मवित्परमार्थतः एतानि जीवन्मुक्तौ प्रमाणानि
स्मृतिपुराणवचनान्युदाहृतानि श्रुतयाप्युदाह्रियंते कठवल्ल्यां विमुक्तश्च विमुच्यत इति जीवन्नेवाभिमानाभावे
न बंधनाद्विमुक्तोऽपि प्रारब्धकर्मक्षये सति देहादपि विमुच्यत इत्यर्थः बृहदारण्यकेऽपि यदा सर्वे प्रमुच्यंते कामा येऽस्य हृदि
स्थिताः अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते अत्रापि कामादिनाश एवोक्तो न तु देहादिनाशः अत एव देहे सत्यपि
वामृतो भवति स देहावस्थायामेव ब्रह्मानंदमश्नुत इत्यर्थः श्रुत्यंतरेऽपि जीवन्मुक्तावस्था स्मर्यते सचक्षुरचक्षुरिव
सकर्णोऽकर्ण इव समना अमना इवेति तेनेंद्रियवत्त्वे सति तेषां विषयस्पर्शराहित्यमुक्तं भवति तस्मादेभिः प्रमाणैः
देहे सत्यपि कर्तृत्वभोक्तृत्वसुखदुःखलक्षणसर्वविकारशून्यता जीवन्मुक्तिरिति सिद्धं ननु नेयं यन्न साध्यासाक्षि
न्मुक्तो साक्षिणो भवेत् चित्तस्य वा नाद्यः प्रत्यगभिन्नब्रह्मसाक्षात्कारादेवाध्यासिकविकाराभावसिद्धेः न द्वितीयः चि

Indira Gandhi National
Centre for the Arts

॥मोक्ष५०॥ त्तस्य स्वाभाविकानां विकाराणां यत्नशतेनापि निवर्तयितुमशक्यत्वात् न हि जलस्य द्रवत्वं वह्नेरौष्ण्यं निवारयितुं
शक्यते किं च ब्रह्मसाक्षात्कारस्य तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ अनारब्धकार्ये एव तु पूर्वे तदवधेरिति
१२०३ न्यायात् प्रारब्धभोगकर्मातिरिक्तकर्मनाशकत्वेन प्रारब्धभोगकर्मकार्याणां सुखदुःखादीनां प्रबलतरत्वेन तदभावस्य
कर्तुमशक्यत्वेन तदाभावो न संभवति तस्माद्देहे सति विकारशून्यतातिदुर्लभतरेति चेत् न अंतःकरणस्थिता
नामेव विकाराणामात्यंतिकनिवारणसंभवेपि योगाभ्यासबलेन मणिमंत्रादिना दाहस्येव प्रतिबंधसंभवात् प्रा
रब्धकर्मजन्यानां दुःखादीनामभिभवस्यापि प्रारब्धकर्मभोगांतःपातेन न काप्यनुपपत्तिः न च तेन कर्मलेशाभिभ
वस्यापि संभवेन योगाभ्यासरूपयत्नानर्थक्यमिति वाच्यं कृष्यादौ फलजनकीभूतादृष्टसत्वेपि दृष्टसामग्र्यपे
क्षावदत्रापि संभवात् अन्यथा यत्नांतरविधायकशास्त्राणामानर्थक्यप्रसंगात् वस्तुतस्तु योगविधायकशा-
स्त्रानर्थक्यभिया ब्रह्मतत्वज्ञानस्य प्रबलतरप्रारब्धकर्मनाशकत्ववत् बलवत्तरयोगस्यापि प्रारब्धकर्मनाशक
त्वं बोधितमिति तत्वं तथा च योगिनां मुद्गलप्रभृतीनां स्वेच्छया देहत्याग उपपद्यते अत एव स्वेच्छामरणं प्राचीनानां १२०३
स्मर्यते ननु तथाप्यनुपपन्नैव जीवन्मुक्तिः ब्रह्मतत्व साक्षात्कारेण संसारमूलकारणाविद्यानाशेंतःकरणादी
नामपि विनाशे सति कर्तृत्वभोक्तृत्वाद्यसंभवेन व्यवहाराभावप्रसंगात् श्रूयते च जीवन्मुक्तानामपि लो-

कसंग्रहार्थव्यवहारः तस्मान्नाविद्यानाशः संभवति तदनाशे च ब्रह्मज्ञानवैयर्थ्यं न ब्रह्मवेद ब्रह्मैव भवतीत्यादि
वाक्यानि कुप्येरन् तस्माच्छरीरे सति जीवन्मुक्तिरिति चेत् न अज्ञानस्य शक्तिद्वयं तत्रावरणशक्तिनाशेपि विक्षे
पशक्तेरविनाशात् व्यवहारोपपत्तिः अत एवाहं कर्ताऽहं भोक्तेति सुखी दुःखीत्याद्यध्यासाभावेपि प्रारब्धकर्मजन्यशरी
रनिर्वाहार्थं व्यवहारोपि विक्षेपशक्तिमत्याविद्यया दग्धपटायमानया भोगपर्यंतमेव निर्वाह्यते तद्भोगे च संपूर्णे-
विक्षेपशक्तेरपि विनाशः इयमेव च विदेहमुक्तिरित्युच्यते केचित्तु तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य
इति श्रुत्या भोगेन त्वितरे क्षपयित्वा संपद्यत इति सूत्रेण जीवन्मुक्तपदं त्यक्त्वा स्वदेहे कालसात्कृते विशत्यदेहमु
क्तत्वं पवनोऽस्पंदतामिवेति वासिष्ठवचनेन देहपातोत्तरमेव विदेहमुक्तिरिति वदंति तत्र अनारब्धकार्ये एव
तु पूर्वे तदवधेरिति न्यायेन वर्तमानदेहस्य तावात्तनज्ञाननिवर्त्यत्वं देहारंभकस्य कर्मणो भोगेन क्षये सति
स्वत एव देहनाशसंभवात् भोगेन त्वितरे क्षपयित्वा संपद्यत इति सूत्रस्यापि लिंगदेहनाशकत्वे सत्यपि-
ज्ञाने जीवन्मुक्तस्य लिंगदेहानपायात् तस्य तु अनारब्धस्य ज्ञानेन नाशे सति प्रारब्धस्य भोगेन क्षये सति ते
लवर्तिरहितप्रदीपवत् तदवस्थानसामग्रीनाशादेव नाशसंभवः तस्मात् भूयो न जायत इति श्रुत्या देहोत्त
रानारंभ एव ज्ञानसाध्य इति वर्तमानदेहकाल एव विदेहतेति सिद्धं न च तत्राप्यनारब्धकर्माभावादेव सि

Indira Gandhi National
Centre for the Arts

॥मो॰द॰१०॥ द्वैतज्ञानसाध्यतेतिवाच्यं तत्राश्रुतिरेव शरणमिति सांप्रदायिका वदंति वस्तुतस्तु अज्ञाननाशावतवर्त्तमान
देहाभिमानाभाव एव विदेहतेति देहस्थोपि नैदेहस्थो विद्वान्स्वप्नाद्ययोत्थितः अदेहस्थोपि देहस्थः कु
॥२०४॥ मतिः स्वप्नदृग्यथेति भागवतोक्तेरवगम्यत इति तत्वं एवं तत्वज्ञाने सति जीवन्मुक्त इत्युच्यते तत्र मनोना
शवासनाक्षयावप्यपेक्षितौ तदुक्तं वासिष्ठे वासनाक्षयविज्ञानमनोनाशा महामते समकालं चिराभ्यस्ता
भवंति फलदा इमेति जयएतेसमं यावत्न स्वभ्यस्ता मुहुर्मुहुः तावन्न पदसंप्राप्तिर्भवत्यपि समाशतैः त्रया
णां समकालाभ्यासश्चोक्तस्तत्रैव एकैकशो निषेव्यंते यद्येते चिरमप्यलं तन्न सिद्धिं प्रयच्छंति मंत्राः संकलिता
इवेति त्रयाणामपि परस्परसाहित्यमुक्तं तत्रैव यावद्विलीनं न मनो न तावद्वासनाक्षयः न क्षीणा वासना
यावत्चित्तं तावन्न शाम्यतीति तत्र मनो नाम प्रदीपज्वालासंतानवर्त्तदृत्तिसंतानवत्परिणममानमंतःक
रणं मननात्मकत्वात्मन इत्युच्यते तस्य नाशो नाम वृत्तिरूपपरिणामं परित्यनिरुद्धदृत्तित्वाकारेण परिण
मा तदुक्तं पतंजलिना योगसूत्रे व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधक्षणचित्तान्वयो निरो ।२०४।
धपरिणामः व्युत्थानसंस्कारा अभिभूयंते निरोधसंस्काराः प्रादुर्भवंति निरोधयुक्तक्षणश्चित्तेनान्वीयते सो
यं मनोनाश इत्यर्थः सहसोत्पद्यमानस्य क्रोधादिविशेषस्य हेतुश्चित्तगतः संस्कारविशेषो वासना तस्याः

क्षयो नाम विवेकजन्याधीशांत्यादिवासनायां दृढायां निमित्ते सत्यपि क्रोधाकारपरिणामाभावः मनोनाशवा
सनाक्षयहेतुत्वं तत्वज्ञानस्य श्रुतावभिहितं श्रुत्यादेवं सर्वपापप्रहाणं अध्यात्मयोगाधिगमेन देवं मत्वा धीरो ह
र्षशोकौ जहाति तरति शोकमात्मविदित तत्र को मोहः कः शोक एकत्वमनुपश्यतः ज्ञात्वा देवं मुच्यते सर्वपाशैरि
ति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन किं पश्येत्केन किं जिघ्रेत इत्यादि अत एव वासनापर्यायबंधानामविज्ञा
ननिवर्त्यत्वं ते च बंधाः अविद्याग्रंथिरब्रह्मत्वं हृदयग्रंथिः संशयः कर्माणि सर्वकामत्वं मृत्युर्जन्मेत्यादि तत्र त
त्प्रहारात एतद्यो वेद निहितं गुहायां सोविद्याग्रंथिं विकरोतीह सोम्य ब्रह्म वेद ब्रह्मैव भवति भिद्यते हृद
यग्रंथिश्छिद्यंते सर्वसंशयाः क्षीयंते चास्य कर्माणि तस्मिन् दृष्टे परावरे यो वेद निहितं गुहायां परमे व्योमन् सोश्नुते
स सर्वान् कामान् सह तमेव विदित्वाति मृत्युमेति यस्तु विज्ञानवान्भवति अमनस्कः सदा शुचिः स तु तत्पद
माप्नोति यस्माद्भूयो न जायते य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवतीति येतो ज्ञानमज्ञानस्य निवर्त्तकमिति
पंचपादिकायामज्ञानपदं पूर्वोक्तसर्वबंधोपलक्षणपरत्वेन व्याख्येयं तस्मादज्ञानवासनादीनां ज्ञाननिवर्त्य
त्वसिद्धं वासनास्वरूपमुक्तं वासिष्ठे दृढभावनया त्यक्तपूर्वापरविचारं यदादानं पदार्थस्य वासना सा प्रकी
र्तिता भावितं तीव्रसंवेगादात्मना यत्तदेव सः भवत्याशु महाबाहो विगतेतरसंस्मृतिः तादृग्रूपो हि पुरुषो वा

Indira Gandhi National Centre for the Arts

॥मो०त्ना०॥
॥२०५॥

सनाविवशीकृतः संपश्यति यदेवैतं तद्दृश्यति विमुह्यति वासनावेगवैवश्यात् स्वरूपं प्रजहाति तत् शांतं प्र-
शपति द्रष्टिः सर्वमदः वशादिव दृढभावनया दृष्टपूर्वसंस्कारेण आनंदपदार्थस्य पूर्वापरविचारणत्यागरूपा-
फलिका सैव वासनेत्यर्थः बृहदारण्यकेपि स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते यत्कर्म कु-
रुते तदभिसंपद्यत इति तस्याएव कार्यमुक्तं भावितमित्यादिना वासनाभेदो वा लौकिकिनादर्शितः वासनाद्विविधा शो-
भा शुद्धा च मलिना तया मलिना जन्महेतुस्यात् शुद्धा जन्मविनाशिनी अज्ञानस्य घनाकारा घनाहंकारशालिनी पु-
नर्जन्मकरी प्रोक्ता मलिना वासना बुधैः पुनर्जन्मांकुरं त्यक्त्वा स्थिता संभृष्टबीजवत् देहार्थं ध्रियते ज्ञातज्ञेया शुद्धेति सो-
च्यते अज्ञानस्य घनाकारेति अज्ञानस्यावरकस्य घनीभूतः परिणामविशेषः स एवाकारः स्वरूपं यस्याः स एव दृढः
परिणामोऽहंकाररूपः तदुक्तं घनाहंकारशालिनीति घनीभावश्च भ्रांतिपरंपरारूपः मलिना च वासना त्रिविधा शा-
स्त्रवासना लोकवासना देहवासना तत्राद्यापि त्रिविधा पाठरूपा अर्थरूपा अनुष्ठानरूपेत्यादि वासनाभेदानां ज्ञान-
भावप्रतिबंधकत्वं श्रुतिस्मृत्यर्थवादेषु अवगंतव्यं मनः स्वरूपमुक्तं वाजसनेयिब्राह्मणे कामः संकल्पो विचिकित्सा २०५
श्रद्धाश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव मनोणुत्वनित्यत्ववादिनस्तु एतस्माज्जायते प्राणो मनः सर्वे-
न्द्रियाणि चेत्यनेनायास्तावैदितव्याः अनात्मन्यात्मभावेन देहमात्रास्थया नया पुत्रदारकुटुंबैश्च चेतो गच्छति

पीनतां अहंकारविकारेण ममतामललीलया इदं ममेति भावेन चेतो गच्छति पीनतामित्यादि वासिष्ठवचनविरोधा-
च्च तत्र वासनाक्षयप्रकार उक्तो वासिष्ठे बंधो हि वासनाबंधो मोक्षः स्याद्वासनाक्षयः वासनास्त्वं परित्यज्य मोक्षार्थित्वम-
पि त्यज मानसीर्वासनाः पूर्वं त्यक्त्वा विषयवासनाः मैत्र्यादिभावनानाम्नीः गृहाणामलवासनाः ता अप्यंतः परित्य-
ज्य ताभिर्व्यवहरन्नपि अंतःशांततमस्नेहो भव चिन्मात्रवासनः तामप्यथ परित्यज्य मनोबुद्धिसमन्वितां शेषे स्थिरसमा-
धाने येन त्यजसि तं त्यजेति मानसीः पूर्वोक्ता लोकशास्त्रदेहवासनाः विषयवासनाः देहद्वयार्थाः शब्दस्पर्शादयो वि-
षयाः तद्वासना इति वा मैत्र्यादिभावनाः मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चि-
त्तप्रसादनमिति पतंजलिसूत्रोक्ताः तथा च मैत्र्यादिभिर्वासनाभिर्विषयानुसंधानं चित्तात्परित्यज्य मनो राज्यादिरूपः
समस्तचेष्टा अपि विहाय चिन्मात्रवासना अप्यसेत तामप्यथ परित्यज्येति चिन्मात्रवासनादिविधा मनोबुद्धिसमन्वितात
द्रहिता चेति करणं मनः कर्तृत्वोपाधिर्बुद्धिः कर्तृकरणानुसंधानसमन्विता अप्रमत्तोऽहमेकाग्रेण मनसा चिन्मात्रं भाव-
यामीत्याकारा ध्यानशब्दाभिधेया तां परित्यजेत्यर्थः शेषे स्थिरसमाधाने इति यात्वभ्यासपाटवेवकर्तृत्वाद्यनुसंधानव्य-
वहाररहिता समाधिशब्दाभिधेया चिन्मात्रवासना तामुपाददीतेत्यर्थः ध्यानसमाध्योर्भेदमाह पतंजलिः प्रत्ययैकता-
नता ध्यानं तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिरिति येन त्यजसि तं त्यजेति तादृशो समाधौ दीर्घकालादरनै-

Indira Gandhi National Centre for the Arts

रंतर्यसेविते स्थैर्यलब्धापश्चात्कतक रणानुसंधानपरित्यागार्थो यो यत्नस्तमपि परित्यजेदित्यर्थः मनोजयप्रकारश्च
क्तो वासिष्ठे अध्यात्मविद्याधिगमः साधुसंगमएव च वासनासंपरित्यागः प्राणस्पंदनिरोधनं एतास्ता युक्तयः पुष्टाः सं
ति चित्तजये किल चित्तस्य वीजद्वयं वासनाप्राणपरिस्पंदश्च तयोश्च निरोधेन चित्तस्य जयः स्यादेवमनोनाश इत्यु
च्यते तदुक्तं वासिष्ठे द्वे वीजे चित्तवृक्षस्य वृत्तिव्रततिधारिणः एकं प्राणपरिस्पंदो द्वितीयं दृढभावना सती सर्वग
तासंवित्प्राणस्पंदेन बोध्यते संवेदनादनंतानि ततो दुःखानि चेतसः चित्तस्योत्पत्तिमपरां वासनाजनितां शृणु
दृढाभ्यस्तपदार्थैकभावनादतिचंचलं चित्तं संजायते जन्मजरामरणकारणं एतद्द्वयस्य निरोधोपाय उक्तस्त
त्रैव प्राणायामदृढाभ्यासैर्युक्त्या च गुरुदत्तया आसनाशनयोगेन प्राणस्पंदो निरुध्यते असंगव्यवहारित्वा
त् भावभावनवर्जनात् शरीरनाशदर्शित्वाद्वासना न प्रवर्त्तते वासनासंपरित्यागाच्चित्तं गच्छत्यचित्ततां प्रा
णस्पंदनिरोधाच्च यथेच्छसि तथा कुरु आसनशनयोगेनेति असनमुक्तं योगप्रकरणे अशनयोगः हित
मितमेध्याशनरूपः भावभावनवर्जनादिति भावानां वास्यपदार्थानां भावनं ध्यानं तस्य वर्जनात् निवारणा
त् ननु चित्तस्य देहपातं यावदवस्थायित्वेन कथं जीवन्मुक्तस्य मनोलय इति चेत् तस्य सर्ववृत्तिनिरोध एव ल
य इत्युच्यते तदुक्तं वासिष्ठे एतावन्मात्रकं मन्ये रूपं चित्तस्य राघव यद्भावनं वस्तुनोंतर्वस्तुत्वेन रसेन च यदा 

न भाव्यते किंचिद्धेयोपादेयरूपि यत् स्थीयते सकलं त्यक्त्वा तदा चित्तं न जायते अवासनत्वात्सततं यदा न मनुते म
नः अमनस्ता तदोदेति परमोपशमप्रदेति वस्तुत्वेन सत्यत्वेन रसेन सुखरूपत्वेन अत्र चित्तस्य वाह्यवृत्तिनिरो
धे चिन्मात्रवृत्तौ सत्यां संप्रज्ञातसमाधिरित्युच्यते सर्ववृत्तिनिरोधे सति असंप्रज्ञात इत्युच्यते तदुक्तं वासिष्ठे ब्रह्मा
कारमनोवृत्तिप्रवाहोहंकृतिं विना संप्रज्ञातसमाधिः स्याद्ध्यानाभ्यासप्रकर्षत इति भगवद्गीतायामपि प्रशांतात्मा
विगतभीः ब्रह्मचारिव्रते स्थितः मनः संयम्य मच्चित्तो युक्त आसीत मत्परः संयम्य वृत्त्यंतरनिरोधं कृत्वा मच्चित्तः म
देकाकाराचित्तवृत्तिर्यस्य स तथा स एव च निरोधभूमाव संप्रज्ञात उक्तः पतंजलिना तस्यापि निरोधे सर्वनिरो
धान्निर्वीजः समाधिरिति अयं च सुषुप्तिसमानो न तु स्वयं सुषुप्तिः मनस्वरूपसदसत्वाभ्यां विशेषात् तदुक्तं निगृहीत
स्य मनसो निर्विकल्पस्य धीमतः प्रचारः स तु विज्ञेयः सुषुप्तेन्यो न तत्समः लीयते हि सुषुप्तौ तन्निगृहीतं न लीयते त
देव निर्भयं ब्रह्मज्ञानालोकं समंतत इति माडूक्यशाखायामपि द्वैतस्याग्रहणं तुल्यं चित्तयोः प्राज्ञतुल्ययोः वीजनि
द्रायुतः प्राज्ञः सा च तुर्ये न विद्यते न चैवं भेदे सत्यपि संजातब्रह्मज्ञानस्य नासंप्रज्ञातसमाध्यपेक्षा तस्याध्यापाः क्लेश
निवृत्तेः स्वरूपस्य च स्थैर्यैव संभवादिति चेत् सा सुषुप्तिः कादाचित्की वा अन्यस्ता वा आद्यापि तत्कालीनक्लेशनिवर्त्तिका
कालांतरीयक्लेशनिवर्त्तिका वा आद्ये मूढसाधारण्यं द्वितीये संभवः न ह्यल्पकालीनसुषुप्त्याल्पकालीनक्लेशनिवृत्तिः

॥मो०प०॥ संभवति नात्यः अप्यस्तापापभवितस्यां कदाचिज्जागरणेपुनर्भक्षे त्रासंभवात् तस्मात्सत्रिष्टत्वये ब्रह्मविदोप्यसंप्रज्ञात
समाधिरावश्यकः तस्य च स्वरूपमुक्तं भगवद्गीतायां यदा विनियतं चित्तमात्मन्येवावतिष्ठते निस्पृहः सर्वकामेभ्यो युक्त
॥२०१ इत्युच्यते तदा यथा दीपो निवातस्थो नेंगते सोपमा स्मृता योगिनो यतचित्तस्य युंजतो योगमात्मनः यत्रोपरमते
चित्तं निरुद्धं योगसेवया यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति सुखमात्यंतिकं यत्तद्बुद्धिग्राह्यमतींद्रियं वेत्ति
यत्र न चैवायं स्थितश्चलति तत्त्वतः यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः यस्मिन्स्थितो न दुःखेन गुरुणापि विचाल्य
ते आत्मन्येवावतिष्ठत इति सर्वतो निरुद्धवृत्तिकत्वेन सर्ववृत्त्यभावेपि केवलात्मास्फुरणमात्रेणावतिष्ठत इत्यर्थः
न च वृत्तिराहित्ये कथमात्मस्फुरणमिति वाच्यं तत्रात्माकारवृत्त्यभावेपि छिंतकरणे निर्वृत्तिके सति स्वप्रकाशब्रह्मस्फु
रणस्य वारयितुमशक्यत्वात् तादृशचित्तस्य दृष्टांत उक्तो यथेत्यादिना निरुद्धं सर्ववृत्तिशून्यं यत्र निरोधे आत्मा
नं पश्यन् प्रत्यक्चैतन्यं परमात्माभिन्नं महावाक्यजन्यवृत्तिजन्य संस्कारेण साक्षात्कुर्वन् तुष्यति ब्रह्मानंदम
नुभवति तस्यैव परमोत्कृष्टत्वमुक्तं सुखमात्यंतिकमित्यादिना बुद्धिग्राह्यं सद्वृत्तिशून्ये बुद्धिरूपे चित्ते स्फुरद्रूपं २०१
नन्वेवं संप्रज्ञातेतरवृत्तिनिरोधे एकीभूमौ आत्मदर्शने सत्यपि असंप्रज्ञाते निरोधभूमौ सर्ववृत्तिशून्यत्वेन आ
त्मभानासंभव इति चेत् सर्ववृत्तिनिरोधे हि रूफद्वेतककरणे प्रतिबिंबग्राह्यादर्शादिवात्मस्फुरणस्य निवारयितुम

शक्यत्वात् तदुक्तं वार्तिककृता प्रशांतवृत्तिकं चित्तं परमानंददीपकं असंप्रज्ञातनामायं समाधिर्योगिनां प्रियः
अत एव पतंजलिर्योगश्चित्तवृत्तिनिरोध इति सूत्रयित्वा तदा द्रष्टुः स्वरूपेवस्थानमिति सूत्रयत् साधनभेदादप्यसं
प्रज्ञात उक्तः पतंजलिना त्रयमंतरंगं पूर्वेभ्यः यमनियमासनप्राणायामप्रत्याहाररूपसाधनपंचकात् अंतरंगं
त्रयं धारणाध्यानसमाधिरूपं साधनत्रयं संप्रज्ञातनाम्नः सबीजसमाधेः तदपि बहिरंगं निर्बीजस्य निर्बीजस्य समा
धेरसंप्रज्ञातनाम्नः पूर्वोक्तं त्रयमपि बहिरंगमेव तस्य तु वैराग्यमेवांतरंगमित्यर्थः साधनांतर्गतितु समाधिशब्दो
न्योसपरः मुख्यस्तु संप्रज्ञातासंप्रज्ञातौ वदन् समाधिशब्दः एतत्समाधिमांश्च द्विविधः तत्र पूर्वमेव गुरूपगमने
नम— वाक्यजन्यप्रत्यगभिन्नब्रह्मसाक्षात्कारवानाद्यः तादृशब्रह्मविषयकमात्रवृत्तौ संप्रज्ञातः तद्वृत्तिशून्ये
ऽसंप्रज्ञातः द्वितीयस्तु गुरूपसदनं विनैव निष्कृष्टत्वंपदार्थमात्रसाक्षात्कारवान् तद्विषयावेव संप्रज्ञातासंप्रज्ञातौ
ततोपि तस्य ब्रह्मज्ञानेदं गोचरयितुं महावाक्यजन्या ब्रह्मविद्यारूपा वृत्तिरपेक्षिता तदर्थं गुरूपसदनं च अत एव त्वंप
दार्थमात्रविषयकनिरोधसमाधिमात्रान्नायं कृतार्थः किंतु प्रत्यगभिन्नब्रह्मसाक्षात्कारोप्यपेक्षितः तदुक्तं वासिष्ठे
द्वौ क्रमौ चित्तनाशस्य योगो ज्ञानं च राघव योगस्तद्वृत्तिरोधो हि ज्ञानं सम्यगवेक्षणं असंप्रज्ञातसमाधेरपि स्थिर
त्वविपरीतराहित्यं च भूमिचतुष्टयाक्रमणेन भवति तत्र गवादिष्विव वागनिरोधेः प्रथमा भूमिः मुग्धादिष्विव निर्गम

Indira Gandhi National Centre for the Arts

॥मोक्षप०॥ स्तं द्वितीया तेनापि वाहंकाररहितत्वं तृतीया एकत्वाविषमद्वैतत्वराहित्यं चतुर्थी तदेवोक्तं ज्ञानैर्ज्ञानैरुपरमेदिति
ब्रह्मणि चित्तस्य स्थिरतायै अवस्थात्रयमुक्त्वा समप्राप्तिरूपामेवावस्थां सदाभ्यसेत् ताश्चावस्थाः लयविक्षेपक
।२०७। षायसमप्राप्तिरूपाः लयः सुषुप्तिः तदभिमुखं चित्तं प्राणनिरोधेनोत्थापितं कामभोगरूपविक्षेपायाभिमुखं भवति भो
ग्यसर्ववस्तुगतदुःखानुस्मरणेन ततोपि व्युत्थितं तीव्ररागद्वेषादिवासनया ग्रस्तं संतप्तमिव भवति ततोपि विवेकेन
व्युत्थापितं समप्राप्तिरूपं ब्रह्मानंदावस्थामनुभवति तदुक्तं गौडपादाचार्यैः उपायेन निगृह्णीयात् विक्षिप्तं कामभो
गयोः सुप्रसन्नं लये चैव यथा कामो लयस्तथा दुःखं सर्वमनुस्मृत्य कामभोगान्निवर्तयेत् अजं सर्वमनुस्मृत्य जातं
नैव तु पश्यति लये संबोधयेच्चित्तं विक्षिप्तं शमयेत्पुनः सकषायं विजानीयात्समप्राप्तं न चालयेत् नास्वादयेत्सुखं तत्र
निःसंगः प्रज्ञया भवेत् यदा न लीयते चित्तं न च विक्षिप्यते पुनः अनिर्गममनाभासं निष्पन्नं ब्रह्म तत्तदेति विजानीयाद्
विवेकेनानुपश्येत् समप्राप्तमिति समं ब्रह्म सर्वस्य समं सर्वेषु भूतेषु तिष्ठंतं परमेश्वरमिति स्मृतेः तत्प्राप्तं चित्तं न चाल
येदित्यर्थः नास्वादयेदिति ब्रह्मानंदानुभवसमये चित्तवृत्तेरास्वादास्वादाभाव इत्यर्थः निर्वृत्तिके चित्ते स्वप्रकाशानं ।२०७।
दस्य स्वयमेव स्फुरणादित्यर्थः तदुक्तं भगवद्गीतायां सुखमात्यंतिकं यत्तद्बुद्धिग्राह्यमतींद्रियमिति बुद्धिग्राह्यं बुद्धावे
व प्रतिफलितं न तु वृत्त्यावित्यर्थः अतींद्रियं इत्यविषयकं श्रुतावपि समाधिनिर्धूतमलस्य चेतसो निवेशितस्यात्म

नि यत्सुखं भवेत् न शक्यते वर्णयितुं गिरा तदा स्वयं तदंतःकरणेन गृह्यते ननु पूर्वं नास्वादयेदिति वृत्तिनिरूपणतो
क्त इदानीं तु बुद्धिग्राह्यं करणेन गृह्यत इति वृत्तिगम्यत्वमभ्युपगत इति विरुद्धमिति चेत् समप्राप्तिकाले वृत्त्युदयस्य
विरुद्धत्वेन बुद्धेर्निर्मलायां स्वतःस्फुरणस्यैव बुद्धिग्राह्यपदेनाभिप्रेतत्वात् एतमेव स्थिरीभावमभिप्रेत्य कठवल्ली
षु पठ्यते यदा पंचावतिष्ठंते ज्ञानानि मनसा सह बुद्धिश्च न विचेष्टते तामाहुः परमां गतिं तां योगमिति मन्यंते स्थिरामिंद्रि
यधारणं अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययाविति तदेवमुक्तरीत्या मनोनाशवासनाक्षयाभ्यां जीवन्मुक्तिरनुभू
यते तस्याश्च प्रयोजनं ज्ञानरक्षादुःखनाशश्च यद्यपि महावाक्यजन्यापरोक्षसाक्षात्कारे बाधासंभवेन रक्षाया अ
संभवस्तथापि संशयात् ज्ञानरक्षायाः कर्तव्यत्वात्संभवः तच्च महाभारते शुकयाज्ञवल्क्यजनकसंवादे स्पष्टमु
पलभ्यते शुको विद्वानपि संशयान्नो जनकं पप्रच्छ तं जनको बोधयामास नातः परतरः कश्चिन्निश्चयोऽस्त्यपरो मुने स्व
यमेव त्वया ज्ञातं गुरुतश्चापुनः श्रुतं अभ्युक्तिश्चिदात्मैक्ये भानस्तीह नेतर इत्युपक्रम्य प्राप्तं प्राप्तव्यमखिलं भवता पू
र्णचेतसा न ह्यपैति प्रसिद्धस्य न मुक्तं स्वं भ्रांतिमुत्सृज अनुशिष्टः स इत्येवं जनकेन महात्मना विश्राममशुकस्तस्थौ
स्वस्थे परमवस्तुनि जगाम शिखरं मेरोः समाध्यर्थमनिंदितं तत्र वर्षसहस्राणि निर्विकल्पसमाधिना दशास्थित्वा
ज्ञानप्रासादात्मन्यस्तेह दीपवदिति तस्मात्तत्त्वविदो विमोक्षप्रतिबंधात् संशयनिवारणार्थं समाधेरवश्यकत्वं गीताया

मोद्व ५०॥

॥२०९॥

मपि अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति इत्यादावप्रयोजनत्वेनोक्तः श्रुतौ आत्मानं चेद्विजानीयादयमस्मी-
ति पुरुषः किमिच्छन्कस्य कामाय शरीरमनु संज्वरेत् एतं ह वाव न तपति कामावाप्तिरपि प्रयोजनं तदुक्तं तैत्तिरीय
श्रुतौ यो वेद निहितं गुहायां परमे व्योमन् सोऽश्नुते सर्वान्कामान्सहेति सर्वान्कामान्सर्वानानंदान् ब्रह्मानंदावाप्त्या स-
र्वानंदावाप्तेर्जातत्वात् एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः न चैतेषां तत्त्वज्ञानेनैव सिद्धत्वात् कथं
जीवन्मुक्तिफलत्वमिति चेत् सुरक्षितानामेव तेषां प्रयोजनवत्त्वेनाभिप्रेतत्वात् यथा तत्त्वज्ञानमुत्पन्नमपि जीवन्मुक्त्या
निर्वाह्यते तथैतान्यपि फलानि धर्ममेघः समाधिरपि फलं तदुक्तं विवेकख्यातेः परिपोषात् धर्ममेघः समाधिः सर्वधा-
र्मितपत्वात् धर्मविशुक्लोमेघ इत्युच्यते याज्ञवल्क्योपि इज्याचारदमाहिंसादानस्वाध्यायकर्मणां अयं तु परमो धर्मो यद्योगे-
नात्मदर्शनं अयमेवाप्रतिबद्ध साक्षात्कारधाराहेतुः एवम संप्रज्ञातसमाधेरभ्यासात् मनोनाशवासनाक्षययोरप्यां दुर्बल
प्रारब्धस्य प्रतिबंधात् क्लेशानिवृत्तिरित्युक्तमधस्तात् ननु मनोनाशवासनाक्षययोस्तत्त्वज्ञानप्राक्कालीनत्वेन कथं जी-
वन्मुक्तिफलत्वेनाभिधानमिति चेत् श्रवणादिना जातब्रह्मसाक्षात्कारस्याप्यदृढत्वेन दुर्वासनानां मनोवृत्तीनां च सं- २०९
नवेन पुनः पुनर्व्युत्थानसंभवात् अतो मनोनाशवासनाक्षयार्थं यत्ने कृते प्रतिबद्ध साक्षात्कारधारा उत्पद्यते व्युत्था-
नशून्यतायांक्त जातायां तु जातायां जीवन्मुक्तः कृतार्थ इति सिद्धं अत एव याज्ञवल्क्यः शरीरत्यागादेस्तत्त्वविदित्वेपि पा-

स्तकहोलाभिर्विघाभदात् विवादस्य स्पष्टमुपलभ्यते श्रुतौ तद्धि वादे ब्रह्मविषययोरेव प्रश्नोत्तरयोः सत्वेन ब्रह्मवि-
त्वं तेषां निर्विवादो न च ब्रह्मसाक्षात्काराभावेपि परोक्षमेव ब्रह्मविषयकं ज्ञानं तेषामिति वाच्यं यत्साक्षादपरोक्षा-
द्ब्रह्मेति श्रुत्यात्मविषयकस्य वाक्यजन्यस्य साक्षात्कारस्यैव संभवात् ननु तत्त्वसाक्षात्कारे सति दुर्वासनानामेवानु-
त्पत्तेः कथं तन्नाशार्थं यत्नः तदुक्तं नैष्कर्म्यसिद्धौ न चाध्यात्माभिमानोपि विदुषोस्त्यासुरत्वतः विदुषोप्यासुरश्चेत्
स्यात् निष्फलं ब्रह्मदर्शनमिति चेत् न अप्रतिबद्धापरोक्षसाक्षात्कारस्यैव विद्वत्पदेन विवक्षितत्वात् तस्मात्सा-
सात्कारवान् ज्ञानीत्युच्यते तत्र च रागादिसंभवोपि दग्धपदायमानाविद्याविक्षेपशक्तिनिमित्तः अप्रतिबद्धापरोक्ष-
साक्षात्कारस्यैव विद्वत्पदेन विवक्षितत्वात् अप्रतिबद्धापरोक्षसाक्षात्कारवांश्च जीवन्मुक्त उच्यते तस्य च ना-
रागादयः तदुक्तं तत्रैव उत्पद्यमाना रागाद्या विवेकज्ञानवह्निना तदा तदैव दह्यंते कुतस्तेषां प्ररोहणमिति एवं
स्थितप्रज्ञापरनामधेयजीवन्मुक्तौ प्रमाणस्वरूपसाधनफलान्युक्तानि प्रमाणप्रदर्शनेन लक्षणमप्युक्तं सर्व-
दा समाधिस्थस्यैवं स्वतः परतो वा व्युत्थितचित्तस्य तु तस्य रागद्वेषादिराहित्ये सत्येवान्यैः सह संभाषणादिव्यवहा-
रोपि भवति तदुक्तं भगवद्गीतायां स्थितधीः किं प्रभाषेतेति पृष्टे उत्तरितं श्रीकृष्णेन दुःखेष्वनुद्विग्नमनाः सुखेषु विग-
तस्पृहः वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते संभाषणादौ क्रियमाणेपि स्पष्टोद्वेगरागभयक्रोधराहित्यमे-

Indira Gandhi National Centre for the Arts

॥मो॰ध॰॥ वन्नवतीत्यर्थः तेषामपि संन्यासिनां क्वचित् ज्ञाति सामान्यलक्षणपुरस्कारेण क्वचित्स्वावस्थाकथनेन क्वचित्परम
॥२१७॥ तत्वोपदेशमुखेन कचित्साक्षात्साररविवेकोपदेशेन तत्र प्रथमं तावन्मोक्षधर्मेषु जैगीषव्यं महाप्राज्ञं धर्माणामागता
गमं अक्रुध्यंतमहृष्यंतं असितो देवलोब्रवीत् न प्रीयसे वंद्यमानो निंद्यमानो न कुप्यसे का ते प्रज्ञा कुतश्चैषा किं-
चैतस्याः परायणं जैगीषव्य उवाच यामिति र्यां परां निष्ठां यां शांतिं पुण्यकर्मणां तां ते हं संप्रवक्ष्यामि यन्मां पृ
च्छसि वै द्विज निंदत्सु च समं नित्यं प्रशंसत्सु च देवल निह्नुवंति च ये तेषां समयं सुकृतं च यत् उक्ताश्च न निव
दंति वक्तारमहिते रतं प्रतिहंतुं न चेच्छंति हंतारं वै मनीषिणः नाप्राप्तमनुशोचंति प्राप्तकालानि कुर्वते न चा
तीतानि शोचंति न चैतान्प्रतिजानते संप्राप्तानां च पूज्यानां कामादर्थेषु देवल यथोपपत्तिं कुर्वंति शक्तिमंतः
कृतव्रताः पक्वविद्या महाप्राज्ञा जितक्रोधा जितेंद्रियाः मनसा कर्मणा वाचा नापराध्यंति कर्हिचित् अनीर्ष्यवो
न चान्योन्यं विहिंसंति कदाचन न च जातूपतप्यंते धीराः परसमृद्धिभिः निंदाप्रशंसे चात्यर्थं न वदंति परस्य ये
न च निंदाप्रशंसाभ्यां विक्रियंते कदाचन सर्वतश्च प्रशांता ये सर्वभूतहिते रताः न क्रुध्यंति न हृष्यंति नापरा- ॥२१७॥
ध्यंति कस्यचित् विमुच्य हृदयग्रंथीन् चंक्रमंते यथासुखं येषां न बांधवाः संति ये चान्येषां न बांधवाः अमित्रा
श्च न संत्येषां ये चामित्रा न कस्यचित् एवं कुर्वंते मर्त्याः सुखं जीवंति सर्वदा धर्ममेवानुरुध्यंते धर्मज्ञा द्विजस

त्तम निह्नुवंतीति समयं सुकृतं च ये निह्नुवंति ताननु न निवदंतीति संबंधः उक्ताश्च न निवदंतीत्याहत्यापि जल्पं
तथाविकारत्वे सत्यपि विकाराभावरूपं सर्वविकारशून्यमनस्त्वमेव लक्षणमिति समुदायार्थः एवं सामान्य
तो ज्ञानिलक्षणकथनमुक्तं स्वावस्थानिरूपणेनोच्यते विष्णुपुराणे राजोवाच किं श्रांतोस्यल्पमध्वानं त्वयोढा शि
विका मम किमायाससहो न त्वं पीवानसि निरीक्ष्यसे ब्राह्मण उवाच नाहं पीवान्न वै वोढा शिबिका न वतो मया
न श्रांतोस्मि न चायासः सोढव्योस्ति महीपते राजोवाच प्रत्यक्षं दृश्यसे पीवानद्यापि शिबिका त्वयि श्रमश्च भारो
द्वहने भवत्येव हि देहिनां ब्राह्मण उवाच प्रत्यक्षं भवता भूप यद्दृष्टं मम तद्वद बलवानबलश्चेति वाच्यं पश्चाद्विशे
षणं त्वयोढा शिबिका चेति त्वय्यद्यापि च संस्थिता मिथ्यैतदत्र तु भवाञ्शृणोतु वचनं मम भूमौ पादद्वयस्यास्था
जंघे पादद्वये स्थिते ऊरू जंघाद्वयावस्थौ तदाधारं तथोदरं वक्षःस्थलं तथा बाहू स्कंधौ चोदरसंस्थितौ स्कंधा
श्रितेयं शिबिका मम भारोत्र किं कृतः शिबिकायां स्थितं चेदं वपुस्त्वदुपलक्षितं तत्र त्वमहमप्यत्र प्रोच्यते चेदमन्य
था अहं त्वं च तथान्ये च भूतैरुह्याम पार्थिव गुणप्रवाहपतितो भूतवर्गोपि यात्ययं कर्मवश्या गुणाश्चैते सत्वाद्याः
पृथिवीपते अविद्यासंचितं कर्म तच्चाशेषेषु जंतुषु आत्मा शुद्धोक्षरः शांतो निर्गुणः प्रकृतेः परः प्रवृद्ध्यपचयौ ना
स्यैकस्याखिलजंतुषु यदा नोपचयस्तस्य न चैवापचयो नृप तदा पीवानसीति त्वं कया युक्त्या त्वयेरितं भूपाद

Indira Gandhi National Centre for the Arts

जंघाकट्यूरुजठरादिषु संस्थिते शिबिकेयं तथा स्कंधे तदाभारः समत्वया तथा त्वैर्जंतुभिर्नृप शिबिकोत्थो न केवल
शैलद्रुमगृहोत्थोपि पृथिवीसंभवोपि वा यदा पुंसः पृथक्भावः प्राकृतैः कारणैः र्नृप सोढव्यस्तु तदायासः कथं वा
नृपते मया यतद्रव्या शिबिका चेयं तद्रव्यो भूतसंग्रहः भवतो मेखिलस्यास्य ममत्वेनोपबृंहितः भूमावित्यादिना भू
मिभारस्य राजदेहपर्यंतपारंपर्येणाधाराधेयभावमात्रं नतु आत्मनस्तत्र संग इत्युक्तं भवति तद्रूपनक्षितं त्वायात्म
नाहं तथा दृष्टं मेशारीरं शिबिकापां न तु त्वं त्वमहं भयचेति त्वमहमिति अन्यथा मिथ्येत्यर्थः यतो नावयोर्विशेषो वास्तवं
भावोस्तीति भावः गुणप्रवाहः गुणपरिणामस्रोतः आत्मा शुद्ध इत्यादिना आत्मनो निर्विकारत्वमादर्शितं शुद्धः देहा
दिसंसर्गशून्यः असंगीत्यर्थः अक्षरो विनाशी अचलेत्यपि केचित शांतो रागद्वेषरहितः निर्गुणो गुणातीतः स
त्वादिगुणशून्य इति यावत् प्रकृतेपरोऽचेतनाद त्यंतविलक्षणः भूपादेति भूपादादिषु स्थिते स्कंधे स्थिते पंशिबिका
यदि मम भारस्यात तदासभारस्तथा चान्यैश्च समस्यादिति भावः पद्भ्यां येन ध्रियमाणे परस्यापि भारस्यात्तदामत्वक्षित
स्त्वधाश्रितेन र्तव्येत वापि भारस्यादिति भाव इत्यपि केचित यद्व्येति शिबिकायास्तव मम सर्वदेहानां भौतिकत्वे समा 
ने किंतवेयं शिबिका त्वं वा शिबिकायाः किमहंतव त्वं वा ममेति गुणप्रधानभावेन नियामकं नास्तीत्याशयः भूतसंग्रहो
देहः ममत्वेनोपबृंहितः कीयत्वाध्यासेत कीरुतः तथा सोपि राजावती र्यार्या तत्पादौ जगृहे त्वरन् राजोवाच नोमोवि

स
सृज्य शिबिकां प्रसादकुरु मे द्विज कथ्यतां को भवान् अत्र जाल्मरूपधरस्मृतं यो भवान् यन्निमित्तं वा यदागमनकारणं
तत्सर्वं कथ्यतां ब्रह्मन् विस्फुश्रूषवे त्वया ब्राह्मण उवाच श्रूयतां कोहमित्येतद्वक्तुं भूप न शक्यते उपभोगनिमित्तं च
सर्वत्रागमनक्रिया स्रुखदुःखोपभोगौ तु तौ देहाद्युपपादकौ धर्माधर्मोद्भवौ तौ तु भोक्तुं देहादिमृच्छति सर्वस्यैव तु भूपा
लकृतो सर्वत्र कारणं धर्माधर्मौ यतस्तस्मात्कारणं पृच्छ्यते कुतः राजोवाच धर्मोधर्मौ न संदेहः सर्वकार्येषु कारणं उपभो
गनिमित्तं च देहाद्देहांतरागमः यत्त्वेतत् भवता प्रोक्तं कोहमित्येतदात्मनः वक्तुं न शक्यते श्रोतुं तन्ममेच्छा प्रवर्त्तते यो
स्ति सोहमिति ब्रह्मन् कथं वक्तुं न शक्यते आत्मन्येष न दोषाय शब्दोहमिति यो द्विज ब्राह्मण उवाच शब्दोहमिति दोषाय
नात्मन्येष तथैव तत् अनात्मन्यात्मविज्ञानं शब्दो वा भ्रांतिलक्षणः जिह्वा ब्रवीत्यहमिति दंतोष्टं तालुकं नृप एते नाहं
यतः सर्वे वाङ्निष्पादनहेतवः किं हेतुभिर्वदत्येषा दा गेवाहमिति स्वयं तथापि वाग्भ्राहमेतद्वक्तुमित्थं न युज्यते पिंडः
पृथग्यतः पुंसः पादपाण्यादिलक्षणः ततो हमिति कुत्रैतां संज्ञां राजन् करोम्यहं यद्यन्योस्ति परः कोपि मत्तः पार्थिव
सत्तम तदैषोहमयं चान्यो वक्तुमेवमपीष्यते यदा समस्तदेहेषु पुमानेको व्यवस्थितः तदा हि को भवान् कोहमित्येतदफ
लं वचः त्वं राजा शिबिका चेयमिमे वाहाः पुरः सराः अयं च भवतो लोको न सदेतन्नवोच्यते वृक्षाद्दारु ततश्चेयं शिबिका त्व
दधिष्ठिता किं वृक्षसंज्ञास्यस्या दारुसंज्ञाथवा नृप वृक्षारूढो महाराजो नायं वदति ते जनः न च दारुणि सर्वस्त्वां ब्रवी

Indira Gandhi National
Centre for the Arts

तिशिबिकागतं शिबिकादारुसंघातो रचनास्थितिसंस्थितः अन्विष्यतां नृपश्रेष्ठ तद्भेदे शिबिका त्वया एवं छत्रं श-
॥मोक्ष १०॥ लाकानां पृथग्भावे विमृश्यतां क्व यातं छत्रमित्येष न्यायस्त्वयि तथा मयि पुमान्स्त्री गौरजो वाजी कुंजरो विहगस्त-
॥२१२॥ रुः देहेषु लोकसंज्ञेयं विज्ञेया कर्महेतुषु पुमान्न देवो न नरो न पशुर्न च पादपः शरीराकृतिभेदास्तु भूपते कर्मयोन-
यः वस्तु राजेति यल्लोके यच्च राजभटात्मकं तथान्यच्च नृपेत्थं तत्तन्न सत्संकल्पनामयं यत्तु कालांतरेणापि नान्यां स-
ज्ञामुपैति वै परिणामादिसंभूतं तद्वस्तु नृप तच्च किं त्वं राजा सर्वलोकस्य पितुः पुत्रो रिपो रिपुः पत्न्याः पतिः पिता सू-
नोः किं त्वां भूप वदाम्यहं त्वं किमेवं स्थितः किं तु शिरस्त्वं तथोदरं किमु पादादिकं त्वं वा तवैतत्किं महीपते समस-
तावयवेभ्यस्त्वं पृथग्भूप व्यवस्थितः कोऽहमित्यत्र निपुणं भूत्वा चिंतय पार्थिव एवं व्यवस्थिते तत्त्वे मयाऽहमिति भा-
षितुं पृथक्करणनिष्पाद्यं शक्यते नृपते कथं जाल्मरूपधरः जडवेषधृक् असमीक्ष्यकारीति कल्पतरुः आगमननि-
मित्तं पृच्छति यन्निमित्तमिति किमुद्देशेनागतमिति पृच्छति किमागमनकारणमिति शब्दोऽहमिति दोषायेत्यादि अदमि-
त्येष शब्द आत्मनि दोषाय न भवतीति यदुक्तं तत्तथैव किं त्वहं शब्दादनात्मन्यात्मविज्ञानं तदैक्याध्यासेन चात्मनि श- २१२
ब्दप्रयोगो भ्रांतिलक्षणः स्यात् एतेनाहमिति एते जिह्वादयो नाहमिति अहं शब्दवाच्या न भवंति जिह्वाहमिति प्रयो-
गाभावात् यतश्चैते वाक्यनिष्पादने हेतवः कारणानि न तु कर्तारः ततोऽथैतेनाहं शब्दवाच्या इत्यर्थः महाभारते-

पि चरंतं ब्राह्मणं कंचित्कल्पचित्तमनामयं पप्रच्छ राजा प्रह्लादो बुद्धिमान् बुद्धिमत्तरं स्वस्थः शक्तो मृदुर्दांतो निर्विधित्सो-
नसूयकः सुवाक्कुवेत्तु मनो लोके प्रार्थयसे लाभमतीते नानुशोचसि नित्यतृप्त इव ब्रह्मन् न किंचिदभिमन्यसे स्रोतसा
ह्रियमाणासु प्रजासु विमना इव धर्मकामार्थकार्येषु कूटस्थ इव लक्ष्यसे नानुतिष्ठसि कामार्थौ न धर्मे चानुवर्तसे इंद्रि-
यार्थाननादृत्य मुक्तश्चरसि साक्षिवत् का नु प्रज्ञा श्रुतं वापि वृत्तिर्वा का नु ते मुने क्षिप्रमाचक्ष्व मे ब्रह्मन् श्रेयो यदिह मन्य-
से एवमुक्तः स मेधावी लोकधर्मविधानवित् उवाच श्लक्ष्णया वाचा प्रह्लादमनपार्थया पश्य प्रह्लाद भूतानामुत्पत्तिम-
निमित्ततः कामं बुद्धिविनाशं च न प्रहृष्ये न च व्यथे दिवि संचरमाणानि ह्रस्वानि च महांति च ज्योतींष्यपि यथाकालं पतमा-
नानि लक्षये इति भूतानि संपश्यन्ननु मुक्तानि मृत्युना सर्वं मायामयं विद्वान् कृतकृत्यः सुखं शये सुमहांतमपि ग्रा-
सं ग्रसे लब्धं यदृच्छया शये पुनरभुक्तो दिवसानि बहून्यथ आश्यन्त्यपि मामन्नं पुनर्बहुगुणं बहु पुनरल्पगुणं लो-
के पुनर्नैवोपपद्यते कणान् कदाचित् खादामि पिण्याकमपि च ग्रसे भक्षये शालिमांसानि भक्ष्यांश्चोच्चावचान् बहून् श-
ये कदाचित्पर्यंके भूमावपि पुनः शये प्रासादे वापि शय्या मे कदाचिदुपपद्यते धारयामि च चीराणि शाटीं क्षौमाजिनानि
च महार्हाणि पर्यवासांसि धारयाम्यहं भोजसा न संनियतितं धर्म्यमुपभोगं यदृच्छया प्रत्याचक्षे न चाप्येनमनुरुंधे सुदुर्ल-
भं अस्थिरमलममनिधनं शिवं विशोकं शुचिमतुलं विदुषां मते निविष्टं अननुमतमसेवितं च मूढैर्व्रतमिदमाजगरं शुचिश्च-

Indira Gandhi National
Centre for the Arts

॥मोक्षप०॥ रामि अचलितमतिरच्युतः स्वधर्मात्परिमितसंसरणः परापवर्गः विगतभयकषायलोभमोहं व्रतमिदमाजगरं शु
चिश्चरामि अनियतफलभोज्यमद्य ये यं विधिपरिणामविभक्तदेशकालं हृदयसुखमसेवितं कदर्यैर्व्रतः इदमिदमिति
।२१३। तृष्णया भिभूतं जनमनवाप्तधनं निषीदमानं निपुणमनुनिरूप तत्त्वबुध्या व्रतः बहुविधमनुदृश्य चार्थहेतोः कृपणमि
हार्यमनार्यमाश्रयं तं उपशमरुचिरात्मवान्प्रशांतो व्रतमिदं सुखमसुखमलाभमर्थलाभं रतिमरतिं मरणं च जीवितं च
विधिनियतमवेक्ष्य तत्त्वतोहं व्रतः अपगतभयरागमोहदर्पो धृतिमतिबुद्धि समन्वितः प्रशांतः अपगतफलभोगि
नो निशाम्य व्रत अभिगतमसुखार्थमीहनार्थैरुपगत― धिरवेक्ष्य चात्मसंस्थः तृषितमनियतं मनो नियंतुं व्रतः न
हृदयमनुरुध्यते मनो वा प्रियसुखदुर्लभतामनित्यतां च तदुभयमपि लक्षयन्निवाहं व्रतः बहु कथितमिदं हि बु
द्धिमद्भिः कविभिरपि प्रथयद्भिरात्मकीर्तिं इदमिदमितितत्रतत्रतत्तत्स्वपरमतैर्गहनं प्रतर्कयद्भिः तदिदमनुनिशाम्य
विप्रणीतं प्रथगभिपन्नमहाविधैर्मनुष्यैः अनवसितमनंतदोषपारं नृषु विहरामि विनीतदोषतृष्णः कामं बुद्धि वि
नाशं च पश्यन्नित्यन्वयः एवमहांतमपीत्यारभ्यायन्नसिद्ध यथालाभसंतोषोजगरवृत्तिः इदमेवाजगरव्रतं तदेव २१३
स्वावस्थानिरूपणेन प्रपंचितं अमलमित्यादिना विष्णुपुराणेपि ऋभुनिदाघसंवादे निदाघो ऋभुं परमान्नेन भोज
यित्वा पप्रच्छ अपि ते परमा तृप्तिरुत्पन्ना तुष्टिरेव च अपि ते मानसं स्वस्थमाहारेण कृतं द्विज क्व निवासो भवान्विप्र

क्व च गंतुं समुद्यतः आगम्यते च भवता यतस्तच्च द्विजोच्यते ऋभुरुवाच क्षुद्यस्य तस्य भुक्तेन्ने तृप्तिर्ब्राह्मणजाय
ते न मे क्षुन्नाभवत्तृप्तिः कस्मान्मां परिपृच्छसि वह्निना पार्थिवे धातौ क्षपिते क्षुत्समुद्भवः भवत्यंभसि च क्षीणे नृणां तृडे
पि जायते क्षुत्तृषौ देहधर्मौ स्वं न ममैते यतो द्विज ततः क्षुत्संभवाभावात्तृप्तिरस्त्येव मे सदा मनसः स्वस्थता
तुष्टिश्चित्तधर्माविमौ द्विज चेतसो यस्य तत्पृच्छ पुमानेभिर्न युज्यते क्व निवासस्तवेत्युक्तं क्व गंतासि च यत्त्वया कु
तश्चागम्यते तत्र त्रितयेपि निबोध मे पुमान्सर्वगतो व्यापी आकाशवदयं यतः कुतः कुत्र क्व गंतासीत्येतदप्य
र्थवत्कथं नाहं गंता न चागंता नैकदेशनिकेतनः त्वं चान्ये च न च त्वं त्वं नान्ये नैवाहमप्यहं मिष्टं न मिष्टमप्येषा
जिज्ञासा मे कृता तव किं वक्ष्यसीति तत्रापि श्रूयतां द्विजसत्तम मिष्टमेव यदा मिष्टं तदेवोद्वेगकारकं अमि
ष्टं जायते मिष्टं मिष्टादुद्विजते जनः आदिमध्यावसानेषु किमन्नं रुचिकारकं मृन्मयं हि गृहं यद्वन्मृदालिप्तं स्थि
रं भवेत् पार्थिवोयं तथा देहः पार्थिवैः परमाणुभिः यवगोधूममुद्गादि घृतं तैलं पयो दधि गुडः फलादीनि तथा
पार्थिवाः परमाणवः तदेतद्भवता ज्ञात्वा मिष्टामिष्टविचारि यत् तन्मनः समतालंबि कार्यं साम्यं हि मुक्तये इत्याकर्ण्य
वचस्तस्य परमार्थाश्रितं नृप प्रणिपत्य महाभागो निदाघो वाक्यमब्रवीत् प्रसीद मद्धितार्थाय कथ्यतां यस्त्वमाग
तः नष्टो मोहस्तवाकर्ण्य वचांस्येतानि मे द्विज ऋभुरुवाच ऋभुरस्मि तवाचार्यः प्रज्ञादानाय ते द्विज इहागतो

Indira Gandhi National
Centre for the Arts

॥मोक्ष५०॥ यथा स्वामिपरमार्थस्तवोदितः एवमेकमिदं विद्धि न भेदि सकलं जगत् वासुदेवाभिधेयस्य स्वरूपं परमात्मनः
त्वं चान्ये चेति सर्वे विष्णुस्वरूपा इत्यर्थः न च गमनादिप्रतीतेः परिच्छेद एव प्रतीयत इति वाच्यं यस्त्वं लौकिकः प
॥२१४॥ रिच्छिन्नः प्रतीयसे एष त्वं न भवसि ये चान्ये परिच्छिन्नास्तेऽप्यन्ये पि न भवन्ति ज्ञानमयियादृशास्त्वयादृष्टो न तादृशो
हं मिष्टमेवेत्यादिभिष्टमेवाभि— यामनिष्टं भवति अभिष्टमेव कंडूभवेमिष्टं भवतीति नैयत्यव्यवस्था मार्कंडेयपुरा
णेपि दत्तात्रेय उवाच दुःखापहारमद्यैव करोमि तव पार्थिव सत्यं ब्रूहि किमर्थं ते दुःखं च पृथिवीतले स विमृश्य चि
रं राजा पुनः पुनरुदारधीरात्मानमात्मना वीरः प्रहस्येदमुवाच ह मुवीन सलिलं न ज्योतिरनिलो न च नाका
शं किं तु शारीरं समेत्य सुखमिष्यते तथाच्च ममतात्पक्षे विशेषो नोपलभ्यते मनस्यवस्थितं दुःखं सुखं वा मा
न संचयत् यतस्ततो न मे दुःखं सुखं वा नत्त्यहं मनः नाहंकारो न च मनो बुद्धिर्नाहं यतस्ततः अंतःकरणजं दु
खं पारक्यं मम तत्कथं नाहं शरीरं न मनो यतो हं पृथक् शरीरान्मनस स्तथाहं तत्संक्तचेतस्यथवापि देहे सु
खानि दुःखानि च किं ममात्र यस्य हस्तादिकमथक्रोधमांसं नवास्थीनि शिरादि भागः कस्तस्य नागाश्वनरा २१४
दिकोशैः स्वल्पोपि संबंध इहास्ति पुंसः तस्मान्नमेरिर्न च मेस्ति दुःखं न मे सुखं नापि परं न शोकः न चाश्वना
गान्यवोस्य कथविन्नाम चास्ति परमतत्वोपदेशमुखेन संभाषणं यथा तत्रैव परमार्थस्तनूपालसंदेपाख्यया

तानमम एको व्यापी समः शुद्धो निर्गुणः प्रकृतेः परः जन्मवृद्ध्यादिरहित आत्मा सर्वगतोऽव्ययः परज्ञानमयोसद्भिर्ना
मजात्यादिभिर्विभुः न योगवान्न युक्तोभूत् नैव पार्थिव योक्ष्यते तस्यात्मपरदेहेषु सतोप्येकमयं हि यत् विज्ञानं
परमार्थोसौ द्वैतिनोऽतत्वदर्शिनः वेणुरंध्रविभेदेन भेदः षड्जादिसंज्ञितः अभेदव्यापिनो वायोस्तथा तस्य महात्मनः
एकत्वं रूपभेदश्च बाह्यकर्मप्रवृत्तिजः देवादिभेदे यध्वस्ते नास्त्येवावरणे हि सः एक एव न तु प्रतिदेहं भिन्नः व्यापी सा
क्षितया सर्वव्यापकः सम एकरूपः न तु ज्ञानादिपरिणामैरनेकरूपः शुद्धः कर्तृत्वादिकालुष्यशून्यः सर्वगतः
न तु देहपरिमाणः अव्ययः मध्यमपरिमाणवान् द्वैतिनः द्वैतवादिनः अतएवातत्वदर्शिनः वेणुरंध्रेति अभि
न्नव्यापिनो वायोः यथा वेणुरंध्रोपाधिभेदस्य षड्जादिस्वराभिव्यंजकत्वात् तत्तत्संज्ञितो भेदः तथा तस्य महतोऽपरि
च्छिन्नस्यात्मना एवत एकत्वं भेदोपाधिकस्तु भेद इत्यर्थः सारासारविवेकमुखेन यथा विष्णुपुराणे प्रह्लादचरिते प्रह्ला
दचरिते प्रह्लाद उवाच ममोपदिष्टं गुरुणा सकलं तत्र संशयः गृहीतं च मया किं तु न सदेतन्मतं मम साम दानं च दे
दंडौ तथा परौ उपाया कथिता ह्येते मित्रादीनां च साधने तदहं च न पश्यामि मित्रादीस्तात मा क्रुधः साध्याभावे महाबा
हो साधनैः किं प्रयोजनं सर्वभूतात्मके तात जगन्नाथे जगन्मये परमात्मनि गोविंदे मित्रामित्रकथा कुतः त्वय्य
स्ति भगवान् विष्णुर्मयि चान्यत्र चास्ति सः यतस्ततो यं मित्रं मे शत्रुश्चेति पृथक्कुतः विद्याबुद्धिरविद्यायामज्ञानात्तात

Indira Gandhi National
Centre for the Arts

॥गी०टी०॥ जायते बालोग्निं किंन खद्योतमसुरेश्वरमन्यते तत्कर्मयन्नबंधाय साविद्या या विमुक्तये आयासायपरंकर्मविद्या
न्याशिल्पनैपुणं तदेतदवगम्याहमसारं साध्यमुत्तमं निःशमयमहाभागप्रणिपत्यब्रवीमि तत् नचिंतयतिकोराज्यं
॥२१५॥ कोधनं नाभिवांछति तथापिभाव्यमेवैतदुभयंप्राप्यतेनरैः सर्वएवमहाबाहोमहत्त्वंप्रतिसोद्यमः तथापिपूसां भागपा
निनोद्यमा भूतिहेतवः जनानामविवेकानामशृण्वानामपि स्फुटो नागफणीज्याणिज्यानिसंत्यानीतिमतामपितस्मा
द्यतेतधर्मार्थपदीच्छेन्महतीश्रियं यतितव्यं समत्वेचनिर्वाणमपिचेच्छता देवामनुष्याः पशवः पक्षिद्रुमसरीसृपाः
रूपमेतदनंतस्यविष्णोर्भिन्नमिवस्थितं एतद्विजानतासर्वंजगत्स्थावरजंगमं द्रष्टव्यमात्मवद्विष्णुर्यतोयंवि
श्वरूपधृक् एवंज्ञातेसभगवाननादिः परमेश्वरः प्रसीदतितत उपसंल्लेक्लेशासंक्षयः नसंदेतदितिएतन्नसारा
मित्यर्थः उपप्रदानंदानं त्वय्यस्तिभगवानितिसर्वेणहरिरूपेणपश्यतोममशात्रुमित्रादिभेदाभावात्साम्यमुपधाना
मसारत्वमित्यर्थः विद्याबुद्धीतिसाम्यमुपायप्रतिपादकनीतिशास्त्रादिविद्यात्मकेपुविद्याबुद्धिसाम्यमित्यर्थः
तत्रदृष्टांतोबालोग्निमिति अग्निंखद्योतंकिंनबुध्यत इतिसंबंधेप्रकृतासंबंधः स्यात् तस्माद्बालः खद्योतमग्निं २१५
किंनमन्यतइतिसंबंधः तथापिपूंसामिति भाग्यैकलभ्याभूतिरयत्नलभ्येतिसिद्धेयतितव्यंसमत्वेचेतिसारां
तेनप्रसन्नभगवत्प्रसादात्सकलक्लेशापहरणमित्यर्थः तदुक्तंएवंज्ञातेसभगवानित्यादिना एवंज्ञानिनः

समाधिस्थस्यलक्षणमुक्तं व्युत्थितचित्तस्यसंभाषणंचोक्तं तस्यैवकिंमासीतेतिपृष्टेभगवतोक्तं तानिसर्वाणिसंयम्य
युक्तआसीतमत्परः वशेहियस्येंद्रियाणितस्यप्रज्ञाप्रतिष्ठिता तस्यैवकिंव्रजेतेतिपृष्टेभगवतोक्तं रागद्वेषवि
युक्तैस्तुविषयानिंद्रियैश्चरन् आत्मवश्यैर्विधेयात्माप्रसादमधिगच्छति एवंचरन्प्रसादं चित्तस्वच्छतांमेकाग्र
भूमिमधिगच्छति तदयमुक्तार्थसंग्रहः जातब्रह्मसाक्षात्कारोज्ञानीत्युच्यते तस्यचावरणशक्तिनाशेपिविक्षेपश
क्त्यारागादिसंभवः अप्रतिबद्धापरोक्षसाक्षात्कारवान्जीवन्मुक्तः तस्यचयावत्प्रारब्धकर्मभोगं ईश्वरप्रेरितप्र
रूपांतरदत्ताहारादिनाशरीरावस्थानं सचद्विविधःसदासमाधिस्थः व्युत्थितचित्तश्च सोपिद्विविधः एकः स्व
प्रयत्नात्षष्ठींभूमिकामारूढः स्वतएवव्युत्थितचित्तः अपरस्तुगाढसुषुप्त्याख्यांसप्तमींभूमिकामारूढः परतोव्यु
त्थितचित्तः तस्यचेतरैः सहसंभाषणादिव्यवहारः यथा योगंज्ञानोपदेशाध्यात्मवार्त्तादि सदासमाधिस्थश्चविदेह
देहाख्यांसप्तमींभूमिकामारूढो व्युत्थानसामान्याभावात् इयंचावस्थामनोनाशवासनाक्षयज्ञानसाध्याप्रयोज
नंचसंशयानज्ञानरक्षातः याचसमाधिधारापावद्देहपातमितिसंक्षेपः इतिजीवन्मुक्तिः अथयोगिनोपिसावधान
तयाब्रह्मण्येवचित्तवृत्तिधारासंपादयितुमुचिता अन्यथोपसर्गैरभिभूयतइति उपसर्गाश्चवर्ण्यंते तत्रमार्कंडेयपु
राणे उपसर्गाः प्रवर्तंतेदृष्टेह्यात्मनियोगिनः येतांस्तेसंप्रवक्ष्यामिसमासेननिबोधमेकाम्याक्रियास्तथाकामान्मानु

Indira Gandhi National
Centre for the Arts

॥मो०द०प०॥ ध्यानमिवांछति स्त्रियो दारफलं विद्या माया: कुप्यं धनं दिवं देवत्वामरत्वं रसायनवयः क्रियाः मरुत्प्रपतनं यज्ञाकु-
॥२१६॥ ल्याम्यावपनं तथा श्राद्धानाशकदानानां फलानि नियमांस्तथा ततोपरमात्मपूजां देवते जप्याधनानि चते त्यस्ते त्य
स्वकर्मत्यक्तप्रसृष्टो निकं छति चित्तमित्थं प्रवर्त्ततं योनयो गी निवर्त्तयेत ब्रह्मसंगिमनः कुर्वन्नुपसर्गात्प्रमुच्यते काम्याः
क्रियाः फलार्थत्वेन विहिता यज्ञादयः मानुषाः कामाः मनुष्यशरीरजोगणाः सत्वादयइति तु कल्पतरुः दारफलं पुत्रा
दिकं विद्या आध्यात्मिकातिरिक्ताः योगिनः अध्यात्मकथारतेर्विहितत्वात् माया इंद्रजालादि कुप्यं हेमरूप्यव्यतिरिक्तं
कांस्यादि दिवं स्वर्गं अमरेशत्वं इंद्रत्वं रसायनं धातुवादः वयः तारुण्यं क्रियाः तदनुरूपाः चेष्टाः मरुत्प्रपतनं मरु
द्गमनं कुल्याम्याभ्यावपनं कुल्या नदी अग्निश्चैतयोरावपनं स्तंभनं अनाशकं अनशनं अपरमात्मपूजां अर्वाग्देवतापू
जां अन्यान्यथोपसर्गानाह देवलः अनिष्टाभिनवो निद्रा बाधा मयानकोत्पत्तिर्ज्ञानपीडा जोगातिशयः कोपनैपुण्यमै
श्वर्यविशेषो धर्मा महत्वविद्यास्थानानि यशोदीप्तिरिति योगिनां दशोपसर्गाः अनिष्टाभिनवः अनिष्टेन दुःखेनाभि
भिनवो विकल्पं ज्ञानपीडा स्मृत्यादिभ्रंशः एतेषूपसर्गेषु जितेष्वजितेष्वपि अन्ये उपसर्गाः प्रादुर्भवंतीत्युक्तं मार्कंडेयपु २१६
राणे उपसर्गैर्जितैरेभिरुपसर्गास्ततः पुनः योगिनः संप्रवर्त्तंते सात्वराजसतामसाः प्रातिभः श्रावणो दैवो भ्रमाव
र्त्तौ तथापरौ पंचैते योगिनो योगविघ्नाय कटुकोदयाः सात्वः सात्विकः प्रातिभादीनां लक्षणान्युक्तानि तत्रैव वे

दांतशास्त्रकाव्यादिविद्याः शिल्पान्यनेकशः प्रतिभांतीति यदस्येति प्रातिभः स तु योगिनः शब्दार्थानखिलान्वेत्ति श्रा
व्यं गृह्णाति चैव यत् योजनानां सहस्रेभ्यः श्रावणः सोभिधीयते अष्टौ यदा तु दृश्यंते समंताद्देवयोनयः उपसर्गं तमथा
हुर्दैवमुन्मत्तवद्योनयः भ्राम्यते यन्निरालंबं मनोदोषेण योगिनः समस्ताचारविभ्रंशात् भ्रमः स परिकीर्त्तितः आवर्त्त इव
तोयस्य ज्ञानावर्त्तो यथाकुलः चित्तनाशक आवर्त्त उपसर्गः स उच्यते एतैर्नाशितयोगास्तु सकला देवयोनयः उपस
र्गैर्महाघोरैरावर्त्तंते पुनः पुनः उपसर्गनिराकरणोपाय उक्तो वायुपुराणे विदित्वा सप्त सूक्ष्माणि षडंगं च महेश्वरं प्र
धानविनियोगज्ञः परं ब्रह्माधिगच्छति ईश्वरषडंगान्युक्तानि तत्रैव सर्वज्ञता तृप्तिरनादिबोधः स्वतंत्रता नित्यमलुप्त
शक्तिः अनंतशक्तिश्च विभोर्विधिज्ञाः षडाहुरंगानि महेश्वरस्य नित्यं ब्रह्मपरो युक्त उपसर्गैः प्रमुच्यते मार्कंडेयपु
राणेपि प्राहत्यकं बलं सूक्ष्मं योगी तस्मान्मनोमयः चिंतयेत्परमं ब्रह्म कृत्वा तत्प्रवणं मनः योगयुक्तः सदा योगी
लघ्वाहारो जितेंद्रियः मनोमयः मनःप्रधानः सप्तधारणाप्रकारस्याप्युपसर्गनिराकरणहेतुत्वमुक्तं तत्रैव सूक्ष्मास्तु
धारणाः सप्त भूराद्या मूर्ध्नि धारयेत् धरित्रीं धारयन्योगी तत्सूक्ष्मं प्रतिपद्यते आत्मानं मन्यते चोर्वीं तद्गंधं च जहाति
तथैवाप्सु रसं सूक्ष्मं तद्वद्रूपं च तेजसि स्पर्शं वायौ तथा तद्वद्बिभ्रतस्तस्य धारणां व्योम्नः सूक्ष्मं प्रवृत्तं च शब्दं तद्वज्जहा
ति च मनसा सर्वभूतानां मन आविशते यदा मानसीं धारणां बिभ्रन्मनसो सूक्ष्मं जहाति च एतद्बुद्धिमशेषाणां सत्वाना

[Indira Gand]hi National Centre for the Arts

॥मोक्षध०॥ मेत्य योगवित् परित्यजति संज्ञायबुद्धिसौक्ष्म्यमनुत्तमं परित्यजति सूक्ष्माणि सत्वान्येतानि योगवित् सम्यक् विज्ञा
य येोलर्कतस्यावृत्तिर्न विद्यते एतासां धारणानां तु सप्तानां सौक्ष्म्यमाप्तवान् दृष्ट्वा दृष्ट्वा ततः सिद्धिं त्यक्त्वा त्यक्त्वा परां
॥२१७॥ व्रजेत यस्मिन्यस्मिंश्च कुरुते भूतेरागं महीपते तस्मिंस्तस्मिन्समासक्तिं संप्राप्य स विनश्यति तस्माद्भित्त्वा सू
क्ष्माणि संसक्तानि परंपरं परित्यजति यो योगी स परं प्राप्नुयात्पदं एतान्येव तु बंधाय सप्त सूक्ष्माणि पार्थिव भूतादी
नां विरागो ऽतज्ज्ञावस्य विमुक्तये गंधादिषु समासक्तमित्येतदखिलं जगत् पुनरावृत्तये भूयस ब्रह्मण्यरमानुषं
सप्तैव धारणा योगी समेत्य यदि गच्छति तस्मिंस्तस्मिन्भूलयं सूक्ष्मे याति भूतेन रेश्वर देवानामसुराणां च गंधर्वो
रगरक्षसां देहेषु लयमायाति संगं नाप्नोति च क्वचित् आत्मानमिति आत्मानमुर्वीमन्यमानो भावयन् तया धार
णया गंधतत्त्वं जहाति तथैवाप्सु भावयन् रसतत्त्वं जहाति एवमुत्तरत्र मनः सौक्ष्म्यं संकल्पविकल्पात्मकं बुद्धि
सौक्ष्म्यमध्यवासयरूपं एतान्येवेति एतेषां सप्तसूक्ष्माणां रागविषयत्वेन बंधकत्वं ततो वैराग्ये मुक्तिरिति भावः
तदेवोक्तं गंधादिष्विति अथ योगविभूतय तत्र याज्ञवल्क्यः अंतर्द्धानं स्मृतिः कांतिः दृष्टिः श्रोत्रज्ञता तथा नि २१९
जं शरीरमुत्सृज्य परकायप्रवेशनं अर्थानां छंदतः सृष्टिर्योगसिद्धेस्तु लक्षणं सिद्धे योगे त्यजन्देहममृतत्वाय
कल्पते अणिमप्राप्त्या परैरदृश्यत्वमंतर्धानं स्मृतिरतींद्रियेष्वर्थेषु स्मरणं कांतिः कमनीयता दृष्टिरतीता

नागतेष्वर्थेषु श्रोत्रज्ञता ऽतिदूरदेशे निष्पद्यमानानां श्रोत्रपथमनागतानां ज्ञातृता अर्थानां छंदतः सृष्टिः स्व
वांछावशेनार्थानां करणनिरपेक्षतया सृष्टिः एतद्योगसृष्टेलक्षणं न चैतावदेव प्रयो नं किंतु सिद्धे योगे देहं त्यजन्
अमृतत्वाय मोक्षाय कल्पते अष्टावैश्वर्याणि योगजन्यानीत्युक्तं देवलेन अणिमा महिमा लघिमा प्राप्तिः प्राका
म्यमीशित्वं वशित्वं यत्र कामावसायित्वं चाष्टावैश्वर्यगुणाः तेषामणिममहिमलघिमानस्त्रयः शारीराः प्राप्त्यादयः
पंचैंद्रियाः तत्राणुशरीरत्वमणिमा अणुभावात्सूक्ष्माण्यपि विशति शरीरमहत्त्वं महिमा महत्त्वात्सर्वं शरीरा
ण्यावृणोति शरीराशुगामित्वं लघिमा तेनातिदूरस्थानपि क्षणेनासादयति विश्वविषयावाप्तिः प्राप्तिः प्राप्त्या
सर्वप्रत्यक्षदर्शी भवति यथेष्टचारित्वं प्राकाम्यं प्राकाम्येन सर्वभोगवशानाप्नोति अप्रतिहतैश्वर्यमीशित्वं मीशि
त्वमीशित्वेन देवतान्यप्यतिशेते आत्मवश्यतावशित्वं वशित्वेनापरिमितायुर्वश्यजन्मतौ भवति यत्रकामाव
सायित्वं त्रिविधं छायावेशः अवध्यानावेशः अंगप्रवेश इति परस्य छायाप्रवेशमात्रेण तं वशीकरोति स छायावे
शः यद्दूरस्थानामप्यनुध्यानेन चित्ताधिष्ठानं सोवध्यानावेशः पत्सजीवस्योज्झितजीवस्य वा शरीरानुप्रवेशानं सों
गप्रवेशः यत्रकामावसायित्वेन भूतेंद्रियं स्वंचाधितिष्ठतीति एश्वर्यावस्थानं तत्र च प्रकृतिषु रूपेस्वरहेतोर्द्दमते जोङ्गा
न विशेषात् सातिशयं नवभूतं चैश्वर्यं जिवतीति एवमेतानैश्वर्यगुणान् योगिमपोद्धूत कल्पपद्धिलसंशयः प्रत्य

Indira Gandhi National Centre for the Arts

॥मोक्षध०॥

॥२१८॥

ह्लादन्नाधिर्मपरावरज्ञः कूटस्थः सर्वमिदमसदनित्यंज्ञात्वास्वयमेवशांतिमधिगच्छतीत्यैश्वर्यावाप्तिः तेषामितिपू
पूर्वोक्तानामैश्वर्याणांशारीरेंद्रियकत्वेनविभागउक्तः तत्राणुशारीरत्वमित्यारभ्यसोगव्वेन्नाइत्यंतेनाष्टानामपि
लक्षणान्युक्तानि प्रकृतिपुरुषोत्तरहेतोरिति ईश्वरत्वेनहिप्रकृतिपुरुषनियामकत्वंभवतितेनैवहेतुनाधर्मति
जोज्ञानविशेषाउत्पद्यंते तेनैवसातिशयोभवतीतिसमुदायार्थः मार्कंडेयकूर्मवायुपुराणेपि योगिनांतुवेशे
षेणऐश्वर्येष्टलक्षणे अणिमाद्येतिविज्ञेयातस्माद्युंजीततंद्विजः एवंहियोगीसंयुक्तः शुचिर्दांतोजितेंद्रि
यंआत्मानंविंदतेयस्तुससर्वंविंदतेद्विजः ऋचोयजूंषिसामानिवेदोपनिषदस्तथा योगज्ञानादवाप्नोतिब्रा
ह्मणोध्यानवितकः सर्वभूतलयोभूत्वाअभूतः सतुजायते योगिसंक्रमणंकृत्वायातिवैशाश्वतंपदंध्यान
वितर्कइतिध्यानेनचित्तवृत्तिनिरोधेनवितर्कयतिसतथा सर्वभूतलयः सर्वेषुपृथिव्यादिभूतेषुलयोयस्य
अभूतः भूतैरसंस्पृष्टः इदमेवसंक्रमणंयोगिनः योगबलात्कायव्यूहउक्तोमहाभारते विशंतिपरमोग्रा
र्थयोगायोगबलान्विताः प्रजायतीनृषीन्देवान्महाभूतानिचेश्वराः नयमोनांतकः क्रुद्धोनमृत्युर्भीम २१८
विक्रमः ईशातेनृपतेसर्वेयोगस्यामिततेजसः आत्मनांचसहस्राणिबहूनिभरतर्षभयोगः कुर्याद्बलंप्राप्यतै
श्चसर्वैर्महीचरेत्वा प्राप्नुयाद्विषयान्कैश्चित्कैश्चिदुग्रंतपश्चरेत् संक्षिपेच्चपुनस्तानिसूर्यस्तेजोगणानि

व योगबलस्यावश्यकत्वमुक्तंब्रह्मपुराणे यथाचानिमिषाःस्थूलंजालंछित्वापुनर्जलं प्राप्नुवंतितथायोगास्त
त्पदवीतकल्मषाः तथैववागुरांछित्वाबलवंतोयथामृगाः प्राप्नुयुर्विपुलंमार्गंविमुक्ताः सर्वबंधनैः उपयांति
तथाविधाबंधनानिबलान्विताः छित्वायोगपरंमार्गंगच्छंतिविमलंशुभं तथा यथाचशाकुनाः सूक्ष्माप्राप्यजा
लमरिंदमाः तत्रासक्ताविपद्यंतेमुच्यंतेचबलान्विताः छित्वायोगाद्बंधनानितद्वद्योगाः परिद्विजाः अबलावैविनश्यं
तिविमुच्यंतेबलान्विताः महाभारतेपि अल्पकश्चयथाराजन्वह्निः शाम्यतिदुर्बलः आक्रांतइंधनैःस्थूलैस्तद्वद्यो
गबलःप्रभोः सएवचयथाराजन्वह्निर्जातबलः पुनःसमीरणयुतः कृत्स्नांदहेत्क्षिप्रंमहीमिमां तद्वज्जातबलो
योगीतीप्ततेजामहाबलः अंतकालइवादित्यः कृत्स्नंसंशोषयेज्जगत् दुर्बलश्चयथाराजन्स्रोतसाह्रीयतेन
रः बलहीनस्तथायोगीविषयैःह्रीयतेवशः तदेवतुयथास्रोतोविष्टंभयतिवारणः तद्वद्योगबलंलब्ध्वाव्यूह
तेविषयानबहून् बलंचोक्तंब्रह्मपुराणे कणानांभक्षणेयुक्तः पिण्याकस्यचभोद्विजाः स्नेहानांवर्जनेयुक्तोयो
गीबलमवाप्नुयात् कामंतीर्त्वातथाक्रोधंशीतोष्णंवर्षमेवच भयंशोकंतथायासंबोरुषान्विषयास्तथा अरतीन्
दुर्जयांश्चैवघोरान्जित्वाचभोद्विजाः स्पर्शंसंनिद्रांभयंतद्वाद्दुर्जयांमुनिसत्तमाः दीपयंतिमहात्मानंसूक्ष्ममात्मा
नमात्मना तथायोगदोषान्समुच्छिद्यपंचयानकवयोविदुः कामंक्रोधंचलोभंचभयंस्वप्नंचपंचमं परित्यज्य

Indira Gandhi National
Centre for the Arts

॥मोक्ष प॰॥ निषेवेत यावद्योगस्य साधनं ध्यानमध्ययनं दानं तत्तन्नीराजदंक्षमा शौचमाचरतः इन्द्रियाणां च संयमान्
णतेर्विवर्द्धते तेजः पाप्मानमुपहंति च स्नेहानां तैलघृतीदानां अरातीनेवाह स्वासेत्यादिनादीपयंति पुकान्नायं
॥२१८॥ ति सूक्ष्मं दुर्ज्ञेयं आत्मानं जीवात्मानं अथ ज्ञानिनो युक्तचित्तस्य योगिनरे नागेन त्वितरेक्षपयित्वाथ संप
श्यत इति न्यायेन प्रारब्धो गार्थं शरीरं धारयमाणस्य दृष्टारिष्टो यतिश्रेष्ठो योगी ध्यानपरो भवेदिति देवलेनादि
ष्टे संनिहितं मृत्युं ज्ञात्वा ध्यानपरतायाविधानान्मृत्युसंन्निधानज्ञानार्थमरिष्टान्युच्यंते तत्रारिष्टानि द्विविधा
नि जाग्रद्दरिष्टानि स्वप्नारिष्टानि च तत्रायुःपरिमाणबोधकारिष्टान्युच्यंते मार्कंडेयपुराणे अरिष्टानि महारा
ज शृणु वक्ष्यामि तानि ते येषामालोकनान्मृत्युं निजं जानाति योगवित् देवमार्गं ध्रुवं शुक्रं सोमच्छायामरुंधतीं
यो न पश्येन्न जीवेत्स नरः संवत्सरात्परं देवमार्गमाकाशगंगेति प्रसिद्धः सोमच्छायां चंद्रकलंकं देवलः अरुं
धतीं ध्रुवं सोमच्छायां चैव महापथं यो न पश्येन्न जीवेत्स द्विजः संवत्सरात्परं ब्रह्मपुराणे सत्ये दिये वास्तमर्ये नि
त्रायां चंद्रछायामथवादायत स्त आत्मछायां वा कुदंडोपसार्य दृष्ट्वा कबंधं प्रजहाति देहं अरुंधतीं न पश्यंति ।२१८।
दृष्टपूर्वां कृशर्थचन तथैव ध्रुवमित्याहु पूर्णेदुं दीपमेव च खंडपादं दक्षिणतस्ते हि संवत्सरायुषः परचक्षुषि चा
त्मानं येन पश्यंति पार्थिव आत्मछाया कृतिं चैव ते पि संवत्सरायुषः देहमिति संवत्सर इति शेषः अग्रे संवत्स

रायुष्ट्वस्यैवाभिधानात् देवलः अरश्मिवंतमादित्यं रश्मिवंतं च पावकं यो न पश्येन्न जीवेत्स मासादेकादशात्परं न
जीवेत्स इति काकाक्ष्या रवेरग्रं तथा च यो न पश्येत्स जीवेदेव पश्यति चेन्न जीवतीत्यर्थः अयमर्थ उक्तो मार्कंडेय
पुराणे अरश्मिवंतं सूर्यं च वह्निं वांशुमालिनं दृष्ट्वैकादशमासांस्तु नरो नोर्ध्वं स जीवति देवलः रुक्मत्राणरवान
डु माहृष्ट्वा गंधर्वनगराणि च पश्येत्प्रेतान् पिशाचांश्च दशमासान् स जीवति वमेन्मूत्रं पुरीषं वा सुवर्णरजतधने श
त्पन्नं यदि वा स्वप्ने नव मासान् स जीवति युक्तं मार्कंडेयपुराणे वमेत्पुरीषं मूत्रं वा सुवर्णं रजतं तथा प्रत्यक्षमथा
वा स्वप्ने जीवितं दशमासिकं दृष्ट्वा प्रेतपिशाचादीन् गंधर्वनगराणि च सुवर्णवर्णान् वृक्षांश्च नवमासान् स जीव
ति इति वैपरीत्येनाभिधानं तद्विकल्पाभिप्रायेण स्थूलः कृशः स्थूलो यो कस्मादभिजायते प्रकृतेश्च निवर्त्तेतत
स्यायुश्चाष्टमासिकं खंडं वस्य पदं पार्ष्ण्यां पादस्याग्रे तथा भवेत् पांसुकर्दमयोर्मध्ये सप्तमासान् स जीवति कपोत
गृध्रकाकोला वायसो वापि मूर्द्धनि क्रव्यादो वा खगो लीनः षण्मासायुःप्रदर्शकः ब्रह्मपुराणे अतिद्युतिरतिप्रज्ञा अ
प्रज्ञा चाद्युतिस्तथा प्रकृतेर्विक्रियापत्तिः षण्मासान्मृत्युलक्षणं दैवतान्यवजानाति ब्राह्मणैश्च विरुध्यते कृष्णा
न्नात्वा च षण्मासान्मृत्युलक्षणं कृष्णं वर्णतः श्यामच्छवि छायं नीलवर्णं छायापुरुषं यः पश्यति यद्वा कृष्णां पूर्व
मन्यथाभूतस्य देहस्य काष्णीं छायायाः प्रतिबिंबस्य श्यामच्छवित्वं यः पश्यति देवलः मर्दितो वाप्युवर्षेण पांशु

Indira Gandhi National Centre for the Arts

॥मोक्षपर्व॥ वर्षेण वा पुनः छायां वा विकृतां पश्येत् पंचमासान्स जीवति अमोघां विद्युतं पश्येत् दक्षिणां दिशमाश्रितां मासान्स च
तुरो जीवेद्योगीत्यत्र न संशयः मार्कंडेयपुराणे तु अनभ्रे विद्युतं दृष्ट्वा दक्षिणां दिशमाश्रितां उदके इन्द्रधनुर्वापि जीवि
॥२२७॥ तं द्वित्रिमासिकमिति तद्देवलोक्तचतुर्मासायुष्टेन विकल्पार्थं देवलः जले चेन्द्रधनुर्वापि यदि पश्येन्न रोहिणीं मासद्वये
न दृश्यते नास्ति तत्र विचारणा अथवा यदि वादर्शे छायां पश्यति नात्मनः छायां वा विकृतां पश्येन्मासमेकं स जी
वति मार्कंडेयपुराणे घृते तैले तथादर्शे तोये वाप्यात्मनस्तनुं यः पश्येदशिरस्कां स मासादूर्ध्वं न जीवति यस्य वस्ति
समो गंधो गात्रे शावसमोपि वा तस्यार्द्धमासिकं ज्ञेयं योगिनो नृप जीवितं देवलः यस्य वै स्नातमात्रस्य उरःपादौ च
शुष्यतः मस्तके वा न वेद्धूमोर्द्धमासं स जीवति मार्कंडेयपुराणे यस्य वै स्नातमात्रस्य हृत्पादमवशुष्यति पिवतश्च
जलं शोषो थेद्दशाहं सोपि जीवति ब्रह्मपुराणे शीर्णनाभिर्यथाचक्रं छिद्रं सोमप्रपश्यति तथैव च सहस्रांशोः सप्तरा
त्रेण मृत्युना क्व देवतायतनस्य षड्रात्रेण स मृत्युना कृच्छ्रिद्रं छिद्रवंतं वा वायुपुराणे यस्य कृष्णा खरा जिह्वा पद्मा
भासं च वै मुखं गंडयोः पिटके रक्ते तस्य मृत्युरुपस्थितः चतुरहेणेति शेषः अत एव देवलः यस्य कृष्णोकरा जिह्वा ।२२७।
पद्माभासं च वै मुखं गंडे च पिटिका रक्ताः स जीवेच्चतुरो दिनान् मार्कंडेयपुराणे संभिन्नो मारुतो यस्य मर्मस्था
नानि कृंतति न हृष्यत्यंबुसंस्पर्शात्तस्य मृत्युरुपस्थितः अहेणेति शेषः मारुतो यस्य गात्रेषु परं मर्माणि कृंतति।

जीवेत्त्र्यहं कविधः सन् संदेहस्तथा न वेदिति देवलेन त्र्यहं जीवनाभिधानात् न हृष्यत्यंबुसंस्पर्शादित्यत्र तत्र
होद्दयोनेति शेषः अग्निस्पृष्टो न तप्येत सोहनीत्वेव जीवतीति तेनैवाहोद्दयोक्तेः घोरं न शृणुयात्कर्णे ज्योतिर्नेत्रेन
पश्यति सद्यो जीवः सर्वे विध्नः जपकर्माणि कारयेत ब्रह्मपुराणे कर्णनासाविचलनं दंतदृष्टिविरागिता संज्ञा
लोपो निरूद्धत्वं सद्यो मृत्युनिदर्शनं अकस्माच्च स्फुरेद्यस्य वामभागेन राधिप मूर्द्धाश्चोत्पद्यते धूमः स यो मृत्युनिदर्श
नं वकारो वामाक्षिस्फुरणसमुच्चयार्थः केवलस्य मूर्द्धि धूमोद्गमस्य मासार्द्धजीवनहेतुत्वस्योक्तत्वात् कर्णना
साविचलनमिति कर्णयोर्नासिकायाश्च वक्रीभावः नेत्रमेकं स्रवेद्यस्य कर्णौ नासा च शीर्यते नासा च वक्रा भवति स
द्यो गतजीवित इति वायुपुराणवचनात् वायुपुराणे सूर्योदये प्रत्युषसि प्रत्यक्षं यस्य वै शिवा क्रोशंत्यभिमुखा
स्थिति स गतायुर्नचिरः यस्य वै शुक्लमात्रस्य हृदयं वाधति क्षुधा जायते दंतघर्षश्च तं गतायुषमादिशेत् भूयो भूय
स्वसेद्यस्तु रात्रौ वा यदि वा दिवा दीपगंधं च नावैति विद्यान्मृत्युमुपस्थितं रात्रौ चित्रं बरं पश्येद्दिवा नक्षत्रमंडलं परने
त्रेषु चात्मानं न पश्येन्न स जीवति चित्रांबरं इंद्रायुधं शाकपुंजं वा इंद्रादिदिवाग्रहगणं तथा दृष्ट्वा मन्येत संक्षीणमात्म
जीवितमात्मवानिति मार्कंडेयपुराणे तत्रैव आरक्ततामेति मुखं जिह्वा चास्य सिता यदा तदा प्राज्ञो विजानीयात्
मृत्युमासन्नमात्मनः स्वप्नस्वप्नमलंकारकंपप्रस्पृष्टथासितं यः पुमान्मृत्युमासन्नं तस्यापि द्विविनिर्दिशेत् स्वा

Indira Gandhi National Centre for the Arts

॥मो०त्व१०॥ नावैपरीत्यंतुप्रकृतेश्चविपर्ययः कथयंतिमनुष्याणांसद्यासन्नौयमांतकौ येषांविनीतः सततंयेस्यपूज्यतमा
मताः तानेवचावजानातितानेवचविनिंदति देवान्नार्चयतेवृद्धान्गुरूनायश्चविनिंदति मातापित्रोरसत्कारंजा
२२१ मातृणांकरोतिच योगिनांज्ञानविदुषामन्येषांचमहात्मनां प्राप्तेतरालेपुरुषस्तद्विज्ञेयंविचक्षणैः अथस्वप्ना
रिष्टानि देवलः शवगंधंनवेनाच्चंदंतसादोपियस्यच दृष्ट्वात्मानंमृतंस्वप्नेद्वादशाहंसजीवति वायुपुराणे ना
स्मांगारांश्चकेशांश्चनदींशुष्कांभुजंगमान् यत्रपश्येद्दशरात्रंतुनचजीवतितादृशः कृष्णवर्णनरयुक्तेनरथे
नाशांतदक्षिणांगायन्नथव्रजेत्स्वप्नेविद्यान्मृत्युमुपस्थितं कृष्णांबरधरात्रपामागायंतीवाथयांगनायंनये
द्दक्षिणमाशांस्वप्नेसोपिनजीवति वाशब्दोहासमुच्चयार्थः रक्तकृष्णांबरधरागायंतीहसतीचयं दक्षिणाशां
नयेन्नारीस्वप्नेसोपिनजीवतीतिमार्कंडेयपुराणात् वायुपुराणेछिद्रंवासश्चकृष्णंचस्वप्नेयोबिभृयान्नर ना
ग्नंवाश्रवणंदृष्ट्वाविद्यान्मृत्युमुपस्थितं छिद्रंसच्छिद्रं श्रवणः क्षपणकः सचहसमानः नग्नंक्षपणकंस्वप्नेहा
समानंचपश्यति एनंचवीक्ष्यवल्गंतंविद्यान्मृत्युमुपस्थितमितिमार्कंडेयपुराणात् तत्रैवआमस्तकतलाद्य २२१
स्तुनिमग्नः पंकसागरे स्वप्नेपश्येत्तथात्मानंनरः सद्योम्रियेतसः करालैर्विकटैःकृष्णैःपुरुषैरुद्यतायुधैः पाषा
णैस्ताडितः स्वप्नेसद्योमृत्युर्न्नविन्नरः पततीयस्यवैगर्तेस्वप्नेद्वारंपिधीयते नचोत्तिष्ठतिवैश्वभ्रात्तदंतंतस्य

जीवितं यश्चाग्निप्रशम्यतेनूतैर्वृष्टैरात्राथवादिवा समस्तुंसप्तरात्रांतः प्रमानाप्नोत्यसंशयं एवंयोगिनाप्रारब्धा
नोगच्छायपर्यंतंशरीरपातप्रतीक्षायाः कर्त्तव्यत्वात् शरीरपातावधिसूचकारिष्टानिविलोक्यानीत्युक्तंमार्कंडेयेयो
गिनासततंयत्नादरिष्टान्यवनीपते संवत्सरांतस्तद्दिनफलदानिदिवानिशि विलोक्यानिसदाचैवफलपंक्तिषु
नीरूपणं विज्ञायकार्योमनसिसचकालोनरेश्वर ज्ञात्वाकालंचाथसम्यगभयंस्थानमाश्रितः युंजीतयोगीका
लोसौयथातस्याफलोभवेत् दृष्ट्वारिष्टंतथायोगीत्यक्त्वामरणजंभयंतत्स्वभावंतदालोक्यकालेयावत्त्वपागतं
मत्युसंनिधानज्ञानोत्तरंकर्त्तव्यमुक्तंतत्रैवतस्यभागेतथैवाह्नोयोगंयुंजीतयोगवित् पूर्वाह्नेचापराह्नेवामध्या
ह्नेवादिनेदिनेदिने यत्रवारजनीभागेतदरिष्टंनिरीक्षितं तत्रैवतावद्युंजीतयावत्प्राप्तंहितद्दिनं ततस्त्यक्त्वाभयं
सर्वंजित्वातंकालमात्मवान् तत्रैववासनेस्थित्वायत्रवास्थैर्यमात्मनः युंजीतयोगीनिर्जित्यत्रीन्गुणान्परमा
त्मनः तन्मयश्चात्मनोभूत्वाचिद्वृत्तिमपिसंत्यजेत् ततः परमनिर्वाणमतींद्रियमगोचरं यद्बुद्धेर्यन्नचाख्यातुंशक्यते
तत्समश्नुते तत्रैवेत्यादि धारणाध्यासपरंपराइत्यंतरनिरोधेनत्रीन्गुणान् समतीत्ययोगंतदाकारामेववृत्तिसंत
तिंयुंजीतकुर्वीतद्दममेवसंप्रज्ञातधारा ततश्चिद्वृत्तिमपिसंत्यजेदित्यसंप्रज्ञातसमाधिः तदैवस्वेष्टकालेसमाहि
तश्चेन्मृत्युस्तदाचद्ब्रह्माणप्राणोत्क्रमणप्रकारेणकलेवरंविलयवद्भ्रसंपद्यते यदिचप्रागपनेतत्तरांकाष्ठांसूर्ये

Indira Gandhi National
Centre for the Arts

॥मोक्षखण्डे॥ योनिधनंब्रजेत नक्षत्रेच मुहूर्ते च पुण्ये राजन् सपुण्यभागिति ब्रह्मपुराणीयवाक्यात ततत्वविदोपिनीव्यस्योत्तरी
यणादिप्रतीक्षाया: श्रुतत्वाच्चोत्तरायणादिप्रतीक्षातदातस्मिन्नरिष्टसूचितेकालेचन समाहितोमृत्यु सदाविधा
॥२२२॥ रकेणप्रयत्नेनप्राणान्धारयेत तदुक्तं ब्रह्मपुराणे अथास्पनेष्टंमरणंस्थातुमिच्छेदिमांक्रियां सर्वगंधानूरसाश्चै
वधारयेत्सुसमाहितः तथामृत्युमुपादायतत्परेणांतरात्मना आधायधारणांचैवविदित्वामनुजर्षभ जयेतमृत्युंयो
गेनयोगिनातत्परात्मना क्रियांअवस्थांसर्वगंधानिति सर्वकामः सर्वगंध: सर्वरसइत्यादिश्रुत्युक्तामात्मभावना
रूपांधारणामभ्यसेदित्यर्थः यद्वासर्वगंधान्विषायान्धारयेतइंद्रियद्वारामनस्युपसंहरेत मृत्युंशरीरं मृत्यु
पदस्यशरीरपरत्वेनसनत्सुजातीयशांकरभाष्यात मृत्युंजयेतमरणंप्रतिबध्नीत योगिनायोगश्चित्तवृत्ति
निरोधस्तद्वता तत्परात्मनाआत्मपरेणांतःकरणेनाएवंज्ञानिनोप्ययोगार्थंशरीरंधारयप्राणस्ययोगेनस्थितिरेवाप
यित्वेतिन्यायेनप्रारब्धक्षयेदेहपातसमकालमेवानंदावाप्तिरूपमुक्तिप्राप्तिर्भवतिनतुगत्युत्क्रांतीउपरागस्यतुयो
गिनोस्तिगत्यादीतिवक्ष्यते अथयोगिनउपासकस्यप्राणोत्क्रमणं तत्रदेवलः दृष्टारिष्टोयतिश्रेष्ठोयोगीध्यानपरो ॥२२२॥
भवेत् त्यात्क्वाकलेवरंध्यानातत्परंपातिमहेश्वरं आसनपूर्विकांधारणामाहसएव त्यक्त्वाभयं विषादंचशुचिर्भू
त्वासमाहित प्राचीवायदिवोदीचींदिशंनिष्क्रम्यवैद्विजः प्रागुदक्प्रवणेदेशेसमेनिस्थावरेशुचौद्विजस्तेनैवि

धिनासोपदेशोधुतजवः शतमष्टशतंवापिधारणांमूर्ध्निधारयेत निस्थावरेद्वन्द्वादिरहितेतत्रासनंकृत्वेतिशेषःअ
तएवासनपूर्वकप्राणनिरोधउक्तः श्रीभागवते स्थिरंसुखंचासनमाश्रितोयतिर्यदाजिहासुरिममंगलोकंकौ
लेचदेशेचमनोनसज्जयेतप्राणंनियच्छेन्मनसाजितासुः प्राणोर्ध्वनयनप्रकार उक्तस्तत्रैव स्वपार्ष्णिनापीड्यगुदं
ततोनिलंस्थानेषुषट्सून्नमयेज्जितक्लमः नाभ्यांस्थितंहृद्यधिरोप्यतस्माद्उदानगत्योरसितंनयेन्मुनिः ततोनुसं
धायधियामनस्वीस्वतालुमूलंशनकैर्नयेत तस्माद्भ्रुवोरंतरमुन्नयेतनिरुद्धसप्तायतनोनपेक्षः स्थित्वासमुहूर्तार्द्ध
मकुंठदृष्टिरिति भ्रुवोर्मध्येमुहूर्तार्द्धंप्राणस्थापनप्रयोजनंपरमात्मानुसंधानमुक्तंभगवद्गीतायां कविंपुराणमनु
शासितारंमणोरणीयांसमनुस्मरेद्यः सर्वस्यधातारमचिंत्यरूपंमादित्यवर्णंतमसः परस्तात प्रयाणकालेमनसाच
लेनभक्त्यायुक्तोयोगबलेनचैव भ्रुवोर्मध्येप्राणमावेश्यसम्यक्सतंपरंपुरुषमुपैतिदिव्यं तथाअंतकालेचमामेवस्मर
न्मुक्त्वाकलेवरं तंतमेवैतिकौंतेयसदातद्भावभावितः तथासर्वद्वाराणिसंयम्यमनोहृदिनिरुध्यचमूर्ध्न्याधायात्म
नः प्राणमास्थितोयोगधारणां ओमित्येकाक्षरंब्रह्मव्याहरन्मामनुस्मरन्यः प्रयातित्यजन्देहंसयातिपरमांगतिं
अनन्यचेताः सततंयोमांस्मरतिनित्यशः तस्याहंसुलभः पार्थनित्ययुक्तस्ययोगिनः ततोब्रह्मरंध्रेणोत्क्रमणमुक्तंश्री
भागवते स्थित्वामुहूर्तार्द्धमकुंठदृष्टिर्निर्भिद्यमूर्द्धन्विसृजेत्परंगतः देवलोपि त्रिवेसाधारणामिसमुत्थाय स्थितो

Indira Gandhi National Centre for the Arts

॥मोक्ष१०॥ व्रजेत् त्यक्त्वोंकारमायो योगी अक्षरस्योद्धरी भवेत् एवं निर्वाणमाप्नोति योगी योगपरायणः एकांतात्यंतिकं सा-
॥२२३॥ ख्यं परं ब्रह्म सनातनं जन्ममृत्युजराव्याधिभयसंगविवर्जितं देवैर्मुनिगणैर्वापि दुर्गमं दुरतिक्रमं उपगच्छति तत्वज्ञो
योगी तन्मतमानसः भगवद्गीतायामपि अनन्यचेताः सततं यो मां स्मरति नित्यशः तस्याहं सुलभः पार्थ नित्ययुक्त-
स्य योगिनः मनुरपि नदीकूलं यथा वृक्षो वृक्षं वा शकुनिर्यथा तथा त्यजन्निमं देहं कृच्छ्राद् ग्राहाद्विमुच्यते प्रियेषु स्वेषु
सुकृतमप्रियेषु च दुष्कृतं विसृज्य ध्यानयोगेन ब्रह्माप्येति सनातनं ग्राहात् बंधकात् तद्गुणपापरूपात् तदेवोक्तं सुकृ-
तदुष्कृते विसृज्येति सुकृतदुष्कृते विधुनुते क्षीयंते चास्य कर्माणि तस्मिन् दृष्टे परावरे इति च श्रुतेः तदयं पूर्वोक्त
संग्रहः यस्त्वप्रतिबद्धापरोक्षब्रह्मज्ञानवान् स यावद्भोगं शरीरं धारयमाणो देहपातसमकालमेव मोक्षमाप्नोति ननु
प्राणोत्क्रमणगत्यादि यस्तु प्रतिबद्धापरोक्षज्ञानवानुपासकस्तस्य योगिनः क्रममुक्तिः स्तदर्थं ब्रह्मरंध्रेण प्राणो-
त्क्रमणं मर्चिरादिमार्गेण गमनं च इतरस्तु धूममार्गेण अथ योगिन उपासकस्यार्चिरादिमार्गेण गतिरुच्यते तत्र या-
ज्ञवल्क्यः अनंता रश्मयस्तस्य दीपवद्यः स्थितो हृदि सितासिताः कद्रुनीलाः कपिलाः पीतलोहिताः ऊर्ध्वमेकः स्थितस्ते- ।२२२।
षां यो भित्वा सूर्यमंडलं ब्रह्मलोकमतिक्रम्य तेन यांति परां गतिं तस्य हृदि प्रदीपवत् स्थितस्य जीवस्य रश्मयो ना-
ड्यः सितासितेत्यादिना सुखदुःखादिहेतुत्वात्तासां वैचित्र्यमुक्तं ऊर्ध्वमेक इति तेषां रश्मीनां मध्ये एको रश्मिः सुषुम्ना-

नाड्याख्यः रश्म्यनुसारीति न्यायात् अयमेतस्मात् शरीरादुत्क्रामति अथैतैरेव रश्मिभिरूर्ध्वमाक्रमत इति श्रुतेश्च र-
श्मिपदेनोर्ध्वगतनाडीविशेषोऽभिधीयते स च सूर्यमंडलं भित्वा ब्रह्मलोकं चातिक्रम्य स्थितः तेनायं जीवो निर्गच्छ-
न् परां ब्रह्माख्यां गतिं याति वक्ष्यमाणार्चिरादिमार्गेण श्रुतावपि शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिः-
सृतैका तयोर्ध्वमायन्नमृतत्वमेति विष्वगन्या उत्क्रमणे भवंति इयं च गतिर्विद्वदुपासकस्यैव न त्वविदुषः तदोग्रज्वल-
नं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकयेत्यधिकरणन्यायात्
तत्र हि स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आ-
त्मा निष्क्रामति चक्षुष्टो वा मूर्ध्नो वाऽन्येभ्यो वा शरीरदेशेभ्य इति श्रूयते तत्र संशयः इयं गतिः किं विद्वदुपासकस्या-
विदुषश्चाविशेषेण किं वा व्यवस्थयेति तत्रानियमप्राप्तावुच्यते हृदयं तस्य भगवतो ओकः तदग्रज्वलने समानेऽपि विद्वा-
न् शताधिकया नाड्या निर्गच्छति तत्प्रकाशितद्वारः तेन हृदयाग्रप्रद्योतनेन प्रकाशितं द्वारं यस्य स शताधिकयैव ग-
मने हेतु विद्यासामर्थ्यात् उपासनासामर्थ्यात् विद्याशेषत्वान्मूर्धन्यनाडीगतेः हार्दानुगृहीतः हृदयस्थितेनो-
पासितेन भगवतानुगृहीतः ते मूर्ध्न इति भगवदुपासकविद्विषयं चक्षुष्टोऽन्येभ्यो वा शरीरदेशेभ्य इत्यविद्व-
द्विषयमिति सिद्धं अत्र केचित् [illegible] ब्रह्मविद्यावतामपि मूर्धन्यनाड्योत्क्रांतिरर्चिरादिमार्गेण गमनमित्या-

...i National
Centre for the Arts

ङ्कः तेषामयमाशयः श्रुतौ तावत् विद्यावत्त्वेन परापरविद्यावतो मूर्द्धन्यनाडीगमनस्य श्रुतत्वात् याज्ञवल्क्येन ब्रह्म
आत्मैव विजिज्ञास्यः सर्वैरथैवमेवक्त इष्टव्यं स्तथ मंतव्यश्रोतव्यश्च द्विजातिभिः य एनमेवं विदंति ये चारण्यकमाश्रिताः
उपासते द्विजाः सत्यश्रद्धापरायणाः क्रमात्ते संभवंत्यर्चिरहरह्नः शुक्लं तथोत्तरमिति ज्ञानिनमुपासकं च पृथक्कृत्यार्चि
रादिमार्गाभिधानात् न च ब्रह्मज्ञानिनोऽथाकामयमानो योऽकामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उ
त्क्रामंतीति निषेधस्य श्रुतावव गमात्तन गत्युत्क्रांतीइति वाच्यं तस्येत्यनेन प्राधान्यान्निर्दिष्टे साधिकारिणः शारीरस्या
त्मनः परामर्शात् शारीरस्यात्मनः प्राणा नोत्क्रामंति किं तु तेन सहैव गच्छंतीत्यर्थः न तस्मात्प्राणा उत्क्रामंतीति
शाखांतरेऽपादानपंचम्याः श्रुतत्वात् संबंधसामान्यवाचिन्या अपि षष्ठ्यास्तत्परत्वावसायात् यद्वा पुनरुत्पत्त
य इति वाक्यशेषः तथा च पुनरुत्पत्तये प्राणा नोत्क्रामंति किं तु अर्चिरादिमार्गेण पुनरावृत्त्यै उत्क्रामंतीत्यर्थः यद्वा
प्राणाः स्वतंत्राः संतो देहिनं परित्यज्य नोत्क्रामति किं तु स आत्मा स्वतंत्रः प्राणैः सहोत्क्रामतीत्यर्थः नन्वेव मत्रैव समव
लीयंत इति वाक्यशेषोऽनुपपन्नः स्यादिति वाच्यं तत्राप्यत्रेत्यनेन इहैव जन्मनि न तु जन्मांतर इति व्याख्येयं तस्मा ॥२२४॥
दस्ति ब्रह्मज्ञानिनो—त्क्रमणादीति नैतत्साधीयः सर्वभूतात्मभूतस्य सम्यक् भूतानि पश्यतः देवा अपि मार्गे मु
ह्यंत्यपदस्य पदैषिण इति महाभारतवचनेन मोक्षस्य नैव किंचित्स्यात् तदन्यत्र गमनं क्वचित् स्यान्नैवाधामपरं

यत्र गच्छंति योगिनः अज्ञानबंधभेदस्तु मोक्षो ब्रह्मलयस्त्विति ब्रह्मपुराणवचनेन च अत्रैव ब्रह्म समश्नुत इति
श्रुतेश्च परब्रह्मविद उत्क्रांत्याद्यभावस्य प्रतीतेः यदपि तस्येत्यत्र प्राधान्याद्देहिन अपादानत्वमिति तदपि न शा
खांतरे श्रोत्रादिभ्यो देहस्यैवापादानत्वप्रतीतेः तथा हि यत्रायं पुरुषो म्रियत उद् अस्मात् प्राणाः क्रामंत्याहो ने
तीत्यार्त्तभागप्रश्ने । नेति होवाच याज्ञवल्क्यः तर्हि कथं मृत इत्याशंक्यात्रैव समवलीयंते स उच्छ्वयत्याध्माय
त्याध्मातो मृतः शेत इति देहस्यैव प्रकृतत्वात् तस्येत्यनेनापि देहग्रहणमेव युक्तं तस्मादिति पाठेऽपि चैवं तस्माद्दे
हाद्देवोत्क्रांतिः प्राणानां प्रतिषिद्धा एवं चोत्क्रांतिप्रकरणमिति चेत् अकामयमान इत्युपसंहृत्याथाकामयमानो न तस्य प्र
ाणा उत्क्रामंतीति वैलक्षण्यनिर्देशोऽपि संगच्छते अन्यथोत्क्रांतिसाम्ये वैलक्षण्येनोपक्रमोऽसंगतः स्यात् तेन ना
ध्यात्मादिदोषप्रसंगोऽपि अत्रैवेत्यत्रापि प्रकृतदेहग्रहणेनैवोपपत्तौ नाप्रकृतजन्मग्रहणं युक्तं याज्ञवल्क्य
वचनव्याख्या त्वेवं सर्वैराश्रमैः स आत्मा विजिज्ञास्यः विचार्यः द्रष्टव्यः अपरोक्षीकर्त्तव्यः तत्साधनमाह श्रोतव्यो
मंतव्यश्चेति वेदांतवाक्यविचारात्मकश्रवणेन युक्तिभिरनुचिंतनात्मकमनननिदिध्यासनद्वारा आत्मापरोक्षी
भवतीत्यर्थः तावतैते कृतार्थाः ब्रह्मसाक्षात्कारमात्रस्यैवाज्ञाननाशकत्वात् ये चारण्यकमाश्रिता इति च स्त्वर्थे
तथा च ये त्वारण्यकं निर्जनप्रदेशं उपनिषत्प्रोक्तोपासनाप्रकारं वा आश्रिताः संत एनं सत्यमुपासते ते क्रमादर्चिरहः

Indira Gandhi National Centre for the Arts

॥गीताभा८॥ शुक्ल इत्यादि संभवतीत्यर्थः ननु ब्रह्मविदोपि शुक्लकस्य शुक्लकस्तु मारुतान्नीर्यां गतिं कृत्वांतरिक्षगः दर्शयित्वा स्व
त्मानं स्वं सर्वभूतगतो भवदिति महाभारते गतिश्रवणमसमंजसं स्यादिति चेत् न सशरीरस्यैव योगबलादियं गतिः
॥२२५॥ न तु परमगतिः अन्यथा दर्शयित्वेत्यनुपपन्नं स्यात् देहोत्सर्गे तु सर्वभूतगतो भवदिति न गत्यादि श्रूयते तस्माद्
ब्रह्मविदो गत्युत्क्रान्त्यादीति सिद्धं चैतदुत्तरमीमांसायां प्रतिषेधादिति चेन्न शारीरादिति पूर्वपक्षाभिधानोत्तरं स्पष्टो
ह्येकेषामिति सिद्धान्तसूत्रे एवं मूर्धन्यनाड्योत्क्रान्तस्य योगिन उपासकस्य गमनमार्गो नावृत्तिफलक उक्तो भगव
द्गीतायां यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ अग्निर्ज्योतिरहः शु
क्लः षण्मासा उत्तरायणं तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः कालेकालाभिमानिदेवतोपलक्षिते मार्गे यो
गिनः उपासकाः कर्मिणश्च येन मार्गेण प्रयाताः सन्तोऽनावृत्तिमावृत्तिं च यान्ति तं कालं मार्गं वक्ष्यामीत्यन्वयः तत्रा
नावृत्तिफलकमर्चिरादिमार्गमाह अग्निर्ज्योतिरित्यादिना न चार्चिरादिमार्गेण विगतानां पञ्चाग्निविद्याद्युपास
कानां भोगान्ते आवृत्तिश्रवणात् कथमेतस्यानावृत्तिफलकत्वमिति वाच्यं भूम्नादहराद्युपासकानामनावृत्तिश्र ॥२२५॥
वणात् धूमादिमार्गे तु न कस्यापीति वैलक्षण्योक्तिः अग्निर्ज्योतिरित्यादयश्चातिवाहिकास्तल्लिङ्गादिति न्यायेना
र्च्याद्यभिमानिन्यो ह्यातिवाहिक्यो देवताः भक्तमार्गविज्ञानविज्ञानेश्वरोक्तप्रकारेण भोगभूमयो वा तत्पुरुषोऽमान

वः स एतान् ब्रह्म गमयतीति श्रुत्यार्चिरादिविद्युत्पर्यन्तमानवपुरुषेण प्रापणं ततो मानवद् इति वैलक्षण्येनाभिधाना
त् स्वं पिण्डितकरणस्य स्वतो गमनानुपपत्तेः अग्निर्ज्योतिरित्यर्चिरभिमानिनी देवतोच्यते न तु देवताद्वयं क्रमात्ते सं
भवात् अर्चिरहः शुक्लं तथोत्तरमिति याज्ञवल्क्ये न तेऽर्चिषमभिसंभवन्ति अर्चिषोऽहरिति श्रुतौ चाहः पूर्वमर्चिष एवाभिधाना
त् न त्वहः शुक्लः षण्मासा उत्तरायणमिति शब्दानां कालविशेषे रूढत्वात् तदभिमानिदेवतापरत्वे अत एव ब्रह्मपुराणे
आपन्नतद्धरां काष्ठां सूर्ये यो निधनं व्रजेत् नक्षत्रे च मुहूर्ते च पुण्ये राजन् स पुण्यभागिति भीष्मस्योत्तरायणप्रतीक्षायाः
प्रसिद्धत्वात् यान् षडुदङ्ङेति मासांस्तानिति च श्रुतेः कालपरत्वमेवयुक्तमिति चेत् न तथा सति रात्रौ कृष्णपक्षे दक्षि
णायने च मृतस्य विद्यावतोऽर्चिरादिमार्गेण गमनाभावे विद्यानर्थक्यप्रसंगात् ब्रह्मपुराणीयवचश्च कर्मिणामुत्तराय
णमरणं प्रयागमरणादिवत् पुण्यलोकप्रापकमिति तात्पर्यकं भीष्मस्याप्युत्तरायणप्रतीक्षायाः उत्तरायणमरणं प्र
शस्ततरमिति सदाचारपरिपालनार्थं स्वाधीनमृत्युताप्रकाशनार्थं च श्रुतिश्चोत्तरायणदेवताप्राप्त्यर्थमिति व्याख्ये
या निशि नेति चेन्न संबंधस्य यावद्देहभावित्वाद्दर्शयति च अतश्चायनेऽपि दक्षिण इति न्यायाभ्यां तस्मादहः शुक्लः ष
ण्मासा उत्तरायणमिति शब्दानां कालविशेषवाचकानामपि तदभिमानिदेवतापरत्वमेव युक्तं उत्तरायणोत्तरं संवत्सरो
पि बोद्धव्यः ते अर्चिषमभिसंभवन्ति अर्चिषोऽहः अह्न आपूर्यमाणपक्षं आपूर्यमाणपक्षाद्यान् षडुदङ्ङेति मासांस्तान् मासेभ्यः

Indira Gandhi National
Centre for the Arts

मो०द्व१०॥
॥२२६॥

संवत्सरमितिश्रुतेः तदनंतरंदेवलोकः क्रमात्तेसंभवत्यर्चिरहःपक्षंतथोत्तरं अयनंदेवलोकंचसवितारंसवैद्युतमि
तियाज्ञवल्क्योक्तेः देवलोकानंतरं सवितुश्चपूर्वंवायुलोकोविबोद्धव्यः यदावैपुरुषोस्माल्लोकात्प्रैतिसवायुमागच्छ
तिसतत्रविजिहीतेयथारथचक्रस्यखंतेनसऊर्ध्वमाक्रमतेसआदित्यमागच्छतीतिश्रुतेः वायुमब्दादविशेषविशे
षाभ्यामितिन्यायाच्चनचाब्दादितिसंवत्सरोत्तरमेववायुःस्यान्नदेवलोकादितिवाच्यं मासेभ्योदेवलोकमितिश्रु
त्यामासोपलक्षितसंवत्सरानंतरंदेवलोकाभिधानात अब्दादितिअब्दोत्तरदेवलोकात्परतोवायुमितिसूत्रार्थः
सवितुरनंतरंविद्युतश्चपूर्वंचंद्रमाः आदित्याच्चंद्रमसंचंद्रमसोविद्युतमितिश्रुतेः विद्युतोनंतरंवरुणेंद्रप्रजाप
तयः सवायुलोकंसवरुणलोकंसइंद्रलोकंसप्रजापतिलोकमितिकौषीतकिश्रुतेः नचात्रवायुलोकोत्तरंवरुण
लोकाभिधानातकथंविद्युदानंतर्यमितिवाच्यं विद्युत्संबंधिजलाधिपत्याद्वरुणस्यविद्युदानंतर्यं तडितोधिवरुणः
संबंधादितिन्यायात वैद्युतात्त्वमानवः पुरुषस्तान्ब्रह्मलोकंनयति ततस्तान्पुरुषोभ्येत्यमानसोब्रह्मलोकिका
न्करोतिपुनरावृत्तिस्तेषामिहनविद्यतइतियाज्ञवल्क्योक्तेः वैद्युतेनैवततस्तच्छ्रुतेरितिन्यायाच्च मानसोमानवः ॥२२६॥
तत्पुरुषोमानवः सएनान्ब्रह्मगमयतीतिश्रुतेः ब्रह्मलोकिकान्ब्रह्मलोकनिष्ठान्करोतितेषांपुनरावृत्तिर्नवि
द्यतइतिसंबंधः तदेतेनप्रतिपद्यमानाइमंमानवमावर्तंनावर्ततइतिश्रुतेः तत्रप्रयाताः ब्रह्मब्रह्मलोकंकार्यंका

बादरिरस्यगत्युपपत्तेरितिन्यायात ब्रह्मविदः सगुणब्रह्मोपासकाः नचकार्यब्रह्मलोकप्राप्तौअपुनरावृत्त्यभिधा
नानुपपत्तिः आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोर्जुनेतिभगवदुक्तेरितिवाच्यं उपासकस्यब्रह्मलोकप्राप्त्यनंत
रंपरब्रह्मप्राप्तेरपुनरावृत्तिसंभवः ब्रह्मणासहतेसर्वेसंप्राप्तेप्रतिसंचरे परस्यांतेकृतात्मानःप्रविशंतिपरंब्रह्माधिगच्छ
तीतिस्मृतेःकार्यात्ययेतदध्यक्षेणसहातःपरमभिधानादितिन्यायाच्च ब्रह्मलोकगतस्यतुअपुनरावृत्त्यभिधानंक
र्मिणांगमनविषयं कर्मिणांतुपुनरावृत्तिफलकोधूमादिमार्गः यज्ञेनतपसादानैर्येहिस्वर्गजितोनराः धूमंनिशा
मितियाज्ञवल्क्योक्तेः तेषांचभूतैरिंद्रियैःप्राणैःसंपरिष्वक्तानांधूमादिमार्गेणगमनं पंचम्यामाहुतावापःपुरुषवचसो
भवंतीतिश्रुतेःतमनूत्क्रामंतंप्राणोनूत्क्रामतिप्राणमनूत्क्रामंतंसर्वेप्राणाअनूत्क्रामंतीतिश्रुतेश्चतदंतरप्रतिपत्तौरंह
तिसंपरिष्वक्तः प्रश्ननिरूपणाभ्यामितिन्यायात धूमादिमार्गश्चोक्तोभगवद्गीतायां धूमोरात्रिस्तथाकृष्णःषण्मासाद
क्षिणायनंतत्रचांद्रमसंज्योतिर्योगीप्राप्यनिवर्तते अत्रापिधूमादिशब्दानांपूर्वोक्तन्यायेनतदभिमानिदेवतापरत्वंद
क्षिणायनोत्तरंचंद्रमसःपूर्वंसंवत्सरपितृलोकाकाशाअपिबोद्धव्याः धूमंनिशांकृष्णपक्षंदक्षिणायनमेवचपितृलो
कंचंद्रमसमितियाज्ञवल्क्योक्तः तेधूममभिसंभवंतिधूमाद्रात्रिंरात्रेरपरपक्षमपरपक्षाद्यान्षड्दक्षिणेतिमासान्
तान्नैतेसंवत्सरमभिप्राप्नुवंतिमासेभ्यःपितृलोकंपितृलोकादाकाशमाकाशाच्चंद्रमसमितिश्रुतेश्च चंद्रलोकेचक

Indira Gandhi National
Centre for the Arts

र्मफलभोगः तदुक्तं श्रुतौ एष सोमो राजा तद्देवानामन्नं तं देवा भक्षयंति तस्मिन् यावत्संपातमुषित्वेति स सोमलो
के विभूतिमनुभूय पुनरावर्त्तत इति श्रुतेः स्वर्ग्यो गी कर्मयोगान्निवर्त्तत इहेति शेषः निवर्त्तनप्रकारश्चोक्तो याज्ञव
ल्क्येन पितृलोकं चंद्रमसं भुक्त्वा वृष्टिं जलं महीं क्रमात् संभवंतीह पुनरेव व्रजंतीति चंद्रलोके यावत्संपातं कर्मभो
गं कृत्वा ततोऽवपादि सामर्थ्यं प्राप्य इह संभवंतीत्यर्थः अत्रापि वायोः पूर्वमाकाशः वायोरनंतरं वक्ष्यमाणो अप्येतमेवा
ध्वानं पुनर्निवर्त्तते यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वाभ्रं भवति अभ्रं भूत्वा मेघो भवति
मेघो भूत्वा प्रवर्षतीति श्रुतेः अत्र वाकाशादिसादृश्यं सूक्ष्मशरीरवत्त्वेन न तु आकाशादिभावः साभाव्यापत्ति
रुपपत्तेरिति न्यायात् मद्यावनंतरं व्रीह्यादिभावः त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायं
त इति श्रुतेर्व्रीह्यादिभावोऽपि तत्संसर्गमात्रं न तत्तानि भोगायतनानि आकाशादिवत्संश्लेषमात्रस्यैव श्रुतत्वा
त् अन्याधिष्ठितेः पूर्ववदभिलापादिति न्यायात् अन्ये हि तत्र जीवाः स्थावरशरीरेषु भोगार्थमधिष्ठिताः तत्राव
रोहमाणानामधिष्ठानासंभवात् व्रीह्यनंतरं च रक्तभावः आकृत्याप्यायते सूर्यः सूर्याद्वृष्टिरथौषधीः तदन्नं र ।२२९।
सरूपेण रक्तत्वमधिगच्छतीति याज्ञवल्क्योक्तेः अग्नौ प्रक्षिप्तया सोमरसाल्पाप्याकृत्या सूर्य आप्यायते तत्प
रिणामो वृष्टिः ओषधीरन्नं भवति तदन्नं स्त्रीपुंसाभ्यां सेवितं रक्तं भवति यदुक्तं मनः अग्नौ प्रास्ताहुतिः सम्यगा

दित्यमुपतिष्ठति आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इति अन्नस्य प्रजाहेतुत्वमुक्तं तद्भुक्तद्वारा यो य
श्नाति यो रेतः सिंचति तद्भूय एव भवतीति श्रुतेः कपूयचरणाः कपूयां योनिमापद्यंत इति च रेतः सिग्योगोऽथ योनेः
शरीरमिति न्यायाभ्यां एतमेवावरोहक्रममभिप्रेत्य श्रुतौ द्युपर्जन्यपुरुषयोषिद्भ्यः पंचाग्निभ्यः प्रेत्य श्रद्धा सोमवृष्टि
रन्नरेतोरूपा आहुतीर्दर्शयित्वा इति तु पंचम्यामाहुतावापः पुरुषवचसो भवंतीति श्रूयते इदं च पुनरावृत्तिफलकं
धूममार्गेण गमनं मूर्द्धन्यनाड्यतिरिक्तनाड्यतिरिक्तनाडीभिरुत्क्रांतस्य तदुक्तं याज्ञवल्क्येन यदस्यान्यद्विभिन्ना
तमूर्ध्वमेव व्यवस्थितं तेन देवशरीराणि सधामानि प्रपद्यते अन्यत्र शताधिकमूर्द्धन्यनाडीतो भिन्नं देवशरीराणि
स्वरवैकभोगाधिकरणानि सधामानि सविमानानि नाडीविशेषेणोत्क्रांतस्य गतिविशेषश्चोक्तो महाभारते तथै
वोत्क्रममाणं तु शृणुष्वावहितो नृप पद्भ्यामुत्क्रममाणस्य वैष्णवं स्थानमुच्यते वसून्देवांस्तु जंघाभ्यामाप्नुयाददिति
नः स्तुतं जानुभ्यां तु महाभाग देवान्साध्यानवाप्नुयात् पायुनोत्क्रममाणस्तु मैत्रं स्थानमवाप्नुयात् पृथिवीं
जघनेनाथ ऊरुभ्यां च प्रजापतिं पार्श्वाभ्यां मरुतो देवान् हस्ताभ्यामिंद्रमेव च बाहुभ्यामिंद्रमित्याहुरुरसा रु
द्रमेव च ग्रीवायां च ऋषिश्रेष्ठ नरमाप्नोत्यनुत्तमं विश्वान्देवान्मुखेनाथ दिशः श्रोत्रेण चाप्नुयात् घ्राणेन गंध
वहं नेत्राभ्यां सूर्यमेव च भ्रूभ्यां चैवाश्विनौ देवौ ललाटे पितृंस्तथा ब्रह्माणमाप्नोति विभुं मूर्द्ध्ना देवाग्रजं तथा

Indira Gandhi National Centre for the Arts

॥मोक्ष१०॥
॥२२८॥

एतान्युत्क्रमणस्थानान्युक्तानि मिथिलेश्वर वैष्णवं स्थानं पादाधिष्ठाता विष्णुरादित्यविज्ञेयः तदीयं लोकविज्ञेयं
नतु वैकुंठं तत्रगतानां वैकुंठोक्तमुक्तिश्रवणात् मैत्रं पायुधिष्ठातामित्रस्तदीयं स्थानमित्यर्थः पृथिवीं पृथिव्य
धिष्ठातृदेवतालोकं प्राजापत्यं प्रजापते— दक्षादयस्तल्लोकं एवं तत्र— केषुभोगानुत्क्रान्तरोहणरीत्यावरुह्य स्व
—र्मानुसारिदेहं प्र—वंति रमणीयचरणा ब्राह्मणादियोनिमापद्यंते कपूयचरणाश्वादियोनिमिति श्रुतेः चरणश
ब्दोनुशयपर्यायः चरणशब्देन च सुकृतदुष्कृते एवेति काबादरिरिति न्यायेन पुण्यपापे बोद्धव्ये तत्र चंद्रलोके
भुक्तफलस्यैव कर्मणः शेषोनुशय इति केचित् तत्र स्वर्गभोग्यफलस्य ज्योतिष्टोमादिकर्मण ऐहिकभोगज
नकत्वासंभवात् किंच एवं सति आमुष्मिकभुक्तफलस्य स्वकृतस्यैव शेषेण रमणीययोनिप्राप्तिरेव स्यात् न
कपूययोनेः तस्मादामुष्मिकफले कर्मणि उपभुक्ते संचितमैहिकफलं कर्मांतरमनुशयपदवाच्यं तद्वंतो वरोहंती
त्यत्र न वंतो न्यायकृतः ननु भोजकादृष्टेष्वपि सर्वस्यैव कर्मणः फलोन्मुखत्वात् संचितं नाम नास्त्येवोक्तं न विक
वादाभ्युपगमादिति चेत् कदाचित्सुकृतं कर्म कूटस्थमिव तिष्ठति मज्जमानस्य संसारे यावद्दुःखाद्विमुच्यत इ ।२२८।
ति स्मृत्या तन्निराकरणात् कृतात्ययेनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं चेत्यधिकरणन्यायाच्च विरतीचेत
त्परिशेषप्रकरणे येषां तु नोपासनं न च इष्टापूर्त्तादि तेषां तृतीयः पंथाः संयमिनीरूपः अधीनाद्यात्क्रमणं च

तदुक्तं याज्ञवल्क्येन येनैकरूपाश्चाधस्तादूर्ध्वयोस्पमदुपन्नाः इह कर्मोपभोगाय तैः संसरति सोव्रतः एतद्यो न
विजानाति मार्गद्वितयमात्मवान् दंदशूकः पतंगो वा भवेत्कीटोथवा कृमिः अवशः स्वकृतकर्मपरतंत्रः एतन्मा
र्गद्वयं यो न विजानाति तदुपायभूतमुपासनकर्मानुष्ठानं च न करोति तस्य तृतीया गतिर्भवति दंदशूकः सर्पः श्रु
तावपि चेत्थमयासौ लोको न संपूर्यत इति प्रश्नस्योत्तरं यथैतयोः पथोर्न कतरेण च तानीमानि क्षुद्राण्यसकृदाव
र्त्तीनि भूतानि जायस्व म्रियस्वेत्येतत्तृतीयं स्थानमिति संयमने त्वनुभूयेतरेषां रोहावरोहौ तद्गतिदर्शनादिति
न्यायाच्च संयमिनीमार्गेण गत्वा तत्र यातना अनुभूय पुनरत्र श्वादियोनिमापद्यते कपूयचरणाः कपूयां यो
निमापद्यत इति श्रुतेः एतन्मार्गत्रितयज्ञानेन विवेके सति काम्यनिषिद्धकर्मत्यागे सति कैवल्ययोगपरेण भवित
व्यमित्युक्तं गीतायां शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते एकया यात्यनावृत्तिमन्यया वर्त्तते पुनः नैते सृ
ती पार्थ जानन् योगी मुह्यति कश्चन तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन शुक्लार्चिरादिगतिः ज्ञानप्रकाश
मयत्वात् कृष्णा धूमादिगतिः ज्ञानहीनत्वेन तमोमयत्वात् एकया शुक्लया नावृत्तिं याति अन्यया कृष्णया पुन
रावर्त्तते एते सृती शुक्लकृष्णे इति गतिप्रकरणं ॥

Indira Gandhi National
Centre for the Arts

मोक्ष१०॥

॥२२८॥

७३/२३५

५८

SARASVATI-BHAVANA
BENARES
GOVT. SANSKRIT LIBRARY

॥२२८॥

Indira Gandhi National
Centre for the Arts